1 रोष anger 2 सरोषम् angrily 3 भो a voc Particle hello! 4 ननु certainly, indeed 5 निर्विण्ण despondent, depressed 6 एतावत a (acc s m एतावन्तम्) this much, so much 7 काल time 8 एतयो = पितु: मातु च 9 जीवत् alive 10 मृत (gen d m मृतयो) dead, died, P P √ मृ 6 A 11 कृते ind + gen) on account of, for the sake of 12 ईदृश a such as this, of this kind 13 वनवास forest dwelling, forest-life 14 दुःखम् pain, misery 15 वनवासदुःखम् = वनवासस्य, वनवास जनित वा दुःखम् 16 अनुभवत् (nom s m अनुभवन्) tasting experiencing, Pres Part अनु + √ भू 1 P 17 तत् therefore 18 प्रसीद be thou pleased! लोट् प्र + √ सद् 1 P 19 निर्बन्ध (abl s निर्बन्धात्) persistence, insisting upon 20 गुरुचरणशुश्रूषा निर्बन्धात् = गुरुचरणशुश्रूषाया य निबध तस्मात् 21 निवृत्य having turned away; gerund, नि + √ वृत् 1 A, नि + √ वृ 1 5 9 U 22 इच्छा f will, desire 23 परिभोग enjoyment 24 रमणीय pleasant 25 इच्छापरिभोगरमणीयम् = इच्छया परिभोग तेन रमणीयम् 26 राज्यम् kingship, kingdom 27 सुखम् happiness 28 अनुभूयताम् it must be enjoyed, कमणि लोट् अनु + √ भू 1 P 29 अभिहित told, P P अभि + √ धा 3 U

Jester— (angrily) Ho friend! Have you not surely grown despondent, all this time suffering from the pain of such a forest-dwelling life as this on account of the two people, viz, your parents who are almost dead, though alive? Therefore, be pleased now. Turning away from your insisting upon serving your parents, do enjoy the happiness of your kingship that is so pleasing as it gives you enjoyment to your satisfaction!

Hero— My friend, you have not spoken rightly For

तिष्ठन् भाति पितुः पुरो भुवि यथा सिंहासने किं तथा
यत् संवाहयतः सुखं तु चरणौ तातस्य किं राजके ।
किं भुक्ते भुवनत्रये धृतिरसौ भुक्तोज्झिते या गुरोः
आयासः खलु राज्यमुज्झितगुरोस्तत्रास्ति कश्चिद्गुणः ॥७॥

विदूषकः—(आत्मगतम्) अहो, अस्यगुरुजनशुश्रूषानुरागः। (विचिन्त्य) भवतु। तदेतदपि तावदन्यदिव भणिष्यामि।

1 तिष्ठत (nom s. m तिष्ठन्) standing; Pres. part √ स्था 1P 2 भाति he shines; √ भा 2P. 3 पुरस् before, in front of 4 भू f (loc S भुवि) earth, ground. 5 यथा—तथा as—so. 6 यत connects सुखम as a relative pronoun. 7 सवाहयत (gen, s. m सवाहयत) shampooing, rubbing; Caus Pres. Part सम + √वह 1P. 8 तु but. 9 राजक King, royalty. 10 भुक्त n. food; pp. enjoyed, eaten; √ भुज 7U 11 भुवनत्रये भुक्ते (loc. abs) when the three worlds are enjoyed 12 असौ धृति. f, that satisfaction 13 उज्झित left over, pp √ उज्झ 6p 14 या connects धृति as its rel. Pron. 15 भुक्तोज्झिते = भुक्तत् उज्झितं तस्मिन 16 आयास. trouble, pain. 17 खलु indeed 18 उज्झितगुरो = उज्झितो गुरु येन तस्य. 19 तत्र there. 20 अस्ति there is, लट् √अस् 2 p. 21 कश्चित् गुण any merit, whatsoever. 22 आत्मगतम् to oneself. 23 अस्य=नायकस्य. 24 अनुराग passion, love. 25 भवतु now, well. 26 भणिष्यामि 2 will speak; लृट् √ भण् 1p.

पितुः पुरः भुवि तिष्ठन् (पुत्र) यथा भाति तथा सिंहासने किं, तातस्य चरणौ सवाहयत (तस्य) यत् सुख (तत्) तु राजके किं, गुरो भुक्तोज्झिते या असौ धृति भुवनत्रये भुक्ते किं, उज्झितगुरो. राज्य खलु आयास तत्र कश्चित् गुण. अस्ति ॥ शार्दूलविक्रीडितम् ।

> Does a son shine so much on a throne as he does when standing on the ground in front of his father ? Is there the same happiness in his kingship as is felt on shampooing the feet of his father ? Does he feel that satisfaction in enjoying the triple worlds that he feels in partaking of what is left over by his parent after eating ? Kingship is indeed a trouble for him who has abandoned his parents : is there any virtue in it ?

Jester—(to himself) How great his passion to serve his parents is ! (Reflecting) Well, then I will speak like this.

(प्रकाशम्) भो वयस्य, न खल्वहं राज्यसुखमेव केवलमुद्दिश्य एवं भणामि। अन्यदपि ते करणीयमस्त्येव।

नायकः—(सस्मितम्) वयस्य, ननु कृतमेव यत्करणीयम्। पश्य।

न्याय्ये वर्त्मनि योजिताः प्रकृतयः सन्तः सुखं स्थापिताः
नीतो बन्धुजनस्तथात्मसमतां राज्ये च रक्षा कृता।
दत्तो दत्तमनोरथाधिकफलः कल्पद्रुमोऽप्यर्थिने
किं कर्तव्यमतः परं कथय वा यत्ते स्थितं चेतसि ॥ ८ ॥

1 केवलम् only 2 उद्दिश्य (+ acc) with reference to, about 3 अन्यत् other, another 4 ते = तव thy 5 न्याय्य right, just, proper 6 वर्त्मन् n (loc s वर्त्मनि) path 7 योजित yoked, placed, caus pp √ युज 7u 8 प्रकृति f (nom p प्रकृतयः) subject 9 सत् a (nom p m सन्तः) good 10 स्थापित placed fixed, caus pp √ स्था 1p 11 नीत led, pp √ नी 1u 12 आत्मसमता = मम समता my equality 13 रक्षा f protection security 14 दत्त given, pp √ दा 3U 15 मनोरथ wish 16 अधिक more 17 फलम् fruit 18 दत्तमनोरथाधिकफल = दत्त मनोरथात् अधिकं फलम् यन सः 19 कल्पद्रुम wish-yielding tree 20 अर्थिन् a (dat s अर्थिने) needy 21 कर्तव्य = करणीय (ought) to be done, pot pp √ कृ 8U 22 अतः परम् beyond this 23 कथय tell thou! लोट् √ कथ् 10U 24 स्थित standing 25 चेतस् n (loc s चेतसि) mind

प्रकृतयः न्याय्ये वर्त्मनि योजिताः सन्तः सुखं स्थापिताः तथा बन्धुजनः आत्मसमतां नीतः राज्ये च रक्षा कृता दत्तमनोरथाधिकफलः कल्पद्रुमः अपि अर्थिने दत्तः अतः परं किं कर्तव्यं वा यत् ते चेतसि स्थितं कथय ॥ शार्दूलविक्रीडितम्

(Aloud) O friend! I do not, indeed, speak in this way only with respect to the happiness of kingship There is also something else you ought to do

Hero— (smiling) Friend, certainly I have done what has to be done Behold! My subjects have been set upon the righteous path, the good have been yoked onto happiness, also my relatives have been brought to the same status as mine, and security has been guaranteed in the kingdom, and even the wish yielding tree that yields more fruits than wished for has been given to the needy Tell me what more is to be done, or what is in your mind!

विदूषकः— भो वयस्य, अत्यन्तसाहसिको मतङ्गहतकस्ते प्रतिपक्षः। तस्मिंश्च समासन्नस्थिते ते प्रधानामात्यसमधिष्ठितमपि न त्वया विना राज्यं सुस्थिरमिति प्रतिभाति ।

नायकः— धिङ् मूर्ख, मतङ्गो राज्यं हरिष्यतीति शङ्कसे ।

विदूषकः— अथ किम् ।

नायकः— यद्येवं तत्किं न स्यात्। ननु स्वशरीरात् प्रभृति सर्वं परार्थमेव मया परिपाल्यते। यत्तु स्वयं न दीयते तत् तातानुरोधात्। तत्किमनेनावस्तुना चिन्तितेन ।

1 अत्यन्त excessive, extreme 2 साहसिक brutal, violent 3 हतक (समासान्ते) vile, wretched 4 प्रतिपक्ष adversary, enemy 5 समासन्न = समीप near, imminent 6 तस्मिन् समासन्नस्थिते (loc. abs.) he being near, while he is near 7 प्रधान chief, principal 8 अमात्य minister 9 समधिष्ठित administered, entrusted, P P सम्-अधि + √ स्था 1 P 10 प्रधानामात्यसमधिष्ठितम् = प्रधानामात्येन समधिष्ठितम् 11 विना Prep. (+ acc & ins) without 12 सुस्थिर firm in fine condition 13 प्रतिभाति it appears, प्रति + √ भा 2 P 14 धिक् ind fie! 15 मूर्ख idiot 16 हरिष्यति he will plunder, लृट् √ हृ 1 U 17 शङ्कसे thou fearest, √ शङ्क् 1 A 18 अथ किम् exactly so 19 स्वशरीरम् (abl —रात्) one's own body 20 प्रभृति ind (+ abl) from, since, beginning with 21 परार्थम् = परेषाम् अर्थम् for others' sake 22 परिपाल्यते it is guarded, preserved; कर्मणि लट् परि + √ पाल् 10 P 23 स्वयम् ind in person, oneself 24 दीयते it is given; √ दा 3 U 25 तातानुरोधात् out of regards for father 26 किम् (+ ins) what is the use of? 27 अवस्तु n meaningless thing

Jester—Ho my friend, wretched Matanga who is extremely brutal is your adversary And while he is near, our kingdom, though it is administered by your prime minister, does not appear safe without you

Hero—Fie! idiot! do you fear that Matanga will plunder the kingdom?

Jester—Exactly so

Hero—If so, what then? Everything including my own body is certainly preserved by me for others However, that I do not give up myself is out of regards for my father So what is the use of considering such a meaningless thing as this?

वरं ताताज्ञैवानुष्ठिता । आज्ञापितश्चास्मि तातेन यथा 'वत्स, जीमूतवाहन, बहुदिवसपरिभोगेण दूरीकृत-समित्कुशकुसुममुपभुक्तमूलकन्दनीवारप्रायमिदं स्थानं वर्तते । तदितो मलयपर्वतं गत्वा किञ्चित् तस्मिन्नि-वासयोग्यमाश्रमपदं निरूपय' इति । तदेहि मलय-पर्वतमेव गच्छावः ।

विदूषकः— यद्भवानाज्ञापयति । एतु । (इत्युभौ परिक्रामतः)

1 वरम् it is better that 2 आज्ञा f command 3 अनुष्ठित perfotmed; P P अनु + √ स्था 1 P 4 आज्ञापित ordered, caus P P आ + √ ज्ञा 9 U 5 वत्स d child 6 बहु many, much 7 दिवस m n day 8 परिभोग (ins s परिभोगेण) consumption 9 बहुदिवसपरिभोगेण = बहून् दिवसान् परिभोगेण 10 दूरीकृत far-remov exhausted, P P दूरी + √ कृ 8 U 11 समिध f (समित्) fuel 12 कुश kind grass 13 कुसुमम् flower 14 दूरीकृतसमित्कुशकुसुमम् = दूरीकृता समित् च कुशा च कुसुमानि दूरीकृत समित्कुशकुसुम (समाहारसमास) यस्मिन् तत् 15 उपभुक्त enjoyed, eaten up; P उप + √ भुज् 7 U 16 मूलम् root. 17 कन्द m n bulbous root 18 नीवार w rice 19 प्राय (समासान्ते) mostly, almost 20 उपभुक्तमूलकन्दनीवारप्रायम् = उपभुक्ता च कन्दा च नीवार च प्रायेण यत्र तत् 21 स्थानम् place 22 वर्तते it exists, √ वृत् 1 23 मलयपर्वत the Malaya mountain 24 किञ्चित् (n) some, any 25 तस्मिन् = मल पर्वते 26 निवास dwelling, residence 27 योग्य fit for 28 आश्रमपदम् site of h mitage 29 निरूपय observe, or find thou! लोट् नि + √ रूप् 10 U 30 एहि con go thou! लोट् √ इ 2 P 31 गच्छाव we go, लट् √ गम् 1 P 32 यत् = यथा 33 भवान् (nom s m) your Honour 34 आज्ञापयति he commands, णिजन्तालट् आ √ ज्ञा 9 U 35 एतु may he come, लोट् √ इ 2 P

It is better that I obey my father's command And moreover, I a ordered by my father, "Dear son, Jimūtavāhana, due to many a day consumption this place is far removed from fuel, Kusha grass, a flowers, and grass roots, Kandas and wild rice have been almo exhausted Therefore, go to the mountain of Malaya and seek o there some hermitage site fit for dwelling" So come, let us rep to the Malaya mountain

Jester—As your Honour commands Come!
(Both walk round)

विदूषक :— (अग्रतोऽवलोक्य) भो वयस्य, प्रेक्षस्व । एष खलु सरसघनस्निग्धचन्दनवनोत्सङ्गपरिमिलनलग्नबहुलपरिमलो विषमतटनिपतनजर्जरायमाणनिर्झरोच्छलितशिशिरसीकरासारवाही प्रथमसङ्गमोत्कण्ठितप्रियाकण्ठग्रहः इव मार्गपरिश्रममपनयन् रोमाञ्चयति प्रियवयस्यं मलयमारुतः ।

1 अग्रतस् ind in front, ahead 2 प्रेक्षस्व behold thou ! लोट् प्र + √ ईक्ष् 1 A 3 एष मलयमारुत this Malaya wind. 4 सरस wet, juicy 5 घन thick, dense. 6 स्निग्ध charming, agreeable. 7 चन्दन m n. sandal 8 वनम woodland 9 उत्सङ्ग lap, edge, summit. 10 परिमिलनम् touch, meeting, contact. 11 लग्न stuck, adhered; P P. √ लग् 1 P. 12 बहुल abundant. 13 परिमल perfume, scent. 14 सरसघनस्निग्धचन्दनवनोत्सङ्गपरिमिलनलग्नबहुलपरिमल = सरसानि घनानि स्निग्धानि चन्दनानां वनानि तेषां उत्सङ्गे परिमिलनेन लग्न बहुल परिमल यस्य स. 15 विषम uneven, irregular. 16 तट slope. 17 निपतनम descending, falling. 18 जर्जरायमाण being shattered. 19 निर्झर. cataract, waterfall. 20 उच्छलित a moving upward. 21 शिशिर cool 22 सीकर· spray, drizzle. 23 आसार shower 24 वाहिन् a (nom. s. m. वाही) carrying. 25 विषमतटनिपतनजर्जरायमाणनिर्झरोच्छलितशिशिरसीकरासारवाही = विषमेषु तटेषु निपतनेन जर्जरायमाणा. ये निर्झरा तेभ्य उच्छलितानां शिशिरसीकराणां आसार वहति स 26 प्रथमसङ्गम first union. 27 उत्कण्ठित eagerly longed for 28 प्रिया f. loving woman. 29 कण्ठग्रह embrace. 30 प्रथमसङ्गमोत्कण्ठितप्रियाकण्ठग्रह = प्रथमसङ्गमे उत्कण्ठिताया प्रियाया कण्ठग्रह. 31 मार्गपरिश्रम. fatigue of journey. 32 अपनयत् (nom s m. अपनयन्) removing; pres Part. अप + √ नी 1 U 33 रोमन् n. (nom. & acc. s. रोम) horripilation 34 अञ्चयति it unfolds, manifests, √ अञ्च् 10 U 35 मारुत wind

Jester— (looking ahead) Ah friend, Behold ! Really this wind of the Malaya mountain, filled with abundant perfume on account of its contact with the top of the wet, dense and pleasant sandal woods, and carrying the shower of cool sprays of water jumping up from the cataracts being split into pieces by falling down upon the uneven slopes, thrills my dear friend, removing the fatigue of journey, like the embrace of a loving woman eager in her first union.

नायक :— (निरूप्य सविस्मयम्) अये, प्राप्ता एव वयं मलयपर्वतम्।

(समन्तादवलोक्य) अहो रामणीयकमस्य। तथा हि

माद्यद्दिग्गजगण्डभित्तिकषणैर्भग्नस्रवच्चन्दनः
क्रन्दत्कन्दरगह्वरो जलनिधेरास्फालितो वीचिभिः।
पादालक्तकरक्तमौक्तिकशिलः सिद्धाङ्गनानां गतैः
सेव्योऽयं मलयाचलः किमपि मे चेतः करोत्युत्सुकम् ॥ ६॥

1 प्राप्त (nom p m. प्राप्ता) arrived, pp प्र + √ आप् 5 p 2 सविस्मयम् ad in wonder 3 समन्तात् ind on all sides 4 रामणीयकम् beauty, loveliness 5 अस्य= मलयस्य 6 तथा हि for, whereas 7 माद्यत rutting, being intoxicated, pres part ,√ मद् 4 p 8 दिग्गज quarter-elephant 9 गण्ड cheek 10 भित्ति f fragment, portion 11 कषणम friction, rubbing 12 माद्यद्दिग्गजगण्डभित्तिकषणं = माद्यता दिग्गजाना या गण्डभित्तय तासां कषणं 13 भग्न broken, shattered, pp √ भञ्ज 7 p 14 स्रवत oozing pres part √ स्रु 1 p 15 भग्नस्रवच्चन्दन = भग्ना स्रवन्त चन्दना यत्र स 16 क्रन्दत crying, roaring pres part √ क्रन्द् 1p 17 कन्दर m n valley 18 गह्वरम् cave 19 क्रन्दत्कन्दरगह्वर = क्रन्दन्ति कन्दराणा गह्वराणि यस्मिन् स 20 जलनिधि m (gen s जलनिधे) ocean 21 आस्फालित shaken, trembled, pp आ + √ स्फल् 10 U, caus 1p 22 वीचि f (ins p वीचिभि) wave 23 अलक्तक red lac 24 रक्त coloured pp √ रञ्ज् 1 4 p 25 मौक्तिकम् pearl 26 शिला f stone 27 पादालक्तकरक्तमौक्तिकशिल = पादालक्तकेन रक्ता मौक्तिकशिला यस्मिन् स 28 अङ्गना woman 29 गतम् gait 30 सेव्य serviceable, enjoyable 31 अचल mountain 32 किमपि somehow, for some reason 33 करोति it makes लट् √ कृ 8 u 34 उत्सुक eager, anxious

माद्यद्दिग्गजगण्डभित्तिकषणं भग्नस्रवच्चन्दन जलनिधे वीचिभि आस्फालित क्रन्दत्कन्दरगह्वर सिद्धाङ्गनाना गतै पादालक्तकरक्तमौक्तिकशिल सेव्य अय मलयाचल किमपि मे चेत उत्सुक करोति ॥ शार्दूलविक्रीडितम् ।

Hero — (observing in wonder) Ah, we have just arrived at the Mt Malaya

(Looking on all sides) How lovely this is ! For,

This enjoyable mountain of Malaya, where the sandal trees ooze out, being torn up by the frictions of the cheeks of the rutting quarter elephants, where the hollows of the ridges are roaring as it is shaken by the ocean waves and where the pearly rocks are coloured with the red lac on the feet on account of the gait of the Siddhas' women, makes my mind anxious for some reason

तदह्यत्रारुह्य वासयोग्यं किञ्चिदाश्रमपदं निरूपयावः ।

विदूषकः—एवं कुर्वः । (अग्रत स्थित्वा) एतु भवान् । (आरोहणं नाटयतः)

नायक :— (दक्षिणाक्षिस्पन्दन सूचयन्) अये !

दक्षिणं स्पन्दते चक्षुः फलाकाङ्क्षा न मे क्वचित् ।
न च मिथ्या मुनिवचः कथयिष्यति किं न्विदम् ॥१०॥

विदूषकः—भो वयस्य, अवश्यमासन्नं ते प्रियं निवेदयति ।

1 तत् so, therefore. 2 अत्र here. 3 आरुह्य having ascended, mounted; gerund आ + √ रुह् 1 P. 4 कुर्वः we two do; √ कृ 8 U. 5 स्थित्वा having stood; gerund √ स्था 1 P. 6 एतु let him go (come); लोट् √ इ 2 P. 7 आरोहणम् ascending, mounting. 8 नाटयतः they two gesticulate, act; णिजन्तात् लट् √ नट् 1 P. 9 दक्षिण right. 10 अक्षि n eye. 11 स्पन्दनम् throbbing. 12 दक्षिणाक्षिस्पन्दनम् = दक्षिणस्य अक्ष्णः स्पन्दनम्. 13 सूचयत् (nom. s. m सूचयन्) indicating; pres. part; √ सूच् 10 U. 14 स्पन्दते it trembles, throbs; √ स्पन्द् 1 A. 15 चक्षुस् n. eye. 16 आकाङ्क्षा f. desire, longing. 17 क्वचित् in some place or case. 18 मिथ्या ind. in vain, falsely. 19 मुनिवचस् n. the word of the sages. 20 कथयिष्यति it will tell; लृट् √ कथ् 10 U. 21 नु indeed, possibly. 22 इदम् = दक्षिणाक्षिस्पन्दनम्. 23 अवश्यम् certainly, inevitably. 24 आसन्न near, imminent. 25 ते = तुभ्यम् to thee. 26 प्रियम् favour, dear thing. 27 निवेदयति it informs; णिजन्तात्लट् नि + √ विद् 2 P.

मे दक्षिणं चक्षुः स्पन्दते फलाकाङ्क्षा क्वचित् न, मुनिवचः च न मिथ्या किं नु इदं कथयिष्यति ॥
अनुष्टुप्

Therefore, ascending here let us look for some hermitage site adequate for residence.

Jester— Let us do so. (Standing ahead) May your Honour proceed ! (Both gesticulate ascending )

Hero— (Indicating a tremor of his right eye) oh ! my right eye throbs, and in no case I long for anything, but the words of the sages are not false what shall it possibly indicate ?

Jester— O friend, it indicates that something pleasant is surely approaching you.

नायकः—एवं नाम यथाऽऽह भवान्।

विदूषकः— (विलोक्य) भो वयस्य, प्रेक्षस्व प्रेक्षस्व। एतत्खलु सविशेषघनस्निग्धपादपविशोभितं सुरभिहविर्गन्धगर्भितोद्दामधूमनिर्गममनुद्विग्नसुखनिषण्णश्वापदगणं तपोवनमिव लक्ष्यते।

नायकः—सम्यगुपलक्षितम्। तपोवनमेवैतत्। कुतः

1 नाम ind indeed, probably 2 आह he said, लिट् √ अह्, a defective root which has only 5 forms, viz, आत्थ, आहथुः, आह आहतुः & आहुः 3 सविशेष special, particular 4 पादप tree 5 विशोभित decorated, adorned, PP वि + √ शुभ् 1 A. caus 6 सविशेषघनस्निग्धपादपविशोभितम् = सविशेष घनैः स्निग्धैः पादपैः विशोभितम् 7 सुरभि fragrant 8 हविस् n oblation 9 गन्ध perfume, scent 10 गर्भित a pregnant, filled with 11 उद्दाम continual, excessive 12 धूम smoke 13 निर्गम coming out 14 सुरभिहविर्गन्धगर्भितोद्दामधूमनिर्गमम् = सुरभि हविर्गन्ध तद्गर्भित उद्दाम धूमस्य निर्गम यत्र तत 15 अनुद्विग्न unalarmed, unfrightened, PP अ + उद् + √ विज् 6A 7P 16 निषण्ण seated, PP नि + √ सद् 1 P. 17 श्वापद animal 18 अनुद्विग्नसुखनिषण्णश्वापदगणम् = अनुद्विग्ना सुखेन निषण्णा ये श्वापदा तेषां गण यत्र तत् 19 इव like 20 लक्ष्यते it appears, कर्मणि लट् √ लक्ष् 1 A 10 U 21 उपलक्षित observed, PP. उप + √ लक्ष् 22 सम्यक् ad rightly 23 एतत् (nom s. n) this

Hero— Yes, probably as you say.

Jester—(looking) O friend behold behold! Certainly this place appears to be a penance grove, adorned with particularly dense and pleasant trees, where incessant smoke filled with fragrant oblation perfume is floating out and where a herd of unalarmed animals rests in ease

Hero— Well observed This is exactly a penance-grove For,

वासोऽर्थं दययेव नातिपृथवः कृत्तास्तरूणां त्वचा
भग्नाऽऽलक्ष्यजरत्कमण्डलु नभःस्वच्छं पयो नैर्झरम् ।
दृश्यन्ते त्रुटितोज्झिताश्च वटुभिर्मौञ्ज्यः क्वचिन्मेखला
नित्याकर्णनया शुकेन च पदं साम्नामिदं पठ्यते ॥११॥

1 वासस् n garment, dress 2 अर्थम् for the sake of, on account of 3 दया f (ins s दयया) pity, compassion 4 अतिपृथु a (nom P f अतिपृथवः) very broad 5 कृत्त (nom P f कृत्ताः) cut PP √ कृत् 6 P 6 तरु m (gen P तरूणाम्) tree 7 त्वच् f (nom P त्वचः) skin, bark 8 भग्न broken, PP √ भञ्ज् 7P 9 आलक्ष्य visible 10 जरत् old 11 कमण्डलु m n water pot 12 भग्नालक्ष्यजरत्कमण्डलु = भग्नाः आलक्ष्याः जरन्तः कमण्डलवः यस्मिन् तत् तथाभूतम् 13 नभस् n sky 14 स्वच्छ transparent clear 15 नभःस्वच्छम् = नभः इव स्वच्छम् 16 पयस् n water 17 नैर्झर a pertaining to a cataract or a mountain brook 18 दृश्यन्ते they are seen they are visible, कर्मणि लट् √ दृश् 1P 19 त्रुटित broken PP √ त्रुट् 4 6 P 20 उज्झित abandoned, PP √ उज्झ् 6P 21 वटु m (ins P वटुभिः) boy 22 मौञ्ज-ञ्जी a (nom P f मौञ्ज्यः) made of Munja grass 23 मेखला f belt girdle 24 नित्य constant 25 आकर्णनया by hearing 26 शुक parrot 27 पद्य a quarter of a stanza 28 सामन् n (gen P, साम्नाम्) the Sama Veda 29 पठ्यते it is recited, √ पठ् 1 P

वासोऽर्थं दयया इव नातिपृथवः तरूणां त्वचः कृत्ताः नैर्झरं पयः नभःस्वच्छं भग्नाऽऽलक्ष्यजरत्कमण्डलु, वटुभिः त्रुटितोज्झिताः मौञ्ज्यः मेखलाः च क्वचित् दृश्यन्ते नित्याकर्णनया च इदं साम्नां पदं शुकेन पठ्यते। ।
शार्दूलविक्रीडितम्

For clothing, the barks of trees are cut thin as if out of pity (for them) the water of the brook is clear as the sky, in which broken, old water pots are visible, and in some places girdles made of Munja grass, torn up and then thrown away by the boys, are seen, and due to his constant hearing a parrot recites this hymn of the Sama Veda

तदेहि प्रविश्यावलोकयावः। (प्रवश नाटयन। सविस्मय विलोक्य)
अहो नु खलु मुदितमुनिजनप्रविचार्यमाणसन्दिग्धवेदवाक्य-
विस्तरस्य पठद्वटुजनच्छिद्यमानार्द्रार्द्रसमिधस्तापसकु-
मारिकाऽऽपूर्यमाणवालवृक्षकालवालस्य प्रशान्तरमणीयता
तपोवनस्य। इह हि

1 प्रविश्य having entered gerund r + √ विश 6P 2 प्रवेश entrance 3 मुदित glad, satisfied 4 मुनिजन sages, ascetics 5 प्रविचायमाण being discussed caus Pres Part Pass प्र + वि + √ चर 1 P 6 सन्दिग्ध doubtful obscure 7 वेद Veda the oldest Hindu Scripture 8 वाक्यम sentence passage 9 विस्तर abundance expanse 10 मुदितमुनिजनप्रविचायमाणसन्दिग्धवेदवाक्यविस्तरस्य = मुदितेन मुनिजनन प्रविचायमाण सन्दिग्ध वेदवाक्यविस्तर यस्मिन तस्य 11 पठत reading Pres Part √ पठ 1 P 12 बटुजन boys 13 छिद्यमान being lopped cut pres Part Pass √ छिद 7 U 14 आर्द्र wet, fresh 15 आर्द्रार्द्र very wet, very fresh 16 समिध f fire wood fuel 17 पठदबटुजनच्छिद्यमानार्द्रार्द्रसमिध = पठता बटुजनन छिद्यमाना आर्द्रार्द्रा समिध यस्मिन तस्य 18 तापस hermit 19 कुमारिका f girl virgin 20 आपूर्यमाण being filled Pres Part Pass आ + √ पूर् 10 U 21 बाल young 21 वक्षक tree 22 आलवालम water basin around a tree 23 तापसकुमारिकापूर्यमाणबालवृक्षकालवालस्य = तापसकुमारिकाभि आपूर्यमाणानि बालवृक्षकाणा आलवालानि यस्मिन् तस्य 24 प्रशान्त peaceful serene 25 रमणीयता f charm, delightfulness 26 इह = तपोवन

So come let us enter and see (Both men enter looking in wonderment) O how serene is the charm of this penance grove where many doubtful passages of the Vedas are being discussed by the self contented sages where very wet and fresh fuel woods are being lopped off by the boys reciting (Mantras), and where the hermit girls are filling up the basins of the young trees (with water)! For here

मधुरमिव वदन्ति स्वागतं भृङ्गशब्दै-
र्नतिमिव फलनम्रैः कुर्वतेऽमी शिरोभिः ।
मम ददत इवार्घ्यं पुष्पवृष्टीः किरन्तः
कथमतिथिसपर्यां शिक्षिताः शाखिनोऽपि ॥१२॥

तन्निवासयोग्यमिदं तपोवनम् । मन्ये भविष्यतीह वसतामस्माकं निर्वृतिः ।

विदूषकः—भो वयस्य, किं खलु एते ईषद्वलितकन्धरा निश्चलमुखापसरदर्धदलितदर्भकवलाः समुन्नमितदत्तैककर्णाः सुखनिमीलितलोचना आकर्णयन्त इव हरिणा लक्ष्यन्ते ।

1 मधुर melodious 2 वदन्ति they say, √ वद् 1P 3 स्वागतम् welcome 4 भृङ्गशब्द humming sound of bees 5 नति f bow 6 नम्र a bent 7 कुर्वते they make, √ कृ 8 U 8 शिरस् n (ins P शिरोभिः) head 9 मम = मह्यम् 10 ददत they give, लट् √ दा 3 U 11 अर्घ्यम् offering 12 पुष्पम् flower 13 वृष्टि f (acc P वृष्टीः) shower 14 किरत् (nom p m किरन्तः) scattering, pres part √ कॄ 6 P 15 अतिथिसपर्या f hospitality or service to guests 16 शिक्षित learned, PP √ शिक्ष् 1 A 17 शाखिन् m (nom P शाखिनः) tree 18 मन्ये I think, √ मन् 4 A 19 वसत् (gen p m वसताम्) dwelling, pres part, √ वस् 1 P 20 निर्वृति f satisfaction 21 ईषत् a little 22 वलित bent round, pp √ वल् 1 A 23 कन्धर neck 24 ईषद्वलितकन्धराः = ईषत् वलिता कन्धरा यैः ते 25 निश्चल immovable 26 मुखम् mouth 27 अपसरत् dropping, pres part अप + √ सृ 1 P 28 दर a little 29 दलित chewed, torn, pp √ दल् 1P 30 दर्भ a kind of grass 31 कवल m n mouthful 32 निश्चलमुखापसरद्दरदलितदर्भकवलाः = निश्चलमुखेभ्यः अपसरन्तः दरदलिताः दर्भकवलाः यषां ते 33 समुन्नमित uplifted 34 कर्ण ear 35 समुन्नमितदत्तैककर्णाः = समुन्नमितः दत्तः एकः कर्णः यैः ते 36 आकर्णयन्त they listen, आ + √ कर्ण 37 हरिण deer

अमी शाखिनः मधुरं स्वागतं भृङ्गशब्दैः वदन्ति इव फलनम्रैः शिरोभिः नतिं कुर्वते इव पुष्पवृष्टीः किरन्तः मम अर्घ्यं ददत इव कथम् अतिथिसपर्याम् अपि शिक्षिताः ॥ मालिनी

These trees give out, as it were a melodious welcome by the humming sound of the bees seem to make a bow with their heads bent low on account of the fruits and to give me a present by scattering showers of the flowers — how have they learnt the service to guests, even ? So this penance grove is fit for residence I think we will be satisfied by dwelling here

Jester—O friend, what is it that these deer seem to listen, with a mouthful of half chewed Darbha grass dropping from their unmoved mouths, attentively pricking up one ear bending round their necks a little, happily closing their eyes ?

नायक :—(कर्णं दत्वा) सखे, सम्यगुपलक्षितम् । तथाहि

स्थानप्राप्त्या दधानं प्रकटितगमकां मन्द्रतारव्यवस्थां
निर्ह्रादिन्या विपञ्च्या मिलितमलिरुतेनेव तन्त्रीस्वरेण ।
एते दन्तान्तरालस्थिततृणकवलच्छेदशब्दं नियम्य
व्याजिह्माङ्गाः कुरङ्गाः स्फुटललितपदं गीतमाकर्णयन्ति ॥१३॥

विदूषकः—भो वयस्य, कः पुनरेष तपोवने गायति ।

1 दत्वा having given (pricked up) gerund √ दा 3 U 2 सखि m (voc. s सखे) friend 3 स्थानम place, position 4 प्राप्ति f obtaining 5 स्थानप्राप्त्या by obtaining due places 6 दधान (acc s n दधानम) placing, containing, pres part √ धा 3 U 7 प्रकटित manifest 8 गमक name of a musical note 9 प्रकटितगमकाम् = प्रकटिता गमका यस्या ताम् 10 मन्द्र deep 11 तार high 12 व्यवस्था f state, arrangement 13 निर्ह्रादिन् a (gen s f निर्ह्रादिन्या) sounding 14 विपञ्चि f (gen s विपञ्च्या) lute 15 मिलित met, joined, pp √ मिल 6P 16 अलि m bee 17 रुतम् (ins s रुतन) cry humming 18 तन्त्री f string 19 स्वर sound 20 दन्त tooth 21 अन्तरालम space, inside 22 स्थित staying 23 तृणम् grass 24 कवल m n morsel, mouthful 25 छेद cutting 26 शब्द sound 27 दन्तान्तरालस्थिततृणकवलच्छेदशब्दम् = दन्तयो अन्तराल स्थितस्य तृणकवलस्य छेदशब्दम 28 नियम्य having stopped, gerund नि + √ यम् 1 U 29 व्याजिह्म a crooked, oblique 30 अङ्गम् body 31 व्याजिह्माङ्गा = व्याजिह्म अङ्ग यषा त 32 स्फुट clear 33 ललित amorous, lovely 34 पद m n wording 35 स्फुटललितपदम् = स्फुटानि ललितानि पदानि यस्मिन् तत् 36 गीतम् song 37 गायति he sings, लट् √ गै 1 P

एत कुरङ्गा व्याजिह्माङ्गा दन्तान्तरालस्थिततृणकवलच्छेदशब्द नियम्य स्थानप्राप्त्या प्रकटितगमका मन्द्रतारव्यवस्था दधान निर्ह्रादिन्या विपञ्च्या अलिरुतेन इव तन्त्रीस्वरेण मिलित स्फुटललितपद गीत आकर्णयन्ति ॥ स्रग्धरा

Hero— (listening) Friend, Well observed ! For

These deer with their bodies bent round, stopping the chewing noise of the morsels of grass sticking in between the teeth, are listening to a song, whose clear and lovely wording is in harmony with the string sound of a lute resembling the humming of bees, and which contains an arrangement of deep and high cadence with the Gamakas manifest by obtaining their due places

Jester— O friend, but who is singing in the penance grove ?

नायक :—यथैताः कोमलाङ्गुलितलाभिहन्यमानाः नातिस्फुटं

क्वणन्ति तन्त्र्यस्तथा काकलीप्रधानं गीयत इति तर्कयामि ।

(अङ्गुल्यग्रेणाग्रतो निर्दिशन्) अस्मिन्नायतने देवतामाराधयन्ती

काचिद्दिव्या योषिदुपवीणयति ।

विदूषकः—भो वयस्य, एहि आवामपि देवतायतनं प्रेक्षावहे ।

नायक :—वयस्य, साधूक्तं खलु भवता । वन्द्याः खलु देवताः ।

(उपसर्पन् सहसा स्थित्वा) वयस्य, कदाचिद् द्रष्टुमनर्होऽयं

स्त्रीजनो भवति ।

1 एता तन्त्र्य (s. तन्त्री) these strings 2 कोमल tender, delicate. 3 अङ्गुलि f. finger 4 तल m n surface. 5 अभिहन्यमान being beaten, striken, Pres. Part Pass अभि + √ हन् 2 P. 6 कोमलाङ्गुलितलाभिहन्यमाना = कोमलै अङ्गुलितलै अभिहन्यमाना 7 नातिस्फुटम् ad not very distinctly 8 क्वणन्ति they hum, sound, लट् √ क्वण् 1 P. 9 काकली f low of sweet tone. 10 प्रधान chief, principal. 11 गीयते it is sung, कर्मणिलट् √ गै 1 P 12 तर्कयामि 2 conjecture, suppose, √ तर्क् 10 U. 13 अग्रम् (ins s. अग्रेण) tip. top 14 निर्दिशन् (nom s. m निर्दिशन्) pointing, Pres. Part. निस् + √ दिश 6U. 15 आयतनम् altar, temple 16 देवता f, deity 17 आराधयत् (nom s f आराधयन्ती) propitiating, Pres Part. caus आ + √ राध् 5 P. 18 काचित् योषित् some young lady. 19 दिव्य a. (f दिव्या) sacred, divine 20 उपवीणयति (नामधातु) she plays on a lute 21 आवाम् we two 22 प्रेक्षावहे we see, लट् प्र + √ ईक्ष् 1 A 23 साधु well 24 उक्त said, PP. √ वच् 2 P. √ ब्रू 2U. 25 वन्द्य adorable. 26 उपसर्पत् (nom. s. m उपसर्पन्) approaching, Pres Part. उप + √ सृप् 1 U. 27 द्रष्टुम् to see, inf. √ दृश् 1 P 28 स्त्रीजन woman.

Hero— As these strings being striken by some delicate finger-tips sound not very distinctly I conjecture that a song mostly consisting of Kākalī is being sung (Pointing in front with his finger-tip.) In this altar some divine young lady is playing on a lute propitiating a deity.

Jester— O friend, come, let us see the god's altar, too

Hero— Friend, you have well spoken. Really adorable are the gods (Approaching and then stopping all of a sudden) O friend, there might be some women not fit to be seen at any time.

तदावां तमालगुल्मान्तरितौ पश्यन्ताववसरं प्रतिपालयावः ।

(तथा कुरुत )

(तत प्रविशति भूमावुपविष्टा वीणा वादयन्ती मलयवती चेटी च)

**नायिका**—(गायति)

उत्फुल्लकमलकेसरपरागगौरद्युते मम हि गौरि ।
अभिवाञ्छितं प्रसिध्यतु भगवति युष्मत्प्रसादेन ॥१४॥ आर्या

**नायकः**—(कर्णं दत्त्वा) वयस्य, अहो गीतम् । अहो वाद्यम् ।

1 तत् so 2 तमाल name of a tree 3 गुल्म m n thicket, bush 4 अन्तरित (nom. d p अन्तरितौ) concealed, PP अन्तर् + √ इ 2 P 5 तमालगुल्मान्तरितौ = तमालाना गुल्मेन अन्तरितौ भूत्वा 6 पश्यत् (nom d m पश्यन्तौ) beholding, Pres Part √ दृश 1 P 7 अवसर = chance, opportunity 8 प्रतिपालयाव we two wait for, प्रति + √ पाल् 10 P or caus 9 कुरुत they two do, √ कृ 8 U 10 ततस् and then, at that time 11 भूमि f (loc s भूमौ) earth, ground 12 उपविष्ट seated, PP उप + √ विश 6 P 13 वीणा f lute, 14 वादयत् (nom s f वादयन्ती) playing on an instrument, caus Pres Part √ वद् 1 P 15 मलयवती = नायिका the heroine of this play 16 उत्फुल्ल a full-blown 17 कमलम् lotus 18 केसर m n filament 19 पराग pollen, dust 20 गौर fair, white 21 द्युति f beauty, hue 22 उत्फुल्लकमलकेसरपरागगौरद्युते = उत्फुल्लस्य कमलस्य ये केसरा तेषा पराग तद्वत् गौरा द्युति यस्या सा तत्सम्बोधनम् 23 गौरी f (voc गौरि) goddess पार्वती 24 अभिवाञ्छितम wish 25 प्रसिध्यतु let it be accomplished, लोट प्र + √ सिध 4 P 26 भगवती f. (voc s भगवति) goddess 27 युष्मत् = युष्माकम् 28 प्रसाद favour 29 वाद्यम् instrumental music 30 गीतम् song

Therefore, concealing ourselves behind the Tamāla thicket let us observe and wait for a chance (Both do so) (At that time appear the heroine Malayavati seated on the ground, playing on a lute, and her maid)

Heroine— (Sings)
O goddess Gāuri who bear the hue as fair as the pollen of the filaments of a full blown lotus! May my wish be by your favour accomplished!

Hero— (pricking up his ears) Friend, O wonderful song!
O wonderful instrumental music!

व्यक्तिर्व्यञ्जनधातुना दशविधेनाप्यत्र लब्धाऽमुना
विस्पष्टो द्रुतमध्यलम्बितपरिच्छिन्नस्त्रिधाऽयं लयः ।
गोपुच्छाप्रमुखाः क्रमेण यतयस्तिस्रोऽपि सम्पादिता-
स्तत्त्वौघानुगताश्च वाद्यविधयः सम्यक्त्रयो दर्शिताः ॥१५॥

चेटी— (सप्रणयम्) भर्तृदारिके, चिरं खलु वादयन्त्याः कुतो न परिश्रमोऽग्रहस्तयोः ।

1 व्यक्ति f manifestation distinctness 2 व्यञ्जनधातु m the tenfold method of producing musical notes on the lute 3 दशविध (ins s दशविधेन) tenfold 4 अत्र = गाते in this song 5 लब्ध obtained, PP √लभ् IA 6 अमुना (m) by this— 7 विस्पष्ट clear 8 द्रुत quick 9 मध्य middle 10 लम्बित slow 11 परिच्छिन्न divided determined, PP परि + √छिद 7U 12 त्रिधा in three ways 13 द्रुतमध्यलम्बितपरिच्छिन्न = द्रुत मध्य लम्बित तै परिच्छिन्न 14 लय timing, tempo 15 गोपुच्छा f kind of pause in music 16 प्रमुख a (समासान्त) headed by 17 क्रमेण in due order 18 यति f (P यतय) pause in music 19 त्रि (m त्रय, f तिस्र, n त्रीणि) three 20 सम्पादित effected, produced, caus PP सम् + √पद 4A 21 तत्त्व, ओघ, अनुगत are the three modes of instrumental music 22 विधि m (P विधय) method, mode 23 दर्शित shown, caus PP √दृश 1P 24 सप्रणयम ad affectionately 25 भर्तृदारिका f princess 26 चिरम for a long time 27 परिश्रम fatigue 28 अग्रहस्त finger

अत्र दशविधेन अमुना व्यञ्जनधातुना अपि व्यक्ति लब्धा द्रुतमध्यलम्बितपरिच्छिन्न अयं लय त्रिधा विस्पष्ट गोपुच्छाप्रमुखा तिस्र यतय अपि क्रमेण सम्पादिता तत्त्वौघानुगता च त्रय वाद्यविधय सम्यक् दर्शिता । शार्दूलविक्रीडितम्

Here through this ten fold method of musical notes distinctness has been procured, this timing determined by quick medium and slow sounds has been manifest in the three ways, the three pauses headed by the Gopucchha have also been duly effected and the three modes of instrumental music viz, Tattva, Augha and Anugata, have been rightly displayed

Maid— (affectionately) O princess why do you not feel tired in your fingers as you are playing on the lute for a long time ?

नायिका—(साधिक्षेपम्) हञ्जे, कुतो मे देव्याः पुरतो वीणां वादयन्त्या अग्रहस्तयोः परिश्रमः ।

चेटी— भर्तृदारिके, ननु भणामि किमेतस्या निष्करुणायाः पुरतो वादितेन । या एतावन्तं कालं कन्यकाजनदुष्करैर्नियमोपासनैराराधयन्त्या अद्यापि न ते प्रसादं दर्शयति ।

विदूषकः—कन्यका खल्वेषा । किं न प्रेक्षावहे ।

नायकः—को दोषः । निर्दोषदर्शनाः कन्यका भवन्ति ।

1 अधिक्षप abuse, dismissal 2 साधिक्षेपम् ad in refutation 3 हञ्जे (voc) o maid! 4 मे = मम 5 देवी f (gen s देव्या) goddess 6 पुरतस् ind (+ gen) in front of 7 वादयन्त्या is connected to मे 8 ननु certainly 9 भणामि I say, speak, √ भण् 1 P 10 एतस्या = देव्या गौर्या 11 निष्करुण a (gen s निष्करुणाया) pitiless, cruel 12 वादितम् (ins s वादितेन) playing on a lute 13 किम् + ins. what is the use of 14 या = देवी गौरी 15 कन्यका f girl, virgin 16 दुष्कर difficult, arduous 17 नियम restraint, penance 18 उपासनम् worship 19 अद्य today, now 20 ते = तव 21 दर्शयति she shows, णिजन्तात्लट् √ दृश् 1 P 22 एषा she 23 दोष fault, blemish 24 निर्दोष faultless 25 दर्शनम् sight, appearance, seeing 26 निर्दोषदर्शना = निर्दोष दर्शन यासा ता 27 भवन्ति they are, लट् √ भू 1 P

Heroine— (in refutation) O maid, how can my fingers be tired while I am playing on the lute in front of the goddess ?

Maid— O princess, certainly I dare say what is the use of playing on it in front of this pitiless goddess who would not even today show you her favour though you are propitiating her by means of penance and worship which are arduous for a girl ?

Jester— She is really a girl ! Why do we not see her ?

Hero— No fault It is not a fault to see girls (girls have a faultless appearance )

किंतु कदाचिदस्मान् दृष्ट्वा बालभावसुलभलज्जासाध्वसान्न चिरमिह तिष्ठेत् । तदनेनैव लताजालान्तरेण पश्यावः ।

विदूषक :—एवं कुर्वः । (उभौ पश्यत )

विदूषक :— (दृष्ट्वा सविस्मयम्) भो वयस्य, प्रेक्षस्व प्रेक्षस्व । अहह आश्चर्यम् । न केवलं वीणाविज्ञानेनैव सुखं करोति । यावत् अनेन वीणाविज्ञानानुरूपेण रूपेणापि अक्ष्णोः सुखमुत्पादयति, का पुनरेषा । किं तावत् देवी । अहोस्विद्नागकन्यका । अहोस्वित् विद्याधरदारिका । अहोस्वित् सिद्धकुलसम्भवेति ।

1 किंतु but 2 अस्मान् us 3 बाल्भाव boyhood, virginhood 4 सुल्भ easily obtainable, natural 5 लज्जा f bashfulness 6 साध्वसम् fear 7 बाल्भावसुलभलज्जासाध्वसात् = बाल्भावेन सुलभाया लज्जाया साध्वसात् च 8 तिष्ठत् she may stay, विधिलिङ् √ स्था 1 P 9 लता f creeper 10 जाल्म् network, mass 11 अन्तरेण ind from inside, out of, through 12 अहह, ah, oh, alas ! 13 आश्चर्यम् wonder, miracle 14 न केवलम् not only—but 15 विज्ञानम् skill, knowledge 16 सुखम् joy 17 करोति she makes √ कृ 8 U 18 यावत् तावत् while, as much as 19 अनुरूप a (ins s अनुरूपेण) resembling, befitting 20 रूपम् form, beauty 21 अक्षि n (gen d अक्ष्णो) eye 22 उत्पादयति she creates; णिजन्तात्लट् उद् + √ पद् 4 A. 23 पुनर् again, but 24 अहोस्वित् ind Oh ! ah ! what ! (to express doubt, wonder, etc) 25 दारिका girl 26 कुलम् family 27 सम्भव birth 28 सिद्धकुलसम्भवा = सिद्धाना कुले सम्भव यस्या सा

But whenever she detects us, she may not stay here for a long time through bashfulness and fear natural in virginhood Let us therefore, behold her through this network of creepers

Jester – Let us do so (Both observe )

Jester— (looking in wonderment) Hallo friend see, see ! Ah ah wonderful ! Not only she gives us a joy by her knowledge of lute but by this beautiful form befitting her knowledge of lute she gladdens the eyes After all who is she ? Is she a goddess ? Oh ! is she a girl of the Nāgas ? Oh ! a girl of the Vidyādharas ? Oh ! was she born in the race of the Siddhas ?

नायक :— (सस्पृहमवलोक्य) वयस्य, केयमिति नावगच्छामि ।

एतत्पुनरहं जानामि ।

स्वर्गस्त्री यदि तत्कृतार्थमभवच्चक्षुःसहस्रं हरे—
नागी चेन्न रसातलं शशभृता शून्यं मुखेऽस्याः स्थिते ।
जातिर्नः सकलान्यजातिजयिनी विद्याधरी चेदियं
स्यात् सिद्धान्वयजा यदि त्रिभुवने सिद्धाः प्रसिद्धास्ततः ॥१६॥

विदूषक :— (नायकमवलोक्य सहर्षमात्मगतम्) दिष्ट्या चिरस्य तावत् कालस्य पतितः खल्वेष गोचरे मन्मथस्य । (आत्मानं निर्दिश्य भोजनमभिनीय)

1 स्पृहा f. envy. 2 सस्पृहम् = स्पृहासहितम् enviously. 3 अवगच्छामि I know; अव + √ गम् 1 P. 4 जानामि I know; √ ज्ञा 9 U 5 स्वर्गस्त्री f. nymph. 6 यदि = चेत् if. 7 तत् = तर्हि then. 8 कृतार्थम् = कृत अर्थः येन तत्. contented, with one's wish accomplished 9 अभवत् it was; लङ् √ भू 1 P 10 चक्षुःसहस्रम् a thousand eyes. 11 हरि m. (gen. s. हरे) Indra, 12 रसातलम् the Nāgas' nether world. 13 शशभृत् m (ins. s शशभृता) moon. 14 शून्य devoid of, empty. 15 अस्या मुखे स्थिते (loc. abs.) while there is her face 16 जाति f. caste, race 17 नः = अस्माकम्. 18 सकल all, entire 19 जयिन् a (f, जयिनी) conquering, vanquishing 20 स्यात् she might be; विधिलिङ् √ अस् 2 P. 21 अन्वय race, family 22 ज a (f. जा) (समासान्ते) born in. 23 त्रिभुवनम् the triple world. 24 प्रसिद्ध a. famous. 25 दिष्ट्या fortunately. 26 पतित fallen, pp. √ पत् 1 P 27 गोचर scope, range 28 मन्मथः cupid 29 अभिनीय having acted; gerund अभि + √ नी 1 U 30 भोजनम् eating, food.

यदि इयं स्वर्गस्त्री तत् हरेः चक्षुःसहस्रं कृतार्थं अभवत्, नागी चेत् अस्याः मुखे स्थिते रसातलं शशभृता शून्यं न, इयं विद्याधरी चेत् नः जातिः सकलान्यजातिजयिनी यदि सिद्धान्वयजा स्यात् ततः सिद्धाः त्रिभुवने प्रसिद्धाः ॥ शार्दूलविक्रीडितम्

Hero— (enviously looking) Friend, I do not know who she is, but I know this, If she were a divine nymph, Indra's thousand eyes should be contented, if she were a Nāga, the nether world would not be devoid of a moon while her face is there, if she were a girl of the Vidyādharas, our race would be triumphant over all other races, and were she born in the Siddhas' race, they should be renowned in the three worlds.

Jester— (looking at the hero, joyfully to himself) Fortunately after a long time he has now fallen within the range of Cupid (pointing himself and gesticulating eating.)

अथवा नहि नहि, ममैवैकस्य ब्राह्मणस्य ।

चेटी— (सप्रणयम्) भर्तृदारिके, ननु भणामि किमेतस्या निष्करुणायाः पुरतो वादितेन । (इति वीणामाक्षिपति)

नायिका— (सरोषम्) हञ्जे, मा भगवती गौरीमधिक्षिप । नन्वद्य कृतो मे भगवत्या प्रसादः ।

चेटी— (सहर्षम्) भर्तृदारिके, कथय तावत् कीदृशः ।

नायिका—हञ्जे, जानामि अद्य स्वप्ने एतामेव वीणां वादयन्ती भगवत्या गौर्या भणितास्मि । 'वत्से मलयवति, परितुष्टास्मि तवैतेन वीणाविज्ञानातिशयेनानया च बालजनदुष्करया असाधारणया ममोपरि भक्त्या ।

1 अथवा or yet, moreover. 2 आक्षिपति she throws off, आ + √ क्षिप् 6 U. 3 रोष anger 4 सरोषम् angrily 5 अधिक्षिप offend, accuse thou! लोट अधि + √ क्षिप् 6 U 6 कथय tell thou! लोट √ कथ् 10 U 7 तावत just now 8 कीदृश a of what kind 9 स्वप्न (loc s स्वप्ने) dream, sleep 10 भणित (nom s f भणिता) spoken, told pp √ भण् 1 P 11 वत्स (voc s f वत्से) dear child 12 परितुष्ट pleased, satisfied, pp परि + √ तुष् 4 P 13 अतिशय excess 14 वीणाविज्ञानातिशयेन = वीणाविज्ञानस्य अतिशयेन 15 असाधारण a (ins s f असाधारणया) uncommon, unique 16 उपरि over, towards 17 भक्ति f (ins s भक्त्या) devotion 18 वादयन्ती = नायिका अहम्

Or nay nay, within the range of this Brahmin as I am

Maid— (affectionately) O princess certainly I say, what is the use of playing on the lute before this cruel goddess? (Thus she throws off the lute)

Heroine— (angrily) O maid, do not offend Goddess Gaurī! Truly the goddess bestowed upon me a favour today

Maid— (joyously) O princess, now tell me what kind of

Heroine— O maid, I am sure I was addressed by the Goddess, Gauri in my dream today as I was playing on this lute,—"Dear Child Malayavati, I am pleased with this excellent lute-knowledge and this unique devotion of yours towards me that is arduous for a young person

तद् विद्याधरचक्रवर्ती अचिरेणैव ते पाणिग्रहणं निर्वर्तयिष्यति ।'

चेटी—(सहर्षम्) भर्तृदारिके, यद्येवं तत् कस्मात् स्वप्नः अयं भण्यते । ननु हृदयस्थितो वरो देव्या दत्तः ।

विदूषकः—(श्रुत्वा) भो वयस्य, अवसरः खल्वेषोऽस्माकं देवीदर्शनाय । तदेहि उपसर्पावः ।

नायकः—न तावत् प्रविशामि ।

विदूषकः— (अनिच्छन्तमपि नायकं बलादाकृष्योपसृत्य) स्वस्ति भवत्यै । भवति, सत्यमेव चतुरिका भणति वर एव स देव्या दत्तः ।

नायिका—(ससाध्वसमुत्तिष्ठन्ती नायकमुद्दिश्य) हञ्जे, को नु खल्वेषः ।

1 चक्रवर्तिन् m (nom s चक्रवर्ती) emperor 2 विद्याधरचक्रवर्ती = विद्याधराणा चक्रवर्ती जीमूतवाहन 3 अचिरेण before long, soon 4 पाणिग्रहणम् marriage 5 निर्वर्तयिष्यति he will do, finish, णिजन्तात्लृट् निर् + √ वृत् 1A 6 कस्मात why 7 भण्यते it is said, कर्मणि लट् √ भण् 1P 8 हृदयम् heart 9 स्थित fixed, pp √ स्था 1P 10 वर bridegroom 11 दत्त given, pp √ दा 3U 12 देवीदर्शनम् (dat s — र्शनाय) queen's audience 13 अनिच्छत (acc s अनिच्छन्तम्) unwilling 14 बलात् by force 15 आकृष्य having pulled, gerund, आ + √ कृष् 6U 16 स्वस्ति ind (+dat) hail to ! 17 सत्यम् truely 18 उद्दिश्य pointing, regarding

On that account, the universal monarch of the Vidyādharas will marry you before so long"

Maid — (with joy) O princess, if it is so, why do you mention this dream ? Surely a bridegroom fixed in your heart has been given to you by the goddess

Jester— O friend, this is the chance to have an audience with our queen So come, let us approach (her)

Hero— I do not enter now

Jester— (pulling the unwilling hero by force and approaching) Hail to your ladyship ! Lady, is it true that the maid said that your bridegroom was given to you by the goddess ?

Heroine— (standing up in fear, pointing the hero) O maid, who is this man ?

चेटी—(नायक निरूप्यापवार्य) अनयाऽनन्यसदृश्या आकृत्या एष स भगवत्या प्रसादीकृत इति तर्कयामि ।

( नायिका सस्पृह सलज्जञ्च नायकमवलोकयति ।)

नायक :— तनुरियं तरलायतलोचने
श्वसितकम्पितपीनघनस्तनि ।
श्रममलं तपसैव गता पुनः
किमिति सम्भ्रमकारिणि खिद्यसे ॥१७॥

नायिका— (अपवार्य) हञ्जे, अतिसाध्वसेन न शक्नोमि एतस्याभिमुखी स्थातुम् । (नायक तिर्यंक सलज्जञ्च पश्य ती किंचित पराङमुखी तिष्ठति ।)

1 अपवार्य aside, apart (a dramatic term indicating that the person addressed only hears the speech ) 2 अनन्य = न अन्य, unique, not other 3 सदृश a (ins s f सदृश्या) like, resembling 4 आकृति f (ins s आकृत्या) form, noble appearance 5 प्रसादीकृत favoured offered as a favour 6 सलज्जम् bashfully 7 तनु f body 8 तरल tremulous 9 आयत long, large 10 लोचनम् eye 11 इयम् f this 12 तरलायतलोचन = तरले आयते लोचने यस्या सा तत्सम्बोधनम् 13 श्वसितम् breathing, sighing 14 कम्पित shaken , PP √ कम्प 1 A 15 पीन fat, plump 16 घन hard 17 स्तन breast 18 श्वसितकम्पितपीनघनस्तनि = श्वसितेन कम्पितौ पीनौ घनौ च स्तनौ यस्या सा तत्सम्बोधनम् 19 श्रम fatigue 20 श्रमम् गता तनु this body is wearied 21 अलम् completely, too much 22 तपस् n (ins s तपसा) penance 23 किमिति what for, why 24 सम्भ्रम haste 25 कारिन a (voc. s f कारिणि) making, doing 25 खिद्यसे thou art troubled, लट् √ खिद् 4 7A 26 शक्नोमि I am able , लट् √ शक् 5 P

तरलायतलोचने श्वसितकम्पितपीनघनस्तनि सम्भ्रमकारिणि ! इय तनु तपसा एव अल श्रम गता पुन किमिति खिद्यसे ॥ द्रुतविलम्बितम्

Maid— (observing the hero aside) In view of this unique, noble appearance he is the very one offered to you by the goddess, I suppose (The heroine looks at the hero enviously and bashfully )

Hero— O tremulous and large eyed one, this thy body is completely wearied due to penance, O hasty one whose plump and hard breasts are shaken by breathing ! Why dost thou again exhaust thyself ?

Heroine— (aside) Ah maid ! out of my excessive fear I cannot stand face to face with him (Turning a side glance to the hero bashfully, she stands away a little )

चेटी—भर्तृदारिके, किमेतम्।

नायिका—हञ्जे, न शक्नोमि एतस्यासन्ने स्थातुम्।
तदेह्यन्यतो गच्छावः। (उत्थातुमिच्छति)

विदूषक:—भोः, बिभेति खल्वेषा। मम पठितविद्यामित्र मुहूर्तं धारयामि।

नायक:—को दोषः।

विदूषक:—भवति, किमत्र युष्माकं तपोवने ईदृश आचारः।
येनातिथिरागतो वाङ्मात्रेणापि न सम्भाव्यते।

चेटी— (नायिका दृष्ट्वाऽऽत्मगतम्) अनुरज्यत इवात्रैतस्या दृष्टिः।
भवतु, एवं तावद् भणिष्यामि (प्रकाशम्) भर्तृदारिके, युक्तं
भणति ब्राह्मणः। उचितः खलु तेऽतिथिजनसत्कारः।

1 आसन्न near, close to अन्यतम ind elsewhere 3 इच्छति she wishes, √ इष् 6 P 4 बिभेति she fears, √ भी 3 U 5 पठित read, learned, PP √ पठ् 1 P 6 विद्या f knowledge, learning 7 मुहूर्तम् for a moment 8 धारयामि I hold, √ धृ 10 U 9 ईदृश a of this kind 10 आचार conduct custom 11 येन hereby, since 12 आगत come, PP आ + √ गम् 1 P 13 वाग् f word 14 मात्र suffix only, alone 15 सम्भाव्यते he is honoured, णिजन्तात्कर्मणि लट् सम् + √ भू 1 P 16 अनुरज्यते it is delighted, कर्मणि लट् अनु + √ रञ्ज् 1 4 U 17 दृष्टि f eye 18 युक्तम befittingly 19 उचित proper 20 अतिथिजनसत्कार hospitality or service to guests

Maid— O princess, what about him ?

Heroine— Maid, I am not able to remain close to him So come, let us go away (She intends to rise)

Jester— Friend, she is really afraid I shall hold her up for a moment like my acquired learning

Hero— Not bad.

Jester— Is this your custom here in the penance grove that a guest on a visit is not treated well even by a mere word ?

Maid— (looking at the heroine, to herself) It appears that her eyes are delighted here Well, now I will speak thus (Aloud) Your Highness, the Brahmin speaks befittingly Indeed hospitality towards any guests is proper for you

तत् किमीदृशे महानुभावे प्रतिपत्तिमूढा तिष्ठसि । अथवा तिष्ठ त्वम् । अहमेव यथाऽनुरूपं करिष्यामि । (नायकं निर्दिश्य) स्वागतमार्यस्य । आसनपरिग्रहेणालंकरोत्वार्य इमं प्रदेशम् ।

विदूषक:—भो वयस्य, शोभनमेषा भणति । उपविश्यात्र मुहूर्तं विश्राम्यावः ।

नायकः—युक्तमाह भवान् । (उभावुपविशत ।)

नायिका— (चेटीमुद्दिश्य) अयि परिहासशीले, मा एवं कुरु । कदापि कोऽपि तापसः प्रेक्षते ततो मामविनीतेति सम्भावयिष्यति ।

(ततः प्रविशति तापसः)

1 महानुभाव = महान् अनुभावो यस्य सः illustrious magnanimous 2 प्रतिपत्ति f acknowledgement, acceptance, honour 3 मूढ a dull, perplexed 4 प्रतिपत्तिमूढा = प्रतिपत्तौ मूढा 5 तिष्ठ wait thou ! लोट् √स्था 1P 6 यथाऽनुरूपम् a thing as befitting 7 करिष्यामि I shall do, लृट् √कृ 8U 8 स्वागतम् ind welcome ! 9 आर्य a noble. 10 आसनम् seat 11 परिग्रह acceptance 12 अलङ्करोतु may he adorn, लोट् अलम् + √कृ 8U 13 प्रदेश spot, place 14 शोभन fine —म finely 15 उपविश्य having sat down gerund उप + √विश् 6P 16 विश्राम्याव we two rest लट् वि + √श्रम् 4P 17 उभ (nom d m उभौ) both 18 परिहास jest 19 शील nature, disposition 20 परिहासशील = परिहासशीलं यस्या सा तत्सम्बोधनम् 21 कुरु do thou ! लोट् √कृ 8U 22 अविनीत (f अविनीता) immodest unchaste 23 सम्भावयिष्यति he will consider, णिजन्तात्लृट् सम् + √भू 1P

Then why do you remain perplexed in honouring this illustrious gentleman ? Or you wait ! I myself will do in a way as befitting (Pointing the hero) Welcome to you noble one ! By accepting this seat may the noble one decorate this place !

Jester— O friend she speaks very fine Let us rest for a while, seated here

Hero— Properly spoken (Both men sit down )

Heroine— (towards the maid) O you who are fond of jest ! don't do that Whenever any hermit sees me, he will consider me unchaste (Then enters a hermit )

तापस :—आज्ञापितोऽस्मि कुलपतिना कौशिकेन यथा 'वत्स शाण्डिल्य, पितुराज्ञया सिद्धराजमित्रावसुर्भविष्यद्विद्याधरचक्रवर्तिनं कुमार-जीमूतवाहनमिहैव मलये पर्वते क्वापि वर्तमानं भगिन्या मलयवत्या वरहेतोर्द्रष्टुमद्य गतः। तच्च प्रतीक्षमाणाया मलयवत्याः कदाचिद् मध्यंदिनसवनविधिवेलातिक्रामेत्। तदे-नामाहूयागच्छ' इति। तत्तपोवनगौरीगृहमेव गच्छामि। (परिक्रम्य भूमिं निरूप्य सविस्मयम्) अये! कस्य पुनरियं पांशुले भूप्रदेशे प्रकाशचक्रचिह्ना पदपङ्क्तिः। (अग्रतो जीमूतवाहनं निर्दिश्य)

1 आज्ञापित ordered, caus PP आ + √ज्ञा 9U 2 कुलपति m (ins s —पतिना) head of the hermitage 3 पितृ m (gen s पितु) father 4 भविष्यत् a pertaining to future. 5 कुमार prince 6 क्वापि somewhere 7 वर्तमान being, staying, Pres Part √वृत् 1A 8 भगिनी f (gen s भगिन्या) sister 9 वरहेतो for the purpose of choosing as a bridegroom 10 तम् = मित्रावसुम् 11 प्रतीक्षमाण waiting for, Pres Part प्रति + √ईक्ष् 1A 12 मध्यंदिनम् mid day 13 सवनम् bathing, sacrifice 14 विधि m ceremony 15 वेला f time hour 16 मध्यंदिनसवनविधिवेला = मध्यंदिन सवन तस्य विधिवेला 17 अतिक्रामेत् it might pass, विधिलिङ् अति + √क्रम् 1U 4P 18 आगच्छ come thou! लोट् आ + √गम 1P 19 भूमि f ground 20 पांशुल a dusty 21 भूप्रदेश ground 22 प्रकाश clear 23 चक्रचिह्नम् wheel mark as the sign of an emperor पदपङ्क्ति f line of foot prints

Hermit— I have been ordered by Kaushika the head of our monastery thus, "My child Shāndilya, by order of his father, the King of the *Siddhas*, Mitravasu just now went out to see *Prince Jimūtavahana, the future* Emperor of the Vidyadharas who *is somewhere here* on the mountain Malaya in order to make him the bridegroom of his sister Malayavati And while waiting for him, Malayavati might miss the hour of her mid day ablution ceremony So call her back" Now I am going to the hermitage— altar of Gauri (Walking round and looking at the ground, surprised) O! To whom does this line of foot prints marked with the clear Chakra signs on the dusty ground belong?
(Pointing Jimutavāhana in front)

नूनमस्यैवेयं महापुरुषस्य । तथाहि ।

उष्णीषः स्फुट एष मूर्धनि विभात्यूर्णेयमन्तर्भ्रुवो-
श्चक्षुस्तामरसानुकारि हरिणा वक्षःस्थलं स्पर्धते ।
चक्राङ्कश्च यथा पदद्वयमिदं मन्ये तथा कोऽप्ययं
नो विद्याधरचक्रवर्तिपदवीमप्राप्य विश्राम्यति ॥१८॥

अथवा कृतं सन्देहेन । व्यक्तमेतेनैव जीमूतवाहनेन भवितव्यम् ।

1 अस्य इयम् = जीमूतवाहनस्य पदपङ्क्ति 2 महापुरुष great man 3 उष्णीष diadem, mark of a crown 4 मूर्धन् m (loc s मूर्धनि, मूर्ध्नि) head 5 विभाति it shines वि + √ भा 2 P 6 ऊर्णा f wool circle of hair between the eye-brows 7 अन्तर ind inside, betwixt, between 8 भ्रू f (loc d भ्रुवो ) eye-brow 9 तामरसम् red lotus 10 अनुकारिन् a imitating, resembling 11 तामरसानुकारि = तामरसस्य अनुकारि 12 हरिन् m (ins s हरिणा) lion 13 वक्षस् n bosom, chest 14 स्थलम् place 15 स्पर्धते it rivals, defies, √स्पर्ध 1A 16 अङ्क mark. 17 चक्राङ्कम् = चक्राङ्को यस्मिन् तत् 18 पदद्वयम् a pair of feet 19 मन्ये I think, √मन् 4A 20 नो = न, not 21 पदवी f way, rank. 22 अप्राप्य not having obtained, gerund अ + प्र + √आप् 5P 23 व्यक्तम् evidently 24 जीमूतवाहनेन भवितव्यम् (भावे प्रयोग) he must be जीमूतवाहन, एष जीमूतवाहन भवेत्

एष स्फुट उष्णीष मूर्धनि विभाति इय ऊर्णा भ्रूवो अन्त चक्षु तामरसानुकारि वक्ष स्थल हरिणा स्पर्धते यथा इद पदद्वय चक्राङ्क तथा मन्ये क अपि अय विद्याधरचक्रवर्तिपदवी अप्राप्य नो विश्राम्यति ॥ शार्दूलविक्रीडितम् ।

This surely belongs to this illustrious man, for,

> This bright mark of a crown shines on his head, this circle of hair appears betwixt his eye-brows, his eyes resemble a red lotus, his chest can defy a lion and as this pair of his feet bear Chakra signs, I consider, whoever he may be, he will not rest till he attains to the rank of the Vidyādhara Emperor

Or no doubt He must be, it is evident, Jimūtavāhana

तापस :—आज्ञापितोऽस्मि कुलपतिना कौशिकेन यथा 'वत्स शाण्डिल्य, पितुराज्ञया सिद्धराजमित्रावसुर्भविष्यद्विद्याधरचक्रवर्तिनं कुमारजीमूतवाहनमिहैव मलये पर्वते क्वापि वर्तमानं भगिन्या मलयवत्या वरहेतोर्द्रष्टुमद्य गतः। तच्च प्रतीक्षमाणाया मलयवत्याः कदाचिद् मध्यंदिनसवनविधिवेलातिक्रामेत्। तदेनामाहूयागच्छ' इति। तत्तपोवनगौरीगृहमेव गच्छामि। (परिक्रम्य भूमिं निरूप्य सविस्मयम्) अये ! कस्य पुनरियं पांशुले भूप्रदेशे प्रकाशचक्रचिह्ना पदपङ्क्तिः। (अग्रतो जीमूतवाहनं निर्दिश्य)

1 आज्ञापित ordered, caus PP आ + √ज्ञा 9U 2 कुलपति m (ins s —पतिना) head of the hermitage 3 पितृ m (gen s पितु) father 4 भविष्यत् a pertaining to future 5 कुमार prince 6 क्वापि somewhere 7 वर्तमान being, staying, Pres Part √वृत् 1A 8 भगिनी f (gen s भगिन्या) sister 9 वरहेतो for the purpose of choosing as a bridegroom 10 तम् = मित्रावसुम् 11 प्रतीक्षमाण waiting for, Pres Part प्रति + √ईक्ष् 1A 12 मध्यदिनम् mid day 13 सवनम् bathing, sacrifice 14 विधि m ceremony 15 वेला f time, hour 16 मध्यदिनसवनविधिवेला = मध्यदिने सवन तस्य विधिवेला 17 *अतिक्रामेत् it might pass, विधिलिङ् अति + √क्रम् 1U 4P* 18 आगच्छ come thou! लोट् आ + √गम 1P 19 भूमि f ground 20 पांशुल a dusty 21 भूप्रदेश ground 22 प्रकाश clear 23 चक्रचिह्नम wheel mark as the sign of an emperor पदपङ्क्ति f line of foot prints

Hermit— I have been ordered by Kaushika the head of our monastery thus, "My child Shandilya, by order of his father, the King of the Siddhas, Mitravasu just now went out to see Prince Jimūtavāhana, the future Emperor of the Vidyādharas who is somewhere here on the mountain Malaya in order to make him the bridegroom of his sister Malayavati And while waiting for him, Malayavati might miss the hour of her mid day ablution ceremony So call her back" Now I am going to the hermitage— altar of Gauri (*Walking round and looking at the ground, surprised*) O! To whom does this line of foot prints marked with the clear Chakra signs on the dusty ground belong?
(Pointing Jimūtavāhana in front)

नूनमस्यैवेयं महापुरुषस्य । तथाहि ।

उष्णीषः स्फुट एष मूर्धनि विभात्यूर्णेयमन्तर्भ्रुवो-
श्चक्षुस्तामरसानुकारि हरिणा वक्षःस्थलं स्पर्धते ।
चक्राङ्कं च यथा पदद्वयमिदं मन्ये तथा कोऽप्ययं
नो विद्याधरचक्रवर्तिपदवीमप्राप्य विश्राम्यति ॥१८॥

अथवा कृतं सन्देहेन । व्यक्तमेतेनैव जीमूतवाहनेन भवितव्यम् ।

1 अस्य इयम् — जीमूतवाहनस्य पत्नीदिशा 2 महापुरुष great man 3 उष्णीष diadem mark of a crown 4 मूर्धन् m (loc s मूर्धनि मूर्ध्नि) head 5 विभाति it shines वि + √भा 2 P 6 ऊर्णा f wool circle of hair between the eye brows 7 अन्तर् and inside, betwixt between 8 भ्रू f (loc. d भ्रुवः) eye brow 9 तामरसम् red lotus 10 अनुकारिन् a imitating, resembling 11 तामरसानुकारि — तामरसस्य अनुकारि 12 हरि m (ins s हरिणा) lion 13 वक्षस् n bosom, chest 14 स्थलम् place 15 स्पर्धते it rivals, defies √स्पर्ध 1A 16 अङ्क mark 17 चक्राङ्कम् = चक्राङ्को यस्मिन् तत् 18 पदद्वयम् a pair of feet 19 मन्ये I think √मन् 4A 20 नो = न not 21 पदवी f way, rank 22 अप्राप्य not having obtained, gerund अ + प्र + √आप् 5P 23 व्यक्तम् evidently 24 जीमूतवाहनेन भवितव्यम् (भाव प्रयोग) he must be जीमूतवाहन, एष जीमूतवाहनः भवेत्

एष स्फुटः उष्णीषः मूर्धनि विभाति इयं ऊर्णा भ्रुवोः अन्तः चक्षुः तामरसानुकारि वक्षःस्थलं हरिणा स्पर्धते यथा इदं पदद्वयं चक्राङ्कं तथा मन्ये अयं कः अपि अयं विद्याधरचक्रवर्तिपदवीं अप्राप्य नो विश्राम्यति ॥ शार्दूलविक्रीडितम् ।

This surely belongs to this illustrious man, for

> This bright mark of a crown shines on his head this circle of hair appears betwixt his eye brows his eyes resemble a red lotus, his chest can defy a lion and as this pair of his feet bear Chakra signs, I consider whoever he may be he will not rest till he attains to the rank of the Vidyadhara Emperor

Or no doubt He must be, it is evident, Jimutavahana

अनया जघनाभोगभरमन्थरयानया ।

अन्यतोऽपि व्रजन्त्या मे हृदग्रे निहितं पदम् ॥ २० ॥

विदूषक :—भोः, दृष्टं त्वया प्रेक्षितव्यम् । तदिदानीं मध्याह्नसूर्यकिरणसन्तापद्विगुणित इव मे उदराग्निर्धमधमायते । तदेहि निष्क्रामावः । येन ब्राह्मणोऽतिथिर्भूत्वा मुनिजनसकाशात् लब्धैः कन्दमूलफलैरपि यावत् प्राणधारणं करोमि ।

नायक :—(ऊर्ध्वमवलोक्य) मध्यमध्यास्ते नभस्तलस्य भगवान् सहस्रदीधितिः ।

1 जघनम् hip 2 आभोग : expanse. 3 भर burden, weight 4 मन्थर lazy, slow. 5 यानम् moving. 6 जघनाभोगभरमन्थरयानया = जघनस्य आभोग: तस्य भरेण म थर यान यस्या तया 7 अन्यतस् in other direction. 8 व्रजत् (ins. s. f व्रजन्त्या) walking; Pres Part √ व्रज् 1 P. 9 निहित placed; PP. नि + √ धा 3U. 10 मध्याह्न midday. 11 सूर्य : the sun. 12 किरण ray 13 सन्ताप : heat; 14 द्विगुणित a. redoubled. 15 उदरम् belly, stomach. 16 मध्याह्नसूर्यकिरणसन्तापद्विगुणित = मध्याह्ने य सूर्य तस्य किरणसन्तापेन द्विगुणित: . 17 अग्नि : m. fire. 18 धमधमायते it blows like bellows, नामधातु 19 सकाशात् from. 20 प्राणधारणम् maintenance of life. 21 ऊर्ध्वम् ind overhead 22 अध्यास्ते it occupies; अधि + √ आस् 2 A. 23 नभस्तलम् sky. 24 सहस्रदीधिति : m. thousand-rayed sun

अन्यत व्रजन्त्या अपि अनया जघनाभोगभरमन्थरयानया पद मे हृदये निहितम् ॥ अनुष्टुप्

By her whose gait is slow on account of the burden of her expansive hips one step is placed in my bosom, even though she is going in other direction

Jester— O friend, you have seen what is to be seen But the fire of my belly, redoubled, as it were, by the heat of the sun-beams in the mid day, blows like bellows. Come, then, let us move away. Hence I, a Brahmin must try to support my life in the meantime with Kanda roots and fruits to be obtained from the hermits by dint of becoming *a guest.*

Hero— (looking overhead) The thousand-rayed lord occupies the zenith of the firmament.

तथाहि,

तापात्तत्क्षणघृष्टचन्दनरसौ पाण्डू कपोलौ वहन्
संसक्तैर्निजकर्णतालपवनैः संवीज्यमानाननः ।
सम्प्रत्येष विशेषसिक्तहृदयो हस्तोज्झितैः शीकरैः
गाढायल्लकदुःसहामिव दशां धत्ते गजानां पतिः ॥ २१ ॥

(निष्क्रान्ताः सर्वे)

*समाप्तः प्रथमोऽङ्कः*

1 ताप : (abl. s. तापात्) heat. 2 तत्क्षणम् instantly. 3 घृष्ट crushed, rubbed; PP. √ घृष् 1 P. 4 रस : juice. 5 तत्क्षणघृष्टचन्दनरसौ = तत्क्षण घृष्टः चन्दनरस : याभ्यां तौ. 6 पाण्डु a. (d m. पाण्डू) pale white. 7 कपोल : (d. कपोलौ) cheek. 8 वहत् (nom. s. m. वहन्) bearing; Pres. Part. √ वह् 1 P. 9 संसक्त attached, clung; PP. सम् + √ सञ्ज् 1 P. 10 निज a. one's own 11 कर्णताल : flapping the ears. 12 पवन : wind. 13 निजकर्णतालपवनैः : = निजकर्णयोः तालजैः : पवनैः · 14 संवीज्यमान being fanned; Pass Pres. Part सम् + √ वीज् 10 U. 15 आननम् face. 16 संवीज्यमानाननः = संवीज्यमान आनन यस्य स 17 सम्प्रति now. 18 विशेष a. ad. special, specially. 19 सिक्त sprinkled; PP. √ सिच् 6 U. 20 विशेषसिक्तहृदय : = सविशेष सिक्त हृदयं यस्य स. 21 हस्त: trunk. 22 शीकर : spray. 23 गाढ deep. 24 आयल्लक : longing, impatience. 25 दुःसह a. (acc. s. f दुःसहाम्) unbearable. 26 गाढायल्लकदुःसहाम् = गाढेन आयल्लकेन दुःसहाम्. 27 दशा f condition. 28 धत्ते he bears; √ धा 3 U. 29 गज : (gen. P. गजानाम्) elephant. 30 पति · m lord.

तापात् तत्क्षणघृष्टचन्दनरसौ पाण्डू कपोलौ वहन् संसक्तैः निजकर्णतालपवनैः संवीज्यमानाननः हस्तोज्झितैः शीकरैः विशेषसिक्तहृदयः सम्प्रति एषः गजानां पतिः गाढायल्लकदुःसहां दशां धत्ते इव ॥

Whereas

Beating the two cheeks pale white with the sap of a Sandal tree rubbed due to the heat, fanning his face with the breeze caused by the flapping of his own ears, and now sprinkling a spray specially upon his chest with his trunk, the lordly elephant seems to be in a condition unbearable due to his burning impatience.

(Exeunt omnes) *Here ends Act One*

(मलयवतीं निरूप्य) अये, इयमपि राजपुत्री मलयवती ।
(उभौ विलोक्य) चिरात्खलु युक्तकारी विधिः स्याद्यदि युगलमेतदन्योन्यानुरूपं घटयेत् । (उपसृत्य नायकं निर्दिश्य) स्वस्ति भवते ।

नायकः—भगवन्, जीमूतवाहनोऽभिवादयते । (उत्थातुमिच्छति)

तापसः—अलमलमभ्युत्थानेन । ननु सर्वस्याभ्यागतो गुरुरिति भवानेवास्माकं पूज्यः । तद्यथासुखं स्थीयताम् ।

नायिका—आर्य, प्रणमामि ।

1 कारिन् a (nom s m कारी) doing, performing 2 विधि m destiny. 3 स्यात् it should be, विधिलिङ् √अस् 2p 4 युगलम् a pair 5 अन्योन्य a mutual, one another 6 घटयेत् it would join or unite, णिजन्तात् विधिलिङ् √घट् IA 7 अभिवादयते he salutes, णिजन्तात् लट् अभि + √वद् IP 8 उत्थातुम् to rise, inf उद् + √स्था IP 9 अलम् ind (+ ins & gerund) enough of, away with 10 अभ्युत्थानम् (ins s अभ्युत्थानेन) rising in honour 11 अभ्यागत guest 12 गुरु a important, m teacher 13 सर्व (gen s सर्वस्य) all everyone 14 अस्माकम् = अस्माभिः 15 पूज्य a adorable 16 तत् = तस्मात् कारणात्, therefore 17 यथासुखम् ad as happily, as much in ease 18 स्थीयताम् (भाव प्रयोग) = भवान् तिष्ठतु, कर्मणि लोट् √स्था IP 19 प्रणमामि I salute you, प्र + √नम् IU

(Observing Malayavati) Oh here is the princess, Malayavati! (Looking at both) Indeed, after a long time destiny would be doing what is proper, if it should unite this pair, suited to each other (Advancing, towards the hero) Hail to your Honour!

Hero – O revered one, Jimūtavāhana salutes you! (He intends to rise)

Hermit – Pray do not rise! Really a guest is valuable to everyone, Your Honour is to be honoured by us Therefore, be seated in ease

Heroine – Sir, I salute you!

**तापस** :—(नायिकां निर्दिश्य) वत्से, अनुरूपभर्तृगामिनी भूयाः। राजपुत्रि, त्वामाह कुलपतिः कौशिकः यथा। 'अतिक्रामति मध्यन्दिनसवनवेला, तत् त्वरितमागम्यताम्' इति।

**नायिका**—यद् गुरुराज्ञापयति। (आत्मगतम्)

एकतो गुरुवचनमन्यतो दयितदर्शनसुखानि।
गमनागमनाधिरूढमद्यापि दोलायते मे हृदयम् ॥ १६ ॥

(उत्थाय निःश्वस्य सलज्जं सानुरागञ्च नायकं पश्यन्ती तापससहिता निष्क्रान्ता।)

**नायक** :—(सोत्कण्ठं निःश्वस्य नायिकां पश्यन्)

1 गामिन् a (nom s f गामिनी) going, attaining, united with 2 भूयाः mayest thou be, आशीर्लिङ् √ भू 1 P 3 त्वरितम् ad quickly 4 त्वया आगम्यताम् (कर्मणि लोट् आ + √ गम् 1 P) = त्वं आगच्छ 5, एकतस् (with अन्यतस्) on one side on the other side 6 वचनम् word. 7 गुरुवचनम् = गुरोः वचनम् 8 दयित lover 9 दर्शनम् sight 10 दयितदर्शनसुखानि = दयितस्य दर्शनसुखानि 11 गमनम् going 12 अगमनम् not going 13 अधिरूढ mounted, PP अधि + √ रुह् 1 P 14 गमनागमनाधिरूढम् = गमनं अगमनं च अधिरूढम् 15 दोलायते it swings, it is restless, नामधातु √ दोलाय A. (from दोला swing) 16 हृदयम् heart 17 निःश्वस्य having sighed, gerund, नि + √ श्वस् 2 P 18 सहित with, accompanied by 19 तापससहिता = तापसेन सहिता.

एकतः गुरुवचनं अन्यतः दयितदर्शनसुखानि गमनागमनाधिरूढं मे हृदयं अद्यापि दोलायते ॥ आर्या

Hermit— (towards the heroine) My dear child, I wish you may acquire a worthy husband O princess, Patriarch Kaushika tells you to come back quickly, as the hour of mid day ablution passes

Heroine— As my preceptor orders (To herself) On one side is my preceptor's bidding and on the other the raptures of seeing my loving one my heart, hesitating whether to go or not, swings even now (Rising with a sigh and looking at the hero bashfully and lovingly she moves away with the hermit)

Hero— (longingly sighing and looking at the heroine)

# ❀ द्वितीयोऽङ्कः ❀

(ततः प्रविशति चेटी)

चेटी — आज्ञप्तास्मि भर्तृदारिकया मलयवत्या यथा 'हञ्जे मनोहरिके, अद्य चिरयति मे भ्राताऽऽर्यो मित्रावसुः । तद् गत्वा जानीहि किमागतो न वा' इति । (परिक्रामति । नेपथ्याभिमुखं दृष्ट्वा) का पुनरेषा त्वरितत्वरितमित एवागच्छति । (निरूप्य) कथं चतुरिका । (ततः प्रविशति द्वितीया चेटी)

प्रथमा—(उपसृत्य) हला चतुरिके, किंनिमित्तं पुनर्मां परिहृत्यैवं त्वरितया गम्यते ।

द्वितीया—हला मनोहरिके, आज्ञप्तास्मि भर्तृदारिकया मलयवत्या 'हञ्जे चतुरिके, कुसुमावचयपरिश्रमनिःसहं मे शरीरं शरदातपजनित इव मे सन्तापोऽधिकतरं बाधते ।

1 द्वितीय a Second 2 चिरयति he delays, नामधातु √चिरय P 3 भ्रातृ (nom. S भ्राता) brother 4 जानीहि find out, know thou! लोट् √ज्ञा 9 P 5 त्वरितत्वरितम् very hurriedly 6 निमित्तम् cause, reason 7 किं निमित्तम् why 8 परिहृत्य having avoided, gerund परि+हृ 1 U 9 गम्यते ((भावे प्रयोग) it is gone by you, viz you go 10 अवचय gathering 11 परिश्रम fatigue 12 निःसह unbearable. 13 मे—मम 14 कुसुमावचयपरिश्रमनिःसहम्=कुसुमानां अवचयः तस्य परिश्रमः तेन निःसहम् 15 शरीरम् body 16 शरद् f autumn 17 जनित occasioned, caus PP √जन् 4 A 18 अधिकम् very much 19 बाधते it torments √बाध् 1 A

## ACT TWO

(Then enters a maid)

Maid — 'O maid Manoharika, my noble brother Mitravasu is late today So go, and ascertain whether he has come or not," thus I have been ordered by Princess Malayavati (She walks about Turning her eyes to the curtain) But who is she that is coming here very hurriedly? (observing) How it is Chaturikā! (Then appears the second maid)

First — (approaching) Friend Chaturika, but why are you going hurriedly, even avoiding me thus?

Second — Oh friend Manoharikā, I have been ordered by Princess Malayavatī as follows — 'O maid Chaturikā as if occasioned by the autumnal heat of the sun my fever exceedingly vexes my body which is hard to bear on account of fatigue of my flower gathering

तद् गच्छ त्वं बालकदलीपत्रपरिक्षिप्ते चन्दनलतागृहे चन्द्रमणिशिलातलं सज्जीकुरु' इति । अनुष्ठितश्च मया यथाऽऽज्ञप्तम् । यावद्गत्वा भर्तृदारिकायै निवेदयामि ।

प्रथमा—यद्येवं तल्लघु गत्वा निवेदय येनास्यास्तत्र गताया उपशाम्यति सन्तापः ।

द्वितीया—(विहस्यात्मगतम्) नेदृशोऽस्याः सन्तापो य एवमुपशमिष्यति । विविक्तरमणीयं चन्दनलतागृहं प्रेक्षमाणाया अधिकतरः सन्तापो भविष्यतीति तर्कयामि । (प्रकाशम्) तद्गच्छ त्वम् । अहमपि सज्जीकृतं मणिशिलातलमिति गत्वा भर्तृदारिकायै निवेदयामि । (इति निष्क्रान्ते ।) ॥ इति प्रवेशकः ॥

1 कदली f. plantain tree. 2 पत्रम् leaf. 3 परिक्षिप्त surrounded, PP. परि+√क्षिप् 6 U. चन्दनलतागृहम्=sandal creeper bower. 5 चन्द्रमणिशिला f. moon-stone. 6 सज्जीकुरु prepare thou, लोट् सज्जी+√कृ 8 U. 7 अनुष्ठित carried out, PP. अनु+√स्था 1 P. 8 निवेदयामि I report; णिजन्तात्लट् नि+√विद् 2 P. 9 लघु quickly. 10 येन so that 11 उपशाम्यति it calms down, उप+√शम् 4 P. 12 य.=सन्ताप 13 उपशमिष्यति it will cease, लृट् उप+√शम् 4 P. 14 विविक्त solitary. 15 भविष्यति it will be; लृट्√भू 1 P. 16 प्रवेशक. interlude

Do you, therefore, go to the bower of sandal-creepers, surrounded by young Banana leaves, and prepare a moon-stone slab there." And I did as I was asked Now I am going to report to the Princess.

First — If so, then, go quickly and inform her so that her fever will be subsided, when she goes there.

Second — (to herself, laughing) Her fever is not such as may be subsided in this way. When she beholds the bower of sandal-creepers solitary and pleasant, her fever will be redoubled, I do imagine. (Aloud) Then, you may go. I, too, shall go back and inform the princess that the moon-stone slab is ready. (Exit Both)

END OF INTERLUDE

(तत प्रविशति सोत्कण्ठा मलयवती चेटी च)

मलयवती—(निःश्वस्यात्मगतम्) हृदय, तथा नाम तस्मिञ्जने यल्लज्जया मां पराङ्मुखीकृत्येदानीं तत्रात्मना गतमसीत्यहो ते आत्मंभरित्वम् । (प्रकाशम्) हञ्जे चतुरिके, आदिश मे भगवत्या आयतनम् ।

चेटी—(आत्मगतम्) चन्दनलतागृहं प्रस्थिता भणति भगवत्या आयतनम् । (प्रकाशम्) चन्दनलतागृहं भर्तृदारिका प्रस्थिता ।

नायिका—(सलज्जम्) हञ्जे सुष्ठु स्मारितम् । तदेहि तत्रैव गच्छावः ।

चेटी—एतु एतु भर्तृदारिका । (नायिका अन्यतो गच्छति)

चेटी—(पृष्ठतो दृष्ट्वा सोद्वेगमात्मगतम्) अहो अस्याः शून्यहृदयत्वम् । कथं तदेव देवीभवनं प्रस्थिता (प्रकाशम्) भर्तृदारिके, नन्वितश्चन्दनलतागृहम् । तदित इत एहि ।

1 उत्कण्ठा f anxiety, uneasiness 2 सोत्कण्ठा=उत्कण्ठासहिता anxious 3 तस्मिञ्जने=तस्मिन् नायके 4 इदानीम now 5 आत्मम्भरित्वम् selfishness 6 आदिश show thou! लोट् आ+√दिश् 6 U 7 प्रस्थित set out for departed for PP प्र+√स्था 1 P 8 सुष्ठु ind excellently 9 स्मारित reminded caus PP √स्मृ 1 P 10 पृष्ठतस from behind 11 सोद्वेगम् sorrowfully 12 शून्यहृदयत्वम absent mindedness

(Then enter uneasy Malayavati and her maid)

Malayavati—(sighing to herself) O heart, indeed at that time having made me turn away abashed in that way from him, now you are gone to him Alas! your selfishness! (Aloud) Maid Chaturikā, show me the altar of the goddess

Maid — (to herself) Though going to the bower of sandal creepers, she speaks about the altar of the goddess (Aloud) Your Highness has set out for the bower of sandal creepers

Heroine — (abashed) O maid, excellently reminded me Come, then we shall go there

Maid — May you come, princess! (The heroine moves in another direction)

Maid — (looking at her back, sadly to herself) Alas her absent mindedness! How she is moving towards the divine altar! (Aloud) O princess, indeed, the bower of sandal-creepers lies in this direction So pray come this way, this way

(नायिका सविलक्षस्मितं तथा करोति)

चेटी—इदं चन्दनलतागृहम् । तत्प्रविश्य चन्द्रमणिशिलातले उपविश्य समाश्वसितु भर्तृदारिका । (उभे उपविशतः ।)

नायिका—(निःश्वस्यात्मगतम्) भगवन् कुसुमायुध, येन त्वं रूपशोभया निर्जितोऽसि तस्य त्वया न किमपि कृतम् । मम पुनरनपराद्धाया अप्यबलेति कृत्वा प्रहरन्न लज्जसे ।

(आत्मानं निर्वर्ण्य मदनावस्थां नाटयन्ती प्रकाशम्) हञ्जे किं पुनर्घनपल्लवनिरुद्धसूर्यकिरणं तदेव चन्दनलतागृहं न मेऽद्यापि सन्तापदुःखमपनयति ।

चेटी—जानाम्यहमत्र सन्तापस्य कारणम् । किं पुनरसम्भावनीयमिति भर्तृदारिका न तत् प्रतिपत्स्यत इति ।

1 विलक्ष a embarrassed 2 स्मित m smile 3 समाश्वसितु may she take heart, लोट् समा+√श्वस् 2 P 4 कुसुमायुध cupid 5 येन=नायकेन 6 रूपशोभा f (ins S. रूपशोभया) beauty of form 7 निर्जित defeated, PP निस्+√जि 1 P 8 तस्य=तस्मै. 9 अनपराद्ध not offended 10 अबला weak woman 11 प्रहरत् (nom s m प्रहरन्) striking, pres part प्र+√हृ 1 U 12 लज्जसे thou art ashamed, √लज्ज 6 A. 13 निर्वर्ण्य having looked at, gerund निस्+√वर्ण 10 U 14 मदनावस्था f love-sick condition 15 पल्लव m n leaf, foliage 16 निरुद्ध obstructed, PP नि+√रुध् 7 U 17 घनपल्लवनिरुद्धसूर्यकिरणम्=घनैः पल्लवैः निरुद्धाः सूर्यकिरणाः यत्र तत् 18 असम्भावनीय improbable 19 प्रतिपत्स्यते she acknowledges लृट् प्रति+√पद 4 A

(The heroine does so with a smile of embarrassment)

Maid — This is the sandal creeper bower Entering it and sitting on the moon stone slab, may Your Highness take heart (Both sit down)

Heroine — (with a sigh to herself) Ah God of Love! Being defeated by him in point of physical beauty, you have not done anything to him, but regarding me as a weak sex and striking at me, you do not feel ashamed, though I did not offend you (Looking at her own self and gesticulating her love sick condition, aloud) O maid, why even now this bower of sandal creepers where the sunbeams are barred by dense foliage does not remove my pain of fever?

Maid — I know the cause of your fever here But will you deny it as improbable?

नायिका—(आत्मगतम्) लक्षितेवाहमेतया, तथापि पृच्छामि।

(प्रकाशम्) हञ्जे, किं तद्यत् प्रतिपद्यते तत् कथय तावत् किं तत् कारणम्।

चेटी— एष ते हृदयस्थितो वरः।

नायिका—(सहर्षं ससम्भ्रममुत्थाय द्वित्राणि पदानि गत्वा) कुत्र कुत्र सः ?

चेटी— (उत्थाय सस्मितम्) भर्तृदारिके, स कः।

नायिका—(सलज्जमुपविश्याधोमुखी तिष्ठति)

चेटी— भर्तृदारिके, एतदस्मि वक्तुकामा। एष ते हृदयस्थितो वर एव देव्या दत्तः इति स्वप्ने प्रस्तुते यः तत्क्षणमेव प्रविमुक्तकुसुमबाण इव मकरध्वजो भर्तृदारिकया दृष्टः स तेऽस्य सन्तापस्य कारणम्।

1 लक्षित (f s लक्षिता) detected, PP √लक्ष् 1A 10U 2 तथापि nevertheless, yet 3 पृच्छामि I ask, √प्रच्छ् 6P 4 द्वित्राणि पदानि a few steps 5 सम्भ्रम confusion 6 ससम्भ्रमम् confusedly 7 अधस् below down 8 अधोमुख a (nom s f अधोमुखी) having a downcast face 9 वक्तुकाम,—कामा f (final म of the infinitive is dropped when used with काम) desirous of speaking 10 प्रस्तुत extolled, PP प्र+स्तु 2U 11 स्वप्ने प्रस्तुते (loc abs ) when the dream was extolled 12 क्षणम् at once, for a moment 13 प्रविमुक्त left, abandoned, PP प्रवि+√मुच् 6P 14 बाण arrow 15 प्रविमुक्तकुसुमबाण = प्रविमुक्ता कुसुमबाणा येन स 16 मकरध्वज cupid

Heroine— (to herself) It seems that I am just detected by her Nevertheless I shall ask (Aloud) O maid, tell me what is to be admitted and what its cause is

Maid — There is your bridegroom fixed in your heart

Heroine—(joyfully rising in confusion and stepping a few steps) Where, where is he ?

Maid — (rising with a smile) O princess, who is he ?

Herione— (blushing sits down, her face downcast)

Maid — O princess I should like to say this Just when your dream was extolled that the goddess has bestowed upon you a bridegroom of your heart, just at that moment you saw him as if he were Cupid who has abandoned his flower arrows He is the cause of your fever

येनैतत् स्वभावशीतलमपि चन्दनलतागृहं न ते सन्तापदुःखमपनयति ।

नायिका—(चतुरिकाया अलकं सज्जयन्ती) हञ्जे, चतुरिका खलु त्वम् । किं तेऽपरं प्रच्छाद्यते । तत् कथयिष्यामि ।

चेटी— भर्तृदारिके, इदानीमेव कथितममुना वरालापमात्रजनितेन सम्भ्रमेण । तन्मा सन्तप्यस्व । यद्यहं चतुरिका तदा सोऽपि भर्तृदारिकामप्रेक्षमाणो न मुहूर्तमप्यभिरंस्यते । तदेतदपि मया लक्षितम् ।

नायिका— (सास्रम्) हञ्जे, कुतोऽस्माकमियन्ति भागधेयानि ।

चेटी—भर्तृदारिके, मैवं भण । किं मधुमथनो वक्षःस्थलेन लक्ष्मीमनुद्वहन् निर्वृतो भवति ।

1 स्वभाव nature 2 शीतल cool 3 अलक hair 4 सज्जयत् (nom s f सज्जयन्ती) (decorating, preparing, pres part नामधातु √सज्जय 5 अपर a other 6 प्रच्छाद्यते it is concealed, कर्मणि लट् प्र+√छद् 10U 7 आलाप talk 8 सन्तप्यस्व torment thou! लोट् सम+√तप् 1P 10U 9 मुहूर्तम् for a moment 10 अभिरंस्यते he will gratify himself; लृट् अभि+√रम 1A 11 इयत् a (nom P N इयन्ति) this much, so much, much 12 भागधेयम् luck, good fortune. 13 मधुमथन slayer of मधु, i.e. विष्णु 14 लक्ष्मी f goddess of wealth 15 निर्वृत satisfied

On that account this Sandal-creeper bower, though cool by nature, does not dispel your painful fever

Heroine—(arranging Chaturikā's hair) O Maid, you are indeed a Chaturikā (i e sharp witted) How can I conceal anything further? I will tell you all about it

Maid — O princess, it has been just now told by that confusion caused by a mere mention of the word 'bridegroom' So don't torment yourself If I am Chaturikā, he too, will not rest satisfied even for a moment without seeing you I have detected this, too

Heroine—(with tears) O maid, whence such a luck for us?

Maid — O princess, say not so! Would Visnu be happy, without bearing Luxmi upon his bosom?

नायिका—कि सुजनः प्रियं वर्जयित्वाऽन्यद् भणितुं जानाति। सखि, अतोऽपि सन्तापोऽधिकतरं बाधते, यतः स महानुभावो वाङ्मात्रेणापि मया न सम्भावितः। सोऽप्यकृतप्रतिपत्तिम-दक्षिणेति मां सम्भावयिष्यति। (इति रोदिति)

चेटी— भर्तृदारिके, मा रुदिहि। (आत्मगतम्) अथवा कथं न रोदिष्यति। अधिकोऽस्या हृदयस्य सन्तापोऽधिकतरं बाधते।
तत् किमिदानीमत्र करिष्ये। तद्यावच्चन्दनलतापल्लव-रसमस्या हृदये दास्ये। (उत्थाय चन्दनपल्लवं गृहीत्वा निष्पीड्य हृदये ददाति)
भर्तृदारिके, ननु भणामि मा रुदिहि।

1 सुजन good people 2 प्रिय dear, agreeable 3 वर्जयित्वा having excluded, gerund√वृज 10U 4 सखी f (voc s सखि) friend 5 सम्भावित honoured, caus PP सम+√भू 1P 6 प्रतिपत्ति f honour, respect 7 अकृतप्रतिपत्तिम=अकृता प्रतिपत्ति यया सा 8 अदक्षिण a (अदक्षिणा f) discourteous 9 रोदिति she weeps, √रुद 2P 10 करिष्ये I shall do, लृट√कृ 8U 11 अत्र in this case 12 दास्ये I shall give or place, लृट√दा 3U 13 निष्पीड्य having squeezed, gerund निस+√पीड 10U 14 रुदिहि weep thou, √रुद 2P

Heroine— Do the good people know to speak anything else except what is sweet? My torment agonizes me all the more, because the illustrious man was not honoured by me by a mere lip service Furthermore, he might regard me who did not honour him as a discourteous one (she weeps)

Maid — O princess, weep not! (To herself) Or how could she not help crying? The overwhelming torment of her heart pains her very much So what shall I do now in this case? In the meantime I shall apply the juice of sandal creeper leaves on her bosom (she rises and squeezing a sandal leaf places it on her bosom) Ah princess, I say please do not weep

अयं खल्वीदृशश्चन्दनरस एभिरनवरतपतद्भिर्वाष्पविन्दुभिरुष्णी-
कृतो न ते हृदयस्यैतं सन्तापमपनयति ।

( कदलीपत्रमादाय वीजयति । )

नायिका—(हस्तेन निवारयति) सखि, मा वीजय । उष्णः खल्वेष
कदलीदलमारुतः ।

चेटी—भर्तृदारिके, मा अस्य दोषं कथय ।

करोषि घनचन्दनलतापल्लवसंसर्गशीतलमपीमम् ।
निःश्वासैस्त्वमेव कदलीदलमारुतमुष्णम् ॥१॥

नायिका— (सास्रम्) सखि, अस्ति कोऽपि अस्य सन्तापस्योपशमोपायः ।

1 अनवरत a continuous ad continuously (अनवरतम्) 2 पतत् (ins p m पतद्भि) falling, pres part √पत् 1P 3 बाष्प m n tear 4 बिन्दु m (ins P बिन्दुभि) drop 5 निवारयति she prevents, णिजन्तात् ल्ट नि+√वृ 1 5 9U 6 उष्ण hot 7 दल m n leaf, blade 8 मारुत wind 8 समर्ग contact 9 घनचन्दनलतापल्लवससर्गशीतलम्=घना या च दनलता तस्या पल्लवाना ससर्गेण शीतलम 10 नि श्वास sigh 11 उष्णीकृत heated, PP उष्णी+√कृ 8U 12 उपशम extinction 13 उपाय means.

त्व एव घनचन्दनलतापल्लवससर्गशीतल अपि इम कदलीदलमारुत नि श्वासै उष्ण करोषि ॥

Indeed, this sandal juice being heated by these continually falling tear drops, does not extinguish the fever of your heart (Taking a plantain leaf, she fans )

Heroine— (preventing with her hand) My friend, do not fan This wind of the plantain leaf is really hot

Maid — Princess, do not mention its defect

With your sighs you make this
wind of the plantain leaf hot,
though this is cool due to its
contact with the leaves of the
dense sandal creepers

Heroine— (shedding tears) Friend, is there any means to extinguish this fever?

चेटी—भर्तृदारिके, अस्ति। यदि सोऽत्रागच्छति।

(तत प्रविशति नायको विदूषकश्च)

नायकः— व्यावृत्यैव सितासितेक्षणरुचा तानाश्रमे शाखिनः
कुर्वत्या विटपावसक्तविलसत्कृष्णाजिनौघानिव।
यद् दृष्टोऽस्मि तया मुनेरपि पुरस्तेनैव मय्याहते
पुष्पेषो भवता मुधैव किमिति क्षिप्यन्त एते शराः॥ २॥

1 व्यावृत्य having turned back; gerund व्या+√वृत् IA. 2 सित white 3 असित not white, black. 4 ईक्षणम् age. 5 रुच् f lustre, hue 6 सितासितेक्षणरुचा = सिते असिते च ये ईक्षणे तयो रुचा. 7 शाखिन् m (acc P शाखिन) tree 8 कुर्वत् (ins. s. f कुर्वत्या) making, Pres Part. √कृ 9 विटप branch 10 अवसक्त suspended, attached, PP. अव + √सञ्ज् IP 11 *विलसन् a glittering (√लस् IP.) 12 कृष्ण spotted deer* 13 अजिनम् skin. 14 ओघ (acc. P. ओघान्) mass. 15 विटपावसक्तविलसत्कृष्णाजिनौघान्=विटपेषु अवसक्तानि विलसन्ति कृष्णाना यानि अजिनानि तेषा ओघ येषु तान्. 16 यत् (अवलोकनम्) तेन. 17 मुने=तापसशाण्डिल्यस्य. 18 मयि आहते (loc abs) when I was striken. 19 पुष्पेषु cupid, पुष्पनिर्मिता इषव यस्य स 20 शर arrow. 21 क्षिप्यन्ते they are thrown, √क्षिप्

सितासितेक्षणरुचा आश्रमे तान् शाखिन विटपावसक्तविलसत्कृष्णाजिनौघान् इव कुर्वत्या तया मुने पुर अपि व्यावृत्य एव यत् दृष्ट अस्मि तेन एव मयि आहते, भवता किमिति एते शरा मुधा एव क्षिप्यन्ते पुष्पेषो[1] शार्दूलविक्रीडितम्।

Maid— Yes, princess, *there is, if he comes here.*
(Thereupon the hero and his clown enter.)

Hero— With the lustre of her white and dark eyes, making the trees in the *hermitage appear full of the glittering skins of spotted antelopes* suspended *from* their boughs, she saw *me* by turning back even in the presence of the sage: when I am already striken by her glance, why do you in vain throw these arrows on me? O god of Love!

विदूषक :— भो वयस्य, कुत्र ते गतं तद् धीरत्वम् ।

नायक :— वयस्य, ननु धीर एवास्मि । कुतः

नीताः किं न निशाः शशाङ्कधवलाः नाघ्रातमिन्दीवरं
किं नोन्मीलितमालतीसुरभयः सोढाः प्रदोषानिलाः ।
झङ्कारः कमलाकरे मधुलिहां किं वा मया न श्रुतः
निर्व्याजं विधुरेष्वधीर इति मां केनाभिधत्ते भवान् ॥ ३ ॥

1 धीरत्वम् strong-mindedness, mental strength 2 धीर firm, strong-mined. 3 नीत led, passed, PP. √नी 1U. 4 निशा f. night. 5 शशाङ्क moon. 6 धवल bright, white. 7 शशाङ्कधवला = शशाङ्केन धवला . 8 आघ्रात smelled, PP. आ + √घ्रा 1P. 9 इन्दीवरम् blue lotus. 10 उन्मीलित opened, blossoming. 11 मालती f. kind of jasmine 12 सुरभि (m.p सुरभय) fragrant 13 उन्मीलितमालतीसुरभय = उन्मीलिताभि मालतीभि सुरभय . 14 सोढ (nom p m. सोढा ) borne, endured, PP √सह् 1A. 15 प्रदोष night-fall. 16 अनिल (nom P. अनिला ) wind 17 आकर mine, mass 18 मधुलिह m. (gen. P. मधुलिहाम्) bee 12 श्रुत heard, PP. √श्रु 5P. 20 निर्व्याजम् ad plainly, candidly. 21 विधुर (m p loc विधुरेषु) love-lorn 22 केन = केन कारणेन,, why. 23 अभिधत्ते he speaks, लट् अभि + √धा 3U

शशाङ्कधवला निशा न नीता किं इन्दीवर न आघ्रात उन्मीलितमालतीसुरभय प्रदोषानिला न सोढा किं कमलाकरे मधुलिहा झङ्कार वा मया न श्रुत किं विधुरेषु अधीर इति केन भवान् मा निर्व्याज अभिधत्ते ॥ शार्दूलविक्रीडितम्

Jester— Oh friend, where has your mental strength gone ?

Hero— Friend, I am just firm, for the nights bright under the moon have I not passed, the blue lotus have I not smelled, the evening breezes fragrant with the blooming jasmines have I not borne, or have I not listened to the humming of the bees in the lotus-beds ? Why, then, do you plainly refer me as weak-minded among the love-lorn ?

(विचिन्त्य) अथवा मृषा नाभिहितं, वयस्यात्रेय। नन्वधीर एवास्मि।

स्त्रीहृदयेन न सोढाः क्षिप्ताः कुसुमेषवोऽप्यनङ्गेन।
येनाद्यैव पुरस्तव वदामि धीर इति स कथमहम्॥

विदूषकः— (आत्मगतम्) एवमधीरत्वं प्रतिपद्यमानेनाख्यातो महाननेन हृदयस्यावेगः। तत् कुत्रैव एनमपक्षिपामि। (प्रकाशम्) भो वयस्य, कथं पुनरद्य त्वं लघ्वेव गुरुजनं शुश्रूषित्वा इहागतः।

नायकः— वयस्य, स्थाने खल्वेष प्रश्नः। कस्य वाऽन्यस्यैतत् कथनीयम्।

1 मृषा ind in vain falsely 2 अभिहित said, PP अभि+√धा 3U 3 स्त्रीहृदयेन स्त्रीगत हृदय अथवा स्त्रिया इव हृदय यस्य तेन 4 क्षिप्त (nom p m क्षिप्ता) thrown, PP √क्षिप् 6U 5 इषु m (nom p इषव) 6 अनङ्ग Cupid 7 वदामि I speak, say, √वद 1P 8 प्रतिपद्यमान (m ins s —मानेन) resorting to, admitting, pres part प्रति+√पद् 4A 9 आख्यात told, PP आ+√ख्या 2P 10 महत a (m nom s महान) great 11 अनेन= नायकेन 12 आवेग agitation 13 गुरुजन parents elders 14 शुश्रूषित्वा having served, des gerund of √श्रु 5P (its pres form is शुश्रूषते) 15 स्थाने ind rightly 16 प्रश्न question 17 कस्य=कस्मै

स्त्रीहृदयेन येन अनङ्गेन क्षिप्ताः कुसुमेषवः अपि न सोढाः स अहं अद्य एव तव पुरः धीरः इति कथं वदामि॥ आर्या

(Reflecting) Or perhaps you did not say in vain, oh friend Ātreya! I am really shaky

> Through an effeminate mind even the flowery
> arrows shot by the formless Cupid were not
> endured by me, so how can I just now des
> cribe myself as firm before you?

Jester — (to himself) Thus the great agitation of his heart has been told by admitting his weak mindedness Where shall I throw it away? (Aloud) After all, why have you come here so early after serving your parents?

Hero — My friend, rightly you put me a question To whom else it can possibly be told?

अद्य खलु स्वप्ने जानामि सैव प्रियतमा (अङ्गुल्या निर्दिशन्) अत्र चन्दनलतागृहे चन्द्रकान्तमणिशिलायामुपविष्टा प्रणयकुपिता किमपि मामुपालभमानेव रुदती मया दृष्टा। तदिच्छामि स्वप्नानुभूतदयितासमागमरम्येऽस्मिंश्चन्दनलतागृहे दिवसशेषं समतिवाहयितुम्। तदेहि गच्छावः।

40833

(परिक्रामत)

चेटी— (कर्णं दत्त्वा ससम्भ्रमम्) भर्तृदारिके, पदशब्द इव।

नायिका— (ससम्भ्रममात्मानं पश्यन्ती) हञ्जे, मा ईदृशमाकारं प्रेक्ष्य कोऽपि मे हृदयं तुलयिष्यति। तदुत्तिष्ठ। अनेन रक्ताशोकपादपेनान्तरिते प्रेक्षावहे तावत् क एष इति। (तथा कुरुत।)

1 चन्द्रकान्त moon-stone 2 प्रणय love 3 कुपित angry, angered 4 प्रणयकुपिता=प्रणयेन कुपिता 5 किमपि for some reason unknown 6 उपालभमान (—ना f) scolding, blaming, pres part उपा+√लभ् 1A 7 अनुभूत enjoyed, experienced; PP अनु+√भू 1P 8 दयिता f loving woman 9 समागम union 10 रम्य pleasant, beautiful 11 स्वप्नानुभूतदयितासमागमरम्ये=स्वप्ने अनुभूत दयितायाः समागम तेन रम्ये 11 दिवसशेष rest of the day 12 समतिवाहयितुम to pass, caus inf समति+√वह 1P 13 तुलयिष्यति he will suspect लृट्√तुल 1P 10U 14 पादप tree 15 अन्तरित (nom d f अन्तरिते) concealed, PP अन्त+√इ 2P

I know today in my dream my beloved one was seen by me (pointing his finger), seated here on the moon-stone slab of the sandal-creeper bower, angry with me through love for some reason, blaming me and weeping I, therefore, wish to spend the rest of the day in this bower of sandal creepers which is pleasant to me on account of my union with her enjoyed in the dream (Both pace about)

Maid — (listening, in haste) princess a sound of foot steps is heard!

Heroine— (confused, looking at herself) O Maid, if anyone sees this plight, he may suspect my heart So stand up! Being concealed behind this red Ashoka tree let us see who is coming.....

(Both do so)

विदूषकः—इदं चन्दनलतागृहम् । तदेहि प्रविशावः ।

(नाट्येन प्रविशतः)

नायकः—चन्दनलतागृहमिदं सचन्द्रमणिशिलमपि प्रियं न मम ।
चन्द्राननया रहितं चन्द्रिकया मुखमिव निशायाः ॥५॥

चेटी— (दृष्ट्वा) भर्तृदारिके, दिष्ट्या वर्धसे । स एव ननु ते हृदयवल्लभो जनः ।

नायिका— (दृष्ट्वा सहर्षं ससाध्वसञ्च) हञ्जे, एनं प्रेक्ष्यातिसाध्वसेन न शक्नोमि इहैवासने । कदापि एष प्रेक्षते । तदेहि अन्यतो गच्छावः । (सोत्कण्ठं पदं दत्त्वा) वेपेते मे ऊरू ।

चेटी— (विहस्य) अयि कातरे, इह स्थितां त्वां कः प्रेक्षते । ननु विस्मृतस्तेऽयं रक्ताशोकपादपः । तदिहैवोपविश्य तिष्ठावः (तथा कुरुतः ।)

1 सचन्द्रमणिशिलम=चन्द्रमणिशिलया सहितम 2 चन्द्राननया=चन्द्रवत् आननं यस्याः तया 3 रहित (n s रहितम्) deserted PP √रह 1P 10U 4 चन्द्रिका f (ins s चन्द्रिकया) moonlight 5 मुखम=प्रदोष nightfall 5 वर्धसे thou prosperest √वृध 1A 6 दिष्ट्या वर्धसे congratulations ! 7 वल्लभ beloved, lover 8 कातर a (voc s f कातरे) timid

सचन्द्रमणिशिलं अपि इदं चन्दनलतागृहं चन्द्राननया रहितं चन्द्रिकया (रहितं) निशायाः मुखं इव न मम प्रियम् ॥ आर्या

Jester —This is the bower of sandal-creepers Come, let us enter
(Both men enter )

Hero —Though adorned with a moon stone, this sandal creeper bower, deserted by the moon faced one, does not please me like an evening without the moonlight

Maid — (looking) Ah princess, congratulations ! it is your beloved lover

Heroine—(looking with a mingled feeling of joy and fear) O Maid, on seeing him I cannot sit here out of excessive fear He might see us at any moment so come let us go to some other place (Eagerly stepping) My thighs are trembling

Maid —(laughing) O timid one, who will see you staying here? You have forgotten this red Ashoka tree So let us be seated and remain here (Both do so )

विदूषकः—(निरूप्य) भो वयस्य, एषा सा चन्द्रमणिशिला ।

नायकः—(सबाष्प नि श्वसिति ।)

चेटी— भर्तृदारिके, जानामि स्वप्नालाप इव, तदवहिते शृणुवः ।

(उभे आकर्णयत )

विदूषकः—(हस्तेन चालयन्) भो वयस्य, ननु भणामि एषा सा चन्द्रमणिशिलेति ।

नायकः—(सबाष्प नि श्वस्य) सम्यगुपलक्षितम् (हस्तेन निर्दिश्य)

शशिमणिशिला सेयं यस्यां विपाण्डुरमाननं
करकिसलये कृत्वा वामे घनश्वसितोद्गमा ।
चिरयति मयि व्यक्ताकूता मनाक्स्फुरितैर्भ्रुवो—
र्विरमितमनोमन्युर्दृष्टा मया रुदती प्रिया ॥६॥

1 किसलय m n sprout, tender leaf 2 करकिसलये=कर एव किसलय तस्मिन् . 3 वाम a left 4 उद्गम coming out 5 घनश्वसितोद्गमा=घन श्वसिताना उद्गम यस्या सा 6 मयि चिरयति (loc abs.) when I delayed 7 आकूतम् feeling, emotion 8 व्यक्ताकूता =व्यक्त आकूत यया सा 9 मनाक् a little 10 स्फुरितम् trembling 11 विरमित stopped, caus PP. वि+√रम् 1P. 12 मन्यु m anger 13 विरमितमनोमन्यु =विरमित मनोगत मन्यु यया सा . 14 कृत्वा supporting, placing gerund√कृ 8U.

इय सा शशिमणिशिला यस्या मयि चिरयति विपाण्डुर आनन वामे करकिसलये कृत्वा घनश्वसितोद्गमा भ्रुवो मनाक् स्फुरितै व्यक्ताकूता विरमितमनोमन्यु रुदती प्रिया मया दृष्टा ॥ हरिणी

Jester —(looking) Hallo friend this is the moon stone

(The hero sighs with tears )

Maid — Princess, I suggest we shall hear attentively as if it were the talks in your dream

(Both listen )

Jester — (shaking him with his hand) Ah my friend, I say this is the moon-stone

Hero — (sighing in tears) You have well observed

(Pointing with his hand)

This is the the moon stone on which I saw my loving one supporting her pale face upon her shoot like left hand, heaving deep sighs, clearly expressing her emotion by knitting eyebrows a little and then stopping her profound anger and weeping as I delayed

ततस्त्वस्यामेव चन्द्रमणिशिलायामुपविशावः । (उभावुपविशत ।)

नायिका— (विचिन्त्य) का पुनरेषा भविष्यति ।

चेटी— भर्तृदारिके, यथात्रामपवारिते तावदेतं प्रेक्षावहे तथा मा नाम त्वमपि एवं दृष्टा ।

नायिका— युज्यते एतत् । किं पुनः प्रणयकुपितं प्रियजनं हृदये कृत्वा मन्त्रयते ।

चेटी— भर्तृदारिके, मा इदृशीं शङ्कां कुरुष्व । पुनरपि तावच्छृणुवः ।

विदूषकः— (आत्मगतम्) अभिरमते एष एतया कथया । भवतु एतामेव वर्धयिष्यामि । (प्रकाशम्) भो वयस्य, तदा सा त्वया रुदती किं भणिता ।

नायकः— वयस्य, इदमुक्ता ।

1 अपवारित (nom d f अपवारिते) concealed, *PP.* अप + √वृ 10P., caus 5U. 2 मा नाम probably. 3 मन्त्रयते he speaks, √मन्त्र् 10A. शङ्का f suspicion, doubt. 5 अभिरमते he takes delight in; अभि + √रम् 1A 6 कथा f. (ins.s. कथया) talk, tale. 7 एताम् = कथाम् 8 वर्धयिष्यामि I shall heighten, णिजन्ताल्लृट् √वृध् 1A.

Let us, therefore, sit down on this moon stone

(Both sit down)

Heroine— (thinking) But who can she be?

Maid — Princess, as we observe him, being concealed, he might have seen you, too.

Heroine— May be But why is he talking about that sweetheart angry through love, thinking of her in his heart?

Maid —Princess, do not cherish such suspicion as this. Let us again hear.

Jester — (to himself) He takes delight in this topic. Well, I will make him amplify on this talk. (Aloud) O friend, then what did you say to her who was weeping?

Hero —My friend, I said this;

निष्यन्दत इवानेन मुखचन्द्रोदयेन ते ।
एतद् वाष्पाम्बुना सिक्तं चन्द्रकान्तशिलातलम् ॥ ७ ॥

नायिका— (सरोषम्) चतुरिके, अस्ति किमतोऽप्यपरं श्रोतव्यम् । तदेहि गच्छावोऽन्यतः ।

चेटी— (हस्ते गृहीत्वा) भर्तृदारिके, एवं मा भण । त्वमेव स्वप्ने दृष्टा, नैतस्यान्यस्यां दृष्टिरभिरमते ।

नायिका— न मे हृदयं प्रत्येति । तत् कथावसानं यावत् प्रतिपालयावः ।

नायकः— वयस्य, जाने तामेवास्यां शिलायामालिख्य तया चित्रगतयाऽऽत्मानं विनोदयामीति तदित एव गिरितटान्मनःशिलाशकलान्यादाय आगच्छ ।

1 निष्यन्दते it oozes, sheds ; नि+√स्यन्द् 1A 2 उदय rise, appearance 3 मुखचन्द्रोदयेन=मुख एव चन्द्र तस्य उदयेन 4 अम्बु n (ins s अम्बुना) water 5 अत अपरम् anything beyond this 6 श्रोतव्य (ought) to be heard, pot PP √श्रु 5P 7 प्रत्येति it trusts, प्रति+√इ 2P 8 अवसानम् end 9 आलिख्य having painted, gerund आ+√लिख 6P 10 विनोदयामि I divert . णिजन्तात्लट् वि+√नुद् 6U 11 गिरितट (abl s –तटात) mountain-side 12 मनशिला f red arsenic

बाष्पाम्बुना सिक्त एतत् चन्द्रकान्तशिलातल अनेन ते मुखचन्द्रोदयेन निष्यन्दते इव ॥ अनुष्टुप

This moon stone slab upon which are tear-drops sprinkled seems to ooze at the rise of the moon in the form of thy face

Heroine—(angrily) Chaturika, is there anything to be heard beyond this ? So come on, let us go elsewhere

Maid —(taking her by the hand) Princess, don't say so You might have been seen in his dream His eyes would not take delight in any other woman

Heroine—My heart doest not trust it but we shall wait for the conclusion of his talk

Hero —My friend, drawing her just on this stone slab I wish I might divert myself by means of her portrait Therefore, bring here some fragments of red arsenic from the mountain-skirt !

विदूषक :— यद्भवानाज्ञापयति (परिक्रम्य । गृहीत्वोपसृत्य) भो वयस्य, त्वया एको वर्णक आज्ञप्तः, मया पुनरिहैव सुलभाः पञ्चरागिणो वर्णा आनीता इति आलिखतु भवान् । (उपनयति) ,

नायक :— वयस्य, साधु कृतम् । (गृहीत्वा शिलायामालिखन् सरोमाञ्चम्) सखे, पश्य ।

अक्लिष्टबिम्बशोभाधरस्य नयनोत्सवस्य शशिन इव ।
दयितामुखस्य सुखयति रेखाऽपि प्रथमदृष्टेयम् ॥ ८ ॥

(लिखति ।)

विदूषक :— (सकौतुक निर्वर्ण्य) अप्रत्यक्षेऽपि एवं नाम रूपं लिख्यते । अहो आश्चर्यम् ।

1 वर्णक, वर्ण colour, paint 2 सुलभ easily attainable 3 पञ्च five. 4 रागिन a (nom p m रागिण) coloured 2 आनीत brought PP आ+√नी 1U 6 आलिखतु may he paint ! लोट आ+√लिख 6P 7 उपनयति he offers, उप+√नी 1U 8 साधु ad well 9 रोमाञ्च horripilation, thrill 10 सरोमाञ्चम ad with horripilation 11 सखि m (voc s सखे) friend 12 अक्लिष्ट unimpaired, blameless 13 बिम्बम् kind of fruit 14 शोभा f beauty 15 अधर lip, lower lip 16 अक्लिष्टबिम्बशोभाधरस्य= अक्लिष्टबिम्ब तस्य शोभा तद्वत् अधर यस्मिन् तस्य 17 सुखयति it pleases, √सुख 10P 18 रेखा f sketch, drawing 19 कौतुकम eagerness, curiosity 20 सकौतुकम् eagerly 21 अप्रत्यक्ष unseen invisible

अक्लिष्टबिम्बशोभाधरस्य नयनोत्सवस्य शशिन इव दयितामुखस्य प्रथमदृष्टा इयं रेखा अपि सुखयति ॥ आर्या

Jester —I will do (having walked away, he brings them) O friend, I have brought five colours easily obtainable here, though you ordered a single colour So may you paint (He offers)

Hero — Friend well done! (He takes them, and drawing with a thrill) O my friend, behold!

Even this first seen drawing of my loving one's face which is a joy to the eyes and which bears the lower lip beautiful as a pure Bimba fruit gives happiness, like that of the moon which gladdens the eyes and which bears the beauty of its cloudless disc

(He paints)

Jester —(looking with curiosity) Though invisible in reality, her form is finely painted. Oh wonderful!

**नायकः**—(सस्मितम्) वयस्य,

> प्रिया सन्निहितैवेयं सङ्कल्पस्थापिता पुरः ।
> दृष्ट्वा दृष्ट्वा लिखाम्येनां यदि तत् कोऽत्र विस्मयः ॥६॥

**नायिका**—(सास्रम्) चतुरिके, ज्ञातं खलु कथाऽवसानं तदेहि तावन्मित्रावसुं प्रेक्षावहे ।

**चेटी**— (सविषादमात्मगतम्) जीवितनिरपेक्ष इवास्या उल्लापः । (प्रकाशम्) भर्तृदारिके, ननु गतैव तत्र मनोहरिका । तत् कदापि भर्ता मित्रावसुरिहैवागच्छति । (तत प्रविशति मित्रावसु ।)

**मित्रावसुः**—आज्ञापितोऽस्मि तातेन यथा 'वत्स मित्रावसो, जीमूतवाहनोऽस्माभिरिहासन्नभावात् सुपरीक्षितोऽयम् । कुतोऽस्माद् योग्यो वरः । तदस्मै वत्सा मलयवती प्रतिपाद्यताम्' इति ।

1 सन्निहित present, near 2 सङ्कल्प idea, imagination 3 स्थापित placed PP caus √स्था 1P 4 विस्मय wonder 5 विषाद disappointment 6 सविषादम् ad 7 जीवितम् life 8 °निरपेक्ष indifferent, no need of 9 जीवितनिरपेक्ष =जीविते निरपेक्ष 10 उल्लाप talk 11 आसन्नभाव existence in the neighbourhood 12 सुपरीक्षित well-examined 13 योग्य fit 14 प्रतिपाद्यताम् she must be given (in marriage) णिजन्तात्कर्मणि लोट प्रति+√पद्

इय प्रिया पुर सङ्कल्पस्थापिता सन्निहिता एव, एना दृष्ट्वा दृष्ट्वा लिखामि यदि तत् अत्र न विस्मय ॥ अनुष्टुप

Hero — (with a smile) O my friend,
Being placed in front through my imagination, my sweetheart is just present repeatedly seeing her I draw her Is there any wonder here?

Heroine—(shedding tears) Chaturikā, I have understood the conclusion of his talk Come then we shall go to see Mitrāvasu now

Maid — (dejectedly to herself) It appears that her word has no need of life (Aloud) O princess, Manoharikā has gone there So master Mitrāvasu will be coming here at any moment

(Then enters Mitravasu)

Mitrāvasu—I have been commanded by my father —
"My son Mitrāvasu this Jimutavahana has been well examined by us in view of his staying here in the vicinity Is there any bridegroom more acceptable than he? Therefore, do offer my daughter Malayavati to him'

अहन्तु स्नेहपराधीनतयाऽन्यदेव किमप्यवस्थान्तरमनुभवामि ।
अन्यच्च ।

यद्विद्याधरराजवंशतिलकः प्राज्ञः सतां सम्मतो
रूपेणाप्रतिमः पराक्रमधनो विद्वान् विनीतो युवा ।
यश्चासूनपि सन्त्यजेत् करुणया सत्त्वार्थमभ्युद्यत-
स्तेनास्मै ददतः स्वसारमतुला तुष्टिर्विषादश्च मे ॥१०॥

श्रुतश्च यथा जीमूतवाहनो गौर्याश्रमसम्बद्धे चन्दनलतागृहे वर्तत इति। तदेतत् चन्दनलतागृह यावत् प्रविशामि । (प्रविशति)

1 स्नह affection 2 पराधीनता f subjection dependence 3 अवस्था f condition, feeling 4 अवस्यान्तरम=अया अवस्था different condition (अतरम in this sense is always neuter e g पुरुषान्तरम=अ य पुरुष) 5 तिलक (समासान्त) the best 6 प्राज्ञ wise 7 सम्मत loved esteemed 8 अप्रतिम a unrivalled, matchless 9 पराक्रम heroism courage 10 धनम wealth possession 11 पराक्रमधन=पराक्रम एव धन यस्य स 12 विद्वस (nom s m विद्वान) learned 13 विनीत gentle disciplined 14 युवन् m (nom s युवा) youth 15 असु m (acc P असून) life breath 16 सन्त्यजत he may give up, विधिलिङ्, सम+√त्यज 1P 17 करुणा pity 18 सत्त्वार्थम for the living being 19 अभ्युद्यत active, ready 20 अतुल incomparable 21 तुष्टि f pleasure 22 सबद्ध attached to

यत् विद्याधरराजवंशतिलक प्राज्ञ सता सम्मत रूपेण अप्रतिम पराक्रमधन विद्वान विनीत युवा यत् सत्त्वार्थ अभ्युद्यत करुणया असून अपि सन्त्यजेत तेन अस्मै स्वसार ददत म अतुला तुष्टि विषाद च ॥
शार्दूलविक्रीडितम

But overwhelmed by my affection for her I do experience some kind of different feeling and besides —

As he is the best of the royal race of the Vidyadharas wise, esteemed by the good people, *matchless in form rich in* heroism learned and well disciplined youth and ready to serve the living beings he may even give up his life out of compassion I feel incomparable pleasure and sorrow on giving him my sister

I have heard that Jimutavahana is in the sandal creeper bower attached to Gauri s hermitage So I shall now enter there

(He enters )

विदूषकः— (ससम्भ्रममवलोक्य) भो वयस्य, प्रच्छादय अनेन कदलीपत्रेणेमां चित्रगतां कन्यकाम्। एष खलु सिद्धयुवराजो मित्रावसुरिहागतः। कदापि प्रेक्षिष्यते।

नायकः—(कदलीपत्रेण प्रच्छादयति।)

मित्रावसुः—(प्रविश्य) कुमार, मित्रावसुः प्रणमति।

नायकः—(दृष्ट्वा) मित्रावसो, स्वागतम्। इतः स्थीयताम्।

चेटी—भर्तृदारिके; आगतो भर्ता मित्रावसुः।

नायिका—हञ्जे, प्रियं मे।

नायकः—मित्रावसो, अपि कुशली सिद्धराजो विश्वावसुः।

मित्रावसुः—कुशली तातः। तातसन्देशेनास्मि त्वत्सकाशमागतः।

1 प्रच्छादय cover thou! लोट् प्र+√छद् 10U 2 चित्रगताम्=चित्रे गताम् painted in picture 3 युवराज =कुमार prince 4 (त्वया) स्थीयताम्=उपविश! be seated! (भावे प्रयोग, कर्मणि लोट) 5 कुशलिन् a (nom s m कुशली) happy, faring well 6 सन्देश (ins s सन्देशेन) message, command 7 त्वत्=तव

Jester —(looking in a cofusion) O friend, cover this virgin painted in the picture with this plantain leaf The prince of Siddhas has come here He may see this at any moment

Hero —(covers it with the Banana leaf)

Mitrāvasu—(entering) O prince, Mitravasu salutes you

Hero — (looking) O Mitravasu, welcome! Be seated here

Maid —Princess, Master Mitrāvasu has come

Heroine— O Maid, I am pleased

Hero —Mitravasu, how is His Majesty King Visvāvasu of the Siddhas ?

Mitrāvasu—My father is faring well I have come to see you with his message.

नायक:— किमाह तत्रभवान् ।

नायिका— श्रोष्यामि तावत् किं तातेन कुशलं सन्दिष्टमिति ।

मित्रावसु:— (सास्रम्) इदमाह 'तात, अस्ति मे मलयवती नाम कन्या जीवितमिवास्य सर्वस्यैव सिद्धराजान्वयस्य । सा मया तुभ्यं प्रतिपाद्यते । प्रतिगृह्यताम्' इति ।

चेटी— (विहस्य) भर्तृदारिके, किं न कुप्यसीदानीम् ।

नायिका— (सस्मितं सलज्जं अर्वांमुखी स्थिता) हञ्जे, मा हस । किं विस्मृतं ते एतस्यान्यहृदयत्वम् ।

नायक:— (अपवार्य) वयस्य, सङ्कटे पतिताः स्मः ।

विदूषक:— (अपवार्य) जानामि न तां वर्जयित्वा तेऽन्यत्र चित्तमभिरमते यथा तथा यत् किमपि भणित्वा विसृज्यतामेषः ।

1 श्रोष्यामि I shall hear लृट √ श्रु 5 P कुशलम् tidings of welfare, happiness 3 सन्दिष्ट sent as a message, PP सम + √ दिश 6 P 4 नाम and named by the name of 5 प्रतिगृह्यताम् she must be accepted, कर्मणि लोट प्रति + √ ग्रह 9U 6 सङ्कटम difficulty, narrow passage 7 विसृज्यताम् he must be dismissed कर्मणि लोट् वि + √ सृज् 6 P

Hero — What did His Majesty command ?

Heroine — I shall hear what message of welfare my father has sent

Mitravasu — (shedding tears) His message runs as follows —

Dear sir I have a daughter named Malayavati who is similar to the life of this entire royal family of the Siddhas I offer her to you in marriage Please accept her"

Maid — (laughing) Princess are you not angry now ?

Heroine — (with a smile of blushing with her face downcast) Oh maid do not laugh ! Why have you forgotten that his heart is after another person ?

Hero — (aside) Friend we have fallen into a narrow passage

Jester — (aside) I know your mind does not take delight in anyone else but her So say something diplomatically, and dismiss him

नायिका— (सरोषमात्मगतम्) हताश, का वा एतन्न जानाति ।

नायकः— क इह नेच्छेद् भवद्भिः सह श्लाघ्यमीदृशं सम्बन्धम् । किंतु न शक्यते चित्तमन्यतः प्रवृत्तमन्यतः प्रवर्तयितुम् । ततो नाहमेनां प्रतिग्रहीतुमुत्सहे । (नायिका मूर्च्छां नाटयति ।)

चेटी—समाश्वसितु समाश्वसितु भर्तृदारिका ।

विदूषकः— भोः, पराधीनः खलु एषः, किमनेनाभ्यर्थितेन । तद् गुरुजनमस्य गत्वाऽभ्यर्थय ।

मित्रावसुः— (आत्मगतम्) साधूक्तम् । नायं गुरुजनमतिक्रामति । एष गुरुरप्यस्मिन्नेव गौर्याश्रमे प्रतिवसति । तद्यावद् गत्वा अस्य पित्रा मलयवतीं ग्राहयामि । (नायिका समाश्वसिति ।)

1 हताश a wretched, vile 2 इह = अस्मिन् लोके 3 इच्छेत् he should desire, विधिलिङ् √ इष 6 P 4 श्लाघ्य praiseworthy, respectable 5 सम्बन्ध matrimonial relation 6 शक्यते it is possible, √ शक 4 U 5 P 7 अन्यतस् ind in other direction to another place or person, etc 8 प्रवृत्त engaged in, fixed, PP प्र + √ वृत 1 A 9 प्रवर्तयितुम् to introduce to establish caus inf प्र + √ वृत 10 उत्सहे I endeavour desire, उत् + √ सह 1 A 11 मूर्च्छा f fainting 12 अभ्यर्थितम् requesting 13 अभ्यर्थय request thou, लोट् अभि + √ अर्थ 10 A 14 अतिक्रामति he violates, अति + √ क्रम 1 U 4 P 15 ग्राहयामि I cause to accept, णिजन्तात्लट् √ ग्रह 9 U

Heroine—(angrily to herself) Oh wretched man who does not know this

Hero — Who in this world should not long for such a worthy matrimonial relationship with you? But it is not possible to bring my mind, which is fixed in another direction to some other place So I do not wish to accept her (The heroine faints)

Maid — Princess take heart! take heart!

Jester — Sir! He is dependent upon others So what is the use of asking him? Go and request his parents

Mitravasu—(to himself) Properly spoken He does not violate his parents His father also dwells in this Gauri hermitage In the meantime I shall go there and make his father accept Malayavati (The heroine recovers)

मित्रावसुः— एवं निवेदितात्मनोऽस्मान् प्रत्याचक्षाणः कुमार एव बहुतरं जानाति ।

नायिका— (सरोष विहस्य) कथं प्रत्याख्यानलघुर्मित्रावसुः पुनरपि मन्त्रयते ।

(मित्रावसु. निष्क्रान्त.)

नायिका— (सास्रमात्मान पश्यन्ती, आत्मगतम्) किं मम एतेन दौर्भाग्यकलङ्कमलिनेन अत्यन्तदुःखभागिनाऽद्यापि शरीरेण धारितेन । तदिहैवाशोकपादपेऽनयाऽतिमुक्तलतया उद्बध्यात्मानं व्यापादयिष्यामि । तदिदमेवन्तावत् । (प्रकाशं विलक्षस्मितेन) हञ्जे, प्रेक्षस्व तावद् मित्रावसुर्गतो न वेति येनाहमपि इतो गमिष्यामि ।

1 निवेदित communicated; caus PP. नि + √ विद् 2 P. 2 निवेदितात्मन: = निवेदित आत्मा यैं तान्. 3 प्रत्याचक्षाण rejecting, refusing; Pres. Part. प्रत्या + √ चक्ष् 2A. 4 प्रत्याख्यानम् refusal. 5 लघु contemptible, slighted. 6 दौर्भाग्यम् ill-luck, misfortune. 7 कलङ्क spot, stain. 8 मलिन dirty, soiled. 9 दौर्भाग्यकलङ्कमलिनेन = दौर्भाग्यस्य कलङ्केन मलिनेन. 10 भागिन् a (ins. s. n. भागिना) concerned, affected by. 11 शरीरम् body 12 धारित supported; PP. √ धृ 10 U 13 अतिमुक्त : kind of a creeper. 14 उद्बध्य having hung; gerund, उद् + √ बन्ध् 9 P. 15 व्यापादयिष्यामि I shall kill; णिजन्ताल्लट् व्या + √ पद् 4 A. 19 विलक्ष a. embarrassed, forced, unnatural.

Mitrāvasu—The prince knows very much, rejecting us thus, who have expressed ourselves.

Heroine— (angrily laughing) How still now Mitrāvasu speaks, having been slighted by the refusal. (Mitrāvasu walks out.)

*Heroine— (looking at herself in tears, to herself) What is the use of* maintaining this body even now, soiled by the stain of misfortune and affected by extreme misery? By hanging myself with this Atimukta creeper from the Ashoka tree I shall commit suicide.

(Aloud with a forced smile)

*Maid, see whether Mitrāvasu has left or not, so that I, too, will go* away from here.

चेटी— (कतिचित् पदानि गत्वाऽवलोक्यात्मगतम्) अन्यादृशमस्यां हृदयं प्रेक्षे । तन्न गमिष्यामि । इहैवापवारिता प्रेक्षे किमेषा प्रतिपद्यते इति ।

नायिका— (दिशोऽवलोक्य पाशं गृहीत्वा सास्रम्) भगवति गौरि, त्वया इह न कृतः प्रसादः । तद् जन्मान्तरे यथा न ईदृशी दुःखभागिनी भवामि तथा करिष्यामि । (इत्यभिधाय कण्ठे पाशमर्पयति ।)

चेटी— (दृष्ट्वा ससम्भ्रममुपसृत्य) परित्रायतां परित्रायतामार्यः । एषा भर्तृदारिकोद्बध्यात्मानं व्यापादयति ।

नायकः— (ससम्भ्रममुपसृत्य) क्वासौ क्वासौ ।

चेटी— इयमशोकपादपे ।

नायकः— (सहर्षमवलोक्य) सैवेयमस्मन्मोरथभूमिः ।

1 कतिचित् several, some 2 अन्यादृश strange, unusual 3 प्रतिपद्यते she practises, प्रति+√पद् 4 A 4 दिश् f. (acc. p दिशः) direction 5 पाश cord, noose 6 जन्मान्तरम् (loc s जन्मान्तरे) another or next birth 7 अभिधाय having spoken, gerund अभि+√धा 3 U 8 अर्पयति she offers, places, णिजन्तात् लट् √ऋ 1 3 P 9 परित्रायताम् he must help, लोट् परि+√त्रा 2 A. 10 मनोरथभूमि f object of wish

Maid — (moving several steps and looking to herself) I can see an unusual heart in her, so I am not going Hiding myself here I will see what she is going to do

Heroine— (looking everywhere and tearfully seizing the noose) Ah Goddess Gauri you have not done me a favour in this world, therefore I will do so as not to suffer like this in my next birth (Uttering so she places a noose around the neck )

Maid — (looking in confusion and approaching) Sir ! help, help ! The Princess is hanging herself

Hero — (hurriedly running) where is she, where is she ?

Maid — She is by the Ashoka tree

Hero — (joyfully looking) Oh there she is,—the very object of my wish !

(नायिका पाणौ गृहीत्वा लतापाशमाक्षिपति ।)

न खलु न खलु मुग्धे साहसं कार्यमीदृक्
व्यपनय करमेतं पल्लवाभं लतायाः ।
कुसुममपि विचेतुं यो न मन्ये समर्थः
कलयति स कथं ते पाशमुद्बन्धनाय ॥ १६ ॥

नायिका— (ससाध्वसम्) हञ्जे, कः पुनरेषः । (निरूप्य सरोषं हस्तमाक्षेप्तुमिच्छति) मुञ्च मुञ्चाग्रहस्तम् । कस्त्वं निवारयितुम् । मरणेऽपि किं त्वमेवाभ्यर्थनीयः ।

नायकः— नाहं मुञ्चामि ।

1 पाणि m (loc. s. पाणौ) hand 2 मुग्ध (voc. s. f. मुग्धे) charming, simple-minded. 3 साहसम् violence, rashness. 4 कार्य (ought) to be done; pot. PP. √कृ 8 U. 5 व्यपनय remove thou! लोट् व्यप+√नी 1U. 6 आभा f resemblance 7 पल्लवाभम्=पल्लवाभा यस्य तम्. 8 विचेतुम् to gather; inf. वि+√चि 5 U. 9 य=कर. 10 मन्ये I think, √मन् 4A 11 समर्थ able, competent. 12 कलयति it takes hold of; √कल् 10 U. 13 स=कर 14 उद्बन्धनम् hanging 15 आक्षेप्तुम to throw, to cast away; inf. आ+√क्षिप् 6 P. 16 मुञ्च release thou! लोट्√मुञ्च 6 P. 17 मरणम् (loc. s. मरणे) death. 18 अभ्यर्थनीय (ought) to be requested; pot. PP.अभि√+अर्थ 10 A

मुग्धे ईदृक् साहस न खलु न खलु कार्यं, लतायाः पल्लवाभ एत कर व्यपनय, य कुसुम अपि विचेतु समर्थः न मन्ये स ते उद्बन्धनाय पाश कथ कलयति ॥ मालिनी

(Holding the heroine by the hand, he snatches away the creeper-noose.)

O simple—minded one, not indeed, not indeed such violent act should be done. Remove from the creeper thy hand as tender as shoot! How can thy hand, that is not, I think competent to gather even a flower, take hold of the noose for hanging?

Heroine— (fearfully) O maid, but who is he? (Observing with anger she intends to throw off his hand) Who are you to prevent me? Even in death ought I to beg of you? Do free my fingers!

Hero — I will not free them

कण्ठे हारलतायोग्ये येन पाशस्त्वयाऽर्पितः ।
गृहीतः सापराधोऽयं कथं ते मुच्यते करः ॥ १२ ॥

विदूषक :— भवतु, किं पुनरस्या अस्य मरणव्यवसायस्य कारणम् ।

चेटी— नन्वेष एव ते प्रियवयस्यः ।

नायक :— कथमहमेवास्या मरणकारणम् । न खल्ववगच्छामि ।

विदूषक :— भवति, कथमिव ।

चेटी— (साकूतम्) या सा प्रियवयस्येन ते कापि हृदयवल्लभा शिलातले आलिखिता तस्याः पक्षपातिनैतेन प्रतिपादयतोऽपि मित्रावसोर्नाहं प्रतीष्टेति जातनिर्वेदयानयैवं व्यवसितम् ।

1 हारलता f string of pearls 2 येन=करेण. 3 सापराध guilty. 4 व्यवसाय determination, conduct. 5 आकूत purpose, emotion 6 तस्या=कस्याः कन्यकायाः 7 पक्षपातिन् a (ins. S पक्षपातिना) partial, attached to 8 अनेन=नायकेन 9 मित्रावसो प्रतिपादयत (gen abs ) while, or though मित्रावसु was offering (her). 10 अहम्=नायिका. 11 प्रतीष्ट (f. s प्रतीष्टा) accepted, PP. प्रति+√इष् 6 P 12 निर्वेद grief. 13 जातनिर्वेदया=जात निर्वेद यस्या तया. 14 अनया=नायिकया. 15 व्यवसित determined, PP. अव+√सो 1 P

येन पाश हारलतायोग्ये कण्ठे त्वया अर्पित, गृहीत सापराध अयं ते कर कथं मुच्यते ॥ अनुष्टुप्

With this hand you placed a noose round your neck fit for a string of pearls, so how can I release this guilty hand caught by me ?

Jester — Well, after all what was the cause of her determination to die ?

Maid — It's just your dear friend

Hero — How I am the cause of it ? I do not understand.

Jester — Lady, why ?

Maid — (meaningfully) she was determined to do so, overcome with grief caused by the fact that your dear friend had painted some one whom he loves on the stone-slab, and again she was not accepted by him due to his attachment to that lady, though offered to him by Mitravasu in marriage

नायकः— (सहर्षमात्मगतम्) कथमियमेवासौ विश्वावसोर्दुहिता मलयवती । अथवा रत्नाकरादृते कुतश्चन्द्रलेखायाः प्रसूतिः । हा कथं वञ्चितोऽस्मि अनया ।

विदूषकः—भवति, यद्येवं तदनपराद्ध इदानीं प्रियवयस्यः । अथवा यदि मम न प्रत्येति तदा स्वयमेव शिलातलं गत्वा प्रेक्षतां भवती ।

नायिका—(सहर्षं सलज्जञ्च नायकं पश्यन्ती हस्तमाकर्षति ।)

नायकः—(सस्मितम्) न तावन्मुञ्चामि यावन्मम हृदयवल्लभां शिलायामालेख्यगतां पश्यसि । (सर्वे परिक्रामन्ति ।)

विदूषकः—(कदलीपत्रमपनीय) भवति, प्रेक्षस्व प्रेक्षस्व एतमस्य हृदयवल्लभं जनम् ।

नायिका—(निरूप्यापवार्य सस्मितम्) चतुरिके, अहमिवालिखिता ।

1 दुहितृ f (nom s दुहिता) daughter 2 रत्नाकर (abl s रत्नाकरात) ocean 3 ऋते ind (+acc & abl) execpt without 4 चन्द्रलेखा f streak of the moon 5 प्रसूति f coming forth, birth etc. 6 वञ्चित deceived, caus PP √वञ्च 1 P 7 अनपराद्ध not sinned, not guilty PP अ+अप+√राध 4 5 P

Hero — (Joyously to himself) How is she the very daughter of Vishvāvasu, Malayavati? Or whence does the streak of the moon rise without the ocean? Ah I am deceived by her!

Jester — Lady, if so, my friend is not guilty now Or if you don't believe me then personally go to that stone slab and see it

Heroine — (looking at the hero with joy and bashfulness, pulls her hand)

Hero — (with a smile) I shall not leave you alone until you see the sweetheart of mine painted on the stone slab.

(All walk)

Jester — (removing the plantain leaf) Lady, behold behold his beloved one!

Heroine—(observing with a smile aside) O Chaturika! it seems I am painted here

चेटी— (चित्राकृतिं नायिकाञ्च निर्वर्ण्य) भर्तृदारिके, किं भणसि अहमिवालिखितेति। ईदृशं सौसादृश्यं येन न ज्ञायते किं तावदिहैव शिलातले भर्तृदारिकायाः प्रतिबिम्बं संक्रान्तं उत त्वमालिखितेति।

नायिका—(विहस्य) हञ्जे, दुर्जनीकृताऽस्मि अनेन मां चित्रगतां दर्शयता।

विदूषकः—निर्वृत्त इदानीं ते गान्धर्वो विवाहः। तन्मुञ्च तावदस्या अग्रहस्तम्। एषा खलु काऽपि त्वरितत्वरिता इहैवागच्छति।

(नायक मुञ्चति।)

द्वितीया चेटी—(प्रविश्य सहर्षम्) भर्तृदारिके, दिष्ट्या वर्धसे। प्रतीष्टा खलु त्वं भर्तृजीमूतवाहनस्य गुरुभिः।

1 आकृति· f form, body 2 निर्वर्ण्य having carefully looked at, gerund निस्+√वर्ण 10U 3 सौसादृश्यम्=सुसादृश्यम् excellent likeness, resemblance 4 ज्ञायते it is known, कर्मणि प्र√ज्ञा 9U 5 प्रतिबिम्ब m n image, reflection 6 उत ind or, whether 7 दुर्जनीकृत (f s —कृता) slandered, made wicked, PP दुर्जनी +√कृ 8U. 8 दर्शयत् (ins s m दर्शयता) showing, caus Pres Part √दृश् 1P 6 निर्वृत्त finished, done, PP निस्+√वृत् 1A 10 गान्धर्व विवाह love—marriage 11 प्रतीष्ट (nom s f प्रतीष्टा) accepted, PP प्रति+√इष् 6P

Maid —(carefully looking at the image of the picture and the heroine) Oh princess why do you say that it seems you are painted here ? This likeness is so excellent that it cannot be known whether your image is now reflected here on the stone slab, or you are painted

Heroine—(laughing) O Maid, he has made me wicked by showing me my own self painted here

Jester —Your love marriage is over Therefore free her fingers ! Indeed, some one in a great hurry is coming here

(The hero frees her hand )

Second Maid—(entering with joy) O princess, congratulations ! You have been really acepted by the parents of Master Jimūtavahana

विदूषकः— (नृत्यन्) ही ही भोः । सम्पूर्णा मनोरथाः प्रियवयस्यस्य । अथवा न हि न हि, भवत्या मलयवत्याः । अथवा न एतयोः (भोजनमभिनयन्) ममैवैकस्य ब्राह्मणस्य ।

चेटी— (नायिकामुद्दिश्य) आज्ञतास्मि युवराजमित्रावसुना यथा 'अद्यैव मलयवत्याः विवाहः । तल्लघु तां गृहीत्वाऽऽगच्छ' इति । तदेहि गच्छावः ।

विदूषकः— गता खलु त्वं दास्याः पुत्रि, इमां गृहीत्वा । वयस्येन किमिहैवावस्थातव्यम् ।

चेटी— हताश, मा त्वरस्व त्वरस्व । युष्माकमपि स्नपनकमागतमेव ।

नायिका— (सानुराग सलज्जञ्च नायक पश्यन्ती सपरिवारा निष्क्रान्ता ।)

वैतालिकः— (नेपथ्ये पठति)

1 नृत्यत (nom s m नृत्यन) dancing, pres part √नृत 4P 2 सम्पूण filled up fulfilled, PP सम्+√पूर 10U 3 दासी f (gen s दास्या) slave girl 4 पुत्री f (voc s पुत्रि) daughter 5 अवस्थातव्य वयस्येन (भाव प्रयोग) my friend ought to remain 6 त्वरस्व hurry thou ! लोट√त्वर 1A 7 स्नपनक्रम bathing, bathing hour 8 परिवार retinue 9 सपरिवारा=परिवारसहिता with her retinue 10 पठति he recites, √पठ् 1P

Jester — (dancing) Oh what a grand joy! The wishes of my dear friend, nay, nay, of your ladyship Malayavati, nay of this pair, nay (gesticulating eating) of me a Brahmin are fulfilled

Maid —(to the heroine) "Today Malayavati's marriage is to take place So bring her quickly," thus I have been ordered by Prince Mitravasu Come then let us go

Jester — O daughter of a slave girl are you really going, accompanying her? Must my friend remain here alone?

Maid — Ah, wretched lad, don't be impatient! The hour of your ablution has also come

Heroine—(looking at the hero lovingly with bashfulness, moves out with her retinue.)

Bard —(recites behind the scene)

वृष्ट्या पिष्टातकस्य द्युतिमिह मलये मेरुतुल्यां दधानः
सद्यः सिन्दूरदूरीकृतदिवससमारम्भसन्ध्याऽऽतपश्रीः ।
उद्गीतैरङ्गनानां चलचरणरणन्नूपुरह्लादहृद्यै—
रुद्वाहस्नानवेलां कथयति भवतः सिद्धये सिद्धलोकः ॥ १३ ॥

विदूषकः— (आकर्ण्य) भो वयस्य, दिष्ट्यागतं स्नपनकम् ।

नायकः— (सहर्षम्) यद्येवं किमिदानीमिह स्थितेन । आगच्छ । तातं नमस्कृत्य स्नानभूमिमेव गच्छावः ।

अन्योन्यदर्शनकृतः समानरूपानुरागकुलवयसाम् ।
केषाञ्चिदेव मन्ये समागमो भवति पुण्यवताम् ॥ १४ ॥

(इति निष्क्रान्ता सर्वे) ॥ इति द्वितीयोऽङ्कः ॥

1 वृष्टि f. (ins.s वृष्ट्या) shower. 2 पिष्टातक perfumed powder. 3 द्युति f. lustre, hue. 4 मेरु name of a fantastic mountain. 5 तुल्य (acc s f. तुल्याम्) equal, identical. 6 सिन्दूरम् red lead. 7 दिवससमारम्भः dawn 8 सन्ध्या f. twilight. 9 आतपश्री f beauty of the sunshine. 10 सिन्दूरदूरीकृतदिवससमारम्भसन्ध्यातपश्रीः=सिन्दूरेण दूरीकृता दिवससमारम्भस्य च सन्ध्यातपस्य श्री· येन स 11 अङ्गना (gen p अङ्गनानाम् ) woman. 12 रणत् tinkling ; pres part √रण् 1P. 13 नूपुर m n. anklet. 14 ह्लाद sound. 15 हृद्य hearty, pleasant. 16 चलचरणरणन्नूपुरह्लादहृद्यै =चलेषु चरणेषु रणन्त ये नूपुरा तेषां ह्लादेन हृद्यै . 17 उद्वाह wedding 18 अन्योन्य mutual. 19 समान equal. 20 कुलम् family. 21 वयस् n age 22 समानरूपानुरागकुलवयसाम्=समानानि रूप अनुराग कुल वय च येषां तेषाम्

पिष्टातकस्य वृष्ट्या मेरुतुल्या द्युति इह मलये दधानः सद्य सिन्दूरदूरीकृतदिवससमारम्भसन्ध्यातपश्री अङ्गनाना चलचरणरणन्नूपुरह्लादहृद्यै उद्गीतै· सिद्धलोक भवत उद्वाहस्नानवेला सिद्धये कथयति ॥ स्रग्धरा
समानरूपानुरागकुलवयसां केषाञ्चित् पुण्यवता एव अन्योन्यदर्शनकृत समागम· भवति मन्ये ॥ आर्या.

Placing a splendour identical with the Meru with a shower of perfumed powder here on the Malaya, and instantly defeating the beauty of both daybreak and twilight by dint of vermilion, the Siddhas announce for your success the hour of your nuptial ablution with loud songs pleasant with the sound of the anklets tinkling on their women's moving feet.

Jester — (listening) O friend, fortunately the bathing hour has come.

Hero — (with joy) If so, no use of staying here. Come, saluting my father, we shall proceed to the bathing place

I think the union of those who are equal in form, love, family and age to be realized through mutual sight is possible in the case of a few lucky persons. (Exeunt omnes)

*Here Ends Act II*

# ❀ तृतीयोऽङ्कः ❀

(ततः प्रविशति मत्तो विचित्रविह्वलवेषश्चषकहस्तो विटः स्कन्धारोपितसुराभाण्डश्चेटश्च ।)

विटः— नित्यं यः पिबति सुरां जनस्य प्रियसङ्गमश्च यः करोति ।
मम तौ द्वावपि देवौ बलदेवः कामदेवश्च ॥१॥

(घूर्णन्) सफलं खलु मे शेखरकस्य जीवितम् ।
वक्षःस्थले दयिता दत्तोत्पलवासिता मुखे मदिरा ।
शीर्षे च शेखरको नित्यमिव संस्थिता यस्य ॥२॥

अरे, को मां चालयति । अवश्यं नवमालिका मां परिहसति ।

1 मत्त drunk, intoxicated ; PP.√मद् 4P 2 विचित्र strange, variegated 3 विह्वल agitated, confused 4 वेष dress. 5 विचित्रह्वलवेष =विचित्र. विह्वल. वेष यस्य सः 6 चषक m n. wine-glass, vessel. 7 चषकहस्त =चषक हस्ते यस्य स 8 स्कन्ध shoulder. 9 आरोपित set up ; caus PP. आ+√रुह 1P. 10 सुरा f. = मदिरा f wine 11 भाण्डम् pot, chest 12 स्कन्धारोपितसुराभाण्ड =स्कन्धे आरोपित सुराभाण्ड येन स 13 चेट servant. 14 नित्यम् always 15 पिबति he drinks;√पा 1P. 16 देव (nom dual देवौ) god 17 बलदेव Krisna's elder brother who was fond of wine. 18 कामदेव god of love. 19 सफल fruitful. 20 शेखरक crest, flower-garland on the head. 21 उत्पलम् lotus 22 वासित scented, PP.√वास् 10U 23 दत्तोत्पलवासिता=दत्ते उत्पले वासिता 24 शीर्षम (loc s शीर्षे) head. 25 यस्य=विटस्य . 26 अवश्यम् surely, inevitably. 27 नवमालिका f. jasmine, name of a Maid

य (बलदेव ) नित्य सुरां पिबति, य (कामदेव ) जनस्य प्रियसङ्गम करोति, मम द्वौ अपि तौ देवौ बलदेव कामदेव च ॥ यस्य वक्षःस्थले दयिता मुखे दत्तोत्पलवासिता मदिरा शीर्षे च शेखरक नित्य इव संस्थिताः ॥

## ACT THREE

(Then appear Vita clad in a strange and distracted garment, holding a wine-glass in his hand, and a servant with a wine-pot placed upon his shoulder)

Vita —To me there are only two gods,--Baladeva who always drinks wine, and Kāmadeva who brings about the loving union of men and women

(staggering) Fruitful, indeed, is the life of me, Shekharaka, on whose bosom lies my beloved one, into whose mouth wine scented with lotuses placed on it is filled and on whose head is placed a garland of flowers almost constantly.

*Ah wonder! Who is shaking me? It must be Navamālikā joking with me.*

चेटः— भर्तः, न च तावत् साऽद्यापि इहागच्छति ।

विटः— (सरोषम) प्रथमप्रहरे एव मलयवत्या विवाहमङ्गलं निर्वृत्तम् । तत् कथं सा इदानीं प्रभातेऽपि नागच्छति । (विचिन्त्य सहर्षम्) अथवा विवाहमहोत्सवे सर्व एव प्रियप्रणयिनीजनसनाथः सिद्धविद्याधरलोकः कुसुमाकरोद्याने आपानसौख्यमनुभविष्यतीति तर्कयामि । तत्रैव नवमालिका मामपेक्षमाणा तिष्ठति । तत्तत्रैव गमिष्यामि । कीदृशो नवमालिकया विना शेखरकः ।

(प्रस्खलन्निष्क्रमितुमीहते)

चेटी — एतु एतु भर्ता । एतत् कुसुमाकरोद्यानम् । तत् प्रविशतु भर्ता ।

(उभौ प्रवेश नाटयत ।) (तत प्रविशति स्कन्धन्यस्तवस्त्रयुगलो विदूषक ।)

1 प्रहर a watch (3 hours) 2 मङ्गलम् auspicious ceremony 3 प्रभातम् (loc. s प्रभाते) daybreak 4 प्रणयिनीजन loving women 5 सनाथ a possessed of, with 6 आपानम् banquet, drinking party 7 सौख्यम् pleasure 8 आपानसौख्यम्=आपानस्य सौख्यम् 9 अपेक्षमाण waiting for, pres part अप+√ईक्ष् 1A 10 प्रस्खलत् (nom s m प्रस्खलन्) stumbling pres part प्र+√स्खल् 1P 11 ईहते he wishes, desires,√ईह 1A 12 उद्यानम् garden 13 न्यस्त put on, PP नि+√अस् 4P वस्त्रम् garment 15 स्कन्धन्यस्तवस्त्रयुगल =स्कन्धयो (स्कन्धे वा) न्यस्त वस्त्रयुगल येन स

Servant — Master, she is not coming here yet

Vita — (angrily) In the first watch of the night Malayavati's auspicious wedding ceremony was completed Then why does she not come back, though it is now daybreak ? (Thinking with joy) I suppose that all the Siddhas and Vidyadharas accompanied by their loving women, are perhaps enjoying the pleasure of a banquet at the garden of Kusumakara on the occasion of the grand wedding festival There Navamalikā is waiting for me So I am going there What will be the plight of Shekharaka (ie, garland) without Navamālikā (ie a jasmine) ?

(Stumbling, he wants to move )

Servant —This way, this way, master ! This is the garden of Kusumākara May you enter !

(Both enter )

(Then enters the Jester with a pair of garments thrown over the shoulder )

विदूषकः— सम्पूर्णा मनोरथाः प्रियवयस्यस्य । श्रुतं खलु मयाऽपि प्रियवयस्यः कुसुमाकरोद्यानं गमिष्यतीति । तद्यावत् तत्रैव गमिष्यामि । (परिक्रम्य विलोक्य च) इदं कुसुमाकरोद्यानम् । यावत् प्रविशामीदम् । (प्रविश्य भ्रमरबाध नाटयन्) अरे, कथं पुनर्दुष्टमधुकरा मामेवाभिभवन्ति । (आत्मानमाघ्राय) भवतु ज्ञातं यत् तन्मलयवतीबन्धुजनेन जामातुः प्रियवयस्य इति कृत्वा सबहुमानं वर्णकैर्विलिप्तोऽस्मि । सन्तानकुसुमशेखरकश्च मम शीर्षे पिनद्धः । स खलु एषोऽत्यादरोऽनर्थीभूतः । किमिदानीमत्र करिष्यामि । अथवा एतेनैव मलयवतीसकाशाल्लब्धेन रक्तांशुकयुगलेन स्त्रीवेषं विधायोत्तरीयकृतावगुण्ठनो गमिष्यामि । प्रेक्षे तावत् किं दास्याः पुत्रा मधुकराः करिष्यन्ति ।

1 भ्रमर = मधुकर bee 2 बाध annoyance 3 दुष्ट a wicked 4 अभिभवन्ति they assail attack, अभि + √ भू 1 P 5 आघ्राय having smelled, gerund आ + √ घ्रा 1 P 6 जामातृ m (gen s जामातुः) son in law 7 विलिप्त besmeared, PP. वि + √ लिप् 6 U 8 सन्तान m n heavenly tree 9 पिनद्ध fastened, PP पि + √ नह् 4 U 10 अति-आदर great respect 11 अनर्थीभूत become harmful, meaningless 12 रक्तांशुकम् red garment 13 उत्तरीयम् upper garment 14 अवगुण्ठनम् veil, covering 15 उत्तरीयकृतावगुण्ठन = उत्तरीयेण कृत अवगुण्ठन येन स तथाभूत

Jester — My dear friend has his wishes fulfilled And I have also heard that he would go to the garden of Kusumakara So I shall just go there (walking round and looking) This is the garden of Kusumakara Let me enter here (Entering and being annoyed by the bees) Eh! Why these wicked bees are attacking me? (Smelling himself) Well I know the reason is that the kinsfolk of Malayavati respectfully painted me with colours, considering me to be the fond friend of their son in law, and fastened my head with a garland of Santana flowers Really their great respect has become harmful What shall I do here now? Or dressing myself in this pair of red garments obtained from Malayavati like a woman and covering myself with the upper garment I shall go, and see what these vile bees are going to do

(तथा करोति)

विटः—— (निरूप्य सहर्षम्) अरे चेट, (अङ्गुल्या निर्दिश्य सहासम्) एषा खलु नवमालिका आगता। मां प्रेक्ष्य चिरस्यागत इति कुपिता अवगुण्ठनं कृत्वाऽन्यतो गच्छति। तत् कण्ठे गृहीत्वा प्रसादयाम्येनाम्। (सहसोपसृत्य कण्ठे गृहीत्वा मुखे ताम्बूलं दातुमिच्छति।)

विदूषकः——(मद्यगन्धं सूचयन् नासिकां गृहीत्वा पराङ्मुखं स्थित्वा) कथमेकेषां मधुकराणां सकाशात् परिभ्रष्ट इदानीमन्यस्य दुष्टमधुकरस्य मुखे पतितोऽस्मि।

विटः——कथं कोपेन पराङ्मुखीभूता। (प्रणामं कुर्वन् विदूषकस्य चरणमात्मनः शिरसि कृत्वा) प्रसीद नवमालिके प्रसीद। (ततः प्रविशति चेटी।)

चेटी—— आज्ञप्तास्मि भर्तृदारिकया 'हञ्जे नवमालिके, कुसुमाकरोद्यानं गत्वोद्यानपालिकां पल्लविकां भण।

1 चिरस्य after a long time 2 प्रसादयामि I propitiate, caus प्र + √ सद् 1 P 3 ताम्बूलम् Prepared betel leaf 4 मद्यगन्ध odour of wine 5 परिभ्रष्ट freed from fallen, PP परि + √ भ्रश् 4 P 6 पतित fallen, PP √ पत् 1 P 7 प्रणाम salutation 8 प्रसाद be thou pleased ! लोट् प्र + √ सद् 1 P 9 उद्यानपालिका f garden-keeper

(He does so)

Vita — (looking in joy) Hoy servant ! (Pointing his finger with a smile) Indeed, Navamālika has come After seeing me, she is going in another direction, with a veil on her face, angry that I came late So embracing her by the neck I shall propitiate her (All of a sudden approaching and catching him by the neck, he tries to put a betel leaf into the mouth)

Jester — (sensing the odour of wine and then holding his nose he turns aside) How is it that as soon as I have fled from the first bees now I am fallen into the mouth of another wicked bee ?

Vitá — Why do you turn your face aside through anger ? (Bowing and placing the clown's foot on his head) Be pleased, Navamālika, be pleased ! (Then enterts a maid )

Maid — I have been ordered by the princess, — "maid Navamalika, go to the Kusumakara garden and speak to the keeper, Pallavika.

अद्य सविशेषं तमालवीथिकां सज्जीकुरु। मलयवतीसहितेन जामात्रा तत्र गन्तव्यम्' इति। आज्ञप्ता मया पल्लविका। तद्यावद्रजनीविरहवर्द्धितोत्कण्ठं प्रियवयस्यं शेखरकमन्विष्यामि। (दृष्ट्वा) एष शेखरकः। (सरोषम्) कथमन्यां कामपि स्त्रियं प्रसादयति। तदिह स्थितैव जानामि कैषेति। .

विट :— (सहर्षम्)

हरिहरपितामहानामपि गर्वितो यो न जानाति नन्तुम्।
स शेखरकश्चरणेषु तव नवमालिके, पतति ॥३॥

विदूषकः—दास्याः पुत्र, मत्तपालक, कुतोऽत्र नवमालिका।

1 सविशेषम् specially. 2 तमाल: name of tree. 3 वीथिका f road. 4 तमाल-वीथिकाम् = तमालवृक्षमध्यस्था वीथिकाम्. 5 रजनी f night. 6 विरह separation 7 वर्द्धित increased; caus. PP. √ वृध् 1A. 8 रजनीविरहवर्द्धितोत्कण्ठम् = रजन्या यः विरहः तेन वर्धिता उत्कण्ठा यस्य तम्. 9 अन्विष्यामि I search; अनु+√ इष् 4 P. 10 हरिः = Viṣṇu. 11 हर = शिव 12 पितामहः = ब्रह्मा 13 गर्वित haughty. 14 नन्तुम् to bow; inf. √ नम् 1 U. 15 पालक ruler, guardian.

य गर्वित हरिहरपितामहाना अपि नन्तु न जानाति स शेखरक तव चरणेषु पतति, नवमालिके ॥

"Specially decorate the pathway between the Tamāla trees as the bridegroom (i.e. son-in law) shall be going there today with Malayavatī." And her order has been conveyed to Pallavikā. So now I am going to search Shekharaka, my fond friend whose longing for me is increased due to a night's separation. (Looking) Here is Shekharaka. (Angrily) How he is propitiating some other woman! By standing here I will find out who she is.

Vita — (gaily)
O Navamālikā, this Shekharaka, who, being self-conceited, does, not know to bow even to Visnu, Shiva and Brahmā, falls down at your feet

Jester — Eh you, son of a slave-girl! King of drunkards! Where is Navamālika after all?

चेटी — (निरूप्य सस्मितम्) कथं मामिति कृत्वा मदपरवशेन शेखरकेण आर्यात्रेयः प्रसाद्यते । तद्यावदलीकं कोपं कृत्वा द्वावप्येतौ परिहसिष्यामि ।

चेट :— (चेटी दृष्ट्वा शेखरकं हस्तेन चालयन्) भर्तः, मुञ्चैतम् । न भवत्येषा नवमालिका । एषा पुना रोषारक्ताभ्यां लोचनाभ्यां प्रेक्षमाणागता ।

चेटी — (उपसृत्य) शेखरक, का पुनरेषा प्रसाद्यते ।

विदूषक :—(अवगुण्ठनमवतार्य) भवति, कोऽपि ब्राह्मणोऽहं मन्दभागधेयप्रयुक्तः ।

विट :— (विदूषकं निरूप्य) अरे कपिलमर्कट, त्वमपि शेखरकं प्रतारयसि । अरे चेट, गृहाणैतम् । यावद् नवमालिकां प्रसादयामि ।

1 मद intoxication 2 परवश a subject to, under the influence of 3 अलीक a pretended, false 4 रोषारक्ताभ्याम् = रोषेण आ — रक्ताभ्याम् 5 लोचनम् (ins d लोचनाभ्याम्) eye 6 अवतार्य having taken down, gerund अव + √ तॄ 1 P. 7 मन्दभागधेयम् misfortune 8 प्रयुक्त yoked, endoweed with, PP प्र + √ युज् 7U 9 कपिल tawny 10 मर्कट monkey, spider 11 प्रतारयसि thou cheatest, णिजन्ता लट् प्र + √ तॄ 1 P 12 गृहाण capture thou, लोट √ ग्रह 9 U

Maid — (watching with a smile) It is wonderful that under the influence of intoxication Shekharaka is propitiating Sir Ātreya, mistaking him for me So now I am going to ridicule both of them with a pretended anger

Servant — (after detecting the maid, shakes Shekharaka with his hand) O master, do let him alone! He is not that Navamalikā, but she has come, looking at us with her eyes slightly reddened through anger

Maid — (approaching) O Shekharaka, who is she who is being propitiated?

Jester — (taking down his veil) Lady, I am nothing more than a Brahmin endowed with misfortune

Vita — (observing the jester) Eh tawny monkey! Are you cheating this Shekharaka Eh servant, capture him! while I propitiate real Navamalikā

चेट :— यद् भर्ता आज्ञापयति ।

विट :— (विदूषक मुक्त्वा चेट्या पादयो पतति) प्रसीद नवमालिके, प्रसीद ।

विदूषक :— (आत्मगतम्) एप मेऽपक्रमितुमवसर: । (पलायितुमीहते ।)

चेट :— (विदूषक यज्ञोपवीते गृह्णाति । यज्ञोपवीत त्रुट्यति) क क कपिलमर्कट पलायसे । (उत्तरीयेणैव गलके बद्ध्वा कर्षति ।)

विदूषक :— भवति नवमालिके, प्रसीद मोचय माम् ।

चेटी — (विहस्य) यदि भूमौ शीर्षं निवेश्य पादयो: मे पतसि ।

विदूषक :— (सरोप सप्रकम्पञ्च) भो:, राजमित्रं ब्राह्मणो भूत्वा दास्या: पुत्र्या: पादयो: पतिष्यामि ।

चेटी — (अङ्गुल्या तर्जयन्ती सस्मितम) इदानी पातयिष्यामि । शेखरक, उत्तिष्ठ । प्रसन्ना तेऽहम् ।

1 अपक्रमितुम to disappear inf अप+√क्रम 1 U 4 P 2 पलायितुम to flee inf √पलाय 1 A 3 यज्ञोपवीतम sacred thread as a sign of upper social castes such as Brahmin 4 त्रुटयति it breaks, √त्रुट 4 6 P 5 गलक neck 6 प्रकम्प trembling 7 सप्रकम्पम ad 8 मित्रम friend 9 तर्जयत् (nom s f तर्जयन्ती) threatening, pres part √तर्ज 10 P 10 पातयिष्यामि I will cause to fall, णिजन्ताल्लृट् √पत् 1 P 11 प्रसन्न favourable pleased

Servant — Yes, I will do so

Vita — (releasing the jester, falls before the maid's feet) Be pleased, Oh Navamalikā, be pleased !

Jester — (to himself) This is my chance to flee (He wants to escape)

Servant — (Catches the jester by his sacred thread It is cut off) O tawny monkey where, where are you escaping ? (Binding the jester at the neck with the upper garment, he pulls him )

Jester — Lady Navamalika, please free me !

Maid — (laughing) If you put your head on the ground and fall prostrate at my fe t

Jester — (trembling with anger) Hellow ! Being a Brahmin friend of the king, shall I fall prostrate before the feet of a slave-girl's daughter ?

Maid — (threatening with a finger, with a smile) I will prostrate you Stand up, Shekharaka ! I am pleased with you (i e I pardon you )

(कण्ठे गृह्णाति) एष पुनर्जामातुः प्रियवयस्यस्त्वया खलीकृतः। एवञ्च श्रुत्वा कदाऽपि भर्ता मित्रावसुस्तुभ्यं कुप्यति। तदादरेण सम्मानयैनम्।

विट :— यन्नवमालिकाज्ञापयति (विदूषक कण्ठ गृहीत्वा) आर्य, त्वं मया सम्बन्धीति कृत्वा परिहसितः। (घूर्णन्) सत्यमेव शेखरक, त्वया कृतः परिहासः। (उत्तरीय वर्तुलीकृत्य आसन ददाति) इह उपविशतु सम्बन्धी।

विदूषक :— (स्वगतम्) दिष्ट्यापगत इवास्य महावेगः। (उपविशत।)

विट :— नवमालिके, उपविश त्वमपि एतस्य पार्श्वे येन द्वावपि युवां सममेव सम्मानयिष्यामि। (चटी विहस्योपविशति।)

1 खलीकृत insulted, ill treated PP खली+√कृ 8 U 2 सम्मानय honour thou! णिजन्ताल्लोट् सम्+√मन 4 A 3 सम्बन्धी m relation 4 घूर्णन (nom s m घूर्णन) staggering, pres part √घूर्ण 1 A 6 P 5 वर्तुलीकृत्य having made a circle. 6 महावेग great wrath 7 पार्श्वे by the side 8 समम equally 9 अपगत disappeared PP अप+√गम 10 सम्मानयिष्यामि I shall honour णिजन्ताल्लृट् सम+√मन

(She holds him by the neck) But the bridegroom's dear friend has been ill treated by you Whenever Lord Mitravasu hears about it, he will be angry with you So treat him with respect!

Vita — As Navamalikā bids me (Seizing the jester by the neck) Sir! I have made a joke with you, considering you to be my relation (Staggering) Ah Shekharaka, is it true that you have made a joke? (Making a circle out of the upper garment) he offers a seat) Be seated here, my kinsman!

Jester — (to himself) Fortunately it seems that his great wrath has disappeared (Both men sit down)

Vita — Navamalika you may also sit down besides him so that I might equally honour both of you

(The maid sits down laughing)

विट :— (चषकमादाय) अरे चेट, सुभृतं खल्वेतं चषकं कुरु अच्छसुरया ।

चेट :— (नाट्येन चषकभरण करोति ।)

विट :— (स्वशिर शेखरात् पुष्पाणि गृहीत्वा चषके वि यस्य जानुभ्या स्थित्वा नवमालिकाया उपनयति)
नवमालिके, आस्वाद्य देह्येतमेतस्मै ।

चेटी — (सस्मितम्) यत् शेखरको भणति । (तथा कृत्वा विटस्यार्पयति ।)

विट :— (विदूषकस्य चषकमर्पयति) एतन्नवमालिकामुखसंसर्गसविशेषवासितरसं शेखरकादन्येन केनाप्यन्येनानास्वादितपूर्वं तत् पिबैतत् । किं ते अतोऽप्यपरं सम्मानं करिष्यामि ।

विदूषक :— (सवैलक्ष्यस्मित कृत्वा) शेखरक, ब्राह्मणः खल्वहम् ।

1 चषकम् Wine-vessel. 2 सुभृत well filled , PP सु+√भृ 1 3 P 3 अच्छ clear, pure 4 भरणम् supporting, filling 5 पुष्पम (nom and acc P पुष्पाणि) flower 6 वि यस्य having thrown , gerund वि+नि+√अस 4 P 7 जानु n knee 8 जानुभ्या स्थित्वा having knelt down 9 ससर्ग contact 10 रस taste, flavour 11 नवमालिका-मुखससर्गसविशेषवासितरसम् = नवमालिकाया मुखससर्गेण सविशेष वासित रस यस्य तत् 12 आस्वाद्य having tasted , gerund आ+√स्वाद 1 A 13 अनास्वादित not tasted 14 पूर्वम् before, *formerly 15 पिब drink thou , लोट् √पा 1 P 16 देहि give thou ! लोट्√दा 3 U*

Vita — (*taking the wine vessel*) Ah servant, do fill up this wine-vessel with that pure wine !

(The servant fills wine by means of acting )

Vita — (taking some flowers from the garland on his head, casting them into the vessel and kneeling down, offers it to Navamalika) O Navamālikā, after tasting, give this to him

Maid — (smiling) As Shekharaka tells me (Doing so she returns it to Vita )

Vita — (giving it to jester) Nobody but Shekharaka has ever tasted this wine whose flavour is especially scented by the touch of Navamālika's mouth So drink this ! What more honour can I do beyond this ?

Jester — (with an embarassed smile) Shekharaka, I am really a Brahmana

विट :— यदि त्वं ब्राह्मणः तत् क्व ते ब्रह्मसूत्रम् ।

विदूषक :— तत् खलु मेऽनेन चेटेन कृष्यमाणं छिन्नम् ।

चेटी — (विहस्य) यद्येवं तद्वेदाक्षराण्यपि तावत् कत्यपि उदाहर ।

विदूषक :— भवति, अनेन शीधुगन्धेन पिनद्धानि वेदाक्षराणि । अथवा किं मम भवत्याः समं विवादेन। एष ते ब्राह्मणः पादयोः पतति । (इति पादयो पतितुमिच्छति ।)

चेटी — (हस्ताभ्या निवार्य) मा खल्वेवं करोत्वार्यः । शेखरक, अपसर अपसर, ब्राह्मणः खल्वेषः । (विदूषकस्य पादयो पतति) आर्य, न त्वया कोपितव्यम् । सम्बन्ध्यनुरूपः खल्वेष मया परिहासः कृतः ।

1 ब्रह्मसूत्रम् sacred thread 2 छिन्न cut off; PP √छिद् 7 U. 3 अक्षरम् (P. अक्षराणि) syllable, word 4 कति pron and a (always plural) how many, some. 5 उदाहर narrate thou ! लोट् उदा+√ हृ 1 U 6 शीधु m n wine 7 पिनद्ध hidden ; PP. पि+√नह 4 U. 8 विवाद dispute. 9 अपसर begone, withdraw thou, लोट् अप+√सृ 1 P. 10 कोपितव्य (ought) to be angered, pot PP. √कुप् 4 P.

Vita — If you are a Brahmana, where is your sacred thread ?

Jester — Certainly this servant snatched my thread and cut it off

Maid — (ridiculing) If so, now recite some Vedic hymns

Jester — Lady, the Vedic hymns are concealed by this wine odour. Or what is the use of my arguing with you ? This Brahmin falls prostrate before your feet (Thus he tries to fall down )

Maid — (checking him with her hands) Noble Sir, don't do so Ah Shekharaka, get away, get away ! He is indeed a Brahmana. (She prostrates herself at the jester's feet ) Sir please don't be angry, as I simply made a joke expressive of my kinsmanship with you.

विट :— अहमप्येनं प्रसादयामि । (पादयोर्निपत्य) मर्षयतु मर्षयतु आर्यः यन्मया मदपरवशेनापराद्धम् । येनाहं नवमालिकया सह आपानकं गमिष्यामि ।

विदूषक :— मर्षितं मया, गच्छतं युवाम् । अहमपि प्रियवयस्यं प्रेक्षे ।

(निष्क्रान्तो विटश्चेट्या सह चेटश्च ।)

विदूषक :— अतिक्रान्तो ब्राह्मणस्याकालमृत्युः । तद्यावदहमपि मत्तपालकसङ्गदूषित इह दीर्घिकायां स्नास्यामि । (तथा करोति) (नेपथ्याभिमुखमवलोक्य) एष प्रियवयस्योऽपि रुक्मिणीमिव हरिर्मलयवतीमवलम्ब्य इत एवागच्छति । तद्यावत् पार्श्ववर्ती भवामि ।

1 मर्षयतु may he forgive! लोट् √ मृष् 10 U 2 आपानकम् banquet. 3 मर्षित forgiven; PP. √ मृष् 4 अतिक्रान्त passed over; PP अति +√ क्रम् 1 U. 4 P. 5 अकाल untimely. 6 मृत्यु death 7 दूषित defiled; PP. √ दुष् 4 P. 8 मत्तपालकसङ्गदूषित : = मत्ताना पालकस्य सङ्गेन दूषित :. दीर्घिका f pond, lake. 10 स्नास्यामि I shall bathe; लृट् √ स्ना 2 P. 11 अवलम्ब्य having leaned; gerund अव +√ लम्ब् 1 A. 12 पार्श्ववर्तिन् (nom. s m. — वर्ती) attending upon.

Viṭa — I, too, will pacify him. (Falling down at his feet) May the noble one forgive me for my offence under the influence of wine! so that I might go to the party with Navamālikā.

Jester — I forgive you. You may go I shall also see my dear friend (Viṭa and the servant move away with the maid.)

Jester — A Brahmana's untimely death has vanished So in the meanwhile I will bathe myself, defiled by the touch of that lord of drunkards, in this pond. (He does so Then looking at the facade of the curtain) My dear friend is coming here, supporting Malayavātī like Hari who supports Rukminī. Let me now wait upon him

(तन प्रविशति गृहीतवरनेपथ्यो नायको मल्यवती विभवतश्च परिवारः ।)

**नायकः**:— (मल्यवतीमवलोक्य सहर्षम्)

दृष्टा दृष्टिमधो ददाति कुरुते नालापमाभाषिता
शय्यायां परिवृत्य तिष्ठति वलादालिङ्गिता वेपते ।
निर्यान्तीषु सखीषु वासभवनान्निर्गन्तुमेवेहते
जाता वामतयैव मेऽद्य सुतरां प्रीत्यै नवोढा प्रिया ॥ ४ ॥

(मल्यवती पश्यन्) प्रिये मलयवति ।

1 गृहीतवरनेपथ्य = गहीत वरनेपथ्य येन स. 2 विभवतम् ind according to rank or position 3 अधम् ind below, down 4 आलाप speech talk 5 आभाषित addressed, spoken ; PP आ + √ भाष 1 A 6 शय्या f (loc s शय्यायाम्) bed 7 परिवृत्य having turned away, gerund परि + √ वृत् 1 A 8 बलात् ad by force 9 आलिङ्गित embraced, PP आ + √ लिङ्ग् 1 U 10 वपते she trembles, √ वेप् 1 A 11 सखीषु निर्यान्तीषु (loc abs) when friends go out 12 वासभवनम् (abl s वासभवनात्) chamber, residence 13 जाता = भूता 14 वामता f perversity 15 सुतराम् ad very much more. 16 नवोढा newly married (from √ वह 1 U)

अद्य नवाढा मे प्रिया दृष्टा दृष्टिं अध ददाति आभाषिता आलाप न कुरुते शय्याया परिवृत्य तिष्ठति बलात् आलिङ्गिता वेपते वासभवनात् सखीषु निर्यान्तीषु निर्गन्तु एव ईहते वामतया एव प्रीत्यै सुतरां जाता ॥ शार्दूलविक्रीडित

(Then enter the hero in wedding attire, Malayavatī and the retinue according to rank)

Hero — (looking at Malayavati with joy)
Today, my newly married darling casts down her eyes when seen, makes no reply when addressed turns aside in bed trembles when embraced by me by force and wishes to go out when her friends move out of the chamber by her perversity she has become all the more pleasing (to me)
(Looking at her) Oh my loving Malayavati !

हुङ्कारं ददता मया प्रतिवचो यन्मौनमासेवितं
यद् दावानलदीप्तिभिस्तनुरियं चन्द्रातपैस्तापिता ।
ध्यातं यत् सुबहून्यनन्यमनसा नक्तंदिनानि प्रिये
तस्यैतत् तपसः फलं मुखमिदं पश्यामि यत्तेऽधुना ॥ ५ ॥

नायिका — (अपवार्य) हञ्जे चतुरिके, न केवलं दर्शनीयः प्रियमपि भणितुं जानात्येव ।

चेटी — (विहस्य) अयि प्रतिपक्षवादिनि, सत्यकमेवैतत् । किमत्र प्रियवचनम् ।

1 हुङ्कार sound of 'hum' 2 ददत् (ins s m ददता) giving, uttering, pres part √दा 3U 3 प्रतिवचस् answer 4 मौनम् silence 5 आसेवित enjoyed, practised, PP आ+√सेव् 1A. 6 दावानल forest-fire 7 दीप्ति f (ins P दीप्तिभि ) lustre, splendour. 8 तनु f body 9 दावानलदीप्तिभि =दावानलस्य दीप्ति इव दीप्ति येषा तै 10 तापित heated, tormented, 1P 10U √तप् 11 ध्यात thought of, meditated, PP √ध्यै 1P 12 नक्तदिनानि days and nights 13 तपस n. (gen s तपस ) penance 14 अधुना ind now 15 दर्शनीय fit to be seen, charming 16 प्रतिपक्षवादिन् a (voc s f—वादिनि) rival, or contradicting speaker

प्रिये, यत् प्रतिवच हुङ्कार ददता मया मौन आसेवति यत् दावानलदीप्तिभि चन्द्रातपै इय तनु तापिता यत् सुबहूनि नक्तदिनानि अनन्यमनसा (मया) ध्यात यत् अधुना इद ते मुख पश्यामि एतत् तस्य तपस फलम् ॥ शार्दूलविक्रीडितम्

That I behold thy face now is the fruit of this very penance, wherein I resorted to silence merely uttering 'hum' as a reply, wherein this body of mine was heated by the moon-beams splendid as the forest-fire and wherein day and night I meditated single minded, my love!

Heroine— (aside) Ah Maid Chaturikā, not only he is charming but knows how to speak agreeably

Maid —(laughing) Ah you a contradicting speaker it is only true Is there a flattery in his pronouncement ?

नायक :— चतुरिके, आदेशय मार्गं कुसुमाकरोद्यानस्य ।

चेटी — एतु एतु भर्ता ।

नायक :— (परिक्रम्य नायिकां निर्दिश्य) स्वैरं स्वैरमागच्छतु भवती ।

खेदाय स्तनभार एव किमु ते मध्यस्य हारोऽपरः
ताम्यत्यूरुयुगं नितम्बभरतः काञ्च्याऽनया किं पुनः ।
शक्तिः पादयुगस्य नोरुयुगलं वोढुं कुतो नूपुरौ
स्वाङ्गैरेव विभूषिताऽसि वहसि क्लेशाय किं मण्डनम् ॥ ६ ॥

1 मार्ग way 2 स्वैरम् ind in a low tone slowly 3 खेद (dat s खेदाय) pain, fatigue 4 भार burden, weight. 5 किमु why 6 हार pearl necklace 7 अपर a another 8 ताम्यति it is exhausted, लट√तम 4p 9 ऊरु m thigh 10 नितम्बभरतम् ad due to the weight of hips 11 काञ्ची f girdle 12 शक्ति strength ability(f) 13 वोढुम् to bear, to carry, inf √वह् 1U 14 कुतस् why 15 अङ्गम् (ins P अङ्गैः) limb 16 विभूषित decorated, PP वि+√भूष 1P 10U 17 क्लेश (dat s क्लेशाय) pain, fatigue 18 मण्डनम् decoration, ornament 19 मध्य waist

स्तनभार एव ते मध्यस्य खेदाय अपर हार किमु नितम्बभरत ऊरुयुग ताम्यति अनया काञ्च्या किं पुनर्, ऊरुयुगल वोढु पादयुगस्य शक्ति न कुत नूपुरौ, स्वाङ्गैः एव विभूषिता असि क्लेशाय मण्डन किं वहसि ॥ शार्दूलविक्रीडितम

Hero — Chaturika show me the way to the Kusumakara garden !

Maid — My lord, this way this way

Hero — (pacing about and pointing the heroine) My lady, come very slow ly

The weight of thy breasts just tire out thy waist, why then another pearl neklace? Due to the weight of thy hips thy thighs are exhausted, why golden girdle? Thy feet have no strength to carry the thighs, why then these anklets? Thou art just decorated with thy own limbs, why dost thou bear ornaments only to be fatigued?

चेटी— एतत् खलु तत् कुसुमाकरोद्यानं तत् प्रविशतु भर्ता (सर्वे प्रविशन्ति)

नायक:—(विलोक्य) अहो नु कुसुमाकरोद्यानस्य परा श्रीः । इह हि ।

निष्यन्दश्चन्दनानां शिशिरयति लतामण्डपे कुट्टिमान्तानाराद्
धारागृहाणां ध्वनिमनु तनुते ताण्डवं नीलकण्ठः ।
यन्त्रोन्मुक्तश्च वेगाद् चलति विटपिनां पूरयन्नालवाला-
नापातोत्पीडहेलाहृतकुसुमरजःपिञ्जरोऽयं जलौघः ॥ ७ ॥

1 निष्यन्द discharge, flow 2 शिशिरयति it cools, नामधातु √ शिशिरय् 3 लतामण्डप Creeper pavilion 4 कुट्टिम m n Pavement 5 अन्त (acc P अन्तान) border, end 6 आरात् ind. near, from a distance 7 धारागृहम् (gen P —गृहाणाम्) shower-house, room 8 ध्वनि m sound 9 अनु ind after, corresponding with 10 तनुते it performs, spreads, √ तन् 8 U 11 ताण्डव m n dance 12 नीलकण्ठ peacock 13 यन्त्रम् fountain 14 उन्मुक्त discharged, PP उद् + √ मुच् 6P 15 वेग speed force 16 विटपिन् (gen P विटपिनाम्) tree 17 आलवालम् water basin round the root of a tree 18 आपात falling 19 उत्पीड gush, stream 20 हेला ease, contempt (हेलया easily) 21 रजस् n dust, pollen 22 पिञ्जर golden 23 आपातोत्पीडहेलाहृतकुसुमरज पिञ्जर = आपात य उत्पीड तेन हेलया हृतेन कुसुमरजसा पिञ्जर 24 जलौघ flood of water

चन्दनाना निष्यन्द लतामण्डपे कुट्टिमान्तान् शिशिरयति आरात धारागृहाणा ध्वनिं अनु नीलकण्ठ ताण्डव तनुते यन्त्रोन्मुक्त च अय जलौघ आपातोत्पीडहेलाहृतकुसुमरज पिञ्जर (सन) विटपिना आलवालान पूरयन् वेगात् चलति ॥ स्रग्धरा

Maid — This is the Kusumākara garden May my lord enter it

(All enter)

Hero — (looking) O exquisite beauty of the Kusumakara garden! For here

The flowing sap of the Sandals cools the borders of the pavement in the creeper-pavilion nearby a peacock performs a dance after the sound of the shower-huts, and this flood of water, discharged from the fountains, flows down rapidly, filling up the basins of the trees, and being turned yellow by the pollen easily snatched by its gushing stream

अपि च । अमी गीतारम्भैर्मुखरितलतामण्डपभुवः
परागैः पुष्पाणां प्रकटपटवासव्यतिकराः ।
पिबन्तः पर्याप्तं सह सहचरीभिर्मधुरसं
समन्तादापानोत्सवमनुभवन्तीह मधुपाः ॥ ८ ॥

विदूषकः— (उपसृत्य) जयतु जयतु भवान् । स्वस्ति भवत्यै ।

नायकः— वयस्य, चिराद् दृष्टोऽसि ।

विदूषकः— भो वयस्य, लघु एवागतोऽस्मि । किं पुनर्विवाहमहोत्सवमिलितसिद्धविद्याधराणामापानदर्शनकौतूहलेन परिभ्रमन् एतावतीं वेलां स्थितोऽस्मि । तत् त्वमपि तावत् प्रेक्षस्व ।

1 गीतारम्भ Commencement of songs 2 मुखरित a resonant 3 मुखरितलतामण्डपभुव =मुखरिता लतामण्डपस्य भू यै त 4 पराग pollen 5 व्यतिकर mixture 6 प्रकटपटवासव्यतिकरा = प्रकट पटवासस्य व्यतिकर येषा ते 7 पिबत (nom p m पिबन्त) drinking, Pres Part √पा 1 P 8 पर्याप्त gained, whole, all 9 सहचरी f Consort wife 10 मधुरस honey 11 समन्तात् ınd on all sides 12 मधुप bee 13 मिलित joined, met, PP √ मिल् 6 P

गीतारम्भै मुखरितलतामण्डपभुव पुष्पाणा परागै प्रकटपटवासव्यतिकरा सहचरीभि सह पर्याप्त मधुरस पिबन्त मधुपा समन्तात् आपानोत्सव अनुभवन्ति ॥ शिखरिणी ।

And moreover,

With their commencements of songs, making the ground of this creeper-pavilion resonant, exhibiting their contact with the fragrance through the pollen of flowers, and drinking sufficient honey with their female companions the bees enjoy the festivity of drinking on all sides here

Jester — (approaching) Victory to your Highness ! Hail to your Ladyship !

Hero — Friend, I see you after a long time

Jester — O friend I have come here quickly What more, I have stayed away all these hours, roaming about with a curiosity to see the banquet of the Sidhas and Vidyadharas who have assembled together on the occasion of your grand wedding festival You, too, will see it now.

नायकः— एवं यथाह भवान् । (समन्तादवलोक्य) वयस्य, पश्य पश्य ।

दिग्धाङ्गा हरिचन्दनेन दधतः सन्तानकानां स्रजो
माणिक्याभरणप्रभाव्यतिकरैश्चित्रीकृताच्छांशुकाः ।
सार्धं सिद्धजनैर्मधूनि दयितापीतावशिष्टान्यमी
मिश्रीभूय पिबन्ति चन्दनतरुच्छायासु विद्याधराः ॥ ६ ॥

तदेहि वयमपि तां तमालवीथिं गच्छामः । (परिक्रामति)

विदूषकः— एषा खलु तमालवीथिका । एतां सञ्चरन्ती तावत् परिखेदितेव भवती दृश्यते । तदिहैव स्फटिकमणिशिलातल उपविश्य विश्राम्यामः ।

1 दिग्ध anointed, besmeared; PP. √ दिह् 2U. 2 दिग्धाङ्गा.=दिग्धानि अङ्गानि येषां ते. 3 स्रज् f. (nom & acc. P. स्रज ) garland. 4 माणिक्यम् jewel. 5 चित्रीकृत rendered bright. 6 चित्रीकृताच्छांशुकाः = चित्रीकृतानि अच्छांशुकानि येषां ते. 7 मधु n, (acc P. मधूनि) wine. 8 अवशिष्ट left as a remainder ; PP. अव + √ शिष् 7 P. 9 दयितापीतावशिष्टानि = दयिताभि· पीतात् अवशिष्टानि. 10 मिश्रीभूय having mixed; gerund मिश्री + √ भू 1 P. 11 परिखेदिता weary, fatigued. 12 स्फटिकम् crystal

हरिचन्दनेन दिग्धाङ्गा. सन्तानकाना स्रज. दधत माणिक्याभरणप्रभाव्यतिकरै. चित्रीकृताच्छांशुका. अमी विद्याधराः सिद्धजनै सार्धं मिश्रीभूय चन्दनतरुच्छायासु दयितापीतावशिष्टानि मधूनि पिबन्ति ॥ शार्दूलविक्रीडितम्

Hero —Yes, as you say. (Looking on all sides) My friend, behold, behold!

With their bodies besmeared with yellow sandal paste, bearing the garlands of Santāna blossoms and wearing white silk garments brightened on account of their contact with the lustre of the bejewelled ornaments, the Vidyādharas, mingling with the Siddhas, drink the wine left over by their loving women after tasting it, in the shades of the Sandal trees.

So come, let us go to the Tamāla lane (He walks round )

Jester — This is the Tamāla lane. Her ladyship appears tired, walking over here. So let us be seated here on the crystal-slab and rest.

नायकः— वयस्य, सम्यगुपलक्षितम् ।

एतन्मुखं प्रियायाः शशिनं जित्वा कपोलयोः कान्त्या ।
तापानुरक्तमधुना कमलं ध्रुवमीहते जेतुम् ॥ १० ॥

(नायिकां हस्ते गृहीत्वा) प्रिये, इहोपविशामः ।

नायिका— यदार्यपुत्र आज्ञापयति । (सर्वे उपविशन्ति)

नायकः— (नायिकाया मुखमुन्नमय्य पश्यन्) प्रिये, वृथैव त्वमस्माभिः कुसुमाकरोद्यान-कुतूहलिभिः खेदिता । कुतः ।

एतत्ते भ्रूलतोद्भासि पाटलाधरपल्लवम् ।
मुखं नन्दनमुद्यानमतोऽन्यत् केवलं वनम् ॥ १२ ॥

1 शशिन् m. (acc. s. शशिनम्) moon. 2 जित्वा having conquered; gerund √जि 1 P. 3. कान्ति : f. (ins. s. कान्त्या) beauty. 4 ताप heat. 5 अनुरक्त reddened, red. 6 ध्रुवम् firmly 7 वृथा in vain, uselessly. 8 कुतूहलिन् (ins. p m कुतूहलिभि) curious, eager. 9 उद्भासिन् a. (n. उद्भासि) radiant, charming 10 भ्रूलतोद्भासि= भ्रुवौ एव लते ताभ्या उद्भासि. 11 पाटल red 12 पाटलाधरपल्लवम्=पाटल. अधर एव पल्लव. यस्मिन् तत्, 13 नन्दनम् Indra's garden.

प्रियाया एतत् मुख कपोलयो कान्त्या शशिन जित्वा अधुना तापानुरक्त (भूत्वा) कमल जेतुं ध्रुवं ईहते ॥ आर्या ॥ एतत् ते भ्रूलतोद्भासि पाटलाधरपल्लव मुख नन्दन उद्यान, अतः अन्यत् केवल वनम् ॥ अनुष्टुप्

Hero — My friend, you have rightly observed.
Defeating the moon by the beauty of its cheeks, this face of my love, now reddened due to the heat, desires firmly to surpass the red lotus.
(Holding the heroine by the hand) My darling, let us sit here

Heroine — As my husband bids me. (All sit down.)

Hero — Darling, you have been uselessly troubled by us eager to see the Kusumākara garden (lifting up the heroine's face and looking) Whereas, This face of yours, charming on account of the creepers in the form of the eye-brows and the sprout in the shape of the red-lips, is a Nandana garden, and any other (garden) is merely a forest.

चेटी— (सस्मित विदूषक निर्दिश्य) श्रुतं त्वया भर्तृदारिकां कथं वर्णयति । आर्य, पुनरहं त्वां वर्णयामि ।

विदूषक:— (सहर्षम्) भवति, जीवितोऽस्मि । तत् करोतु भवती प्रसाद येनैष मा पुनरपि न भणति यथा त्वमीदृशः कपिलमर्कटाकार इति ।

चेटी— आर्य, त्वं मया विवाहजागरणे निद्रायमाणो निमीलिताक्षः दृष्टः । तत्तथैव तिष्ट येन वर्णयामि । (विदूषक तथा करोति ।)

चेटी— (स्वगतम्) यावदेष निमीलिताक्षस्तिष्ठति तावन्नीलरसानुकारिणा तमालपल्लवरसेन मुखं कालीकरिष्यामि । (उत्थाय तमालपल्लव निष्पीड्य विदूषकस्य मुख कालीकरोति । नायक नायिका च विदूषक पश्यत ।)

1 वर्णयति he describes, paints √ वर्ण 10U 2 जीवित alive, enlivened 3 कपिलमर्कटाकार = कपिल मर्कट तस्य आकार यस्य स 4 जागरणम् (loc s जागरण) wakefulness, watchfulness 5 निद्रायमाण sleeping, Pres Part ) नामधातु √ निद्राय् 6 निमीलित shut, closed, PP नि + √ मील् 1 P 7 अक्षि n (समासान्त क्षम्) eye 8 निमीलिताक्ष = निमीलित अक्षिणी यस्य स 9 नील blue, dark blue 10 कालीकरिष्यामि I shall make black, लृट काली + √ कृ 8U 11 निष्पीड्य having squeezed, pressed out, gerund निस् + √ पीड् 10U

Maid —(with a smile, pointing to the jester) Do you hear how he describes (or paints) the princess ? Sir, I shall also describe you

Jester —(joyously) Lady I am enlivened Therefore do me a favour so that he will not any more speak to me that I resemble a tawny monkey

Maid —Noble sir I saw you asleep with your eyes closed when I was full awake on the marriage So do the same so that I might describe (or paint) you

(The jester does so )

Maid —(to herself ) While he remains with his eyes shut, I shall make his face black by means of the liquid of a Tamala leaf resembling dark blue juice (Rising and squeezing a Tamala leaf she paints the clown's face black The hero and the heroine look at him )

नायकः— वयस्य, धन्यः खल्वसि योऽस्मासु तिष्ठत्सु भवानेवं वर्ण्यते ।

नायिका— (तस्मिन् विदूषकं दृष्ट्वा नायकं पश्यति ।)

नायकः— (नायिकामुखं दृष्ट्वा)

स्मितपुष्पोद्गमोऽयं ते दृश्यतेऽधरपल्लवे ।
फलं त्वन्यत्र मुग्धाक्षि चक्षुषोर्मम पश्यतः ॥ १२ ॥

विदूषकः— भवति, किं त्वया कृतम् ।

चेटी— ननु वर्णितोऽसि ।

विदूषकः—(हस्तेन मुखं प्रमृज्य दृष्ट्वा सरोषं दण्डकाष्ठमुद्यम्य) आः दास्याः पुत्रि, राजकुलं खल्वेतत् । किं तव करिष्यामि । (नायकं निर्दिश्य) भोः, युवयोः पुरतोऽहं दास्याः पुत्र्या खलीकृतः । तत् किं ममेह स्थितेन । अन्यतो गमिष्यामि । (निष्क्रामति ।)

1 धन्य a. blessed, lucky. 2 अधरपल्लवे=अधरः एव पल्लवः तस्मिन् 3 स्मितपुष्पोद्गमः=स्मितं एव पुष्पं तस्य उद्गमः. 4 मुग्धाक्षि=मुग्धे अक्षिणी यस्याः सा तत्सम्बोधनम्. 5 प्रमृज्य having wiped, gerund प्र + √ मृज् 2 P. 1( U 6 राजकुलम् royal family, royal household.

मुग्धाक्षि, ते अधरपल्लवे अयं स्मितपुष्पोद्गमः दृश्यते फलं तु अन्यत्र, पश्यतः मम चक्षुषोः ॥ अनुष्टुप्.

Hero —My friend, you are, indeed, a lucky fellow as you are painted while we are here (The heroine, after looking at the jester with a smile, sees the hero.)

Hero — (looking at the face of the heroine)
Ah charming-eyed one ! on the leaves in the form of thy lips is seen the apparition of a flower in the form of a smile, but its fruit is elsewhere— in my eyes while I see thee

Jester —Lady, *what did you do ?*

Maid —Indeed, you are painted.

Jester —(wiping his face with his hand and looking, he raises a stick angrily)
Ah you daughter of a slave-girl ! This is the royal household. What shall I do to you ? (To the hero) Sir ! I have been defiled by this daughter of a bitch in your presence. So no use of my staying here. I shall go away.

(Exit)

चेटी— कुपितो मे आर्य आत्रेयः । यावदेनं गत्वा प्रसादयिष्यामि ।

नायिका— हञ्जे चतुरिके, किं मामेकाकिनीमुज्झित्वा गच्छसि ।

चेटी— (नायकं निर्दिश्य सस्मितम्) एवमेकाकिनी चिरं भव । (इति निष्क्रान्ता)

नायकः— (नायिकाया मुखं पश्यन्)

दिनकरकरामृष्टं बिभ्रद् द्युतिं परिपाटलां
दशनकिरणैरुत्सर्पद्भिः स्फुटीकृतकेसरम् ।
अयि मुखमिदं मुग्धे सत्यं समं कमलेन ते
मधु मधुकरः किंत्वेतस्मिन् पिबन्न विभाव्यते ॥ १३ ॥

1 एकाकिन् a. (acc. s f एकाकिनीम्) solitary, alone 2 दिनकरः the sun 2 कर = किरणः ray 3 आमृष्ट touched, PP. आ + √ मृश् 6 P. 4 दिनकरकरामृष्टम्=दिनकरस्य करैः आमृष्टम् 5 बिभ्रत् (*nom s n*) bearing, *pres part* √भृ 1. 3U. 6 द्युति f. lustre, splendour 7 दशन tooth 8 केसर m n filament 9 स्फुटीकृतकेसरम्=स्फुटीकृताः केसरा यस्मिन् तत् 10 एतस्मिन्=मुखे 11 विभाव्यते it is seen, णिजन्तात्कर्मणि लट् वि+√भू 1P

अयि मुग्धे, दिनकरकरामृष्टं परिपाटलां द्युतिं बिभ्रत् उत्सर्पद्भिः दशनकिरणैः स्फुटीकृतकेसरं इदं ते मुखं सत्यं कमलेन समं किन्तु एतस्मिन् मधु पिबन् मधुकरः न विभाव्यते ॥ हरिणी

Maid — Noble Ātreya is angry with me, so I shall go and pacify him now.

Heroine— O Maid Chaturikā, why do you go away, leaving me alone ?

Maid — (pointing the hero with a smile) Do remain alone for a long time like this (Exit)

Hero — (observing the heroine's face)
O charming one, this thy face, having been touched by the sun-beams, so bearing a pink hue all over, and manifesting its filaments (also, lips) by dint of rising rays of the teeth, is truly same as a red lotus, but no bee is seen drinking honey here.

(नायिका विहस्य मुखमन्यतो नयति ।)

(नायक तदेव पठति ।)

चेटी— (पटाक्षेपेण प्रविश्य उपसृत्य) एष खल्वार्यमित्रावसुः कार्येण केनापि कुमारं प्रेक्षितुमिच्छति ।

नायकः— प्रिये, गच्छ त्वमात्मनो गृहम् । अहमपि मित्रावसुं दृष्ट्वा त्वरितमागत एव । (नायिका चेटया सह निष्क्रान्ता । )

(तत प्रविशति मित्रावसु ।)

मित्रावसुः— अनिहत्य तं सपत्नं कथमिव जीमूतवाहनस्याहम् ।
कथयिष्यामि हृतं तव राज्यं रिपुणेति निर्लज्जः ॥ १४ ॥
अनिवेद्य च न युक्तं गन्तुमिति निवेद्य गच्छामि । कुमार, मित्रावसुः प्रणमति ।

1 पटाक्षेपेण (dramatic term) with a hurried toss of the curtain 2 अनिहत्य not having killed, gerund अ+नि+√हन् 2P 3 सपत्न =रिपु enemy 4 जीमूतवाहनस्य=जीमूतवाहनाय 5 राज्यम् kingdom 6 निर्लज्ज shameless 7 निवेद्य having informed, gerund नि+√विद् 1 2P caus

त सपत्न अनिहत्य अह निर्लज्ज 'तव राज्य रिपुणा हृत इति कथमिव जीमूतवाहनस्य कथयिष्यामि ॥ आर्या

(The heroine turns her face away, laughing and the hero recites it again )

Maid —(entering with a hurried toss of the curtain and approaching) Noble Mitravasu wishes to see the prince on some business

Hero — My darling go home I will soon follow you after seeing Mitravasu (The heroine walks away with the Maid ) (Thereupon appears Mitravasu )

Mitrāvasu— Without having killed the foe how shall I inform Jimutavahana shamelessly that his kingdom has been plundered by his enemy It is not however proper to go away without informing So I shall inform him and go • O prince, Mitravasu bows to you

नायकः— (मित्रावसुं दृष्ट्वा) मित्रावसो ! इत आस्यताम् ।

मित्रावसुः— (निरूप्य उपविशति)

नायकः— (निरूप्य) मित्रावसो, संरब्ध इव लक्ष्यसे ।

मित्रावसुः— कः खलु मतङ्गहतके संरम्भः ।

नायकः— किं कृतं मतङ्गेन ।

मित्रावसुः— स्वनाशाय किल युष्मदीयं राज्यमाक्रान्तम् ।

नायकः— (सहर्षमात्मगतम्) अपि नाम सत्यमेतत् स्यात् ।

मित्रावसुः—अतस्तदुच्छित्तये आज्ञां दातुमर्हति कुमारः । किं बहुना ।

1 संरब्ध enraged, angered; PP. सम्+रभ् 1A. 2 संरम्भ fury, violence. 3 हतक (समासान्ते) wretched, vile. 4 स्व-नाशः (dat. s.—नाशाय) self-destruction. 5 किल ind. as they say, verily. 6 आक्रान्त occupied, seized; PP. आ+√क्रम् 1U. 4P. 7 तत्=तस्य मतङ्गस्य. 8 उच्छित्तिः f (dat.s. उच्छित्तये) destruction. 9 दातुम् to give, to issue; inf.√दा 3U. 10 अर्हति he deserves (generally used in the sense of entreaty or respect) √अर्ह् 1P.

Hero — (looking at Mitrāvasu) O Mitrāvasu, take your seat here.

Mitrāvasu—(looking, sits down.)

Hero — (observing) Mitrāvasu, you appear to be furious.

Mitrāvasu—What fury against wretched Matanga ?

Hero — What has been done by Matanga ?

Mitrāvasu—Verily, he has occupied your own kingdom for his own destruction.

Hero — (with joy, to himself) Is it possibly true ?

Mitrāvasu—Therefore, Your Highness may be pleased to issue a command to destroy him. What more ?

संसर्पद्भिः समन्तात् कृतसकलवियन्मार्गयानैर्विमानैः
कुर्वाणाः प्रावृषीव स्थगितरविरुचः श्यामतां वासरस्य ।
एते याताश्च सद्यस्तव वचनमितः प्राप्य युद्धाय सिद्धाः
सिद्धश्चोद्वृत्तशत्रुक्षयभयविनमद्राजकं ते स्वराज्यम् ॥१५॥

अथवा किं बलौघैः ?

1 संसर्पत् (ins P m & n संसर्पद्भिः) moving, pres part सम्+√सृप् 1U 2 सकल whole, entire. 3 वियत् n sky. 4 मार्ग path, road 5 यानम् moving, going traversing 6 कृतसकलवियन्मार्गयानैः = कृतं सकलस्य वियन्मार्गस्य यानं यैः तैः 7 विमान m n aeroplane, aerial chariot 8 कुर्वाण (nom. p m कुर्वाणाः) making, pres part, √कृ 8U 9 प्रावृष् f. (loc s प्रावृषि) rainy season 10 स्थगित covered, PP √स्थग् 1P 11 रवि m. the sun. 12 रुच् f light, splendour 13 स्थगितरविरुचः स्थगिता रवेः रुचः यस्मिन् तस्य 14 वासर day. 15 श्यामता f darkness 16 यात (nom p m याताः) gone, PP √या 2P 17 प्राप्य having obtained, gerund प्र+√आप् 5P 18 युद्धम् (dat. s युद्धाय) war 19 सिद्ध won, accomplished, PP √सिध् 4P 20 उद्वृत्त ill-behaved 21 शत्रु m enemy 22 क्षय destruction 23 भयम् fear. 24 विनमत् bending pres part. वि+√नम् 1U. 25 राजक multitude of kings 26 उद्वृत्तशत्रुक्षयभयविनमद्राजकम् = उद्वृत्तस्य शत्रोः क्षयेण भयात् विनमत् राजकं यस्मिन् तत्

समन्तात् संसर्पद्भिः कृतसकलवियन्मार्गयानैः विमानैः स्थगितरविरुचः वासरस्य प्रावृषि इव श्यामतां कुर्वाणाः एते सिद्धाः तव वचनं प्राप्य युद्धाय इतः सद्यः याताः च उद्वृत्तशत्रुक्षयभयविनमद्राजकं ते स्वराज्यं सिद्धं च ॥ स्रग्धरा

Upon obtaining your command these Siddhas will at once depart from here for the battle-field, turning the day into a dark night as in the rainy season, concealing the beams of the sun by their aerial chariots marching forward on all sides and darting through the entire paths of the sky, and the kingdom will be recovered to you with the multitude of the princes bowing down in awe, when the foe is destroyed

Yet what is the use of huge troops ?

एकाकिनाऽपि हि मया रभसावकृष्ट-
निस्त्रिंशदीधितिसटाभरभासुरेण ।
आरान्निपत्य हरिणेव मतङ्गजेन्द्र-
माजौ मतङ्गहतकं हतमेव विद्धि ॥ १६ ॥

नायक :— (कर्णौ विधाय आत्मगतम्) अहह, दारुणमभिहितम् । अथवा एवं तावत् । (प्रकाशम्) मित्रावसो, कियदेतत् । बहुतरमतोऽपि बाहुशालिनि त्वयि सम्भाव्यते ।

1 रभस violence, fury 2 अवकृष्ट drawn out, PP. अव+√कृष् 6U 3 निस्त्रिंश sword, a. cruel 2 दीधिति f ray, lustre. 3 सटा f. mane. 4 भासुर a. (ins s m. भासुरेण) shining, bright. 5 आरात् near 6 रभसावकृष्टनिस्त्रिंशदीधितिसटाभरभासुरेण = रभसेन अवकृष्ट यः निस्त्रिंशः तस्य दीधितयः सटा इव तासां भरेण भासुरः तथाभूतेन. 7 हरिन् m. (ins. s. हरिणा) lion 8 मतङ्गज elephant 9 इन्द्र lord 10 आजिः m f (loc s. आजौ) battle-field 11 हत killed, PP √हन् 2P. 12 विद्धि know thou ! लोट् √विद् 2P. 13 दारुण frightful, cruel 14 कियत् how much 15 सम्भाव्यते it is possible, णिजन्तात्कर्मणि सम्+√भू

एकाकिना अपि हि रभसावकृष्टनिस्त्रिंशदीधितिसटाभरभासुरेण मया आजौ आरात् निपत्य, हरिणा मतङ्गजेन्द्र इव, मतङ्गहतक हत एव विद्धि ॥ वसन्ततिलका

Know thou that vile Matanga will be slaughtered, like a lordly elephant by a lion by me even alone falling upon him closely in the battle-field and resplendent with the massive mane-like lustre of the sword drawn out in my fury !

Hero — (covering his ears to himself) Alas ! a cruel word has been uttered. Or let it be like this. (Aloud) O Mitrāvasu, how much does it mean ? More than this will be possible in you who are endowed with prowess

स्वशरीरमपि परार्थे यः दद्यादयाचितः कृपया ।
राज्यस्य कृते स कथं प्राणिवधक्रौर्यमनुमन्यते ॥१७॥

अपि च क्लेशान् विहाय मम शत्रुबुद्धिरेव नान्यत्र । यदि त्वमस्मत्प्रियं कर्तुमीहसे तदनुकम्प्यतामसौ राज्यस्य कृते क्लेशदासीकृतस्तपस्वी ।

**मित्रावसुः**— (सामर्षम्) कथं नानुकम्पनीय ईदृशोऽस्माकमुपकारी कृपणश्च ।

**नायकः**— (स्वगतम्) अनिवार्यसंरम्भः प्रत्यग्रकोपाक्षिप्तचेता न तावदयं शक्यते निवर्तयितुम् । तदेवं तावत् । (प्रकाशम्)

1 परार्थे for the sake of others 2 दद्यात he should give, विधिलिङ्√दा 3U 3 अयाचित unasked 4 कृपा f (ins s कृपया) pity 5 कृत ind for, on account of 6 प्राणिन् a (in cpds प्राणि) living 7 वध slaughter 8 क्रौर्यम् cruelty 9 अनुमन्ये I give assent to, permit अनु+√मन 4A 10 क्लेश suffering, care, sin 11 विहाय having left, excluding gerund वि+√हा 3P 12 शत्रुबुद्धि f antagonistic mind 13 अनुकम्प्यताम् he must be pitied कर्मणिलोट् अनु+√कम्प् 1A 14 क्लेशदासीकृत enslaved by क्लेशा 15 तपस्विन (nom s m तपस्वी) poor, unlucky 16 कृपण pitiable 17 उपकारी m benefactor, helper 18 प्रत्यग्र fresh 19 प्रत्यग्रकोपाक्षिप्तचेता=प्रत्यग्रेण कोपेन आक्षिप्त चेत यस्य स

य अयाचित परार्थे स्वशरीर अपि कृपया दद्यात् स राज्यस्य कृत प्राणिवधक्रौर्यस्य अनुमन्यत ॥ आर्या ॥

How can he, who should give away even his own body unasked out of compassion for others give consent to the cruelty of slaughtering living beings on account of a kingdom ?

And morever, excepting Kleshas I consider nothing is antagonistic to me If you wish to do me a favour, please pity the poor man who is enslaved by Kleshas

Mitrāvasu—(angrily) How such a benefactor of ours who is pitiable should not be pitied !

Hero —(to himself) As his violent fit is unavoidable and his mind is overwhelmed by a fresh anger it is not possible to dissuade him So let me try thus (Aloud)

मित्रावसो, उत्तिष्ठ। अभ्यन्तरमेव प्रविशावः। तत्रैव त्वां बोधयिष्यामि। सम्प्रति परिणतमहः। तथाहि

निद्रामुद्रावबन्धव्यतिकरमनिशं पद्मकोपादपास्य-
न्नाशापूरैककर्मप्रवणनिजकरप्रीणिताशेषविश्वः ।
दृष्टः सिद्धैः प्रसक्तस्तुतिमुखरमुखैरस्तमप्येष गच्छ-
न्नेकः श्लाघ्यो विवस्वान् परहितकरणायैव यस्य प्रयासः ॥१८॥

(निष्क्रान्ताः सर्वे) ॥ इति तृतीयोऽङ्कः ॥

1 अभ्यन्तरम् inside, interior 2 बोधयिष्यामि I shall advise, instruct णिजन्तात् लृट् √बुध 1U 4P. सम्प्रति now 4 परिणत set PP परि+√नम् 1U 5 अहन् n (nom s अहः) day 6 मुद्रा f seal 7 अवबन्ध close tie 8 निद्रामुद्रावबन्धव्यतिकरम्=निद्रायां य मुद्रावबन्धः तस्य व्यतिकरम् 9 अनिशम् ind everyday, constantly 10 पद्मकोष m n lotus-bud 11 अपास्यत् (nom s m अपास्यन्) removing pres part अप+√अस् 4P 12 आशा f direction quarter, hope 13 पूर filling 14 एककर्मन् sole or single mission 15 प्रवण devoted to, intent on 16 प्रीणित gratified, satisfied PP caus.√प्री 9 10U 17 विश्वम् universe 18 आशापूरैककर्मप्रवणनिजकरप्रीणिताशेषविश्व=आशानां पूर एव एकं कर्म तस्मिन् प्रवणैः निजकरैः प्रीणितं अशेषं विश्वं येन सः 19 प्रसक्त uninterrupted, incessant 20 स्तुति f hymn, praise 21 मुखर loquacious, resonant 22 प्रसक्तस्तुतिमुखरमुखैः=प्रसक्ताभिः स्तुतिभिः मुखराणि मुखानि येषां तैः 23 अस्त setting mountain 24 विवस्वत् m (nom s विवस्वान्) the sun 25 परहितम् others' welfare 26 प्रयास effort, endeavour

अनिशं पद्मकोषात् निद्रामुद्रावबन्धव्यतिकरं अपास्यन्, आशापूरैककर्मप्रवणनिजकरप्रीणिताशेषविश्वः अस्तं अपि गच्छन् प्रसक्तस्तुतिमुखरमुखैः सिद्धैः दृष्टः एषः एकः श्लाघ्यः विवस्वान् यस्य प्रयासः परहितकरणाय एव ॥ स्रग्धरा

O Mitravasu, stand up! Let us go inside. I shall advise you there. Now the day has passed, for,

Praiseworthy is the sun everyday removing from the lotus-bud its close tie with the seal of slumber, gratifying the entire universe with his own rays devoted to the single mission of filling up the quarters and now seen journeying towards the western mountain by the Siddhas with their mouths loquacious with uninterrupted hymns (for him), for his endeavour is for the welfare of others. (Exeunt omnes)

*Here Ends Act III*

# चतुर्थोऽङ्कः

(ततः प्रविशति कञ्चुकी गृहीतरक्तवस्त्रयुगः प्रतिहारश्च ।)

कञ्चुकी— अन्तःपुराणां विहितव्यवस्थः पदे पदे संस्खलितानि रक्षन् ।
जरातुरः सम्प्रति दण्डनीत्या सर्वां नृपस्यानुकरोमि वृत्तिम् ॥१॥
(उपजाति)

प्रतीहारः— आर्य वसुभद्र, क नु खलु भवान् प्रस्थितः ।

कञ्चुकी— आदिष्टोऽस्मि देव्या मित्रावसुजनन्या 'कञ्चुकिन्, दशरात्रं त्वया यावन्मलयवत्या जामातुश्च रक्तवासांसि नेतव्यानि' । दुहिता च श्वशुरकुले वर्तते । जीमूतवाहनोऽपि युवराजेन सह समुद्रवेलां द्रष्टुमद्य गत इति श्रूयते । तन्न जाने किं

1 गृहीतरक्तवस्त्रयुगः =गृहीतं रक्तं वस्त्रयुगलं येन सः (कञ्चुकी) 2 अन्तःपुरम् (gen P अन्तःपुराणाम्) harem lady 3 अन्तर् (as a separate Prep used with gen) inside, in the middle of 4 पुरम् town 5 विहित done, framed PP वि+√धा 3U 6 अवस्था f arrangement state of affairs, law 7 विहितव्यवस्थ =विहिता व्यवस्था येन सः 8 पदे पदे at every step 9 संस्खलितम् (acc P संस्खलितानि) stumbling, blunder 10 रक्षत् (nom s m रक्षन्) guarding, pres part√रक्ष 1P 11 जरा f old age 12 आतुर a afflicted, smitten 13 दण्डनीति f help of a stick policy of punishment 14 नृप king 15 अनुकरोमि I imitate, अनु+√कृ 8U 16 वृत्तिम् behaviour 17 दशरात्रम for ten nights श्वशुर father in law 19 समुद्रवेला f coastal line, sea tide 20 श्रूयते it is heard,√श्रु 5P

## ACT FOUR

(Enter the chamberlain holding a set of garments and the doorkeeper)

Chamberlain—Supervising the state of affairs of the harem—ladies and at every step guarding against stumblings through the help of a stick I now smitten by old age, imitate the conduct of the king who framing law inside, the towns guards them agains their blunders by the policy of punishment at every step

Door-keeper—O noble Vasubhadra where are you going ?

Chamberlain—I have been instructed by Her Majesty, mother of Mitravasu, 'O Chamberlain take these red garments to Malayavati and my son in law (to be worn) for ten nights" But her daughter is in the house of her father in law, and it is heard that Jimūtavāhana has also gone with the Prince to see the ocean tide today Therefore, I do not know whether

राजपुत्र्याः सकाशं गच्छामि अथवा जामातुरिति ।

प्रतीहारः— आर्य, वरं राजपुत्र्याः सकाशं गन्तव्यम् । तत्र हि कदाचिदस्यां वेलायां जामाता स्वयमेवागतो भविष्यति ।

कञ्चुकी— साधूक्तम् । अथ भवान् पुनः क्व प्रस्थितः ।

प्रतीहारः— आदिष्टोऽस्मि महाराजविश्वावसुना यथा "भो सुनन्द, गच्छ मित्रावसुं ब्रूहि दीपप्रतिपदुत्सवे मलयवत्या जामातुश्च यत् किञ्चित् प्रदीयते तदुत्सवानुरूपं किंचिदागत्य चिन्त्यताम्" इति । तद्गच्छ राजपुत्र्याः सकाशमार्यः । अहमपि मित्रावसोराह्वानाय गच्छामि ।

(निष्क्रान्तौ) ॥ इति विष्कम्भकः ॥

1 वरम् ind. it is better that. गन्तव्यम् भवता (भावे प्रयोग) you should go. 3 ब्रूहि speak thou; लोट् √ब्रू 2U. 4 दीप lamp. 5 प्रतिपद् f commencement, the first day of a lunar fortnight. 6 दीपप्रतिपदुत्सव.=दीपावली festival which falls on the night of the first lunar day in आश्विन month, lamp festival. 7 प्रदीयते it is given कर्मणिलट् प्र+√दा 3U. 8 आह्वानम् summon, calling.

I have to go to the Princess or to the son-in-law.

Door-keeper— Sir, it is better for you to go to the princess, for the son-in-law will be personally coming there at any moment now (i.e. at this hour).

Chamberlain— You have well said. But now where have you set out ?

Door-keeper— "O Sunanda, go and speak to Mitrāvasu that he should come here and think something suitable for a festival that may be given as a gift to Malayavati and my son-in-law on the festival of lamps," thus have I been commanded by King Vishvāvasu So you may go to see the princess. I am going to call Mitrāvasu.

(Both exit)

END OF INTERLUDE

(ततः प्रविशति जीमूतवाहनो मित्रावसुश्च)

नायकः—शय्या शाद्वलमासनं शुचिशिला सद्म द्रुमाणामधः
शीतं निर्झरवारि पानमशनं कन्दाः सहाया मृगाः ।
इत्यप्रार्थितलभ्यसर्वविभवे दोषोऽयमेको वने
दुष्प्रापार्थिनि यत् परार्थघटनावन्ध्यैर्वृथा स्थीयते ॥ २ ॥

मित्रावसुः—(ऊर्ध्वमवलोक्य) कुमार, त्वर्यतां त्वर्यतां समयोऽयं चलितुमम्बुराशेः ।

नायकः —(आकर्ण्य) सम्यगुपलक्षितम् ।

1 शय्या f couch, bed 2 शाद्वलम् turf meadow 3 शुचि pure, clear 4 सद्मन् n (nom. s सदम) house 5 शीत cool 6 निर्झर m n spring, cataract 7 वारि m water 8 अशनम feeding, food 9 कन्द root 10 सहाय companion 11 अप्रार्थित unasked 12 लभ्य obtainable 13 विभव wealth 14 अप्रार्थितलभ्यसर्वविभवे =अप्रार्थितेन लभ्य सर्व विभव यस्मिन तस्मिन 15 दोष defect, fault 16 दुष्प्राप a difficult to obtain 17 अर्थिन् a needy, begging 18 दुष्प्रापार्थिनि=दुष्प्रापा अर्थिन यस्मिन् तस्मिन् 19 घटना f effort, performance 20 वन्ध्य barren, fruitless 21 परार्थघटनावन्ध्यै =परस्य अर्थे घटना तस्या वन्ध्यै (अस्माभि ) 22 ऊर्ध्वम् ind forward 23 अम्बुराशि. m ocean

शाद्वल शय्या शुचिशिला आसन द्रुमाणा अध सद्म शीत निर्झरवारि पान कन्दा. अशन मृगा सहाया इति अप्रार्थितलभ्यसर्वविभवे वने एक अय दोष यत् दुष्प्रापार्थिनि (वने) परार्थघटनावन्ध्यै वृथा स्थीयते ॥ शार्दूलविक्रीडितम्

(Thereupon enter Jimutavahana & Mitravasu)

Hero —The meadow is a couch, pure stone slab a seat for a drink there is a cool spring water, for food the roots, and under the trees a dwelling house and the deer are our companions, thus all the wealth is obtainable without asking in the forest where there is a single defect, that is we dwell in vain, being unable (or futile) to endeavour for others, for the needy are not available here

Mitrāvasu—(looking ahead) O prince hurry up, hurry up ! it is the time for ocean tide to flow in

Hero —(listening) You have well-observed

उद्गर्जज्जलकुञ्जरेन्द्ररभसास्फालानुबन्धोद्धतः
सर्वाः पर्वतकन्दरोदरभुवः कुर्वन् प्रतिध्वानिनीः ।
उच्चैरुच्चरति ध्वनिः श्रुतिपथोन्माथी यथाऽयं तथा
प्रायः प्रेङ्खदसंख्यशङ्खवलया वेलेयमागच्छति ॥ ३ ॥

मित्रावसु :— नन्वियमागतैव । पश्य ।

1 उद्गर्जत् thundering, roaring, pres part उद्+√गर्ज 1P 10U 2 जलकुञ्जर water elephant 3 आस्फाल flapping, striking 4 अनुबन्ध continuity 5 उद्धत raised, heightened, PP उद+√हन् 2P 6 उद्गर्जज्जलकुञ्जरेन्द्ररभसास्फालानुबन्धोद्धत = उद्गर्जतां जलकुञ्जरेन्द्राणां रभसेन ये आस्फालाः तेषां अनुबन्धेन उद्धत उदरम् interior 7 पर्वतकन्दरोदरभुव = पर्वतकन्दराणां उदरभुव 8 प्रतिध्वानिन् a (acc p f प्रतिध्वानिनी) echoing, reverberating 9 उच्चैः aloft 10 ध्वनि m sound 11 श्रुतिपथ hearing, range of hearing 12 उन्माथिन् a (nom s m उन्माथी) striking, hurting प्रायस् ind mostly 14 प्रेङ्खद् (त्) swinging, moving, pres part √प्रेङ्ख् 1P 15 असंख्य innumerable 16 वलयम् circle 17 प्रेङ्खदसंख्यशङ्खवलया = प्रेङ्खन्ति असंख्यानि शङ्खवलयानि यस्या सा. 18 वेला f. tide

यथा उद्गर्जज्जलकुञ्जरेन्द्ररभसास्फालानुबन्धोद्धत सर्वा पर्वतकन्दरोदरभुव प्रतिध्वानिनी कुर्वन् श्रुतिपथोन्माथी अयं ध्वनि उच्चै उच्चरति तथा प्राय प्रेङ्खदसंख्यशङ्खवलया इयं वेला आगच्छति ॥ शार्दूलविक्रीडितम्

As the sound, augmented by the violent and continual flappings of the huge water elephants roaring, so hurting the ears, bellows out; making all the anterior parts (depths) of the mountain caves reverberate, the tide is coming on which countless clusters of conch shells are mostly swinging to and fro

Mitrāvasu—Certainly the tide flows in Behold !

कवलितलवङ्गपल्लवकरिमकरोद्गारसुरभिणा प्रयसा।
एषा समुद्रवेला रत्नद्युतिरञ्जिता भाति ॥४॥ (आर्या)
तदेह्यस्माज्जलप्रसरणमार्गादपक्रम्यानेनैव गिरिसानुसमीपमार्गेण परिक्रमावः।

नायक :— मित्रावसो, पश्य पश्य शरत्समयपाण्डुभिः पयोदपटलैः प्रावृताः प्रालेयाचलशिखरश्रियमुद्वहन्त्येते मलयसानवः।

मित्रावसु :— नैवामी मलयसानवः, नागानामस्थिसंघाताः खल्वमी।

1 कवलित eaten, devoured; PP. नामधातु √कवल्म्. 2 लवङ्गम् clove. 3 करिन् m (in comps. करि) elephant 4 मकर crocodile 5 उद्गार ejection, issuing out. 6 सुरभि a (ins s. सुरभिणा) delightful, fragrant. 7 कवलितलवङ्गपल्लवकरिमकरोद्गारसुरभिणा=कवलिता लवङ्गाना पल्लवा यै करिभि. मकरं तेषा उद्गारेण सुरभिणा 8 पयस् n (ins s. पयसा) water. 9 द्युति f. lustre. 10 रञ्जित tinged, cloured, PP. √रञ्ज् 1.4U. 11 रत्नद्युतिरञ्जिता=रत्नाना द्युत्या रञ्जिता. 12 भाति it shines, appears; √भा 2P. 13 सानु m. n. summit, peak, ridge. 14 शरद् f autumn. 15 पयोद cloud. 16 पटलम् heap, mass. 17 प्रावृत covered; PP प्र+ √वृ 1.5 9U 16 प्रालेयाचल the Himalayas 19 शिखर m n peak 20 श्री f (acc s. श्रियम्) beauty. 21 अस्थि n, bone. 22 सघात heap, collection.

With the water fragrant on account of the issuing out of the elephants and crocodiles that have devoured clove-leaves, this ocean-tide shines tinged with the lustre of the jewels.

Come on, coming out of this path with spreading water, we shall go by the pass along the mountain ridges

Hero —O Mitrāvasu, see, see! These Malaya peaks bear the beauty of the Himalayan peaks covered with a mass of clouds white due to autumn.

Mitrāvasu—Not the Malaya peaks, but they are the heaps of serpent bones.

नायक :— (सोद्वेगम्) कष्टम् । किं निमित्तममी संघातमृत्यवो जाताः ।

मित्रावसु :— कुमार, नैवामी संघातमृत्यवः । श्रूयतां यथैतत् । पुरा किल स्वपक्षपवनापास्तसमस्तसागरजलस्तरसा रसातलादुद्धृत्य भुजङ्गमाननुदिनमाहारयति स्म वैनतेयः ।

नायक :— (सोद्वेगम) कष्टम् । अतिदुष्करं करोति । ततस्ततः ।

मित्रावसु :— ततः सकलनागविनाशाशङ्किना वासुकिना गरुत्मानभिहितः ।

नायक :— (सादरम्) किं मां प्रथमं भक्षयेति ।

मित्रावसु :— नहि नहि ।

1 पुरा ind formerly, once upon a time 2 किल ind as they say 3 पक्ष wing 4 पवन wind 5 अपास्त dispersed, PP अप+√अम 4P 6 समस्त all 7 सागर ocean 8 स्वपक्षपवनापास्तसमस्तसागरजल =स्वपक्षयो पवनन अपास्त समस्त सागरजल यन स 9 तरस n (ins s तरसा) vigour, speed 10 रसातलात् from the nether world 11 उदधृत्य having drawn out, gerund उद+√धृ 10U 12 भुजङ्गम serpent 13 अनुदिनम् ind everyday 14 आहारयति he eats, णिज तालल्ट आ+√हृ 1U 15 स्म ind when used with the present tense, it assumes the past meaning 16 विनाश ruin 17 शङ्किन a (ins s m शङ्किना) fearing, suspecting 18 वैनतय =गरुत्मत (nom s गरुत्मान) king of birds, Garuda

Hero — (emotionally) Alas! why these total deaths took place?

Mitravasu—O prince, these are not total deaths Listen, it was like this As they say once upon a time the lord of the birds, Vainateya (Garuda), dispersing the entire sea water by vigorously shaking his wings, drew out the serpents from the nether world and devoured them everyday

Hero — (sadly) Alas! How cruel! Then?

Mitravasu—Then, fearing the extermination of all serpents Vasuki, the serpent king, spoke to Garuda

Hero — (with respect) 'Eat me up first" said he?

Mitravasu—No no

नायक :— किमन्यत् ।

मित्रावसु :— इदमुक्तं 'त्वदभिसम्पातसन्त्रासात् सहस्रशः स्रवन्ति भुजङ्गमाङ्गनानां गर्भाः शिशवश्च पञ्चत्वमुपयान्ति । एवञ्च सन्तति-विच्छेदादस्माकं तवैव स्वार्थहानिर्भवेद् यदर्थमभिपतति भवान् नागलोकम् । तदिह नागमेकैकमनुदिनं प्रेषयामि ।'

नायक :— कष्टमेव रक्षिता नागराजेन पन्नगाः ।

जिह्वासहस्रद्वितयस्य मध्ये नैकाऽपि सा तस्य किमस्ति जिह्वा ।
एकाहिरक्षार्थमहिद्विषेऽद्य दत्तो मयात्मेति यया ब्रवीति ॥ ५ ॥

1 अभिसम्पात attack 2 सन्त्रास (abl s सन्त्रासात्) terror 3 सहस्रशस ind in thousands 4 स्रवन्ति they drop √स्रु 1P 5 गर्भ conception, embryo 6 शिशु m (P शिशव) child, the young 7 पञ्चत्वम् death 1 सन्तति f progeny 9 विच्छेद loss, cutting 10 अर्थहानि loss of purpose 11 अभिपतति he assails अभि + √पत् 1P 12 पन्नग = अहि serpent 13 जिह्वा f tongue 14 सहस्रम् one thousand 15 द्वितयम् pair 16 एकाहिरक्षार्थम for the protection of all serpants 17 द्विष् m (dat s द्विषे) enemy 18 आत्मा = वासुकि 19 यया = जिह्वया

तस्य जिह्वासहस्रद्वितयस्य मध्ये एका अपि सा जिह्वा न अस्ति किम् ? यया एकाहिरक्षार्थ अहिद्विषे (तुभ्य) आत्मा मया अद्य दत्त इति ब्रवीति ॥ इन्द्रवज्रा

Hero — What else ?

Mitravasu—He said thus, "Due to the terror of your attack the embryos of the female-serpents drop and the young ones die in thousands Thus on account of the cessation of progeny our and your purpose might be lost Henceforth I will send you here one snake each every day, for which you assail the serpent world"

Hero — Just injuriously, the serpent king protected the snakes Among his two thousand tongues was there not a single tongue with which he could say ?—"For the protection of the entire serpent-race I shall today offer myself to you the enemy of the serpents"

मित्रावसुः— प्रतिपन्नं तत् पक्षिराजेन ।

इत्येष भोगिपतिना विहितव्यवस्थो
यान् भक्षयत्यहिपतीन् पतगाधिराजः ।
यास्यन्ति यान्ति च गताश्च दिनैर्विवृद्धिं
तेषाममी तुहिनशैलरुचोऽस्थिकूटाः ॥ ६ ॥

नायकः— आश्चर्यम् ।

सर्वाशुचिनिधानस्य कृतघ्नस्य विनाशिनः
शरीरकस्यापि कृते मूढाः पापानि कुर्वते ॥ ७ ॥

1 प्रतिपन्न admitted undertaken, PP प्रति+√पद् 4A 2 पक्षिन m bird 3 पक्षिराजन=पक्षिणा राज्ञा 4 व्यवस्था f agreement 5 विहितव्यवस्थ =विहिता व्यवस्था यन स 6 *भोगिपति king of serpents* 7 भक्षयति he eats √भक्ष 10U 8 पतग bird 9 विवृद्धि f accumulation 10 तुहिनम snow 11 शैल mountain 12 रुच f beauty, appearance 13 तहितशैलरुच =तुहिनशैलस्य रुच यथा त 14 कूट m n peak, mountain 15 अशचि impure 16 निधानम् receptacle, abode 17 कृतघ्न ungrateful 18 विनाशिन a (gen s m विनाशिन) perishable decaying 18 पापम् (P पापानि) sin

इति भोगिपतिना विहितव्यवस्थ एष पतगाधिराज यान् अहिपतीन् भक्षयति तेषा अमी तुहिनशैलरुच अस्थिकूटा दिनै विवृद्धि गता यान्ति यास्यन्ति च ॥ वसन्ततिलका ॥ सर्वाशुचिनिधानस्य कृतघ्नस्य विनाशिन शरीरकस्य अपि कृत मूढा पापानि कुर्वत ॥ अनुष्टुब्

Mitravasu—*His word was accepted by the king-bird Having undertaken* an agreement with the serpent king thus, the king of birds devours big snakes whose accumulated bones have increased, are *increasing* and will increase with every passing day resembling the Himalayan peaks

Hero —A great wonder!
The ignorant commit sins for the sake of the body,—the receptacle of all *impurities*, ungrateful and *decaying*

अहो कष्टमनवसानेयं विपत्तिर्नागानाम् । (आत्मगतम्) अपि शक्नुयामहं स्वशरीरसमर्पणेनैकस्यापि नागस्य प्राणपरिरक्षां कर्तुम् ।

(ततः प्रविशति प्रतीहारः ।)

प्रतीहारः— आरूढोऽस्मि गिरिशिखरम् । यावन्मित्रावसुमन्विष्यामि । (परिक्रम्य) अयं मित्रावसुर्जामातुः समीपे तिष्ठति । (उपसृत्य) विजयेतां कुमारौ ।

मित्रावसुः— सुनन्द, किंनिमित्तमिहागमनम् । (प्रतीहारः कर्णे कथयति)

मित्रावसुः— कुमार, तातो मामाह्वयति ।

नायकः— गम्यताम् ।

मित्रावसुः— कुमारेणापि बहुप्रत्यवायेऽस्मिन् प्रदेशे न चिरं स्थातव्यम् ।

(इति निष्क्रान्तः ।)

1 अनवसान a (nom s f—ाना) endless 2 विपत्ति f. adversity. 3 शक्नुयाम् I should be able to, विधिलिङ्√शक् 5P. 4 समर्पणम् (ins s. समर्पणेन) offering 5 परिरक्षा f protection, rescuing 6 आरूढ mounted, ascended, PP. आ+√रुह् 1P. 7 गिरिः m mountain. 8 विजयेताम् may they two be victorious, लोट् वि+√जि 1A 9 आह्वयति he summons, calls, आ√ह्वे 1U. 10 प्रत्यवाय obstacle. 11 बहुप्रत्यवाये= बहवः प्रत्यवायाः यस्मिन् तस्मिन्

Alas! there is no end to the adversity of the Nāgas (To himself) If I could save the life of even a single Nāga by sacrificing my own body!

(Then enters the door keeper.)

Door-keeper—I have mounted on the summit of the mountain I shall now search for Mitrāvasu (walking) There stands Mitrāvasu by the side of the son in-law (approaching) Victory to the princes!

Mitrāvsu—O Sunanda, what has brought you here?

(The door-keeper whispers into his ear)

Mitrāvasu—Prince, my father summons me.

Hero —You may go.

Mitrāvasu—Do not stay here so long in this area full of obstacles

(Exit)

नायक :— यावदहमप्यस्माद्गिरिशिखरादवतीर्य समुद्रतटमवलोकयामि ।

(परिक्रामति)

[नेपथ्ये]— हा पुत्रक शङ्खचूड, कथं व्यापाद्यमानोऽद्य किल त्वं मया प्रेक्षितव्यः ।

नायक :— (आकर्ण्य) अये, योषित इवार्त्तप्रलापः । केयम् । कुतो वास्या भयमिति स्फुटीकरिष्ये । (परिक्रामति)

(ततः प्रविशति रुदत्या वृद्धयानुगम्यमानः शङ्खचूडो गोपायितवस्त्रयुगलश्च किङ्करः)

वृद्धा— (सास्रम्) हा पुत्रक शङ्खचूड, कथं व्यापाद्यमानोऽद्य किल त्वं प्रेक्षितव्यः । अनेन मुखचन्द्रेण विरहितमिदानीमन्धकारीभविष्यति पातालम् ।

1 अवतीर्य having descended, gerund अव+√तॄ 1P. 2 समुद्रतट sea-shore 3 व्यापाद्यमान being killed; pass pres. part. caus व्या+√पद् 4A. 4 योषित् f. (gen. s. योषित) woman 5 आर्त a distressed, painful 5 प्रलाप talk, wailing 6 स्फुटीकरिष्ये I shall ascertain, लृट् स्फुटी+√कृ 7 वृद्ध (ins s f. वृद्धया) old 8 गोपायित protected, caus PP √गुप् 1P. 9 गोपायितवस्त्रयुगल =गोपायित वस्त्रयुगल येन स 10 किङ्कर servant. 11 विरहित deserted, PP. वि+√रह् 1P. 10U. 12 अन्धकारीभविष्यति it will become dark

Hero —Now descending this mountain peak, I shall watch the sea-shore.

(He walks round)

(Behind the scene) Ah my son, Shangkhachūda, when you are killed today, how can I see you (again)?

Hero —(listening) Ah it sounds like a woman's distressed wailing. Who is she? I shall ascertain who she is and what her fear is? (He paces about.) (Then enter Shangkhachūḍa being followed by a weeping old woman, and a servant guarding a pair of garments)

Old woman—(shedding tears) Ah my son Shangkhachuda, you are being killed today How can I see you again? Now deserted by this moon face of yours, the nether world will become dark.

शङ्खचूड :— अम्ब, किमिति वैक्लव्येन सुतरां आत्मानं पीडयसि ।

वृद्धा— (निवर्ण्य पुत्रस्याङ्गानि स्पृशन्ती) हा पुत्र, कथं तेऽदृष्टसूर्यकिरणं सुकुमारं शरीरं निर्घृणहृदयो गरुड आहारयिष्यति । (कण्ठे गृहीत्वा रोदिति ।)

शङ्खचूड :— अम्ब, अलं परिदेवितेन । पश्य ।

क्रोडीकरोति प्रथमं यदा जातमनित्यता ।
धात्रीव जननी पश्चात् तदा शोकस्य कः क्रमः ॥ ८॥

(गन्तुमिच्छति ।)

वृद्धा— पुत्र, तिष्ठ मुहूर्तं यावत् ते वदनं प्रेक्षे ।

किङ्कर :— एहि कुमार शङ्खचूड, किं ते एतया भणन्त्या ।

1 अम्बा f (voc s अम्ब) mother 2 वैक्लव्यम (ins s वैक्लव्येन) grief 3 स्पृशत् (nom s f स्पृशन्ती) touching pres part √स्पृश् 6P 4 अदृष्टसूर्यकिरणम्=अदृष्टा सूर्यस्य किरणा येन तत् 5 सुकुमार very tender 6 निघृणहृदय = निर्घृण हृदय यस्य स 7 रोदिति she weeps, √रुद् 2P 8 परिदेवितम lamentation 9 क्रोडीकरोति it clasps, embraces 10 जात new born baby 11 अनित्यता f perishability, uncertainty. 12 धात्री f. nurse 13 जननी mother 14 शोक grief 15 क्रम manner, act

यदा अनित्यता जात प्रथम क्रोडीकरोति तदा पश्चात् जननी धात्री इव (जात क्रोडीकरोति), शोकस्य क क्रम ॥ अनुष्टुप

Shangkhachūda—Mother, why do you torment yourself by lamentations ?

Old woman—(looking and touching her son's limbs) Ah my son, how will the cruel hearted Garuda devour your tenderest body that has not seen the sunlight ?

(clasping him by the neck, she weeps )

Shangkhachūda—Mother, enough of lamentation ! See when perishability first embraces the new born baby then does the mother embrace him like a nurse ? What cause for grief?

(He wants to go )

Old woman—My son, wait a moment that I may see your face !

Servant — Come, master Shangkhachuda What is she, who is clamouring, to you ?

पुत्रस्नेहमोहिता खल्वेषा न जानाति राजकार्यम् ।

शङ्खचूड :— अयमागच्छामि ।

किङ्कर :— (अग्रतोऽवलोक्यात्मगतम्) आनीतः खल्वेष मया वध्यशिलासमीपे । तद् वध्यचिह्नं दास्यामि ।

नायक :— इयमसौ योषित् । (शङ्खचूडं दृष्ट्वा) नूनमनेनास्याः सुतेन भवितव्यम् । तत् किमाक्रन्दति । (समन्तादवलोक्य) न खल्वस्या भयकारणं किञ्चित् पश्यामि । कुतोऽस्या भयमिति । यावदुपसर्पामि । प्रसक्त एवायमेतेषामालापः । कदाचिदित एवास्याभिव्यक्तिर्भविष्यति । तद्विटपान्तरितस्तावच्छृणोमि । (तथा करोति ।)

किङ्कर :— (सास्रं कृताञ्जलि) कुमार शङ्खचूड, एष स्वामिन आदेश इति कृत्वा ईदृशं निष्ठुरं मन्त्र्यते ।

1 मोहित— ता f. deluded, infatuated; caus PP. √मुह् 4P. 2 राजकार्यम् royal affair, king's mission. 3 आनीत brought, PP आ+√नी 1U. 4 अनेन सुतेन भवितव्यम् (भावे प्रयोगः) he must be her son. 5 प्रसक्त begun, engaged, PP प्र+√सञ्ज् 1P. 6 अभिव्यक्ति f revelation. 7 अञ्जलिः m folding hands together. 8 आदेश command, instruction 9 निष्ठुर cruel, harsh. 10 मन्त्र्यते it is spoken; कर्मणिलट् √मन्त्र् 10A.

Indeed, deluded by her affection for her son, she does not know the king's mission.

Shangkhachūda—I am coming.

Servant—(looking ahead, to himself) I have really brought him to the the slaughter-rock. So I shall give him the sign for slaughter.

Hero — Here is the woman. (Looking at Shangkhachūda) Surely he must be her son. But why is she crying? (Looking everywhere) I do not really see the cause of her fear and whence her fear has arisen Let me just approach. Their conversation has begun, and it will soon be audible here So being covered by the branches I will listen. (He does so).

Servant—(folding his hands in tears) Master Shangkhachūda, as it is the king's command, such harsh words are to be spoken.

शङ्खचूड :— भद्र, कथय ।

किङ्कर :— नागराजो वासुकिः आज्ञापयति ।

शङ्खचूड :—(शिरस्यञ्जलिं बद्ध्वा सादरम्) किमाज्ञापयति देवः ।

किङ्कर :— 'इदं रक्तांशुकयुगलं परिधायारोह वध्यशिलां येन रक्तांशुकमुपलक्ष्य गरुड आहारयिष्यति' इति ।

नायक :— श्रुत्वा) कथमसौ वासुकिना परित्यक्तः ।

किङ्कर :— कुमार, गृहाणैतद् वसनयुगलम् । (इत्यर्पयति)

शङ्खचूड :— (सादरम्) उपनय । (गृहीत्वा) शिरसि स्वाम्यादेशः ।

वृद्धा— (पुत्रस्य हस्ते वाससी दृष्ट्वा सोरस्ताडम्) हा वत्स, इदं खलु वज्रपातसन्निभं सम्भाव्यते । (मोहं गता।)

किङ्कर :— आसन्ना गरुडस्यागमनवेला, तल्लघु गच्छामि । (इति निष्क्रान्तः ।)

शङ्खचूड :— अम्ब, समाश्वसिहि ।

1 परिधाय having put on; gerund परि+√धा 3U. 2 सोरस्ताडम् ad beating the breast. 3 वज्र m n. thunderbolt. 4 सन्निभ similar 5 आसन्न imminent.

Shangkhachūda—O good man, tell me!

Servant—King of Nāgas Vāsuki commands you

Shangkhachūda—(folding his hands on the head, respectfully) What does His Majesty command?

Servant—"Putting on this pair of red garments, mount the slaughter-rock so that Garuda will eat you, detecting the red clothing."

Hero —(hearing) How, he has been given away by Vāsuki

Servant—Boy, take these garments. (He offers)

Shangkhachūda—(respectfully) Bring them (Taking) His Majesty's command is accepted into my head.

Old woman—(upon seeing the garments in her son's hand, beating her breasts) Oh my child! this is like the fall of a thunderbolt (she faints)

Servant — The hour of Garuda's arrival is imminent. So I am going quickly. (Exit)

Shangkhachūḍa—Mother, take heart!

वृद्धा— (समाश्वस्य सास्रम्) हा पुत्रक, हा मनोरथशतलब्ध, क्व पुनस्त्वां प्रेक्षिष्ये । (कण्ठे गृह्णाति)

नायकः— अहो नैर्घृण्यं गरुडस्य । अपि च ।

मूढाया मुहुरश्रुसन्ततिमुचः कृत्वा प्रलापान् बहून्
कस्त्राता तव पुत्रकेति कृपणं दिक्षु क्षिपन्त्या दृशम् ।
अङ्के मातुरवस्थितं शिशुमिमं त्यक्त्वा घृणामश्नत-
श्चञ्चुर्नैव खगाधिपस्य हृदयं वज्रेण मन्ये कृतम् ॥६॥

1 मनोरथशतलब्ध=मनोरथाना शतेन लब्ध. 2 नैर्घृण्यम् cruelty. 3 सन्तति. f. continuity, stream. 4 मुच् a. (gen. s. f. मुच.) d'scharging. 5 त्रातृ m. (nom. s. त्राता) protector. 6 कृपणम् ad. pitiably. 7 दिश् f. (loc. p दिक्षु) quarter, direction. 8 अङ्कः (loc. s. अङ्के) *lap.* 9 शिशु· *m child* 10 घृणा *f. compassion* 11 अश्नत् (gen. s m अश्नत ) eating, pres. part.√अश् 9P. 12 चञ्चु f. beak. 13 खगः bird. 14 अधिपः king. 15 खगाधिपस्य=गरुडस्य 16 वज्र m n. adamant, thunderbolt.

मूढाया. मुहु. अश्रुसन्ततिमुचः 'कः तव त्राता, पुत्रक!' इति बहून् प्रलापान् कृत्वा दिक्षु दृश कृपण क्षिपन्त्याः मातु अङ्के अवस्थितं इम शिशु घृणा त्यक्त्वा अश्नत. खगाधिपस्य चञ्चु. न एव हृदय वज्रेण कृत मन्ये ॥ शार्दूलविक्रीडितम्

Old woman—(recovering, in tears) Oh my son, obtained through a hundred wishes ! where can I see you again ? (she clasps him by the neck.)

Hero —O how cruel is Garuda ! And morever, I consider that not only the beak but the heart of the king of birds is made of adamant, as he will be eating without compassion this child, placed upon the lap of his mother, who is confounded, repeatedly shedding a stream of tears, making many a lamentation, saying; 'who will be your protector ? O my son !' and throwing her glances into all quarters in a pitiable manner

शङ्खचूड :— (आत्मनोऽश्रूणि निवारयन्) अम्ब, किमतिवैक्लव्येन ।

यैरत्यन्तदयापरैर्न विहिता वन्ध्यार्थिनां प्रार्थना
यैः कारुण्यपरिग्रहान्न गणितः स्वार्थः परार्थं प्रति ।
ये नित्यं परदुःखदुःखितधियस्ते साधवोऽस्तं गता
मातः संहर बाष्पवेगमधुना कस्याग्रतो रुद्यते ॥१०॥

ननु समाश्वसिहि समाश्वसिहि ।

वृद्धा — (सास्रम्) कथं समाश्वसिष्यामि । किमेकपुत्रक इति कृत्वा सानुकम्पेन नागराजेन प्रेषितोऽसि ।

1 अत्यन्त excessive 2 दया f tenderness, mercy 3 पर (समासेपु) intent on, absorbed in 3 अत्यन्तदयापरैं =अत्यन्तदयाया नियुक्तैं 4 प्रार्थना f entreaty, request 5 कारुण्यम् pity 6 प्रग्रिह acceptance 7 गणित counted, given consideration to, PP√ गण 10U 8 स्वार्थं self benefit 9 नित्यम always 10 धी f mind, intellect 11 परदु खदु खितधिय =परपा दु खन दु खिता धी येषा त 12 साधु (nom p m साधव ) good 13 अस्त गता dead 14 सहर withdraw thou ! लोट् सम्+√हृ 1U 15 अग्रतस् ind in front, before

यै अत्यन्तदयापरै अर्थिना प्रार्थना वन्ध्या न विहिता यै कारुण्यपरिग्रहात् परार्थं प्रति स्वार्थं न गणित ये नित्य परदु ख दु खितधिय ते साधव अस्त गता, मात ! बाष्पवेग अधुना सहर, कस्य अग्रत रुद्यते ॥ शार्दूलविक्रीडितम्

Shangkhachūda—(checking his own tears) Oh mother, what can be done by your extreme grief ?

Those good people, by whom, devoted to excessive compassion, entreaty of the needy was not rendered vain, by whom, resorting to tenderness, self interest was not so valued as others' interests and whose minds were distressed by the misery of others, are dead O mother, withdraw now your flowing tears ! In front of whom do you weep ?

Surely take heart, take heart !

Old woman—(with tears) How shall I take heart ? Has the king of Nāgas mercifully sent you, thinking that you are my only son ?

हा, कथमविच्छिन्ने जीवलोके मम पुत्रकः स्मृतः ।
सर्वथाऽहमस्मि मन्दभाग्या । (मूर्च्छति ।)

नायक :— (सकरुणम्)

आर्तं कण्ठगतप्राणं परित्यक्तं स्वबन्धुभिः ।
त्राये नैनं यदि ततः कः शरीरेण मे गुणः ॥११॥

तद्यावदुपसर्पामि ।

शङ्खचूडः — अम्ब, संस्तम्भयात्मानम् ।

वृद्धा — हा पुत्रक, यदा नागलोकपरिरक्षकेण वासुकिना परित्यक्तोऽसि तदा कस्तेऽपरः परित्राणं करिष्यति ।

नायक :—(उपसृत्य) नन्वहमहम् ।

1 अविच्छिन्न continual. 2 जीवलोक mortals, mortal world. 3 स्मृत remembered, PP√स्मृ 1P 4 सर्वथा completely. 5 मूर्च्छति she faints, √मूर्च्छ् 1P. 6 कण्ठगतप्राणम्=कण्ठे गता प्राणा यस्य स 7 त्राये I help, √त्रा 2A. 8 संस्तम्भय support thou! णिजन्तात्लोट् सम्+√स्तम्भ् 1A. 5. 9P. 9 अपर another, other 10 परित्राणम् deliverance

आर्तं कण्ठगतप्राण स्वबन्धुभिः परित्यक्त एन यदि न त्राये तत मम शरीरेण क गुण ॥

Alas ! How did he remeber my son among the over-flowing mortals ?
I am by all means undone, unfortunate that I am. (She faints )

Hero — (compassionately)

Should I not deliver him, distressed, with his life hanging on the throat and abandoned by his own kinsfolk, then what virtue could be gained by my body ?
So let me approach just now.

Shangkhachūda — Mother, support yourself.

Old woman — Ah my Son, when you are given up by Vāsuki, the protector of the Nāgas, what other man will save you ?

Hero — (approaching) Certainly I, I will.

वृद्धा—(नायक दष्टवा ससम्भ्रममुत्तरीयेण पुत्रकमाच्छाद्य नायकमुपसृत्य जानुभ्या स्थित्वा) विनतानन्दन,

व्यापादय मामहं ते नागराजेनाहारनिमित्तं परिकल्पिता ।

नायकः— (सास्रम्) अहो पुत्रवात्सल्यम् ।

अस्या विलोक्य मन्ये पुत्रस्नेहेन विक्लवत्वमिदम् ।
अकरुणहृदयः करुणां कुर्वीत भुजङ्गशत्रुरपि ॥१२॥

शङ्खचूड :— अम्ब, अलं त्रासेन । न नागशत्रुः । पश्य ।

महाहिमस्तिष्कविभेदमुक्तरक्तच्छटाचर्चितचण्डचञ्चुः ।
क्वासौ गरुत्मान् क च सोमसौम्यस्वभावरूपाकृतिरेष साधुः ॥१३॥

1 आच्छाद्य having covered, gerund आ+√छद् 10U 2 परिकल्पित~ता f arranged, provided, PP परि+√क्लृप् 1A 3 वात्सल्यम् affection 4 विक्लवत्वम् excitement, grief 5 कुर्वीत he might make, विधिलिङ √ कृ 8U 6 मस्तिष्कम् brain 7 विभेद tearing 8 रक्तम् blood 9 छटा f mass 10 चर्चित anointed, PP √ चर्च 10P. 11 चण्ड fierce 12 महाहिमस्तिष्कविभेदमुक्तरक्तच्छटाचर्चितचण्डचञ्चु=महता अहीना मस्तिष्कविभदेन मुक्ता या रक्तच्छटा ताभि चर्चिते चण्डे चञ्चू यस्य स 6 क्व क्व imply a great difference 7 सोम moon 8 सौम्य soft 9 सोमसौम्यस्वभावरूपाकृति = सोमतुल्ये साम्ये स्वभावरूपाकृती यस्य स

अस्या पुत्रस्नेहेन इद विक्लवत्व विलोक्य मन्ये अकरुणहृदय भुजङ्गशत्रु अपि करुणा कुर्वीत ॥ आर्या ॥ महाहिमस्तिष्कविभेदमुक्तरक्तच्छटाचर्चितचण्डचञ्चु असौ गरुत्मान् क्व सोमसौम्यस्वभावरूपाकृति एष साधु च क्व ॥ उपजाति

Old woman—(seeing the hero, hurriedly, covers her son with the upper garment, and approaching him, kneels down) Oh Garuda, kill me! I am designated by the Nāga king as your food stuff

Hero (tearfully) Oh her affection for the son!
Seeing this alarm due to affection for her son, I think even the cruel hearted foe of the serpents might cherish pity

Shangkhachūda—O mother, be not alarmed! He is not the enemy of the Nāgas See

The difference between that Garuda whose beak is fierce and besmeared with a stream of blood released by tearing up the brains of big serpents, and this virtuous man whose nature and appearance are gentle as the moon!

वृद्धा— अहं खलु तव मरणभीता सर्वमेव लोकं गरुडमयं प्रेक्षे ।

नायक :— अम्ब, मा भैषीः । नन्वयमहं विद्याधरस्त्वत्सुतसंरक्षणार्थमेवायातः ।

वृद्धा— (सहर्षम) पुत्रक, पुत्रः पुनरेवं भण ।

नायक :— अम्ब, किं पुनः पुनरभिहितेन । ननु कर्मणैव सम्पादयामि ।

वृद्धा— (शिरस्यञ्जलिं बद्ध्वा) पुत्रक, चिरं जीव ।

नायक :— ममैतदम्बार्पय वध्यचिह्नं प्रावृत्य यावद्विनतात्मजाय ।
पुत्रस्य ते जीवितरक्षणाय स्वदेहमाहारयितुं ददामि ॥१४॥

1 भीत (भीता f s ) frightened, PP √ भी 3U 2 मरणभीता = मरणभयेन भीता 3 अभैषी you feared (लुङ्√भी, the augment अ is dropped when used with मा in the imperative sense) 4 सरक्षणार्थम to save 5 जीव live thou ! लट √ जीव् 1P 6 अर्पय give thou ! णिजन्तात्लोट√ऋ 1 3P 7 विनतात्मज (dat s —जाय) son of विनता i e Garuda 8 देह m n body 9 जीवितम् life 9 ददामि I give, √दा 3U

अम्ब, एतत वध्यचिह्नं मम अर्पय यावत् प्रावृत्य ते पुत्रस्य जीवितरक्षणाय विनतात्मजाय स्वदेह आहारयितु ददामि ॥ उपजाति

Old woman—Indeed, frightened by the fear of your death I suspect everyone to be Garuda

Hero — Mother, fear not ! Certainly I am a Vidyadhara who have come to save your son

Old woman—(with joy) Son, say it again and again

Hero — Mother, what is the use *of saying it again and again* ? I shall do just by my action

Old woman—(folding hands over her head) Son, live long !

Hero — O mother, give me this sign for slaughter ! Putting on this, to save the life of your son I shall now offer my body to the son of Vinata to devour

वृद्धा— (कर्णौ पिधाय) प्रतिहतममङ्गलम् । त्वमपि शङ्खचूडनिर्विशेषः पुत्रः । अथवा शङ्खचूडादप्यधिकतरो य एवं बन्धुजनपरित्यक्तमपि पुत्रकं मे शरीरप्रदानेन रक्षितुमिच्छसि ।

शङ्खचूड :— अहो जगद्विपरीतमस्य महासत्त्वस्य चरितम् । कुतः

विश्वामित्रः श्वमांसं श्वपच इव पुराऽभक्षयद् यन्निमित्तं
नाडीजङ्घो निजघ्ने कृततदुपकृतिर्यत्कृते गौतमेन ।
पुत्रोऽयं काश्यपस्य प्रतिदिनमुरगानत्ति तार्क्ष्यो यदर्थं
प्राणांस्तानेष साधुस्तृणमिव कृपया यः परार्थं ददाति ॥१५॥

1 निर्विशेष not different from, same 2 जगत् n world 3 विपरीत inverted, turned in opposite direction, PP विपरि + √ इ 2P 4 महासत्त्व m n great man 5 चरितम् deed 6 विश्वामित्र a great sage in Hindu Mythology. 7 श्वमांसम् dog's flesh. 8 श्वपच an outcast feeding on dogs 9 अभक्षयत् he ate, लङ् √ भक्ष् 10U 10 नाडीजङ्घ crane 11 निजघ्ने it was killed, लिट् नि + √ हन् 2P 12 उपकृति f favour, help 13 कृततदुपकृति = कृता तस्य (गौतमस्य) उपकृति येन स 14 उरग (acc. P उरगान्) snake 15 अत्ति he eats, √ अद् 2P 16 यन्निमित्त, यत्कृते, यदर्थम् are all connected with तान् प्राणान् 17 तृणम् grass 18 कृपा f (ins s कृपया) pity

यन्निमित्त विश्वामित्र श्वपच इव श्वमांस पुरा अभक्षयत् यत्कृते गौतमेन कृततदुपकृति नाडीजङ्घ निजघ्ने यदर्थं काश्यपस्य अयं पुत्र. तार्क्ष्यं उरगान् प्रतिदिन अत्ति तान् प्राणान् य परार्थं तृण इव कृपया ददाति एष साधु ॥ स्रग्धरा

Old woman—(covering her ears) May this ill omen be driven away! You, who desire to save my son deserted by his own kinsfolk thus by sacrificing your body, are also a son not different from Shangkhachūda, or much more valuable than he is

Shangkhachūda - Oh this great man's deed has turned the world upside down! Whereas, He is a good man for others' sake mercifully offers like a grass the very life-breaths for which once upon a time Vishvāmitra ate dog's meat like an outcast for which Gautama killed a crane that had helped him, and for which Garuda, son of Kāshyapa eats serpents everyday

(नायकमुद्दिश्य) भो महासत्त्व, त्वया दर्शिता एवात्मप्रदानव्यवसायान्निर्व्याजा मयि कृपालुता। तदलमनेन निर्बन्धेन। पश्य।

जायन्ते च म्रियन्ते च मादृशाः क्षुद्रजन्तवः।
परार्थे बद्धकक्ष्याणां त्वादृशामुद्भवः कुतः ॥१६॥

तत् किमनेन निर्बन्धेन। मुच्यतामयमध्यवसायः।

नायकः— शङ्खचूड, न मे चिराल्लब्धावसरस्य परार्थसम्पादनामनोरथस्यान्तरायं कर्तुमर्हसि। तदलं विकल्पेन। दीयतामेतद् वध्यचिह्नम्।

शङ्खचूडः— भो महासत्त्व, किमनेन वृथात्मायासेन। न खलु शङ्खधवलं शंखपालकुलं शंखचूडो मलिनीकरिष्यति।

1 दर्शित (— ता f) shown, caus PP √ दृश् 1P 2 व्यवसाय (abl s व्यवसायात्) determination, exertion 3 निर्व्याज honest 4 कृपालुता f kindness. 5 म्रियन्ते they die, लट् √ मृ 6A 6 मादृश a like me 7 क्षुद्र small 8 जन्तु m creature 9 कक्ष्या f emulation, endeavour 10 बद्धकक्ष्याणाम्=बद्धा कक्ष्या यैः तेषाम् 11 त्वादृश् a (gen P त्वादृशाम्) like you 12 उद्भव birth 13 लब्धावसरस्य=लब्ध अवसर येन तस्य 14 विकल्प doubt hesitation 15 आयाम effort 16 धवल pure, white

मादृशा क्षुद्रजन्तव जायन्ते च म्रियन्ते च परार्थे बद्धकक्ष्याणां त्वादृशां उद्भव कुत ॥ अनुष्टुप्

(To the hero) O great personage! You have shown an honest compassion for me through your determination to sacrifice your self So do not insist upon it See! Small creatures like me are born and die, but whence will persons like you who emulate for the sake of others be born?

Therefore, away with this persistence! Pray discard your determination.

*Hero* — *O Shangkhachuda, please do not obstruct me who have obtained* an opportune moment after a long time and who desire to realize the good of others So do not hesitate Give me this sign of slaughter!

Shangkhachūda—O great man do not trouble yourself in vain Not indeed Shangkhachūda will defile the family of Shangkhapāla pure as a conch shell

यदि ते वयमनुकम्पनीयास्तदियमस्मद्विपत्तिविक्लवा न यथा जीवितं जह्यात् तथाभ्युपायश्चिन्त्यताम् ।

नायक :— किमत्र चिन्त्यते । चिन्तित एवाभ्युपायः । स तु त्वदायत्तः ।

शङ्खचूड :— कथमिव ।

नायक :— म्रियते म्रियमाणे या त्वयि जीवति जीवति ।
तां यदीच्छसि जीवन्तीं रक्षात्मानं ममासुभिः ॥१७॥

अयमभ्युपायः । तदर्पय त्वरितं वध्यचिह्नं यावदनेनात्मानं प्रच्छाद्य वध्यशिलामारोहामि । त्वमपि जननीं पुरस्कृत्य अस्माद् देशान्निवर्तस्व । कदाचिदम्बाऽवलोक्य सन्निकृष्टं घातस्थानं स्त्रीस्वभावकातरत्वेन जीवितं जह्यात् ।

1 विपत्तिविक्लवा = विपत्त्या विक्लवा (माता) 2 जह्यात she may forsake विधिलिङ √ हा 3P 3 अभ्युपाय remedy, means 4 आयत्त a depending on, resting with 5 म्रियमाणे त्वयि (loc abs ) when you are dead 6 त्वयि जीवति ( loc abs ) when you are alive 7 असु m (ins P असुभि ) life, life breaths 8 पुरस्कृत्य having placed in front, gerund पुरस + √ कृ 8U 9 सन्निकृष्ट close, near 10 घात slaughter 11 कातरत्वम fear timidity 12 निवर्तस्व return thou! लोट नि + वृत 1A

या म्रियते त्वयि म्रियमाण जीवति त्वयि जीवति ता जीवन्ती यदि इच्छसि मम असुभि आत्मान रक्ष ॥

If we deserve pity from you do think out a remedy by which my mother, overcome with my adversity might not forsake her life

Hero — What is to be thought here ? I have just thought out a remedy It rests with you

Shangkhachūda—How does it ?

Hero — Protect yourself by means of my life, if you wish her alive, who dies when you die and lives when you live

This is the remedy Therefore, quickly offer me the sign of slaughter so that I may wrap myself with this and mount the slaughter rock You too should go away from this place, placing your mother in front Whenever she sees the slaughtering place appearing nearer, she might lose her life due to her timid feminine nature

किं न पश्यति भवानिदं विपन्नपन्नगानेककङ्कालसङ्कुलं महाश्मशानम् । तथाहि

चञ्चच्चञ्चूद्धृतार्धच्युतपिशितलवग्राससंवृद्धगर्धै-
र्गृध्रैरारब्धपक्षद्वितयविधुतिभिर्बद्धसान्द्रान्धकारे ।
वक्त्रोद्वान्ताः पतन्त्यश्छमिति शिखिशिखाश्रेणयोऽस्मिञ्छिवाना-
मस्रस्रोतस्यजस्रस्रुतबहलवसावासविस्रे स्वनन्ति ॥१८॥

1 विपन्न perished, PP वि + √पद् 4A 2 कङ्काल m n skeleton 3 सङ्कुल a confused, full of 4 श्मशानम् cemetery 5 विपन्नपन्नगानेककङ्कालसङ्कुलम् = विपन्नानां पन्नगानां अनेकैः कङ्कालैः सङ्कुलम् 6 चञ्चत् moving, pres part PP √ चञ्च् 1P 7 उद्धृत raised, drawn out, PP उद् + √ धृ 10U 8 च्युत dropped, PP √ च्यु 1A 9 पिशितम् flesh 10 लव = ग्रास bit, morsel, mouthful 11 गर्ध greediness 12 चञ्चच्चञ्चूद्धृतार्धच्युतपिशितलवग्राससंवृद्धगर्धैः = चञ्चन्त्या चञ्च्वा उद्धृतस्य अर्धच्युतस्य पिशितलवस्य ग्रासे संवृद्धः गर्धः येषां तैः 13 गृध्र vulture 14 आरब्ध begun PP आ + √ रभ 1A 15 द्वितयम् pair 16 विधुति f shaking, flapping 17 बद्ध = कृत 18 आरब्धपक्षद्वितयविधुतिभिः = आरब्धा पक्षद्वितयस्य विधुतयः यैः तैः 19 बद्धसान्द्रान्धकारे — बद्धः सान्द्रः अन्धकारः यस्मिन् तस्मिन् 20 उद्वान्त vomitted, PP उद् + √ वम 1P 21 पतत् (nom P f) पतन्त्यः) falling, √ पत् 1P 22 छम् ind rattling or clacking sound 23 शिखिशिखा f fire flame 24 श्रेणि f (P nom श्रेणयः) line, row 25 शिवा f jackal 26 अस्रम् blood 27 स्रोतस् n (loc स्रोतसि) stream 8 अजस्र continual 29 वसा f. fat 30 विस्रम् raw meat-smell 31 अजस्रस्रुतबहलवसावासविस्रे – अजस्रं स्रुतायाः बहलायाः वसायाः वासविस्रं यत्र तस्मिन्

चञ्चच्चञ्चूद्धृतार्धच्युतपिशितलवग्राससंवृद्धगर्धैः आरब्धपक्षद्वितयविधुतिभिः गृध्रैः बद्धसान्द्रान्धकारे अस्मिन् अजस्रस्रुतबहलवसावासविस्रे अस्रस्रोतसि शिवानां वक्त्रोद्वान्ताः छम् इति पतन्त्यः शिखिशिखाश्रेणयः स्वनन्ति ॥ स्रग्धरा

*Don't you see* this *great* Cemetery filled with a great number of skeletons of the dead serpents? For

The rows of fire flames vomitted out of the mouths of the jackals and falling with a clacking sound are making a noise in this stream of blood where the carrion odour is mingled with that of abundant fat continually flowing and where profound darkness is created by the vultures flapping the pairs of their wings and with their greed increased for a morsel of meat pieces drawn out by their beaks and half dropping

शंखचूड :— कथं न पश्यामि ।

प्रतिदिनमशून्यमहिनाहारेण विनायकाहितप्रीति ।
शशिधवलास्थिकपालं वपुरिव रौद्रं श्मशानमिदम् ॥१६॥

नायक :— शंखचूड, तद् गच्छ । किमेभिः सामोपन्यासैः ।

शंखचूड :— आसन्नः खलु गरुडस्यागमनसमयः । (मातुरग्रतो जानुभ्यां स्थित्वा)

अम्ब, त्वमपि निवर्तस्वेदानीम् ।
समुत्पत्स्यामहे मातर्यस्यां यस्यां गतौ वयम् ।
तस्यां तस्यां प्रियसुते माता भूयास्त्वमेव नः ॥२०॥
(पादयो पतति ।)

1 अशून्य not devoid of 2 आहार food 3 हार necklace 4 विनायक Garuda, Ganesha, son of Shiva 5 विनायकाहितप्रीति = विनायकस्य आहिता प्रीति यन तत् 6 कपाल m n skull 7 वपुस n form body 8 रौद्र a terrible, Shiva like 9 श्मशान n cemetery, m Shiva 10 गति f (loc s गतौ) fate, station transmigration 11 भूया may thou be! आशीर्लिङ √ भू 12 समुत्पत्स्यामहे we shall be born

प्रतिदिन अहिना आहारेण (हारेण) अशून्य विनायकाहितप्रीति शशिधवलास्थिकपाल रौद्र वपु इव इद श्मशानम (दृश्यत) ॥ आर्या

प्रियसुत मात ! वय यस्या यस्या गतौ समुत्पत्स्यामहे तस्या तस्या त्व एव न माता भूया ॥ अनुष्टुप्

Shangkhachuda—How do I not see ?

This terrible looking cemetery not devoid of food in the shape of a snake everyday, giving delight to Garuda and full of bones and skulls appears like Shiva's body not devoid of a necklace in the shape of a snake always giving delight to Ganesha and full of bones and skulls on it white as the moon beams

Hero —O Shangkhachuda, go ! What is the use of this soothing word ?

Shangkhachuda—The hour of Garuda's arrival is indeed imminent.

(Kneeling down before his mother) You, too, now return !
Oh mother who love your son may you be my mother in what ever station of transmigration we may be re born !
(He falls before her feet)

वृद्धा — (सास्रम्) कथमस्य पश्चिमं वचनम्। पुत्रक, न खलु त्वामुज्झित्वा मे पादावन्यतो वहतः। तदिहैव त्वया सह स्थास्यामि।

शंखचूडः — (उत्थाय) जवादहमप्यदूरे भगवन्तं दक्षिणगोकर्णं प्रदक्षिणीकृत्य स्वाम्यादेशमनुतिष्ठामि। (उभौ निष्क्रान्तौ।)

नायकः— कष्टम्। न सम्पन्नमभिलषितम्। तत् कोऽत्राभ्युपायः।

कञ्चुकी — (तरसा प्रविश्य) इदं वासोयुगम्।

नायकः— (दृष्ट्वा सहर्षमात्मगतम्) दिष्ट्या सिद्धमभिवाञ्छितमनेन अतर्कितोपनतेन रक्तांशुकयुगलेन।

कञ्चुकी — इदं वासोयुगं देव्या मित्रावसुजनन्या कुमाराय प्रेषितम्। तदेतत् परिधत्तां कुमारः।

नायकः— (सादरम्) उपनय। (कञ्चुकी उपनयति।)

1 पश्चिम last 2 जव speed, rapidity 3 जवात् speedily rapidly 4 दक्षिणगोकर्ण Name of Shiva's sacred place 5 प्रदक्षिणीकृत्य having paid respect to 6 तरस speed 6 तरसा speedily 8 अभिवाञ्छितम अभिलषितम longing desire 9 अतर्कित a unexpected 10 उपनत offered befallen 11 परिधत्ताम् let him wear, लोट परि+ √धा 3A

Old woman—(shedding tears) How is this his last word? My dear son my feet do not stir, abandoning you So I shall stay here with you

Shangkhachuda—(rising) Swiftly paying my respect to the sacred Gokarna nearby I shall carry out His Majesty's command

(Both exit)

Hero —Ah fie! my longing has not been fulfilled So what remedy here?

Chamberlain—(rapidly entering) Here are a pair of garments

Hero —(looking joyfully to himself) Fortunately my longing has been accomplished by these red garments unexpectedly brought

Chamberlain—Her Majesty Queen mother of Mitravasu, has sent this pair of garments to Your Highness Therefore may Your Highness put them on!

Hero —(cordially) Offer them to me (The chamberlain offers)

नायकः— (गृहीत्वात्मगतम्) सफलीभूतो मे मलयवत्याः पाणिग्रहः ।
(प्रकाशम्) कञ्चुकिन्, गम्यताम् । मद्वचनादभिवादनीया देवी ।

कञ्चुकी — यदाज्ञापयति कुमारः । (इति निष्क्रान्तः)

नायकः— वासोयुगमिदं रक्तं प्राप्ते काले समागतम् ।
महती प्रीतिमाधत्ते परार्थे देहमुज्झतः ॥२१॥
(दिशोऽवलोक्य) यथाऽयं चलितमलयाचलशिखरशिलासंचयः प्रचण्डो नभस्वान् तथा तर्कयामि आसन्नीभूतः खलु पक्षिराज इति । तथाहि

1 सफलीभूत become fruitful PP सफली + √ भू 1p 2 पाणिग्रह marriage 3 अभिवादनीय (f —नीया) (ought) to be saluted, pot PP अभि + √ वद 1P caus 4 प्राप्त arrived, suitable, opportune 5 काल time 6 समागत reached, come, PP. समा + √ गम् 1P 7 आधत्ते it produces, लट् आ + √ धा (A) 3U 8 उज्झत (gen s m उज्झत) giving up, pres part √ उज्झ 6P 9 अचल mountain 10 सञ्चय collection, heap 11 चलितमलयाचलशिखरशिलासञ्चय = चलित मलयाचलस्य शिखरेषु शिला सञ्चय येन स 12 प्रचण्ड strong 13 नभस्वत m (nom s नभस्वान्) wind 14 आसन्नीभूत become near imminent, PP आसन्नी + √ भू 1P

प्राप्ते काले इद रक्त वासोयुग समागत परार्थे देह उज्झत (मम) महती प्रीति आधत्ते ॥ अनुष्टुप

Hero — (accepting, to himself) My marriage with Malayavati has been fruitful (Aloud) Oh Chamberlain you may go At my word do salute the queen

Chamberlain—As Your Highness commands me (Exit)

Hero — This pair of red garments arrived at the opportune moment produce a great pleasure to me abandoning my body for the sake of others (Looking all directions) As this strong wind blows shaking the heaps of stones on the peaks of the Malaya range, I suppose that the king of birds is approaching here For,

तुल्याः संवर्तकाभ्रैः पिदधति गगनं पङ्क्तयः पक्षतीनां
तीरं वेगान्निरस्तं क्षिपति भुव इव प्लावनायाम्बु सिन्धोः ।
कुर्वन् कल्पान्तशङ्कां सपदि च सभयं वीक्षितो दिग्विपेन्द्रै-
र्देहोद्योतैर्दशाशाः कपिशयति मुहुर्द्वादशादित्यदीप्तिः ॥२२॥

तद् यावदसौ नागच्छेत् शंखचूडस्तावत् त्वरिततरमिमां वध्य-शिलामारोहामि । (तथा कृत्वोपविश्य स्पर्शं नाटयति)

1 तुल्य (+ ins. & gen.) equal, resembling. 2 संवर्तकः the fire of universal destruction. 3 अभ्रम् cloud. 4 पिदधति they cover, conceal; पि + √ धा 3U. 5 गगनम् sky. 6 पङ्क्तिः f. (nom. P. पङ्क्तयः) line, series. 7 पक्षतिः f. root of wing. 8 तीरम् bank, shore. 9 वेगः speed. 10 वेगात् speedily. 11 निरस्त. scattered; PP. निस् + √ अस् 4P. 12 प्लावनम् (dat. s. प्लावनाय) bathing, flooding. 13 अम्बु n. water. 14 सिन्धुः m. (gen. s. सिन्धोः) ocean. 15 कल्पान्तः universal destruction. 16 शङ्का f. fear, doubt. 17 सपदि ind. instantly. 18 सभयम् fearfully. 19 दिग्विपेन्द्रः quarter-elephant. 20 उद्योतम् appearing, manifesting. 21 कपिशयति it embrowns नामधातुः √ कपिशय्. 22 द्वादश-आदित्याः the twelve suns that are to shine at the time of universal destruction. 23 दीप्तिः splendour, light. 24 द्वादशादित्यदीप्ति.= द्वादशादित्यानां इव दीप्तिः यस्य स (गरुडः) 25 स्पर्शः touch

सवर्तकाभ्रैः तुल्याः पक्षतीनां पङ्क्तयः गगनं पिदधति, भुवः प्लावनाय इव वेगान् निरस्त सिन्धोः अम्बु तीर क्षिपति, सपदि कल्पान्तशङ्कां कुर्वन् दिग्विपेन्द्रैः सभय वीक्षितः च द्वादशादित्यदीप्तिः (गरुडः) देहोद्योतैः मुहुः दशाशाः कपिशयति ॥ स्रग्धरा.

The lines of the roots of his wings resembling the clouds of the fire of the universal destruction cover the sky, he pushes the sea-water, scattering it forcibly, to the shore as if to bathe the earth, and instantly creating a suspense of the universal destruction, being gazed at in fear by the lordly quarter elephants and shining like the twelve suns, embrowns the ten-quarters repeatedly raising his form

Therefore, before Shangkhachūḍa comes back I shall mount on the slughter-rock. (Doing so and sitting, he touches.)

अहो स्पर्शोऽस्याः ।

न तथा सुखयति मन्ये मलयवती मलयचन्दनरसाऽऽर्द्रा ।
अभिवाञ्छितार्थसिद्ध्यै वध्यशिलेयं यथा स्पृष्टा ॥२३॥

अथवा किं मलयवत्या ।

शयितेन मातुरङ्के विश्रब्धं शैशवे न तत् प्राप्तम् ।
लब्धं सुख मयास्या वध्यशिलाया यदुत्सङ्गे ॥२४॥

तदयमागतो गरुत्मान् । यावदात्मानमाच्छादयामि । (तथा करोति)

1 सुखयति she pleases, makes happy, √ सुख 10P 2 आर्द्र wet, fresh 3 मलयचन्दनरसाऽऽर्द्रा=मलयचन्दनस्य रसेन आर्द्रा 4 सिद्धि f (dat s सिद्धयै) success accomplishment 5 अभिवाञ्छितार्थसिद्धयै=अभिवाञ्छितस्य अर्थस्य सिद्धयै 6 स्पृष्ट touched PP √ स्पृश 6P 7 शयित (ins s m शयितेन) slept, lied down, PP √ शी 2A 8 अङ्क lap 9 विश्रब्धम confidently 10 शैशवम् infancy 11 यत तत=सुखम 12 उत्सङ्ग lap

यथा अभिवाञ्छितार्थसिद्धयै स्पृष्टा इयं वध्यशिला मन्ये तथा मलयचन्दनरसार्द्रा मलयवती न सुखयति ॥ आर्या ॥

अस्या वध्यशिलाया उत्सङ्गे यत सुख मया लब्ध तत शैशवे मातु अङ्के विश्रब्ध शयितेन (मया) न प्राप्तम ॥ आर्या

How pleasant its touch is!

I think Malayavati fresh with the sandal juice would not so much please me as does this slaughter rock touched by me for the success of my desired object

Yet no need of mentioning about Malayavati

Such happiness as I have now obtained on the lap of this slaughter rock was not felt by me sleeping confidently on my mother's lap in my infancy

As Garuda is come, I shall now cover myself

(He does so)

गरुड :— दृष्ट्वा विम्वं हिमांशोर्भयकृतवलयां संस्मरञ्शेषमूर्ति
सानन्दं स्यन्दनाश्वत्रसनविचलिते पूष्णि दृष्टोऽग्रजेन ।
एष प्रान्तावसज्जज्जलधरपटलात्यायतीभूतपक्षः
प्राप्तो वेलामहीध्रं मलयमहमहिग्रासगृध्नुः क्षणेन ॥ २५ ॥

1 बिम्ब m n disc 2 हिमांशु m (gen s हिमांशो) moon 3 वलयम coil, circle 4 भयकृतवलयाम=भयन कृत वलय यया ताम 5 संस्मरत (nom s m संस्मरन्) remembering, pres part सम + √ स्म 1P 6 शष the serpent King 7 मूर्ति f image, body 8 आनन्द joy 9 सानन्दम् ad joyfully 10 स्यन्दन chariot 11 अश्व steed, horse 12 त्रसनम fear alarm 13 विचलित shaken PP वि + √ चल 1P 14 स्यन्दनाश्वत्रसन विचलित=स्यन्दनस्य अश्वाना त्रसनन विचलित 15 पूषा m (loc s पूष्णि) the sun 16 चलित पूष्णि (loc abs) when the sun was shaken 17 अग्रज elder brother (i e अरुण) 18 प्रान्त border edge 19 अवसज्जत clinging, sticking 20 जलधर cloud 21 पटलम coating covering layer 22 अति-आयताभूत greatly enlarged 23 प्रान्तावसज्जज्जलधरपटलात्यायतीभूतपक्ष = (पक्षयो) प्रान्तेषु अवसज्जदभि जलधराणा पटल अत्या-यतीभूतौ पक्षौ यस्य स 24 महीध्र mountain 25 ग्रास mouthful, morsel 26 गृध्नु a greedy covetous क्षणन in a moment

हिमांशो विम्ब दृष्ट्वा भयकृतवलया शेषमूर्ति संस्मरन् पूष्णि स्यन्दनाश्वत्रसनविचलित अग्रजन सानन्द दृष्ट प्रान्तावसज्जज्जलधरपटलात्यायताभूतपक्ष अहिग्रासगृध्नु एष अह क्षणन वेलामहीध्र मलय प्राप्त ॥ स्रग्धरा

After seeing the disc of the moon thinking of the image of Shesa, the King of serpents coiled up in fear, and beheld with joy by my elder brother (Aruna) as the sun was agitated by the alarm of the chariot steeds, I have in a moment reached the coastal mountain of Malaya, greedy for a morsel of the snake with my wings greatly enlarged by the coatings of clouds sticking to their borders

नायक :— (सपरितोषम्)

संरक्षता पन्नगमद्य पुण्यं मयाऽर्जितं यत् स्वशरीरदानात् ।
भवे भवे तेन ममैवमेवं भूयात् परार्थः खलु देहलाभः ॥ २६ ॥

गरुड :— (नायक निर्वर्ण्य)

अस्मिन् वध्यशिलातले निपतितं शेषानहीन् रक्षितुं
निर्भिद्याशनिदण्डचण्डतरया चञ्च्वाधुना वक्षसि ।
भोक्तुं भोगिनमुद्धरामि तरसा रक्ताम्बरप्रावृतं
दिग्धं मद्भयदीर्यमाणहृदयप्रस्यन्दिनेवासृजा ॥ २७ ॥

1 पुण्यम् merit 2 अर्जित obtained earned, PP √ अर्ज 1P 10U 3 यत्=पुण्यम् 4 भव birth 5 भवे भवे in every re birth 6 तेन=पुण्येन 7 लाभ gain, acquisition 8 निर्भिद्य havihg torn up pierced, getund निर् + √ भिद् 7U 9 अशनिदण्ड thunder bolt 10 चण्डतर fiercer, more terrible 11 अशनिदण्डचण्डतरया = अशनिदण्डात् चण्डतरया 12 भोक्तुम् to enjoy to eat, inf √ भुज् 7A 13 भोगिन् m (acc s भोगिनम्) snake 14 उद्धरामि I lift up, उद्+ √ धृ 1P 15 अम्बरम् garment 16 दीर्यमाण being torn pass pres part √ दॄ 4 9P

स्वशरीरदानात् अद्य पन्नगं संरक्षता मया अर्जितं यत् पुण्यं तेन भवे भवे मम एवं एव परार्थः देहलाभः खलु भूयात् ॥ उपजाति ॥

अस्मिन् वध्यशिलातले शेषान् अहीन् रक्षितुं निपतितं मद्भयदीर्यमाणहृदयप्रस्यन्दिना असृजा दिग्धं इव रक्ताम्बरप्रावृतं भोगिनं अशनिदण्डचण्डतरया चञ्च्वा अधुना वक्षसि निर्भिद्य भोक्तुं तरसा उद्धरामि ॥ शार्दूलविक्रीडितम्

Hero — (with satisfaction)

By virtue of the merit obtained by me saving a serpent today by offering my own body may I in every round of my birth acquire a body thus aimed at the benefit of others !

Garuda — (watching the hero)

Now I swiftly lift up the snake fallen upon this slaughter stone slab to protect the rest of the snakes and covered with red garm ents as if besmeared with blood flowing out of its heart torn up by its fear of me, to devour it by piercing it through its bosom with my beak fiercer than the thunderbolt

(इत्यभिपत्य नायकं गृह्णाति । नेपथ्ये पुष्पाणि पतन्ति । दुन्दुभयश्च स्वनन्ति ।)

**गरुडः**— (ऊर्ध्वं दृष्ट्वाऽऽकर्ण्य च सविस्मयम्) अये पुष्पवृष्टिदुन्दुभिध्वनिश्च ।

आमोदानन्दितालिर्निपतति किमियं पुष्पवृष्टिर्नभस्तः
स्वर्गे किं चैष चक्रं मुखरयति दिशां दुन्दुभीनां निनादः ।
(विहस्य)
आं ज्ञातं सोऽपि मन्ये मम जवमरुता कम्पितः पारिजातः
सर्वैः संवर्तकाभ्रैरिदमपि रसितं जातसंहारशङ्कैः ॥२८॥

**नायकः**— (आत्मगतम्) दिष्ट्या कृतार्थोऽस्मि ।

**गरुडः**— (नायकं कलयन्)

1 अभिपत्य *having assailed* gerund अभि + √पत 1P 2 दुन्दुभि m f large kettle drum 3 स्वनन्ति they sound, √ स्वन 1P 4 ध्वनि m sound 5 आमोद fragrance 6 आनन्दित pleased, rejoiced PP आ + √नन्द 1P 7 अलि m bee 8 आमोदानन्दितालि =आमोदेन आनन्दिताः अलयः यया सा 9 नभस्तस from the sky 10 चक्रम् wheel 11 मुखरयति it resounds 12 निनाद sound 13 मरुत m (ins s मरुता) wind 14 पारिजात havenly coral tree 15 रसित sounded, PP √रस 1P n sound 16 संहार universal destruction 17 जातसंहारशङ्कैः =जाता संहारस्य शङ्का येषां तैः 18 कृतार्थ =कृत अर्थ यन स 19 कलयत (nom s m कलयन्) holding pres part √कल 10U (weighing counting)

इयं आमोदानन्दितालिः पुष्पवृष्टिः नभस्तः किं निपतति स्वर्गे च दुन्दुभीनां एष निनादः दिशां चक्रं मुखरयति किं आं ज्ञातं मन्ये मम जवमरुता सः पारिजातः अपि कम्पितः जातसंहारशङ्कैः सर्वैः संवर्तकाभ्रैः इदं अपि रसितम् ॥ स्रग्धरा ॥

(Attacking the hero he grasps him Flowers fall and drums sound in the stage )

Garuda — (looking overhead and listening with wonder) Oh a shower of flowers and drum sound !

Why does this shower of flowers that delights the bees with its fragrance fall from the sky ? And why this sound of drums in the sky make the wheel of the quarters resound ? (Laughing)
Ah I know by the wind of my speed the Parijata tree is shaken and all the clouds of the fire of the universal destruction roar causing suspicion of total destruction I think

Hero — *(to himself) Fortunately my objective has been achieved*

Garuda —(weighing the hero)

नागानां रक्षिता भाति गुरुरेष यथा मम ।
तथा सर्पाशनाकाङ्क्षां व्यक्तमद्यापनेष्यति ॥ २६ ॥

तद् यावदेनं गृहीत्वा मलयपर्वतमारुह्य यथेष्टमाहारयामि ।

(इति निष्क्रान्ताः सर्वे ।)

॥ इति चतुर्थोऽङ्कः ॥

1 रक्षितृ m. (nom. s. रक्षिता) protector, guardian. 2 गुरु a. heavy. 3 अशनम् feeding, food. 4 आकाङ्क्षा f. desire, greed. 5 व्यक्तम् surely, clear. 6 अद्य now, today. 7 अपनेष्यति he will remove, लृट् अप + √ नी 1P.

यथा एष नागानां रक्षिता मम गुरुः भाति तथा (मम) सर्पाशनाकाङ्क्षां व्यक्तं अद्य अपनेष्यति ॥ अनुष्टुप्.

Since this guardian of serpents appears to me heavy, today he will certainly remove my greed for devouring the serpents.

Therefore I shall just ascend the Malaya mountain, carrying him with me and eat to my satisfaction.

(Exeunt omnes)

*Here Ends Act IV*

## ❀ पञ्चमोऽङ्कः ❀

( ततः प्रविशति प्रतीहारः :

प्रतीहारः — स्वगृहोद्यानगतेऽपि स्निग्धे पापं विशङ्क्यते स्नेहात् ।
किमु दृष्टबह्वपायप्रतिभयकान्तारमध्यस्थे ॥१॥

तथाहि जीमूतवाहनो जलनिधिवेलाऽवलोकनकुतूहली निष्क्रान्तश्चिरयतीति दुःखमास्ते महाराजविश्वावसुः । समादिष्टश्चास्मि तेन यथा 'सुनन्द, श्रुतं मया सन्निहित—गरुडप्रतिभयमुद्देशं जामाता जीमूतवाहनो गत इति शङ्कित एवास्मि अनेन वृत्तान्तेन । तत् त्वरितं विज्ञायागच्छ किमसौ स्वगृहमागतो न वा' इति ।

1 स्निग्धे स्वगृहोद्यानगते (loc, abs.) when a loving one has gone to the garden of his own house. 2 पापम् misfortune, danger. 3 विशङ्क्यते it is suspected, feared; कर्मणि लट् वि + √ शङ्क् 1A. 4 अपायः calamity. 5 प्रतिभय a. fearful, terrible. 6 कान्तार m. n. big forest. 7 किमु how much more. 8 दृष्टबह्वपायप्रतिभयकान्तारमध्यस्थे-दृष्टाः बहवः अपाया. यस्मिन् तस्य प्रतिभयस्य कान्तारस्य मध्यस्थे. 9 सन्निहितगरुडप्रतिभयम् सन्निहितेन गरुडेन प्रतिभयम् 10 वृत्तान्त news.

स्निग्धे स्वगृहोद्यानगते अपि स्नेहात् पापं विशङ्क्यते दृष्टबह्वपायप्रतिभयकान्तारमध्यस्थे किमु ॥ आर्या.

## ACT V

(Then enters the door-keeper.)

Door-keeper— Even when a loving one has gone to the garden of his own house, a danger is apprehended through affection; how much more when he is in the midst of a jungle where many a calamity is seen? For His Majesty King Vishvāvasu is distressed as Jimūtavāhana who went out eager to have a look at the sea-tide is delaying, and I have been commanded by him, "O Sunanda, I have heard that my son-in-law, Jimūtavāhana went to the place which is fearful on account of Garuda's proximity and am alarmed by this tiding. So quickly finding out whether or not he has returned home, come!"

यावत्तत्र गच्छामि । (परिक्रामन्नग्रे दृष्ट्वा) अयमसौ राजर्षिः जीमूतवाहनस्य पिता जीमूतकेतुरुटजाङ्गणे सह स्वधर्मचारिण्या राजपुत्र्या वध्वा च पर्युपास्यमानस्तिष्ठति । तथाहि

क्षौमे भङ्गवती तरङ्गितदशे फेनाम्बुतुल्ये वहन्
जाह्नव्येव विराजितः सुपयसा देव्या महापुण्यया ।
धत्ते तोयनिधेरयं सुसदृशीं जीमूतकेतुः श्रियं
यस्यैषान्तिकवर्तिनी मलयवत्याभाति वेला यथा ॥२॥

तद् यावदुपसर्पामि । तत प्रविशति पत्नीवधूसमेतो जीमूतकेतु ।)

1 राजऋषि, राजर्षि m royal sage, saint like king 2 उटज m n hut, hermitage 3 अङ्गणम courtyard 4 धर्मचारिणी (ins s धर्मचारिण्या) wife 5 वधू f (ins s वध्वा) bride 6 पर्युपास्यमान being waited upon, pass pres part परि उप + √ आस् 2A 7 क्षौमम् (dual क्षौमे) silk garment 8 भङ्गवत a (acc d n भङ्गवती) having folds, wavy 9 तरङ्गित a wavy, tremulous 10 दशा f fringe 11 तरङ्गिदशे= तरङ्गिता दशा ययो ते 12 फेनाम्बु foamy water 13 जाह्नवी f (ins s जाह्नव्या) the Ganges 14 विराजित glittered, PP वि + √ राज् 1A 15 पत्नी f wife 16 समत accompanied by, come together, PP सम् + √ इ 2P

भङ्गवती तरङ्गितदशे फेनाम्बुतुल्ये क्षौम वहन् सुपयसा जाह्नव्या इव महापुण्यया देव्या विराजित अय जीमूतकेतु तोयनिधे. सुसदृशी श्रिय धत्ते यथा यस्य अन्तिकवर्तिनी मलयवती एषा (मलयवती) वेला आभाति ॥ शार्दूलविक्रीडितम्

Now I am going there (pacing & looking in front) There is Jimutavāhana's father, Jimutaketu the Royal Sage in the courtyard of his hermitage, being waited upon by his consort and the bride, the princess For wearing a pair of silken garments with folds with their fringes waving and resembling a foamy water, this Jimutaketu glittering with the queen highly meritorious like the Ganges possessed of clear water, bears the splendour exactly similar to that of the ocean, while this Malayavati by his side appears like the shore endowed with the Malaya mountain
So I am now to approach
(Then appears Jimūtaketu accompanied by his wife and the bride )

जीमूतकेतु :— भक्तानि यौवनसुखानि यशोऽवकीर्णं
राज्ये स्थितं स्थिरधिया चरितं तपोऽपि ।
श्लाघ्यः सुतः सुसदृशान्वयजा स्नुषेयं
चिन्त्यो मया ननु कृतार्थतयाऽद्य मृत्युः ॥३॥

सुनन्दः — (सहसोपसृत्य) जीमूतवाहनस्य ....

जीमूतकेतुः — (कर्णौ पिधाय) शान्तं पापम् ।

माता — प्रतिहतं खल्वेतदमङ्गलम् ।

मलयवती — वेपते मे हृदयमनेन दुर्निमित्तेन ।

जीमूतकेतु :— (वामाक्षिस्पन्दनं सूचयित्वा) भद्र, किं जीमूतवाहनस्य ।

1 भक्त (n p भक्तानि) shared, enjoyed, PP √ भज 1A 2 यौवनम् youth 3 यशस् n glory, reputation 4 अवकीर्ण scattered, spread, PP अव + √ कृ 6P 5 स्थिर firm, stable 6 धी f mind, intellect 7 स्थिरधिया=स्थिरा धी यस्य तेन 8 सुसदृशान्वयजा=सुसदृशे अन्वये जाता सा 9 स्नुषा f daughter in law 10 शान्तं पापम् ! God forbid ! May an evil be averted ! 11 वेपते it trembles, √ वप् 1A 12 अमङ्गलम्= दुर्निमित्तम् ill omen 13 वामाक्षिस्पन्दनम् tremor of the left eye 14 सूचयित्वा having indicated, gerund √ सूच् 10U

यौवनसुखानि भक्तानि यश अवकीर्णं स्थिरधिया राज्ये स्थित तप अपि चरित सुत श्लाघ्य इय स्नुषा सुसदृशान्वयजा ननु कृतार्थतया मृत्यु मया अद्य चिन्त्य ॥ वसन्ततिलका

Jimūtaketu— The pleasures of youth were enjoyed, and my fame has been spread far and wide, I governed with a constant mind and have also observed penance, my son is praiseworthy and this daughter-in law is of a very worthy family — so now my desired objects having been achieved, I have to think only of death

Sunanda (suddenly approaching) Of Jimūtavahana .. ...

Jimūtaketu— (covering his ears) God forbid!

Mother —May this ill omen be averted!

Malayavati—My heart trembles at this ill omen

Jimūtaketu— (indicating the tremor of his left eye) O good man! What of Jimūtavāhana ?

सुनन्दः — जीमूतवाहनस्य वार्तामन्वेष्टुं महाराजविश्वावसुना युष्मदन्तिकं प्रेषितोऽस्मि ।

जीमूतकेतुः— किमसन्निहितस्तत्र मे वत्सः ।

माता — (सविषादम्) महाराज, यदि तत्र न सन्निहितः तत् क्व गतो मे पुत्रको भविष्यति ।

जीमूतकेतुः— नूनमस्मत्प्राणयात्रार्थं नितान्तं दूरं गतो भविष्यति ।

मलयवती — (सविषादमात्मगतम्) अहं पुनरार्यपुत्रमप्रेक्षमाण अन्यदेव किमपि आशङ्के ।

सुनन्दः— आज्ञापय किं मया स्वामिने निवेदनीयम् ।

जीमूतकेतुः— (वामाक्षिस्पन्दनं सूचयित्वा) जीमूतवाहनश्चिरयतीति पर्याकुलोऽस्मि हृदयेन ।

1 वार्ता f tiding, news 2 युष्मदन्तिकम्=युष्माक सकाशम् 3 असन्निहित not present 4 अस्मत् = अस्माकम् 5 प्राणयात्रा f livelihood, maintenance of living 6 नितान्त very much 7 निवेदनीय (ought) to be informed, pot PP caus नि + √ विद् 2P. 8 पर्याकुल confused, troubled

Sunanda—To find out the tidings of Jimūtavāhana I have been sent to you by King Vishvāvasu

Jimūtaketu—Is my child not present there ?

Mother—(sorrowfully) O my king, if my son is not there, where might he be ?

Jimūtaketu—Certainly he might have gone very far to secure some means for our livelihood

Malayavati—(sorrowfully to herself) I apprehend something, as I am not seeing my husband.

Sunanda—Please command me as to what I have to inform His Majesty

Jimūtaketu—(displaying the tremor of his left eye) I am disturbed by my heart as Jimūtavāhana is delaying

स्फुरसि किमु दक्षिणेतर मुहुर्मुहुः सूचयन्ममानिष्टम् ।
हतचक्षुरपहतं ते स्फुरितं मम पुत्रकः कुशली ॥४॥

(ऊर्ध्वमवलोक्य) अयमेव त्रिभुवनैकचक्षुर्भगवान् सहस्रदीधितिः स्फुटं जीमूतवाहनस्य श्रेयः करिष्यति । (विलोक्य सविस्मयम्)

आलोक्यमानमतिलोचनदुःखदायि
रक्तच्छटा निजमरीचिरुचो विमुञ्चत् ।
उत्पातवाततरलीकृततारकाभ—
मेतत्पुरः पतति किं सहसा नभस्तः ॥५॥

1 स्फुरसि you throb, √ स्फुर् 6P 2 दक्षिणेतर other than right, left 3 अनिष्टम् ill-omen, calamity. 4 हत (as the first member of cpds ) wretched, miserable. 5 कुशलिन् a (nom s m कुशली) sound 6 दीधिति f ray 7 सहस्रदीधितिः=सहस्रदीधितय यस्य स सूर्य 8 श्रेयस् n. welfare. 9 दायिन् a. (समासान्ते ; nom. s n. दायि) giving. 10 अतिलोचनदुःखदायि=अतिमात्रेण लोचनयो दुःख ददाति इति तत्. 11 छटा f streak, mass. 12 उत्पातवातः hurricane 13 तरलीकृत shaken to and fro 14 तारका f. star. 15 आभा f. (समासान्ते) resemblance 16 उत्पातवाततरलीकृततारकाभम्=उत्पातवातेन तरलीकृतायाः तारकाया आभा इव यस्य तत्

दक्षिणेतर हतचक्षु ! मम अनिष्ट मुहु मुहु सूचयन् किमु स्फुरसि ते स्फुरित अपहत [ कुरु ] मम पुत्रक कुशली [ भवेत् ] ॥ आर्या ॥

आलोक्यमान अतिलोचनदुःखदायि निजमरीचिरुच रक्तच्छटा विमुञ्चत् उत्पातवाततरलीकृततारकाभ किं एतत् नभस्त सहसा पुरः पतति ॥ वसततिलका

O miserable left eye, indicating to me an ill-omen, why dost thou throb repeatedly ? Away with thy throbbing so that my son might be sound !

(Beholding the sky) This blessed sun, the only eye of the triple worlds possesed of a thousand rays will surely bring welfare to Jimūtavāhana (Looking with wonder) What is this that falls before me from the sky suddenly, being beheld, causing an extreme pain to the eyes, shooting red streaks of its own lustre and resembling a star swung to and fro by a hurricane ?

कथं चरणयोरेव पतितम् । (सर्वे निरूपयन्ति) अये कथं लग्नसरसमांस-
केशश्चूडामणिः । कस्य पुनरयं स्यात् ।

माता — (सविषादम्) महाराज, पुत्रकस्येव मे एतच्चूडारत्नम् ।

मलयवती — अम्ब, मैवं भण ।

सुनन्दः — महाराज, मैवमविज्ञाय विक्लवीभूः । अत्र हि

तार्क्ष्येण भक्ष्यमाणानां पन्नगानामनेकशः ।
उल्कारूपाः पतन्त्येते शिरोमणय ईदृशाः ॥६॥

जीमूतकेतुः — देवि, सोपपत्तिकमभिहितम् । कदाचिदेवमपि स्यात् ।

माता — सुनन्द, यावदनया वेलया श्वशुरसदनमेवागतो मे पुत्रको
भविष्यति । तद्गच्छ, ज्ञात्वा लघु सम्पादय ।

1 लग्न stuck PP √ लग् 1P 2 मांसम् flesh 3 केश hair 4 चूडामणि m शिरोमणि चूडारत्नम् crest gem 5 लग्नसरसमांसकेश = लग्न सरस मांस केशा च यस्मिन स भक्ष्यमाण (gen P —माणानाम्) being eaten, pass pres part √ भक्ष् 10P 7 अनेकशम् 6 ind frequently in large quantity 8 उल्का f meteor 9 सदनम् house

तार्क्ष्येण भक्ष्यमाणानां पन्नगानां उल्कारूपाः ईदृशाः एते शिरोमणयः अनेकशः पतन्ति ॥ अनुष्टुप्

How it has dropped on my feet ! (All behold) Oh it is a crest-gem with fresh flesh and hair stuck to it ! But whom does this belong to ?

Mother — (dejected) O king ! this is my son's crest-jewel

Malayavati—Mother, do not say so

Sunanda—Sire ! do not be distressed thus without knowing about this

For here

Such crest gems of the serpents being eaten by Garuda as these frequently fall down like meteors

Jimūtaketu— O queen he has spoken fittingly It may be possible at any time

Mother — Sunanda, by this hour my son might have come to the house of his father in law Go then, and bring back his tidings

सुनन्द :— यदाज्ञापयति देवी । (इति निष्क्रान्त)

जीमूतकेतु :— देवि, अपि नागचूडामणिः स्यात् ।

(तत प्रविशति रक्तवस्त्रसवीत शखचूड)

शंखचूड :— (सास्रम्)

गोकर्णमर्णवतटे त्वरितं प्रणम्य
प्राप्तोऽस्मि तां खलु भुजङ्गमवध्यभूमिम् ।
आदाय तं नखमुखक्षतवक्षसञ्च
विद्याधरं गगनमुत्पतितो गरुत्मान् ॥७॥

1 सवीत clothed, adorned; PP. सम् + √ वी 2P  2 रक्तवस्त्रसवीत=रक्तवस्त्राभ्यां सवीतः  3 अर्णवः ocean, sea  4 अर्णवतटे=अर्णवस्य तटे.  5 वध्यभूमिः f slaughter-place.  6 नख m n claw, nail.  7 क्षत injured, hurt, PP. √ क्षण् 8U  8 नखमुखक्षतवक्षसम्=नखैः च मुखेन (चञ्च्वा) च क्षत वक्ष यस्य तादृशम्.  9 आदाय having taken; gerund आ + √ दा 3U  10 उत्पतित flown, Pp उद् + √ पत् 1P.

अर्णवतटे गोकर्णं त्वरित प्रणम्य ता भुजङ्गमवध्यभूमिं खलु प्राप्त अस्मि, नखमुखक्षतवक्षस च त विद्याधरं आदाय गरुत्मान् गगन उत्पतित ॥ वसन्ततिलका

Sunanda—As the queen commands me.

(Exit)

Jīmūtaketu— O queen, I wish this may be a Nāga's crest-gem.

*(There upon enters Shangkhachūda clad in the red garments)*

Shangkhachūda—(shedding tears)

Having hurriedly worshipped the Gokarna on the shore of the sea,
I have come back to the place of serpent-slaughter, and Garuda has
flown into the sky, snatching away the Vidyādhara with his bosom.
injured by its claws and beak.

(रुदन) हा महासत्त्व, हा परमकारुणिक, हा निष्कारणैकबान्धव, हा परदुःखदुःखित, क्व गतोऽसि । प्रयच्छ मे प्रतिवचनम् । हा शंखचूडहतक, किं कृतं त्वया ।

नाहित्राणात् कीर्तिरेका मयाप्ता
नापि श्लाघ्या स्वामिनोऽनुष्ठिताज्ञा ।
दत्त्वात्मानं रक्षितोऽन्येन शोच्यो
हा धिक् कष्टं वञ्चितो वञ्चितोऽस्मि ॥८॥

तन्नाहमेवंविधः क्षणमपि जीवन्नुपहास्यमात्मानं करोमि । यावदेतदनुगमनं प्रति यतिष्ये । (परिक्रामन् भूमौ दत्तदृष्टिः)

1 प्रयच्छ give thou ! लोट् प्र + √ यम् 1P. 2 त्राणम् (abl. s. त्राणात्) protection, saving. 3 कीर्ति f fame. 4 आज्ञा f. command. 5 शोच्य lamentable. 6 वञ्चित deceived , caus PP. √ वञ्च् 1P. 7 एवंविधः a. like this, such 8 उपहास्य ridiculous. 9 अनुगमनम् following 10 दत्तदृष्टिः=दत्ता दृष्टिः येन स 11 भूमिः f. earth (loc. s भूमौ)

अहित्राणात् एका कीर्तिः मया न आप्ता स्वामिनः श्लाघ्या आज्ञा अपि न अनुष्ठिता आत्मानं दत्त्वा अन्येन रक्षितः शोच्यः वञ्चितः वञ्चितः अस्मि हा धिक् कष्टम् ॥ शालिनी.

(crying) Ah great personality ! ah extremely merciful one ! ah my only relation without cause ! ah you distressed by others' sorrow ! where have you gone ? Give me your reply Ah miserable Shangkhachūda ! what did you do ?
From protecting the serpents I did not obtain the sole reputation and did not carry out even the king's commendable command, and lamentable as I am, saved by other man by sacrificing himself, I am deceived and deceived Alas fie upon me !
Therefore, I will not make myself ridiculous by living even for a moment like this. Now I shall strive to follow this (Walking with eyes cast on the ground.)

आदावुत्पीडपृथ्वीं प्रविरलपतितां स्थूलविन्दुं ततोऽग्रे
ग्रावस्वापातशीर्णप्रसृततनुकणां कीटकीर्णां स्थलीषु ।
दुर्लक्ष्यां धातुभित्तौ घनतरुशिखर गह्वरे स्त्यानरूपा—
मेनां तार्क्ष्यं दिदृक्षुर्निपुणमनुसरन् रक्तधारां व्रजामि ॥९॥

माता — (ससाध्वसम्) महाराज, एष सशोक इव रुदितवदन इत एव त्वरितमागच्छन् हृदयं मे आकुलीकरोति । तत् ज्ञायतां तावत् क एष इति ।

1 आदि m (loc. s आदौ) beginning 2 उत्पीड gush 3 पृथु a (acc s f. पृथ्वीम्) broad 4 प्रविरलम् scantily 5 स्थूल bulky, big 6 बिन्दु drop 7 स्थूलबिन्दुम्=स्थूला बिन्दव यस्या ताम् 8 ग्रावन् m (loc P ग्रावसु) stone शीर्ण shattered, torn into pieces, PP √ शॄ 9P 10 तनु thin 11 कण drop 12 आपातशीर्णप्रसृततनुकणाम्=आपातेन शीर्णा प्रसृता तनव कणा यत्र ताम् 13 कीट worm, insect 14 कीर्ण strewn, PP √ कॄ 6P 15 कीटकीर्णाम् = कीटै कीर्णाम् 16 स्थली f natural ground 17 दुर्लक्ष्य hardly visible 18 धातुभित्ति f mineral fragment 19 घनतरुशिखरे = घनानि तरुशिखराणि यस्मिन् तस्मिन् 20 गह्वरम abyss, cave 21 स्त्यान a thick, congealed 22 दिदृक्षु a desirous of seeing 23 निपुणम् carefully, skilfully 24 रुदितवदन =रुदित वदन यस्य स।

तार्क्ष्यं दिदृक्षु (अहम्) आदौ उत्पीडपृथ्वीं प्रविरलपतितां स्थूलविन्दुं ततः अग्रे ग्रावसु आपातशीर्णप्रसृततनुकणां स्थलीषु कीटकीर्णां धातुभित्तौ दुर्लक्ष्यां घनतरुशिखरे गह्वरे स्त्यानरूपां एनां रक्तधारां निपुणं अनुसरन् व्रजामि ॥ स्रग्धरा

Desirous of seeing Garuda I pursue with care this stream of blood which is broad in the beginning due to its gush containing big drops scantily fallen, further ahead consisting of tiny drops scattered, shattered by the fall on the stones, and which is strewn with worms on level grounds, hardly visible on the mineral fragments and congealed on a lower ground (cavern) with dense tree tops

Mother —(agitated) O King, some one hurriedly coming here as if saddened with a weeping face troubles my heart So please find out who he is

जीमूतकेतु :— यथाह देवी ।

शंखचूड :— (साक्रन्दम्) हा त्रिभुवनैकचूडामणे, क मया द्रष्टव्योऽसि । मुषितोऽस्मि भो मुषितोऽस्मि ।

जीमूतकेतुः — (आकर्ण्य सहर्षं विहस्य) देवि, मुञ्च शोकम् । अस्यायं चूडामणिर्नूनं मांसलोभात् केनापि पक्षिणा मस्तकादुत्खायानीयमानोऽस्यां भूमौ पपात ।

माता — (सपरितोषं मलयवतीं समालिंग्य) अविधवे, धीरा भव । न खल्वीदृश्याकृतिर्वैधव्यदुःखमनुभवति ।

मलयवती — (सहर्षम्) अम्ब, युष्माकमाशिषां प्रभावेण (पादयो पतति ।)

जीमूतकेतु :— (शंखचूडमुपसृत्य) वत्स, किं ते चूडामणिरपहृतः ।

शंखचूड :— आर्य, न ममैकस्य, त्रिभुवनस्यापि ।

1 आक्रन्द weeping. 2 साक्रन्दम् ad. 3 मुषित stolen, robbed; PP. √ मुष् 9 P. 4 लोभ avarice. 5 पक्षिन् m. (ins s. पक्षिणा) bird. 6 मस्तकम् (abl. s मस्तकात्) head 7 उत्खाय having pulled out ; gerund उद् + √ खन् 1U. 8 पपात it fell; लिट् √ पत् 1P. 9 अविधवा f. (voc. s. अविधवे) a woman who is not a widow. 10 वैधव्यम् widowhood. 11 आशिस् f. (gen. P. आशिषाम्) blessing. 12 प्रभावः power. 13 अपहृत carried off; PP. अप + √ हृ 1U.

Jīmūtaketu— As my queen says

Shangkhachūda—(weeping) Ah single crest-gem of the three worlds, where are you to be seen ? I am robbed, ah I am robbed

Jimūtaketu— (listening with joy and laughing) O queen, abandon your sorrow ! This is his crest-gem that fell down on this ground when some bird, having pulled from his head, snatched this away out of its avarice.

Mother—(with satisfaction embracing Malayavatī) Be firm. Oh you who are not a widow ! Really such a form as yours does not suffer the pang of widowhood

Malayavatī—(with joy) O mother, by the power of your blessings

(Falls at her feet )

Jimūtaketu—(approaching Shangkhachūda) My child, was your crest-jewel snatched away ?

Shangkhachuda— O noble sir, not only mine but the triple worlds'.

जीमूतकेतु :— (शंखचूडमवलोक्य) वत्स, कथमिव ।

शंखचूड :—दुःखातिभाराद् वाष्पोपरुध्यमानकण्ठो न शक्नोमि कथयितुम् ।

जीमूतकेतु :— (आत्मगतम्) हन्त हतोऽस्मि । (प्रकाशम्)

आवेदय ममात्मीयं पुत्र दुःखं सुदुःसहम् ।
मयि सङ्क्रान्तमेतत्ते येन सह्यं भविष्यति ॥१०॥

शंखचूड :—श्रूयतां शंखचूडो नाम नागः खल्वहम् आहारार्थं वासुकिना वैनतेयाय प्रेषितः । किं बहुना विस्तरेण । कदाचिदियं रुधिरधारापद्धतिः पांसुभिरवकीर्यमाणा दुर्लक्ष्यतामुपयाति । तत् सङ्क्षेपतः कथयामि ।

1 अतिभार (abl s अतिभारात्) excessive burden 2 वाष्प m n tear 3 उपरुध्यमान being choked, obstructed, pass pres part उप + √रुध् 7U 4 वाष्पोपरुध्यमानकण्ठ = वाष्पैः उपरुध्यमानः कण्ठः यस्य सः 5 आत्मीय a belonging to self, one's own 6 सुदुःसह very unbearable 7 सङ्क्रान्त passed into, transferred PP सम् + √क्रम् 1U 4P 8 सह्य bearable 9 विस्तर (ins s विस्तरेण) minute description 10 रुधिरम् blood 11 पद्धति f. path, line 12 पांशु m (ins P पांशुभिः) dust 13 अवकीर्यमाण being strewn, covered, pres part अव + √कॄ 6P 14 दुर्लक्ष्यता f invisibility 15 सङ्क्षेपतः ind in brief

पुत्र ! मम आत्मीयं सुदुःसहं दुःखम् आवेदय येन मयि सङ्क्रान्तम् एतत् ते सह्यं भविष्यति ॥ अनुष्टुप्

Jimūtaketu—(looking at Shangkhachūda) My child, how ?

Shangkhachūda—I am unable to speak as my throat is choked with tears due to my excessive sorrow

Jimūtaketu—(to himself) Alas! I am undone (Aloud)
My son tell me about thy own sorrow very unbearable so that this transferred to me might be bearable to thee

Shangkhachūda—Pray listen I am really a Nāga called Shangkhachūda I was sent by Vāsuki to Garuda as his food What is the use of minute description? This line of blood stream being covered by the dust will turn invisible at any moment So let me narrate in brief

विद्याधरेण केनापि करुणाऽऽविष्टचेतसा ।
मम संरक्षिताः प्राणा दत्त्वात्मानं गरुत्मते ॥११॥

जीमूतकेतुः— कोऽन्य एवं परहितव्यसनी । वत्स, ननु स्पष्टमेवोच्यतां जीमूतवाहनेनेति । हा हतोऽस्मि मन्दभाग्यः ।

माता — हा पुत्रक, कथं त्वयैतत् कृतम् ।

मलयवती — कथं सत्यीभूतमेव दुश्चिन्तितम् । (सर्वे मोहं गच्छन्ति)

शंखचूडः — (सास्रम्) नूनमेतौ पितरौ तस्य महासत्त्वस्य । कथमप्रियवादिना मया इमामवस्थां नीतौ । अथवा विषादृते विषधरस्य मुखात् किमन्यन्निःसरति । अहो, प्राणप्रदस्य सुसदृशं प्रत्युपकृतं जीमूतवाहनस्य शंखचूडेन ।

1 करुणाविष्टचेतसा=करुणया अविष्ट चेत यस्य तेन 2 व्यसनिन् a (nom s m व्यसनी) devoted to fond of 3 सत्यीभूत become true 4 दुश्चिन्तितम् ill thought ill omen 5 अवस्था f state, condition 6 अप्रिय unkind 7 वादिन a (ins s m वादिना) saying 8 ऋते ind except, without (+ acc. and abl) 9 विषधर poisonous snake 10 प्रद a (समासान्त) giving 11 प्रत्युपकृत rewarded pp प्रति+उप+√कृ

करुणाऽऽविष्टचेतसा केन अपि विद्याधरेण गरुत्मते आत्मानं दत्त्वा मम प्राणा संरक्षिता ॥ अनुष्टुप्

Some unknown Vidyadhara with his mind overcome with mercy, having offered himself to Garuda, has saved my life

Jimūtaketu—What other man is so devoted to the welfare of others ? My child, tell us frankly that it was Jimūtavahana Alas I am undone, unlucky that I am !

Mother—Ah my son, why did you do this ?

Malayavati—How the evil thought has become true ! (All faint )

Shangkhachūda—(tearfully) Certainly they are the great man's parents Why have I speaking unkind words, brought them to this plight ? Perhaps from the mouth of a poisonous snake nothing else but poison oozes Alas ! Shankhachūda has very befittingly rewarded Jimūtavāhana who sacrificed his life !

तत्किमधुनैवात्मानं व्यापादयामि । अथवा समाश्वासयामि तावदेतौ । तात, समाश्वसिहि । अम्बा समाश्वसितु ।

(उभौ समाश्वसित ।)

माता — वत्से, उत्तिष्ठ । मा रुदिहि । वयं किं जीमूतवाहनेन विना जीवामः । तत् समाश्वसिहि तावत् ।

मलयवती — (समाश्वस्य) आर्यपुत्र, क्व मया त्वं प्रेक्षितव्यः ।

जीमूतकेतुः — हा वत्स, गुरुचरणशुश्रूषाविधिज्ञ,

चूडामणिं चरणयोर्मम पातयता त्वया ।
लोकान्तरगतेनापि नोज्झितो विनयक्रमः ॥१२॥

(चूडामणिं गृहीत्वा) हा वत्स, कथमेतावन्मात्रदर्शनः संवृत्तोऽसि ।

(हृदये दत्त्वा) अहह ।

1 समाश्वासयामि encourage; णिजन्ताल्लट् समा+√श्वस 2 P 2 रुदिहि weep thou! लोट्√रुद् 2 P 3 जीवाम we live, लट√जीव् 1 P 4 ज्ञ (समासान्ते) knowing 5 गुरुचरण-शुश्रूषाविधिज्ञ =गुर्वो चरणानां शुश्रूषाविधि जानातीति तत्सम्बोधनम् 6 लोकान्तरम्=अन्य लोक 7 लोकान्तरगतेन=अन्य लोक गतेन 8 विनयक्रम manner of decorum 9 एतावन्मात्रदर्शन = एतावन्मात्र दर्शन यस्य स 10 संवृत्त become, PP सम्+√वृत 1A

चूडामणि मम चरणयो पातयता लोकान्तरगतेन अपि त्वया विनयक्रम न उज्झित ॥ अनुष्टुप् but the first line is incorrect

So shall I kill myself now? Or shall I encourage them? Father, take heart! Mother take heart!

(*Both recover*)

Mother — My daughter, stand up, do not weep! How shall we live without Jimūtavahana? So take heart for now!

Malayavati — (recovering) O my husband, where you are to be seen?

Jimūtaketu — Oh my darling son who have been acquainted with your act of *fidel service to the feet of your parents!*

By dropping the crest jewel at my feet you did not abandon your manner of decorum even while going to another world

(Holding the crest gem) Ah my dear son, why have you become visible only in this? (*Placing it on the heart*) Alas!

भक्त्या विदूरविनताननम्रमौलेः
शश्वत्तव प्रणमतश्चरणौ मदीयौ ।
चूडामणिर्निकषणैर्मसृणोऽप्ययं हि
गाढं विदारयति मे हृदयं कथं नु ॥१३॥

माता — हा पुत्र जीमूतवाहन, यस्य ते गुरुजनशुश्रूषां वर्जयित्वा अन्यत् सुखं न रोचते स क्वेदानीं पितरमुज्झित्वा स्वर्गसुखमनुभवितुं गतोऽसि ।

जीमूतकेतुः— (सास्रम्) देवि, किं जीमूतवाहनेन विना जीवामो वयं येनैवं प्रलपसि ।

1 भक्ति f. devotion 2 विदूर a. remote, distant. 3 विनत modest, bent down 4 नम्र a. bent. 5 मौलि f. head. 6 विदूरविनताननम्रमौलेः=विदूरेण विनत आननं अत एव नम्रा मौलिः यस्य तस्य. 7 शश्वत् ind. perpetually, constantly. 8 निकषणम् (ins P. निकषणैः) rubbing. 9 मसृण smooth, shining. 10 गाढम् profoundly. 11 विदारयति it tears; णिजन्ताल्लट् वि + √ दॄ 4.9P 12 रोचते it pleases, (+ dat and gen.) √ रुच् 1A. 13 स्वर्गसुखम्=स्वर्गस्य सुखम्.

शश्वत् भक्त्या मदीयौ चरणौ प्रणमत विदूरविनताननम्रमौलेः तव अयं चूडामणिः निकषणैः मसृणः अपि मे हृदयं गाढं विदारयति कथं नु ॥ वसन्ततिलका.

How is it that this crest-jewel of yours, who constantly through devotion saluted my feet with your head bent very low, profoundly tears my heart, though it is smooth on account of rubbings ?

Mother — Ah my son Jimūtavāhana where have you departed now to taste the bliss of the heaven, abandoning your father, though you never liked any other bliss except service to your parents ?

Jimūtaketu—(shedding tears) O queen, how shall we live without Jimūtavāhana, on account of which you are crying like this ?

मलयवती— (पादयोर्निपत्य कृताञ्जलि) तद् देहि मे आर्यपुत्रचिह्नं चूडामणिं येनैनं हृदये कृत्वा ज्वलनप्रवेशेनापनयामि हृदयस्य सन्ताप-दुःखम् ।

जीमूतकेतुः— पतिव्रते, किमेवमाकुलयसि । ननु सर्वेषामेवास्माकमयं निश्चयः ।

माता— महाराज, तत् किमस्माभिः प्रतिपाल्यते ।

जीमूतकेतुः— न खलु देवि, किञ्चित् । किन्त्वाहिताग्नेर्नान्येनाग्निना संस्कारो विहितः । अतोऽग्निहोत्रशरणाद् अग्नीनादायात्मानमुद्दीपयामः ।

शंखचूडः— (आत्मगतम्) कष्टम् । ममैकस्य कृते सकलमेवेदं विद्याधरकुलमुच्छिन्नम् । तदेवं तावत् । (प्रकाशम्)

1 कृता-जलि = कत अञ्जलि यया सा 2 ज्वलन *fire* 3 प्रवेश *entering* 4 पतिव्रता f (voc s पतिव्रते) chaste woman devoted to her husband 5 आकुलयसि thou agitatest, नामधातु √आकुल्य 6 निश्चय conviction, resolution 7 प्रतिपाल्यते it is waited for, कर्मणि लट प्रति+√पाल् 10P 8 अहिताग्नि *m sacrificer one who keeps sacred* fire on the altar 9 अग्नि m (ins s अग्निना, acc अग्नीन) fire 10 अग्निहोत्रम् sacred fire 11 शरणम् (abl s शरणात्) sanctuary, altar 12 उद्दीपयाम we set on fire, णिजन्त लट उद्+√दीप 4A 13 उच्छिन्न destroyed, PP उद्+√छिद 7U

Malayavati—(falling at his feet and folding her hands) Give me the crest jewel, a token of my husband, so that placing it on my heart I may dispel the agony of my heart by throwing myself into a fire

Jimūtaketu—O chaste wife! Why are you thus troubled? It is certainly the resolve of us all to do so

Mother—O king, then what are we waiting for?

Jimūtaketu—O queen nothing However, cremation rite of a sacrificer is not performed through any other fire Therefore, we shall take the fire from the altar of sacred fire and set ourselves on fire

Shangkhachūda—(To himself) O fie on me! Because of me alone this entire Vidyādhara family is to perish So I shall just now try thus (Aloud)

तात, न खल्वनिश्चित्यैव युक्तमिदमीदृशं साहसमनुष्ठातुम् । विचित्राणि हि दैवविलसितानि । कदाचिन्नयं नाग इति ज्ञात्वा परित्यजेन्नागशत्रुः । तदनयैव दिशा वैनतेयमनुसरामस्तावत् ।

माता— सर्वथा देवतानां प्रसादेन जीवतः पुत्रस्य सुखं पश्यामः ।

मलयवती— (आत्मगतम्) दुर्लभं खल्वेतत् मम मन्दभाग्यायाः ।

जीमूतकेतुः— वत्स, अवितथैषा तव भारती भवतु । तथापि साग्नीनामेवास्माकं युक्तमनुसर्तुम् । तदनुसरतु भवान् । वयमप्यग्निशरणादग्निमादाय त्वरितमेवानुगच्छामः । (पत्नीवधूसमेतो निष्क्रान्तः ।)

शङ्खचूडः— तद्यावद् गरुडमनुसरामि ।(अग्रतो निर्वर्ण्य)

1 अनिश्चित्य not having determined, or ascertained, gerund न निस् + √ चि 5U 2 साहसम् violence, rashness 3 विचित्र (nom p n विचित्राणि) strange 4 विलसितम् (nom p विलसितानि) sport, wanton action 5 अयम्=जीमूतवाहन 6 अवितथ a (nom s f अवितथा) true, realized 7 भारती f speech 8 अनुसर्तुम् to pursue, to follow, inf अनु + √ सृ 1P 9 साग्नीनाम्=अग्निसहितानाम्

O father, indeed it is not proper to commit such a rash thing as this without ascertaining the truth, for strange are the wanton deeds of Fate Whenever the enemy of Nagas finds out that he is not a Naga, he may abandon him So now let us pursue Garuda in this direction

Mother— By all means we should feel the joy of seeing our son alive by the gods' favour

Malayavati—(to herself) This is really unattainable to me, unlucky that I am.

Jimūtaketu— My child, may your words come to be true ! Yet it is fit for us to follow with fire So you may follow him We, too, will follow you quickly, taking the fire from the fire sanctuary

(Exit with his wife and the bride )

Shangkhachūda— So I now follow Garuda (Looking in front)

कुर्वाणो रुधिरार्द्रचञ्चुकषणैर्द्रोणीरिवाद्रेस्तटीः
प्लुष्टोपान्तवनान्तरः स्वनयनज्योतिःशिखासञ्चयैः ।
मज्जद्वज्रकठोरघोरनखरप्रान्तावगाढावनिः
शृङ्गाग्रे मलयस्य पन्नगरिपुर्दूरादसौ दृश्यते ॥ १४ ॥

(तत प्रविशत्यामनस्थ पुर पतितनायको गरुड ।)

गरुडः— जन्मनः प्रभृति भुजङ्गपतीनश्नता नेदमाश्चर्यं मया दृष्टपूर्वं यदयं महासत्त्वो न केवलं न व्यथते प्रत्युत प्रहृष्ट इव किमपि दृश्यते । तथाहि ।

1 द्रोणि f (p द्रोणी) tub, bucket 2 तटि f (p acc. तटी) slope 2 रुधिरार्द्रचञ्चुकषणै =रुधिरेण आर्द्रया चञ्च्वा कषणै 3 प्लुष्ट burnt, PP. √ प्लुष् 4P 4 उपान्त vicinity side 5 वनान्तरम् interior of forest 6 प्लुष्टोपान्तवनान्तर =प्लुष्ट उपान्ते वनान्तर येन स 7 ज्योतिस n fire, flash 8 स्वनयनज्योति शिखासञ्चयै =स्वनययो ज्योति शिखाना सञ्चयै 9 मज्जत् sinking, plunging, pres part √ मस्ज् 6P 10 कठोर a hard, adamant 11 घोर terrible. 12 प्रान्त end 13 अवगाढ depressed 14 अवनि f ground. 15 मज्जद्वज्रकठोरघोरनखरप्रान्तावगाढावनि =मज्जता वज्रवत् कठोराणा घोराणा च नखराणा प्रान्तै अवगाढा अवनि येन स 16 अश्नत् (ins s m अश्नता) eating; pres part √ अश् 5A 17 व्यथते he is vexed, √ व्यथ् 1A 18 प्रत्युत ind rather, on the contrary

रुधिरार्द्रचञ्चुकषणै अद्रे. तटी द्रोणी इव कुर्वाण स्वनयनज्योति शिखासञ्चयै प्लुष्टोपान्तवनान्तर मज्जद्वज्रकठोरघोरनखरप्रान्तावगाढावनि असौ पन्नगरिपु मलयस्य शृङ्गाग्रे दूरात् दृश्यते ॥ शार्दूलविक्रीडितम्

From afar on the summit of the Malaya is the enemy of serpents seen making the slopes of the mountain somewhat like tubs by rubbing his blood wet beak, burning the interior of the forest in the vicinity with the streaks of fire flames coming out of his own eyes and digging the ground with tips of his terrible adamant like claws sinking

(Thereupon appear Garuda perched and the hero fallen in front)

Garuda— Since my birth I am eating big snakes, but have never before seen this wonder, that is, this great being is not only undismayed but rather appears somewhat pleased, For

ग्लानिर्नाधिकपीयमानरुधिरस्याप्यस्ति धैर्योदधे-
र्मांसोत्कर्तनजा रुजोऽपि वहतः प्रीत्या प्रसन्नं मुखम् ।
गात्रं यन्न विलुप्तमेष पुलकस्तत्र स्फुटो लक्ष्यते
दृष्टिर्मय्युपकारिणीव निपतत्यस्यापकारिण्यपि ॥ १५ ॥

ततः कुतूहलमेव जनितमस्यानया धैर्यवृत्त्या । भवतु ।
न भक्षयाम्येवैनम् । पृच्छामि तावत् कोऽयमिति । (अपसर्पति ।)

**नायकः**— (मांसोत्कर्तनविमुखमुपलक्ष्य)

1 ग्लानिः f exhaustion, fatigue. 2 पीयमान being drunk; √ पा 1P. 3 अधिकपीयमानरुधिरस्य=अधिक पीयमान रुधिर यस्य तस्य. 4 धैर्यम् fortitude, courage 5 उदधि m. ocean 6 धैर्योदधेः = धैर्यस्य उदधि यस्य तस्य. 7 उत्कर्तनम् cutting, tearing out. 8 मांसोत्कर्तनजा =मांसस्य उत्कर्तनेन जाता 9 रुज् f, (acc P. रुजः) pain. 10 प्रसन्न calm, favourable. 11 गात्रम् limb. 12 विलुप्त torn, broken, PP. वि + √ लुप् 6U. 13 पुलक. horripilation, 14 joy. तत्र=गात्रे. 15 उपकारिन् (loc. s. उपकारिणि) helper, benefactor. 16 अपकारिन् (loc. s. अपकारिणि) evil-doer, enemy.

धैर्योदधेः अधिकपीयमानरुधिरस्य अपि ग्लानि न अस्ति मांसोत्कर्तनजा रुज वहत (तस्य) मुख प्रीत्या प्रसन्न यत् न विलुप्त गात्र तत्र एष पुलक स्फुट. लक्ष्यते अस्य दृष्टि. अपकारिणि अपि उपकारिणि इव मयि निपतति ॥ शार्दूलविक्रीडितम्.

There is no exhaustion in him who is the ocean of fortitude, although his blood is abundantly drunk, his face is calm with pleasure as he bears up the pains caused by my tearing his flesh, and a distinct horripilation of joy is visible in the limb which is not broken, and his glance is cast on me the evil-doer as if on a benefactor

Thence my curiosity is roused by his courageous attitude Well, I will not eat him, but ask him who he is. (He moves off,)

Hero — (observing Garuda no more willing to tear his flesh)

शिरामुखैः स्यन्दत एव रक्तमद्यापि देहे मम मांसमस्ति ।
तृप्तिं न पश्यामि तवापि तावत् किं भक्षणात् त्वं विरतो गरुत्मन् ॥ १६ ॥

गरुड :— (आत्मगतम्) आश्चर्यमाश्चर्यम् । कथमस्यामप्यवस्थाया—
मेवमूर्जितमभिधत्ते । (प्रकाशम्) अहो महासत्त्व ।

आवर्जितं मया चञ्च्वा हृदयात् तव शोणितम् ।
अनेन धैर्येण पुनस्त्वया हृदयमेव नः ॥ १७ ॥

1 शिरा f vein, blood-vessel. 2 मुखम् opening, top 3 शिरामुखै = शिराणां मुखैःम्य 3 स्यन्दते it oozes out, pours forth, √स्यन्द् 1 A. 5 तृप्ति f contentment, satisfaction. 6 भक्षणम् (abl. s भक्षणात्) eating. 7 विरत ceased, stopped, PP. वि+√रम् 1P. 8 ऊर्जितम् noble word, spirited word 9 अभिधत्ते he speaks; अभि+√धा 3 U. 10 *आवर्जित collected, emptied, PP. caus. आ+√वृज् 7P. or 10 P.* 11 शोणितम् blood 12 न = अस्माकम्

शिरामुखैः रक्तं स्यन्दते एव अद्यापि मम देहे मांसं अस्ति गरुत्मन् ! तावत् तव तृप्तिं अपि न पश्यामि भक्षणात् त्वं किं विरतः ॥ उपजातिः ॥

मया चञ्च्वा तव हृदयात् शोणितं आवर्जितं पुनः त्वया अनेन धैर्येण नः हृदयं एव (आवर्जितम्)

From the openings of the veins the blood still oozes out and even now in my body remains flesh,—O Garuda, I do not see your contentment, but why did you refrain from eating?

Garuda—(to himself) A wonderful phenomenon! He speaks nobly even in this plight (Aloud) O magnanimous one!

I have drawn out the blood from your heart with my beak,
but you have drawn out my heart with your courage

तत् कस्त्वमिति श्रोतुमिच्छामि ।

नायकः— एवं क्षुदुपतप्तो न श्रवणयोग्यस्त्वम् । कुरुष्व तावत् मांसशोणितेन तृप्तिम् ।

शङ्खचूडः— (सहसोपसृत्य) तार्क्ष्य, न खलु न खलु साहसमनुष्ठेयम् । नायं नागः । परित्यजैनम् । मां भक्षय । अहं तवाहारार्थं प्रेषितोऽस्मि वासुकिना । (उरो ददाति)

नायकः— (शङ्खचूडं दृष्ट्वा सविषादमात्मगतम्) कष्टं विफलीकृतो मे मनोरथः शंखचूडेनागच्छता ।

गरुडः— (उभौ निरूप्य) द्वयोरपि भवतोर्वध्यचिह्नम् । कः खलु नाग इति नावगच्छामि ।

शंखचूडः— अस्थान एव भ्रान्तिः ।

1 क्षुध् f hunger 2 उपतप्त burnt, pained, PP उप+√तप् 1P. 2 क्षुदुपतप्त = क्षुधा उपतप्त 3 श्रवणम् hearing. 4 श्रवणयोग्य =श्रवणस्य योग्य. 5 अनुष्ठेय to be performed; pot PP. अनु+√स्था 1P. 6 विफलीकृत rendered fruitless 7 अवगच्छामि।I know; अव+√गम् 1P. 8 अस्थाने not rightly, unjustly. 9 भ्रान्ति f mistake

So I wish to hear who you are.

Hero—you, tormented by hunger like this, are not fit for hearing. Now satisfy yourself with my blood and flesh.

Shangkhachūda – (approaching all of a sudden) Oh Garuda ! not indeed, not indeed the violent deed must be done. He is not a Nāga. Leave him alone ! Eat me ! I am sent to you by Vāsuki as your food (He opens his bosom )

Hero— (looking at Shangkhachūda, sadly to himself) Alas ! my wish is rendered fruitless by Shangkhchūda who has come.

Garuda—( looking at both ) Both of you possess the slaughter-sign. Surely I fail to know who the Nāga is.

Shangkhachūda—You are unjustly confused.

आस्तां स्वस्तिकलक्ष्म वक्षसि तनौ नालोक्यते कञ्चुकः
जिह्वे जल्पत एव मे न गणिते नाम त्वया द्वे अपि।
तिस्रस्तीव्रविषाग्निधूमपटलव्याजिह्मरत्नत्विषो
नैता दुःसहशोकशूत्कृतमरुत्स्फीताः फणाः पश्यसि ॥ १८॥

गरुड :— (उभौ निरूप्य शङ्खचूडस्य फणा दृष्ट्वा) तत् कः खलु मया व्यापादितः।

1 आस्ताम् let it alone, put it aside; लोट् √आस् 2A. 2 स्वस्तिक name of mystic sign. 3 लक्ष्मन् n. (nom and acc. s लक्ष्म) mark, sign 4 तनु f. (loc s. तनौ) body. 5 कञ्चुक slough, skin of a snake 6 जिह्वा f. (d. जिह्वे) tongue. 7 जल्पत् (gen s.m जल्पतः) chattering, speaking, pres. part. √जल्प् 1P. 8 गणित (nom. d. f. गणिते) counted; pp √गण् 10 U 9 तीव्र sharp, horrible. 10 विषाग्निधूम poison-gas. 11 पटलम् mass 12 व्याजिह्म dim, dark, oblique. 13 त्विष् f. lustre, light. 14 तीव्रविषाग्निधूमपटलव्याजिह्मरत्नत्विष = तीव्रस्य विषाग्निधूमस्य पटलेन व्याजिह्मा रत्नानां त्विषः यासां ता 15 शूत्कृत made a hissing sound. 16 मरुत् m wind, breath. 17 स्फीत swollen, large. 18 दुःसहशोकशूत्कृतमरुत्स्फीता = दुःसहेन शोकेन यत् शूत्कृत तद्युक्तेन मरुता स्फीता 19 फणा f (nom and acc. p. फणाः) hood

(तस्य) वक्षसि स्वस्तिकलक्ष्म आस्ताम् (मम) तनौ कञ्चुकः न आलोक्यते जल्पत एव मे द्वे अपि जिह्वे न नाम त्वया गणिते तीव्रविषाग्निधूमपटलव्याजिह्मरत्नत्विषः दुःसहशोकशूत्कृतमरुत्स्फीताः एताः तिस्रः फणाः न पश्यसि ॥ शार्दूलविक्रीडितम्

Let the Swastika mark upon his breast be put aside. Do you not see the slough on my body? Do you not count even my two tongues while I speak? Do you not observe these three hoods upon which the lustre of the crest-gems is dimmed by a column of the terrible poison-gas and which are swollen due to the breaths of hissing sound caused by my unbearable sorrow?

Garuḍa—(observing the two and watching Shangkhachūda's hood)
Then, who is it that I have slaughtered?

शंखचूड :— विद्याधरवंशतिलको जीमूतवाहनः । कथमकारुणिकेन त्वया इदमनुष्ठितम् ।

गरुड :— अये, अयमसौ विद्याधरकुमारो जीमूतवाहनः ।

मेरौ मन्दरकन्दरासु हिमवत्सानौ महेन्द्राचले
कैलासस्य शिलातलेषु मलयप्राग्भारदेशेष्वपि ।
उद्देशेष्वपि तेषु तेषु बहुशो यस्य श्रुतं तन्मया
लोकालोकविचारिचारणगणैरुद्गीयमानं यशः ॥१६॥

1 तिलक (समासान्ते) the best 2 मेरु m (loc s मेरौ) name of a fabulous mountain round which the planets are said to revolve 3 मन्दर name of a mountain 4 हिमवत्सानु m n (loc. s —सानौ) peak of Himalaya 5 महेन्द्राचल Indra's mountain 6 कैलास name of a mountain 7 प्राग्भार summit of a mountain 8 बहुशस् ind frequently 9 यस्य=जीमूतवाहनस्य 10 लोकालोक name of a fabulous mountain 11 विचारिन् a (in cpds विचारि) roaming 12 चारण celestial singer 13 गण multitude. 14 लोकालोकविचारिचारणगणैः =लोकालोके विचारिण चारणा तेषा गणै 15 उद्गीयमान loudly sung, pres pass part उद् + गै 1P 15 यशस् n glory

मेरौ मन्दरकन्दरासु हिमवत्सानौ महेन्द्राचले कैलासस्य शिलातलेषु मलयप्राग्भारदेशेषु अपि तेषु तेषु उद्देशेषु अपि लोकालोकविचारिचारणगणैः उद्गीयमान यस्य यशः तत मया बहुशः श्रुतम ॥ शार्दूलविक्रीडितम्

Shangkhachuda—Jimutavāhana the best of the Vidyadhara race Why did you do it, a cruel one ?

Garuda—Thunder ! is he Jimutavāhana the prince of Vidyadharas ?

On the mountain Meru, in the caverns of the Mandara mountain on the peaks of the Himālayas, on the mountain of Indra on the stone-slabs of the Kailasa mountain, even on the Malaya summits and in every region I have frequently heard about the glory of his, being loudly chanted by the troops of the celestial singers roaming the Lokaloka mountain

सर्वथा महत्यंहःपङ्के निमग्नोऽस्मि ।

नायकः —भो फणिपते, किमेवमुद्विग्नोऽसि ।

शंखचूडः— किमस्थानमिदमावेगस्य ।

स्वशरीरेण शरीरं तार्क्ष्यात् परिरक्षता मदीयमिदम् ।
युक्तं नेतुं भवता पातालतलादपि तलं माम् ॥२०॥

गरुडः— अये, करुणार्द्रचेतसाऽनेन महात्मनास्मद्ग्रासगोचरपतितस्य फणिनः प्राणान् रक्षितुं स्वदेह आहारार्थमुपनीतः । तन्मया महदकृत्यमेतन्मया कृतम् । किं बहुना ।

1 अंहस् n sin 2 पङ्क m n mire, mud 3 निमग्न sunk, PP नि + √ मस्ज 6 P 4 फणिन m (in cpds फणि) serpent snake 5 उद्विग्न agitated, sorrowful 6 अस्थानम् improper place or object 7 तल m n pit 8 नेतुम to lead, inf √ नी 1U 9 करुणार्द्रचेतसा=करुणया आर्द्रं चेतः यस्य तेन 10 महात्मन (ins s m महात्मना)= महान्आत्मा यस्य स saintly, noble 11 उपनीत raised, brought about PP. उप + √ नी 1U

स्वशरीरेण मदीयं इदं शरीरं तार्क्ष्यात् परिरक्षता भवता पातालतलात् अपि तलं मां नेतुं युक्तम ? ॥ आर्या

I have completely sunken into a great mire of sin

Hero—Oh lordly serpent, why are you agitated like this ?

Shangkhachuda—Is my sorrow improper ?

Is it appropriate for you to lead me down to a pit lower than even the nether world by saving this body of mine from Garuda by means of your own body ?

Garuda—Alas ! to safeguard the life of the serpent fallen into the range of my avarice this noble-souled one with his mind tender with compassion offered his body for my food Therefore, I have committed this great sin What more,

बोधिसत्त्व एवायं व्यापादितः। तस्य महतः पापस्याग्निप्रवेशादृते नान्यत् प्रायश्चित्तं पश्यामि। तत् क नु खलु वह्निं समासादयामि। (दिश पश्यन्) अये, अमी केऽपि गृहीताग्नयः इत एवागच्छन्ति। तद् यावदेतान् प्रतिपालयामि।

शंखचूड :— कुमार, पितरौ ते प्राप्तौ।

नायक :— (ससम्भ्रमम्) शंखचूड, समुपविश्यानेनोत्तरीयेणाच्छादितशरीरं कृत्वा धारय माम्। अन्यथा कदाचिदीदृशं सहसैव मां दृष्ट्वा पितरौ जीवितं जह्याताम्।

शंखचूड :— (पार्श्वपतितमुत्तरीय गृहीत्वा तथा करोति।) (तत प्रविशति पत्नीवधूसमेतो जीमूतकेतु।)

जीमूतकेतु :— (सास्रम्) हा पुत्र जीमूतवाहन।

1 पापम् (gen s पापस्य) sin, evil 2 प्रायश्चित्तम् atonement, expiation 3 गृहीताग्नय =गृहीता अग्नय यैं ते 4 आच्छादितशरीरम=आच्छादित शरीर यस्य तम् 5 जह्याताम् = they two may abandon, विधिलिङ √ हा 3P

I have really slaughtered a Bodhisattva In expiation of my great sin, to enter into a fire is the only way But where shall I get fire ? (Looking everywhere) Ah there are some people coming this way with fire So let me just wait for them

Shangkhachuda—O prince, your parents have arrived

Hero—(in a haste) O Shangkhachûda, sit down cover my body with this upper garment and support me Otherwise when my parents suddenly see me they may lose their lives

(Taking up the upper garment lying beside him Shangkhachûda does so Then enters Jimûtaketu accompanied by his wife and the bride )

Jimûtaketu - (shedding tears) Alas my son Jimûtavāhana

आत्मीयः पर इत्ययं खलु कुतः सत्यं कृपायाः क्रमः
किं रक्षामि बहून् किमेकमिति ते जाता न चिन्ता कथम् ।
तार्क्ष्यात् त्रातुमहिं स्वजीवितपरित्यागं त्वया कुर्वता
येनात्मा पितरौ वधूरिति हतं निश्शेषमेतत्कुलम् ॥२१॥

माता— (मलयवतीमुद्दिश्य) जाते, विरम मुहूर्तकम् । अविरत—
निपतद्बाष्पबिन्दुभिरभिभूयतेऽयमग्निः । (सर्वे परिक्रामन्ति ।)

जीमूतकेतुः— हा पुत्र जीमूतवाहन ।

गरुडः— (श्रुत्वा) हा जीमूतवाहन इति ब्रवीति । तद् व्यक्तमयमस्य पिता ।
तत् किमेतदीयेनाग्निनात्मानमुद्दीपयामि ।

1 आत्मीय a one's own. 2 पर another. 3 क्रम order, manner. 4 चिन्ता f. thought. 5 परित्याग abandonment. 6 विरम stop thou! लोट् वि + √ रम्. 7 अभिभूयते it is overpowered; कर्मणि लट् अभि + √ भू 1P. 8 व्यक्तम् clearly.

खलु अयं आत्मीय (अयं) पर इति कुतः सत्य कृपाया क्रम ? किं बहून् किं एकं रक्षामि इति ते चिन्ता न जाता ? तार्क्ष्यात् अहिं त्रातुं स्वजीवितपरित्यागं कुर्वता त्वया येन आत्मा पितरौ वधू इति निःशेषं एतत् कुलं हतम् ॥ शार्दूलविक्रीडितम्

Where is truly such an order of mercy in regard to the difference between one's kinsman and a stranger? But did the thought not occur to you whether you should save many or one? Yourself, your parents and your wife—this entire family—have been destroyed by you by deserting your own life to save one snake from Garuda.

Mother—(to Malayavatī) My child, stop weeping! This fire is being extinguished by your tear-drops dropping uninterruptedly. (All move on.)

Jīmūtaketu—Alas my son Jīmūtavāhana!

Garuda—(listening) He says, 'Alas Jīmūtavāhana!'.
That must be his father. So shall I burn myself with this fire?

न शक्नोम्यस्य पुत्रघाताल्लज्जया मुखं दर्शयितुम् । अथवा किमग्निहेतोः पर्याकुलोऽस्मि । समीपस्थ एवास्मि जलनिधेः । तद् यावदिदानीम् ।

ज्वालाभङ्गैस्त्रिलोकीग्रसनरसचलत्कालजिह्वाग्रकल्पैः
सर्पद्भिः सप्त सर्पिष्कणमिव कवलीकर्तुमीशे समुद्रान् ।
स्वैरेवोत्पातवातप्रसरपटुतरैर्धुक्षिते पक्षवातै—
रस्मिन् कल्पावसानज्वलनभयकरे वाडवाग्नौ पतामि ॥ २२ ॥

1 ज्वाला f flame 2 भङ्ग. wave, fold 3 त्रिलोकी f. three worlds 4 ग्रसनम् swallowing 5 रस. taste, desire. 6 काल=यम the god of death. 7 कल्प (समासान्ते) almost like. 8 त्रिलोकीग्रसनरसचलत्कालजिह्वाग्रकल्पैः=त्रिलोक्या ग्रसने यः रसः तेन चलन्ति कालस्य जिह्वाग्राणि तेषां कल्पैः (ईषदसमाप्तैः) 9 सर्पिस् n. clarified buttter. 10 कवलीकर्तुम् to eat, to swallow. 11 ईश (loc s. ईशे) capable of. 13 उत्पातवात hurricane 14 प्रसर free motion. 15 धुक्षित kindled, inflamed; pp. √ धुक्ष् 1A 16 उत्पातवातप्रसरपटुतरैः=उत्पातवातानां प्रसरः तस्मात् पटुतरैः 17 वाडवाग्नि submarine fire.

त्रिलोकीग्रसनरसचलत्कालजिह्वाग्रकल्पैः सर्पद्भिः ज्वालाभङ्गैः सप्त समुद्रान् सर्पिष्कणं इव कवलीकर्तुं ईशे उत्पातवातप्रसरपटुतरैः स्वैः पक्षवातैः एव धुक्षिते कल्पावसानज्वलनभयकरे अस्मिन् वाडवाग्नौ पतामि ॥ स्रग्धरा.

I cannot show my face to him out of shame due to my murder of his son Or why am I uneasy about fire ? I am just by the side of the sea. So now, I shall fall into this submarine fire which is as fearful as the fire of the universal destruction, which has been inflamed just by the winds of my wings fiercer due to their hurricane—like free motion, and which is capable of swallowing up the seven seas like a drop of clarified butter with the moving columns of its flames almost similar to the tips of Yama's tongues restless with the desire to swallow the three worlds

(Thus he intends to rise)

नायकः— भोः पक्षिराज, अलमनेनाध्यवसायेन । नायं प्रतीकारोऽस्य पाप्मनः ।

गरुडः— (जानुभ्यां स्थित्वा कृताञ्जलिः) भो महात्मन्, कस्तर्हि कथ्यताम् ।

नायकः— प्रतिपालय क्षणमेकम् । पितरौ मे प्राप्तौ । यावदेतौ प्रणमामि ।

गरुडः— एवं क्रियताम् ।

जीमूतकेतुः— (दृष्ट्वा सहर्षम्) देवि, दिष्ट्या वर्धसे । अयमसौ वत्सो जीमूतवाहनो न केवलं ध्रियते प्रत्युत पुरः कृताञ्जलिना गरुडेन शिष्येण इव पर्युपास्यमानस्तिष्ठति ।

माता— महाराज, कृतार्थास्मि । अक्षतशरीरस्यैव पुत्रकस्य मुखं दृष्टम् ।

मलयवती— अहमार्यपुत्रं प्रेक्षमाणाप्यसम्भावनीयमिति कृत्वा न प्रत्येमि ।

1 अध्यवसाय attempt, resolve 2 प्रतीकार remedy, retaliation 3 पाप्मन् m (gen s पाप्मन) sin, guilt 4 शिष्य pupil 5 असम्भावनीय impossible, inconceivable

(Thus he intends to rise)

Hero—Oh king of birds, away with this attempt! This is not the remedy for the guilt

Garuda—(kneeling down with folded hands) O noble hearted one! Tell me what it is, then?

Hero—Wait a moment My parents have come I will now salute them

Garuda—Pray do so

Jimutaketu—(looking with joy) O queen, Congratulations! Our son Jimūta vāhana is not only alive but is waited upon by Garuda as by a pupil folding hands in front of him

Mother—O king I have my object fulfilled as I see the face of my son whose body is unhurt

Malayavati—Though I see my husband, I do not believe this, thinking this to be inconceivable

जीमूतकेतु :— (उपसृत्य) वत्स, एह्येहि परिष्वजस्व माम् ।

नायक :— (उत्थातुमिच्छन् पतितोत्तरीयो मूर्च्छति ।)

शंखचूड :— कुमार, समाश्वसिहि समाश्वसिहि ।

जीमूतकेतु :— हा वत्स, कथं मां दृष्ट्वापि परित्यज्य गतोऽसि ।

माता— हा पुत्रक, कथं वाङ्मात्रेणापि त्वया न सम्भावितास्मि ।

मलयवती— हा आर्यपुत्र, कथं गुरुजनोऽपि ते न प्रेक्षितव्यः ।

(सर्वे मोहं गच्छन्ति ।)

शंखचूड :— हा शंखचूडहतक, कथं गर्भ एव न विपन्नोऽसि येनैवं क्षणे क्षणे मरणातिगं दुःखमनुभवसि ।

गरुड :— सर्वमिदं मम नृशंसस्यासमीक्ष्यकारितया विजृम्भितम् । तदेवं तावत् करोमि । (पक्षाभ्यां वीजयन्) भो महात्मन्, समाश्वसिहि समाश्वसिहि ।

1 पतितोत्तरीय =पतित उत्तरीय यस्य स 2 गर्भ (loc s. गर्भे) womb. 3 विपन्न died; pp. वि+√पद् 4 A. 4 क्षणे क्षणे at every moment 5 अतिग a (समासान्ते) surpassed, exceeded 6 नृशंस wicked, cruel. 7 असमीक्ष्यकारिता f. thoughtless deed 8 विजृम्भितम् fruit, result.

[illegible] Oh my child, come, come, embrace me!
[illegible] away with his upper garment dropped)
[illegible] take heart, take heart!

Jīmūtaketu—O my son, why are you gone, leaving me behind even after seeing me?

Mother—Oh my darling son, why have you not honoured me even with a mere word?

Malayavatī—Alas! my husband, how you are not to see even your parents?
(All faint.)

Shangkhachūda—Ah wretched Shangkhachūda, why did you not die while in your mother's womb, only to suffer misery more than death every moment like this?

Garuda—All this is the fruit of the thoughless deed of mine as I am wicked. Well, I will do like this (Fanning with his wings)
O noble-souled one, take heart, take heart!

नायक :— (समाश्वस्य) शंखचूड, समाश्वासय गुरून् ।

शंखचूड :— तात, समाश्वसिहि समाश्वसिहि । अम्ब समाश्वसिहि समाश्वसिहि । समाश्वसितो जीमूतवाहनः । किं न पश्यथ । प्रत्युत युष्मानेव समाश्वासयितुमुपविष्टस्तिष्ठति । (उभौ समाश्वसित ।)

माता— पुत्र, कथं प्रेक्षमाणानामेवास्माकं कृतान्तहतकेनापह्रियसे ।

जीमूतकेतु :— देवि, मैवममङ्गल्यवादिनी भव । ध्रियत एवायुष्मान् । तद् वधूः समाश्वास्यताम् ।

माता— (मुख वस्त्रेणावृत्य रुदती) प्रतिहतममङ्गलम् । न रोदिष्यामि । मलयवति, समाश्वसिहि । वत्से, उत्तिष्ठ उत्तिष्ठ । परमेतस्यां वेलायां त्वं भर्तृमुखं प्रेक्षस्व ।

मलयवती— (समाश्वस्य) हा आर्यपुत्र ।

माता— (मलयवत्या मुख पिधाय) वत्से, मैवं कुरु । प्रतिहतं खल्वेतत् ।

1 प्रक्षमाणाना अस्माकम् (gen abs ) while we are looking 2 कृतान्त=यम god of death 3 अपह्रियसे thou art carried off कर्मणिलट् अप+√हृ 1U 4 आयुष्मत् a (nom s m आयुष्मान्) long lived

Hero—(recovering) O Shangkhachuda encourage my parents !

Shangkhachuda—Father take heart, take heart ! Mother take heart, take heart ! Jimūtavahana has recovered Don't you see ? He is seated rather to comfort you (Both recover )

Mother—O my son, how are you carried off by the wretched god of death, while we are looking ?

Jimutaketu—O queen do not speak like this about the inauspicious thing Our long lived son is alive Therefore, do encourage the bride

Mother—(weeps, covering her face with her garment) May the evil be averted ! I shall not cry Malayavati, take heart ! O daughter, rise up It is better that you should see your husband's face at this hour

Malayavati—(recovering) Oh my husband !

Mother—(covering Malayavati's face) Oh my child, don't do so This is really averted

जीमूतकेतु :— (सास्रमात्मगतम्)

विलुप्तशेषाङ्गतया प्रयातान् निराश्रयत्वादिव कण्ठदेशम् ।
प्राणान्वहन्तं तनयं निरीक्ष्य कथं न पापः शतधा व्रजामि ॥२३॥

मलयवती— हा आर्यपुत्र, अतिदुष्करकारिणी खल्वहं या ईदृशमार्यपुत्र प्रेक्षमाणाद्यापि जीवितं न परित्यजामि ।

माता— (नायकस्याङ्गानि स्पृशन्ती गरुडमुद्दिश्य) नृशंस, कथमिदानीं त्वयैतदापूर्यमाणनवरूपयौवनशोभं तदेवैतावदवस्थं पुत्रकस्य मे शरीरं कृतम् ।

नायक :— अम्ब, मा मैवम् । किमनेन कृतम् । ननु पूर्वमप्येतदीदृशमेव परमार्थतः । पश्य ।

1 विलुप्तशेषाङ्गतया=विलुप्तानि शेषाणि अङ्गानि तया अवस्थया due to the state of the limbs other than the head which are battered 2 निराश्रयत्वम् (abl s —त्वात्) helplessness 3 पाप a sinful 4 आपूर्यमाणनवरूपयौवनशोभम्=आपूर्यमाणानि नवरूप यौवन शोभा यस्मिन् तत् 5 परमार्थतस् and truly

विलुप्तशेषाङ्गतया निराश्रयत्वात् इव कण्ठदेश प्रयातान् प्राणान् वहन्त तनय निरीक्ष्य पाप (अहम्) कथ शतधा न व्रजामि ॥ उपजाति

Jimutaketu—(shedding tears, to himself) Why do I, a sinful man, not burst into a hundred pieces, while seeing my son bearing his life that has gone up to the throat as if without any support as all the other remaining limbs are battered

Malayavati—Alas ! my lord, I am really an evil doer who do not give up my life even now on seeing my lord in this plight

Mother—(touching the hero's limbs to Garuda) O murderous bird ! Why did you now reduce my son's body filled with a fresh form, youth and splendour to this state ?

Hero—O mother, don't, don't say so ! What did he do ? In reality this body was exactly like this even before See !

मेदोऽस्थिमांसमज्जासृक्सङ्घातेऽस्मिंस्त्वचाऽऽवृते ।
शरीरनाम्नि का शोभा सदा बीभत्सदर्शने ॥ २४ ॥

गरुडः— भो महात्मन्, नरकानलज्वालावलीढमिवात्मानं मन्यमानो दुःखं तिष्ठामि। तदुपदिश्यतां येन मुच्येय अहमस्मादेनसः ।

नायकः— अनुजानातु मां तातः यावदस्य पापस्य प्रतिपक्षमुपदिशामि।

जीमूतकेतुः— वत्स, एवं क्रियताम् ।

नायकः— वैनतेय, श्रूयताम् ।

गरुडः— (जानुभ्या स्थित्वा कृताञ्जलि ) आज्ञापय ।

1 मेदस fat 2 मज्जा f marrow 3 सङ्घात union heap, collection 4 मेदोऽस्थिमासमज्जासृक्सङ्घाते=मद' अस्थीनि मज्जा असृक च तेषा सङ्घाते 5 त्वच f (ins s त्वचा) skin 6 सदा ind always 7 बीभत्स a hideous 8 बीभत्सदशन=बीभत्स दशन यस्य तस्मिन 9 नरक hell 10 अनल fire 11 अवलीढ licked surrounded PP अव + √ लिह 2 U 12 नरकानलज्वालावलीढम=नरकस्य अनलज्वालाभि अवलीढम 13 मुच्येय I might be freed, कर्मणिविधिलिङ √ मुच 6 U 14 प्रतिपक्ष opposite side 15 एनस n (abl s एनस ) sin crime

मदोऽस्थिमासमज्जासृक्सङ्घाते त्वचा आवृते सदा बीभत्सदर्शने अस्मिन शरीरनाम्नि का शोभा ॥ अनुष्टुप

Is there any charm in this body called so —the collection of fat bones flesh marrow and blood covered with skin, and always hideous to look at ?

Garuda—O saint I am pained, thinking myself licked up by the flames of the fire of hell Therefore do advise me in order that I may be freed from this crime

Hero—Father permit me to advise him about the opposite of his sin

Jimutaketu—My child, do so

Hero—Oh Garuda listen to me.

Garuda—(kneeling down with folded hands) Command me

नायकः— नित्यं प्राणाभिघातात्प्रतिविरम कुरु प्राक्कृते चानुतापं
यत्नात्पुण्यप्रवाहं समुपचिनु दिशन् सर्वसत्त्वेष्वभीतिम् ।
मग्नं येनात्र नैनः फलति परिमितप्राणिहिंसात्तमेतद्
दुर्गाधापारवारेर्लवणपलमिव क्षिप्तमन्तर्ह्रदस्य ॥ २५ ॥

गरुडः— यदाज्ञापयसि ।

अज्ञाननिद्राशयितो भवता प्रतिबोधितः ।
सर्वप्राणिवधादेष विरतोऽद्यप्रभृत्यहम् ॥ २६ ॥

1 अभिघात killing 2 प्राक् ind before 3 अनुताप repentance 4 यत्न (abl s यत्नात्) effort, deligence 5 समुपचिनु gather, or pile thou ! लोट् समुप + √ चि 5U 6 अभीति f non fear 7 मग्न sunk, immersed, PP √ मस्ज् 6P 8 परिमित moderate, limited 9 हिंसा f injury, killing 10 आत्त taken undertaken, PP आ + √ दा 3U 11 परिमितप्राणिहिंसात्तम्=परिमितानां प्राणिनां हिंसया आत्तम् 12 दुर्गाध unfathomable 13 अपार boundless, limitless 14 वारि n water 15 दुर्गाधापारवारे = दुर्गाध अपार वारि यस्मिन तस्य 16 ह्रद lake 17 लवणम् salt 18 पलम् small quantity, kind of measurement 19 अज्ञानम् ignorance 20 अज्ञाननिद्राशयित = अज्ञनस्य निद्रया शयित 21 प्रतिबोधित awakened, caus PP प्रति + √ बुध् 1U 4A

नित्य प्राणाभिघातात् प्रतिविरम प्राक्कृते च अनुताप कुरु सर्वसत्त्वेषु अभीतिं दिशन् यत्नात् पुण्यप्रवाह समुपचिनु येन दुर्गाधापारवारे ह्रदस्य अन्त क्षिप्त लवणपल इव परिमितप्राणिहिंसात्त एतत् एन मग्न अत्र न फलति ॥ स्रग्धरा ॥ अज्ञाननिद्राशयित (अहम्) भवता प्रतिबोधित एष अह अद्यप्रभृति सर्वप्राणिवधात् विरत ॥

Hero—For ever refrain from killing the living feel repentance for your past deed and showing no fear to all living beings accumulate diligently a heap of virtues, on account of which, like a small-quantity of salt thrown into a lake whose water is unfathomable and unlimited, this sin incurred by your killing the moderate living beings will sink and will bear no fruit

Garuda—As you command me Awakened by you from the slumber of ignorance, I shall from today abstain from killing all living beings

सम्प्रति हि ।

क्वचिद् द्वीपाकारः पुलिनविपुलैर्भोगनिवहैः
कृतावर्तभ्रान्तिर्वलयितशरीरः क्वचिदपि ।
व्रजन् कूलात् कूलं क्वचिदपि च सेतुप्रतिसमः
समाजो नागानां विहरतु महोदन्वति सुखम् ॥ २७ ॥

अपिच ।

स्रस्तानापादलम्बान् तिमिरचयनिभान् केशहस्तान् वहन्त्यः
सिन्दूरेणेव दिग्धैः प्रथमरविकरस्पर्शताम्रैः कपोलैः ।
आयासेनालसाङ्ग्योऽप्यवगणितरुजः कानने चन्दनाना—
मस्मिन् गायन्तु रागादुरगयुवतयः कीर्तिमेतां तवैव ॥२८॥

1 क्वचित् ind in some places 2 द्वीप island 3 द्वीपाकर =द्वीपस्य आकार यस्य स 4 पुलिन m n sandy bank, shore विपुल large 6 पुलिनविपुलै = पुलिनवत् विपुलै 7 भोग body 8 आवर्त eddy 9 कृतावर्तभ्रान्ति =कृता आवर्तस्य भ्रान्ति येन स 10 कूलम् shore, bank 11 सेतु m bridge mountain path 12 समाज assembly, multitude 13 उदन्वत् m (loc s उदन्वति) sea 14 सुखम् ad happily 15 स्रस्त (acc. p m स्रस्तान्) loosened, PP √स्रस् 1A 16 लम्ब a (acc p m लम्बान्) hanging down 17 तिमिरम् darkness 18 हस्त mass 19 आयास trouble, fatigue 20 अलस (आलस) idle, languid, slow 20 आल्साङ्ग्य = आलसानि अङ्गानि यासा ता 21 अवगणितरुज = अवगणिता रुग् याभि ता 22 युवति f (P nom युवतय) damsel, young woman

क्वचित् पुलिनविपुलै भोगनिवहै द्वीपाकार क्वचित् अपि कृतावर्तभ्रान्ति वलयितशरीर क्वचित् अपि सेतुप्रतिसम च कूलात् कूल व्रजन् नागाना समाज सुख महोदन्वति विहरतु ॥ शिखरिणी ॥

स्रस्तान् आपादलम्बान् तिमिरचयनिभान् केशहस्तान् वहन्त्य सिन्दूरेण दिग्धै इव प्रथमरविकरस्पर्शताम्रै कपोलै आयासेन आल्साङ्ग्य अपि अवगणितरुज उरगयुवतय चन्दनाना अस्मिन् कानने तव एता कीर्ति एव रागात् गायन्तु ॥ स्रग्धरा ॥

Now, In some places displaying the likeness of an island with the heaps of their bodies large as a sandy shore, also in some places, creating the delusion of eddies with their forms coiled up and in other places, moving from shore to shore like a bridge, may the Naga troops happily sport in the great ocean !

And also, Let the Nagas' damsels passionately sing your glory in this forest of Sandals, having the mass of loosened hair of dark hue hanging as far down as their feet, with their cheeks reddened by the touch of the first rays of the sun as if smeared with vermilion, and disregarding their pain, though their limbs are wearied from fatigue !

नायक:—साधु महासत्त्व, साधु अनुमोदामहे। सर्वथा दृढसमाधानो भव। (शङ्खचूड निर्दिश्य) शङ्खचूड, त्वयाऽपि स्वगृहमिदानीं गम्यताम्।

(शङ्खचूड नि श्वस्याधोमुखस्तिष्ठति)

नायक :—(नि श्वस्य मातर पश्यन्)

उत्प्रेक्षमाणा त्वां तार्क्ष्यचञ्चुकोटिविपाटितम्।
त्वद्दुःखदुःखिता दुःखमास्ते सा जननी तव ॥२६॥

माता — (सास्रम्) धन्या खलु सा जननी या गरुडमुखपतितस्याक्षतशरीरस्यैव पुत्रकस्य मुखं प्रेक्षिष्यते।

शङ्खचूड :—अम्ब, सत्यमेवैतत् यदि कुमारः स्वस्थो भविष्यति।

1 अनुमोदामहे we approve with pleasure, rejoice, अनु+√मुद् 1A. 2 समाधानम् steadiness, contemplation 3 दृढसमाधान = दृढ समाधान यस्य स 4 उत्प्रेक्षमाण ~णा f. guessing, conjecturing, pres part उत्प्र+√ईक्ष् 1A 5 कोटि f end, edge. 6 विपाटित torn open, caus. pp वि+√पट् 1P. 7 तार्क्ष्यचञ्चुकोटिविपाटितम = तार्क्ष्यस्य चञ्च्वा कोटया विपाटितम् 8 धन्य (f s. धन्या) lucky, blessed. 9 गरुडमुखपतितस्य = गरुडस्य मुखे पतितस्य 10 अक्षतशरीरस्य = अक्षत शरीर यस्य तस्य 11 स्वस्थ sound in health

तार्क्ष्यचञ्चुकोटिविपाटित त्वा उत्प्रेक्षमाणा त्वद्दुःखदुःखिता तव सा जननी दुःख आस्ते ॥ अनुष्टुप्

Hero—Well spoken! We approve it with pleasure. Be by all means firm and single-minded! (Looking at Shangkhachūda) O Shangkhachūda, Now you too go home. (Shangkhachuda stands, his face downcast)

Hero—(with a sigh looking at his mother) Picturing thee as torn to pieces by the tips of Garuda's beak, thy mother is in agony, distressed by thy misfortune

Mother—(shedding tears) Fortunate, indeed, is the mother who will see her very son unhurt in his body after having fallen into the mouth of Garuda

Shangkhachūda—O mother, it is true when the prince is doing well.

नायक :— (वदना नाटयन्) हहह, परार्थसम्पादनामृतरसास्वादाक्षिप्तत्वा-देतावतीं वेलां मया न लक्षिताः सम्प्रति तु मां बाधितुमारब्धा मर्मच्छेदिन्यो वेदनाः । (मरणावस्था नाटयति ।)

जीमूतकेतु :— (ससम्भ्रमम्) हा वत्स, किमेवं करोषि ।

माता — हा, किं नु खल्वेवं वर्तते । (सोरस्ताडम्) परित्रायध्वं परित्रायध्वम् । एष खलु मे पुत्रको विपद्यते ।

मलयवती — हा आर्यपुत्र, अस्मान् परित्यक्तुकाम इव लक्ष्यसे ।

नायक :— (अञ्जलिं कर्तुमिच्छन्) शङ्खचूड, समानय मे हस्तौ ।

शङ्खचूड : —(कुर्वन्) कष्टम् । अनाथीकृतं जगत् ।

नायक : — (अर्धोन्मीलितचक्षु पितर पश्यन्) तात, अम्ब, अयं मे पश्चिमः प्रणामः ।

1 वदना f pain, agony 2 सम्पादनम् fulfilment 3 आस्वाद tasting 4 आक्षिप्तत्वम् (abl s —त्वात) overpowering, distraction 5 मर्मच्छेदिन् a (nom p f मर्मच्छेदिन्य) piercing the vitals, most painful 6 मर्मन् n vital part 7 समानय join thou! लोट् सम + √नी 1U 8 अनाथीकृत forlorn 9 प्रणाम salutation

Hero—(gesticulating a pain) Oh Oh Oh, the piercing pains that I have not realized all this time due to the distraction by the nectarean taste in fulfilling the good of others now begin to torture me (Displays the condition of death)

Jimutaketu—(in a confusion) Alas my son! why do you do like this?

Mother—Alas! why is he in this condition? (Beating her breast) Help! help! my son is dying

Malayavati—Ah my husband, why do you appear to be desirous of deserting us?

Hero (wishing to fold his palms) Shangkhachuda, join my hands together!

Shangkhachuda—(doing so) Alas the world is forlorn!

Hero—(looking at his parents with his eyes half closed) Father, mother, this is my final salutation

गात्राण्यमूनि न वहन्ति विचेतनानि
श्रोत्रं स्फुटाक्षरपदा न गिरः शृणोति ।
कष्टं निमीलितमिदं सहसैव चक्षु—
र्हा तात यान्ति विवशस्य ममासवोऽमी ॥ ३० ॥

अथवा किमनेन प्रलपितेन । (सरक्षता पन्नगमेव पुण्यम् इत्यादि पठित्वा पतति ।)

माता — हा पुत्र, हा वत्स, हा गुरुजनवत्सल, क्वासि । देहि मे प्रतिवचनम् ।

1 गात्रम् (p गात्राणि ) limb 2 विचेतन a (nom p n विचेतनानि) senseless 3 श्रोत्रम् hearing, ear 4 स्फुट clear 5 अक्षरम् syallable 6 पदम् word wording 7 स्फुटाक्षरपदा = स्फुटानि अक्षराणि येषु पदानि यासु ता 8 गिर f (acc p गिर) speech 9 शृणोति it hears, लट्√श्रु 5P 10 यान्ति they go, depart, √ या 2P 11 विवश unconscious, helpless 12 असु m (nom p असव) life life winds 13 वत्सल loving, affectionate

विचेतनानि अमूनि गात्राणि न वहन्ति श्रोत्र स्फुटाक्षरपदा गिर न शृणोति कष्ट इद चक्षु सहसा एव निमीलित हा तात विवशस्य मम अमी असव यान्ति ॥ वस ततिलका

These paralyzed limbs do not stir, these ears do not hear the speech whose words and syllables are distinct, and alas ! these eyes are all of a sudden closed —Oh father, my life is departing, unconscious as I am

However, no use of this talk (Again reciting, "By virtue of the merit obtained by saving a serpent "

[(this verse occurs in Act IV No 26) he falls ]

Mother—Alas my son ! Alas my darling child ! Alas you darling of your parents where have you gone ? Give me your reply !

जीमूतकेतुः — हा वत्स जीमूतवाहन, हा निखिलजनवल्लभ, हा सर्वगुणनिधे, कासि। देहि मे प्रतिवचनम्। (हस्तावुत्क्षिप्य) कष्टं भोः कष्टम्।

निराधारं धैर्यं कमिव शरणं यातु विनयः
क्षमः क्षान्तिं वोढुं क इह विरता दानपरता।
हतं सत्यं सत्यं व्रजतु कृपणा क्वाद्य करुणा
जगज्जातं शून्यं त्वयि तनय लोकान्तरगते ॥ ३१ ॥

मलयवती — हा आर्यपुत्र, कथं परित्यज्य गतोऽसि।

1 निखिलजनवल्लभ = निखिलजनानां वल्लभ. 2 निधि m ocean, treasure. 3 उत्क्षिप्य having thrown up; gerund उद् + √ क्षिप् 6U. 4 निराधार a without a support, supportless 5 शरणम् refuge, shelter. 6 क्षम able. 7 क्षान्ति. f. patience, forbearance. 8 वोढुम् to bear; inf √ वह् 1P. 9 दानपरता f *indulgence in charity.* 10 सत्यम् n. truth; ad. truly. 11 कृपण (f, कृपणा) pitiable. 12 करुणा f. mercy, tenderness 13 जातम्=भूतम्. 14 लोकान्तरम्=अन्यलोकम् another world. 15 त्वयि लोकान्तरगते (loc. abs ) when you have gone to another world.

तनय! त्वयि लोकान्तरगते धैर्यं निराधारं (सवृत्त), विनय क इव शरण यातु, इह क्षान्ति वोढु कः क्षम, दानपरता विरता, सत्यं सत्य हत, क्व अद्य कृपणा करुणा व्रजतु, जगत् शून्य जातम् ॥

Jīmūtaketu— O my son Jīmūtavāhana, O you, beloved of all people! O you, the ocean of all virtues! Where are you? Give me a reply. (Throwing up his hands) Alas! Alas!

O son, when thou art gone to another world, fortitude is without a support. Whom should modesty take as its refuge? Who can on earth bear forbearance? Indulgence in charity has stopped, and truth is truly undone Where should pitiable compassion go now? The world has become void.

Malayavati— Ah my lord, why have you gone, leaving us behind?

अतिनिर्घृणे मलयवति, किं त्वया प्रेक्षितव्यम्। या एतावद्वेलां जीवितासि।

शङ्खचूड:— हा कुमार, क्वेमं प्राणेभ्योऽपि वल्लभं जनं परित्यज्य गम्यते। तदवश्यमन्वेति त्वां शङ्खचूड:।

गरुड:— (सोद्वेगम्) कष्टम्। उपरतोऽयं महात्मा। तत् किमिदानीं करोमि।

माता— (सास्रमूर्ध्वमवलोक्य) भगवन्तो लोकपाला:, कथमप्यमृतेन सिक्त्वा पुत्रकं मे जीवयत।

गरुड:— (सहर्षमात्मगतम्) अये, अमृतसंकीर्तनात् साधु स्मृतम्। मन्ये प्रमृष्टमयश:। तद् यावत् त्रिदशपतिमभ्यर्थ्य तद्विसृष्टेनामृतवर्षेण न केवलं जीमूतवाहनमेतानपि पूर्वभक्षितानपिस्थिशेषानाशीविषान् प्रत्युज्जीवयामि। यदि न ददात्यसौ तदाहम्।

1 सिक्त्वा having sprinkled; gerund √ सिच् 6U. 2 सकीर्तनम् mentioning. 3 प्रमृष्ट forgiven; PP. प्र + √ मृष् 10U. 4 अयशस् n infamy, disgrace 5 त्रिदशपति Indra. 6 आशीविष (acc p आशीविषान्) snake 7 असौ=त्रिदशपति 8 उज्जीवयामि I resurrect, णिजन्तात् लट् उद् + √ जीव् 1P.

O exceedingly cruel Malayavatī, what are you to expect? You are still now alive!

Shangkhachūda— O prince, where are you going, abandoning your people dearer than your life? So surely Shangkhachūda will follow you.

Garuda— (excited) Alas! this saint is dead. So what shall I do now?

Mother— (with tears looking up at the heaven) O guardian-gods of the world, somehow resurrect my son, sprinkling nectar!

Garuda— (with joy to himself) Oh well reminded by the mention of nectar! I think my infamy may be forgiven. Therefore, I shall now request Lord Indra to discharge the rain of nectar by which I shall resurrect not only Jimūtavāhana but the serpents eaten before and left as skeletons. If he does not give it, then—

पक्षोत्क्षिप्ताम्बुनाथः पटुतरपतनप्रेर्यमाणैः समीरैः
नेत्रार्चिःप्लोषमूर्च्छाविधुरविनिपतत्सानलद्वादशार्कः ।
चञ्च्वा सञ्चूर्ण्य शक्राशनिधनदगदाप्रेतलोकेशदण्डा—
नाजौ निर्जित्य देवान्क्षणममृतमयीं वृष्टिमभ्युत्सृजामि ॥३२॥

तदयं गतोऽस्मि । (इति साटोपं परिक्रम्य निष्क्रान्तः ।)

जीमूतकेतुः— वत्स शङ्खचूड, किमद्यापि स्थीयते । समाहृत्य दारूणि पुत्रस्य मे विरचय चिताम् । येन वयमप्यनेन सहैव गच्छामः ।

1 अम्बुनाथः sea. 2 पक्षोत्क्षिप्ताम्बुनाथः=पक्षाभ्यां उत्क्षिप्त अम्बुनाथः येन सः 3 पतनम् fall, flight. 4 प्रेर्यमाण being stirred or prompted; pres. pass. part. प्र+√ईर् 2A. 10A 5 पटुतरपतनप्रेर्यमाणै=पटुतरेण पतनेन प्रेर्यमाणै'. 6 समीर wind. 7 अर्चिस् n. ray, flame. 8 प्लोषः scorching, burning. 9 मूर्च्छा f swoon. 10 विधुर a. afflicted, distressed. 11 अर्क sun 12 नेत्रार्चिःप्लोषमूर्च्छाविधुरविनिपतत्सानलद्वादशार्कः=नेत्रयोः अर्चिभिः यः प्लोषः तस्य मूर्च्छया विधुरा विनिपतन्त. सानला. द्वादश अर्का येन स 13 सञ्चूर्ण्य having reduced to powder or crushed, gerund सम्+√चूर्ण् U 10. 14 शक्र Indra 15 अशनि m. f. thunderbolt 16 धनद Kubera 17 गदा f. mace, club. 18 प्रेतलोकेशः God of death, Yama. 19 आजिः m. f. (loc. s. आजौ) battle 20 मय suffix (acc. s. f.—मयीम्) consisting of. 21 अभ्युत्सृजामि I discharge, pour down; अभ्युद्+√सृज् 6P. 22 चिता f funeral pyre.

पटुतरपतनप्रेर्यमाणैः समीरैः पक्षोत्क्षिप्ताम्बुनाथ नेत्रार्चिःप्लोषमूर्च्छाविधुरविनिपतत्सानलद्वादशार्क. चञ्च्वा शक्राशनिधनदगदाप्रेतलोकेशदण्डान् सञ्चूर्ण्य आजौ देवान् निर्जित्य क्षणं अमृतमयीं वृष्टिं अभ्युत्सृजामि ॥ स्रग्धरा.

Throwing up the sea with my wings through the winds enhanced by my fearful flight, causing the inflamed twelve suns burnt up by the flames of my eyes to fall down afflicted in a swoon, crushing with my beak Indra's thunderbolt, Kubera's mace and Yama's staff, and defeating the gods in battle, I shall in a moment pour down a shower consisting of nectar. So here I go. (Thus proudly walks out.)

Jimūtaketu—My son Shangkhachūda, why do we remain idle even now? Collect fire wood and prepare my son's funeral pyre, so that we might depart with him together.

माता— पुत्र शङ्खचूड, लघु सज्जय । दुःखमस्माभिर्विना भ्राता ते तिष्ठति ।

शङ्खचूड :— (सास्रम्) यदाज्ञापयन्ति गुरवः । नन्वग्रत एवाहं युष्माकम् ।

(उत्थाय चितारचना कृत्वा) तात अम्ब, सज्जीकृतेयं चिता ।

जीमूतकेतु :— कष्टं भोः कष्टम् ।

उष्णीषः स्फुट एष मूर्धनि विभात्यूर्णेयमन्तर्भ्रुवो—
श्चक्षुस्तामरसानुकारि हरिणा वक्षःस्थलं स्पर्धते ।
चक्राङ्कौ चरणौ तथापि हि कथं हा वत्स मद्दुष्कृते—
स्त्वं विद्याधरचक्रवर्तिपदवीमप्राप्य विश्राम्यसि ॥ ३३ ॥

देवि, किमपरं रुद्यते । तदुत्तिष्ठ चितामारोहामः । (सर्वे उत्तिष्ठन्ति ।)

मलयवती— (बद्धाञ्जलिरूर्ध्वं पश्यन्ती) भगवति गौरि, त्वयाज्ञप्तं यथा विद्याधरचक्रवर्ती भर्ता ते भविष्यतीति ।

एषः स्फुटः उष्णीष मूर्धनि विभाति इय ऊर्णा भ्रुवो. अन्त चक्षुः तामरसानुकारि वक्षस्थल हरिणा स्पर्धते चक्राङ्कौ चरणौ तथापि कथ हि मद्दुष्कृतैः त्व विद्याधरचक्रवर्तिपदवी अप्राप्य विश्राम्यसि हा वत्स ॥ शार्दूलविक्रीडितम् ।

Mother— O son Shangkhachūḍa, arrange it soon, as your brother (i e. Jimūtavāhana) is unhpapy without us.

Shangkhachūḍa— (tearfully) As my elders command. Certainly I will be the foremost among you. (Rising and arranging the pyre) Father, mother ! this funeral pyre is ready.

Jimūtaketu— Alas ! alas !

This bright mark of a crown shines on his head, this circle of hair appears betwixt his eye-brows, his eyes resemble a red lotus, his chest can defy a lion and his feet bear Chakra signs ; yet oh my son, why do you rest without attaining to the rank of the Vidyādhara Emperor because of my sins ? (c. f Verse 18, ACT ONE.)

O queen, why do you weep again ? Rise, let us ascend the funeral pyre. (All stand up)

Malayavatī—(with folded hands looking at the heaven) O goddess Gaurī, you told me that husband would become the Emperor of Vidyādharas.

**माता**— भगवत्याः प्रसादेन ।

(उभौ गौर्याः पादयोः पतित्वा नायकमालिङ्गतः ।)

**मलयवती**— (सहर्षम्) दिष्ट्या प्रत्युज्जीवित आर्यपुत्रः । (गौर्याः पादयोः पतति)

**नायकः**— (गौरीं दृष्ट्वा बद्धाञ्जलिः) भगवति ।

अभिलषिताधिकवरदे प्रणिपतितजनार्तिहारिणि शरण्ये ।
चरणौ नमाम्यहं ते विद्याधरदेवते गौरि ॥ ३५ ॥

(इति गौर्याः पादयोः पतति ।) (सर्व ऊर्ध्वं पश्यन्ति ।)

**जीमूतकेतुः**— अये, कथमनभ्रा वृष्टिः । भगवति, किमेतत् ।

**गौरी**— राजन् जीमूतकेतो, जीमूतवाहनं प्रत्युज्जीवयितुमेतां—
अस्थिशेषानुरगपतीन् समुपजातपश्चात्तापेन पक्षिपतिना

1 वर boon gift 2 द a (समासान्ते) giving 3 अभिलषिताधिकवरदे=अभिलषितात् अधिकं वरं ददाति सा तत्सम्बोधनम् 4 प्रणिपतित saluted, PP प्रणि + √ पत् 1P 5 आर्ति f distress 6 हारिन् a (voc s f हारिणि) taking away 7 प्रणिपतितजनार्तिहारिणि= प्रणिपतितानां जनानां आर्तिम् हरति सा तत्सम्बोधनम् 8 शरण्य a (voc s f शरण्ये) protecting 9 अनभ्र a (f अनभ्रा) unexpected, cloudless 10 पश्चात्ताप repentance 11 समुपजातपश्चात्तापेन=समुपजातः पश्चात्तापः यस्य तेन

अभिलषिताधिकवरदे प्रणिपतितजनार्तिहारिणि । शरण्ये विद्याधरदेवते गौरि, ते चरणौ अहं नमामि ॥
आर्या

Mother — By favour of the goddess (Both falling prostrate at the feet of Gauri embrace the hero)

Malayavati — (with joy) Fortunately my husband is resurrected (She falls before Gauri's feet)

Hero — (looking at Gauri with his hands folded) O goddess! I salute your feet, O protectress Gauri O guardian goddess of Vidyadharas who bestow more boon than desired removing the distress of those who salute you!
(Thus falls prostrate at Gauri's feet) (All look at the sky)

Jimutaketu — Oh a quite unexpected shower from the cloudless sky! O goddess what is this?

Gauri — O King Jimutaketu in order to resurrect Jimūtavahana and these lordly serpents left as skeletons, the King of birds who has felt remorseful

तत् कथं मम मन्दभाग्यायाः कृते त्वमप्यलीकवादिनी संवृत्ता ।

(ततः प्रविशति ससम्भ्रमा गौरी ।)

गौरी— महाराज जीमूतकेतो, न खलु खलु साहसमनुष्ठातव्यम् ।

जीमूतकेतुः— अये कथममोघदर्शना गौरी ।

गौरी— (मलयवतीमुद्दिश्य) वत्से, कथमहमलीकवादिनी भवेयम् ।

(नायकमुपसृत्य कमण्डलुजलेनाभ्युक्षन्ती)

निजेन जीवितेनापि जगतामुपकारिणः ।
परितुष्टास्मि ते वत्स जीव जीमूतवाहन ॥ ३४ ॥

(नायक उत्तिष्ठति ।)

जीमूतकेतुः— (सहर्षम्) देवि, दिष्ट्या वर्धसे । प्रत्युज्जीवितो वत्सः ।

1 अलीकवादिन् a (nom s f –वादिनी) telling a lie 2 साहसम् rashness 3 अमोघ a infallible, unfailing 4 अमोघदर्शना=अमोघं दर्शनं यस्याः सा 5 भवेयम् I could or should be, विधिलिङ् √भू 1P 6 कमण्डलु m n ascetic's water-pot 7 अभ्युक्षत् (nom s f अभ्युक्षन्ती) sprinkling, pres part अभि + √ उक्ष् 6U 8 परितुष्ट (nom s f परितुष्टा) pleased, satisfied, PP परि + √ तुष् 4P

निजेन जीवितेन अपि जगतां उपकारिणः ते परितुष्टा अस्मि जीव वत्स जीमूतवाहन ! ॥ अनुष्टुप्

Then why have you even become a false speaker for me an unfortunate girl ?

(Then appears Gauri in a hurry )

Gauri — O King Jimutaketu not indeed, not indeed rashness must be done

*Jimutaketu—Oh how it is Gauri whose sight is infallible !*

Gauri — (to Malayavati) Child, how could I tell a falsehood ? (Approaching the hero and sprinkling him with the water from the pot)
Satisfied I am with thee who helpest the worlds even with thy own life O son Jimutavahana, revive thou !

(The hero comes to life )

Jimutaketu— (with joy ) O queen, congratulations ! Our son is revived.

हंसांसाहतहेमपङ्कजरजःसम्पर्कपङ्कोज्झितै —
रुत्पन्नैर्मम मानसादुपनतैस्तोयैर्महापावनैः ।
स्वेच्छानिर्मितरत्नकुम्भनिहितैरेषाऽभिषिच्य स्वय
त्वां विद्याधरचक्रवर्तिनमहं प्रीत्या करोमि क्षणात् ॥ ३७॥

अपि च ।

अग्रेसरीभवतु काञ्चनचक्रमेतदेष द्विपश्च धवलो दशनैश्चतुर्भिः ।
श्यामो हरिर्मलयवत्यपि चेत्यमूनि रत्नानि ते समवलोकय चक्रवर्तिन् ॥३८॥

1 हस swan 2 अस shoulder 3 हेमपङ्कजम् golden lotus 4 रजस् n pollen. 5 सम्पर्क union, touch 6 हसासाहतहेमपङ्कजरज सम्पर्कपङ्कोज्झितै = हसाना असै आहताना हेमपङ्कजाना यत् रजस् तस्य सम्पर्क पङ्केन उज्झितै 7 उत्पन (ins p n उत्पन्नै) produced, PP उद + √पद् 4A 8 मानसम (abl s मानसात्) mind 9 पावन a pure, holy 10 निर्मित created, PP. निस+√मा 3A 11 कुम्भ pitcher 12 निहित (ins p n निहितै) placed, PP नि+√धा 3U 13 स्वेच्छानिर्मितरत्नकुम्भनिहितै =स्वेच्छया निर्मितेषु रत्नकुम्भेषु निहितै 14 अभिषिच्य having consecrated, gerund अभि+√सिच् 6U 15 अग्रेसरीभवतु let it be the foremost 16 श्याम हरि black horse 17 काञ्चनचक्रम् golden chakra

हसासाहतहेमपङ्कजरज सम्पर्कपङ्कोज्झितै मम मानसात् उत्पन्नै उपनतै स्वेच्छानिर्मितरत्नकुम्भनिहितै महापावनै तोयै स्वय अभिषिच्य एषा अह क्षणात् प्रीत्या त्वा विद्याधरचक्रवर्तिन करोमि ॥ शार्दूलविक्रीडितम् ॥

एतत् काञ्चनचक्र अग्रेसरीभवतु चतुर्भि दशनै धवल एष द्विप श्याम हरि मलयवती अपि च इति अमूनि ते रत्नानि समवलोकय चक्रवर्तिन् ॥ वसन्ततिलका

> Personally consecrating thee with the most holy waters, freed from mud by the touch of the pollen of golden lotuses agitated by the shoulders of swans, begotten from my mind brought and placed in the bejewelled pitchers created by will, I in a moment make thee Emperor of the Vidyādharas with pleasure

And morever,

> This golden Chakra, let this be the foremost, this white elephant with four tusks, this black horse and this Malayavati, behold these are thy jewels, O! Emperor!

देवलोकादियममृतवृष्टिः पातिता । (अङ्गुल्या निर्दिश्य) किं न पश्यति भवान् ।

सम्प्राप्ताखण्डदेहाः स्फुटफणमणिभिर्भासुरैरुत्तमाङ्गैः—
जिह्वाकोटिद्वयेन क्षितिममृतरसास्वादलोभाल्लिहन्तः ।
सम्प्रत्यावद्धवेगा मलयगिरिसरिद्वारिपूरा इवामी
वक्रैः प्रस्थानमार्गैर्विषधरपतयस्तोयराशिं विशन्ति ॥ ३६ ॥

(नायकमुद्दिश्य) वत्स जीमूतवाहन, न त्वं जीवितदानमात्रस्यैव योग्यः, तदयमपरस्ते प्रसादः ।

1 सम्प्राप्त completely regained, pp सम्+प्र+√आप् 5P 2 अखण्ड a entire, whole 3 सम्प्राप्ताखण्डदेहा = सम्प्राप्ता अखण्डा देहा यैः ते 4 स्फुटफणमणिभि = स्फुटा फणानां मणयः येषु तैः 5 भासुर splendid, bright 6 उत्तमाङ्गम् upper part of the body, head 7 क्षिति f earth, ground 8 अमृतरसास्वादलोभात् = अमृतरसस्य आस्वाद लोभात् 9 लिहत् (nom p m लिहन्त) licking, pres part √लिह् 2U 10 आवद्ध = कृत 11 आवद्धवेगा = आवद्ध वेग यैः त 12 सरित f river 13 वारिपूर flood stream 14 मलयगिरिसरिद्वारिपूरा = मलयगिरेः सरितां वारिपूरा 15 तोयराशि m sea ocean

सम्प्राप्ताखण्डदेहा स्फुटफणमणिभि भासुरैः उत्तमाङ्गैः अमृतरसास्वादलोभात जिह्वाकोटिद्वयेन क्षिति लिहन्त सम्प्रति आवद्धवेगा मलयगिरिसरिद्वारिपूरा इव अमी विषधरपतय वक्रैः प्रस्थानमार्गैः तोयराशि विशन्ति ॥ स्रग्धरा

has caused this shower of nectar to fall down from the world of gods Do you not see ? (Pointing her finger)

Those lordly serpents, having recovered their full bodies with their heads glittering with the bright crest gems and licking the earth with the double tongue tips out of their avarice for the flavour of the nectar-juice, are now entering the ocean in serpentine movements like the flood streams of the fast flowing rivers from the Malaya mountain

(To the hero) My child Jimutavahana, you deserve more than a gift of life Therefore, here is another favour to you

तथापीदमस्तु । (भरतवाक्यम्)

वृष्टिं हृष्टशिखण्डिताण्डवभृतो मुञ्चन्तु काले घनाः
कुर्वन्तः प्रतिरूढसन्ततहरिच्छस्योत्तरीयां क्षितिम् ।
चिन्वानाः सुकृतानि वीतविपदो निर्मत्सरैर्मानसै—
र्मोदन्तां घनबद्धबान्धवसुहृद्गोष्ठीप्रमोदाः प्रजाः ॥ ४० ॥

अपि च ।

शिवमस्तु सर्वजगतां परहितनिरता भवन्तु भूतगणाः ।
दोषाः प्रयान्तु नाशं सर्वत्र सुखी भवतु लोकः ॥ ४१ ॥

(इति निष्क्रान्ताः सर्वे)

## ❀ इति पञ्चमोऽङ्कः ❀

1 भरतवाक्यम् last verse in a drama, epilogue. 2 हृष्ट delighted, pp √हृष् 4P. 3 शिखण्डिन् m (in cpds. शिखण्डि) 4 ताण्डव dance. 5 भृत borne, pp. √भृ 3U 6 हृष्टशिखण्डिताण्डवभृत = हृष्टानां शिखण्डिनां ताण्डवभृत 7 घन m cloud 8 प्रतिरूढ grown up, pp प्रति + √रुह् 1p 9 सन्तत a spread, extended 10 हरित् green 11 शस्यम् corn 12 उत्तरीयम् covering, veil. 13 क्षिति f earth 14 प्रतिरूढसन्ततहरिच्छस्योत्तरीयाम् = प्रतिरूढानि सन्ततानि हरिन्ति शस्यानि एव उत्तरीयाणि यस्याः सा 15 वीतविपद = वीता विपद यासां ता 16 निर्मत्सर free from jealousy 17 मोदन्ताम् let them rejoice, √मुद् 1A 18 गोष्ठी f. association 19 प्रमोद joy, pleasure 19 प्रजा f subject 20 घनबद्धबान्धवसुहृद्गोष्ठी-प्रमोदा = घन बद्ध बान्धवानां सुहृदां गोष्ठीषु प्रमोद याभि ता 21 निरत engrossed, attached to.

हृष्टशिखण्डिताण्डवभृत घना प्रतिरूढसन्ततहरिच्छस्योत्तरीयां क्षितिं कुर्वन्त वृष्टिं काले मुञ्चन्तु सुकृतानि चिन्वाना वीतविपद घनबद्धबान्धवसुहृद्गोष्ठीप्रमोदा प्रजा निर्मत्सरैं मानसै मोदताम् ॥ शार्दूल-विक्रीडितम् ॥

सर्वजगतां शिव अस्तु भूतगणा परहितनिरता भवन्तु दोषा नाश प्रयान्तु सर्वत्र लोक सुखी भवतु ॥ आर्या

Yet let this be, — ((Epilogue))

Supported by the dances of delighted peacocks, let the clouds release rains in time, making the earth veiled by green corns grown and well-spread, let the subjects free from calamities rejoice in the close-knit association with their relations and friends with minds without jealousy, accumulating meritorious deeds !

And furthermore,

May there be bliss for the entire universe, all the living beings be engrossed in the welfare of others sins be undone, and the world be completely happy !

(Exeunt Omnes) *Here Ends Act V*

अपि च । आलोक्यन्तामम्मी मत्प्रचोदिताश्चटुलचूडामणिमरीचिर-
चितेन्द्रचापपङ्क्तयो भक्त्यावनतपूर्वकायाः प्रणमन्ति मतङ्ग-
देवादयो विद्याधरपतयः । तदुच्यतां किं ते भूयः प्रियमुपकरोमि ।

नायकः— (जानुभ्यां स्थित्वा) अतः परमपि प्रियमस्ति ।

त्रातोऽयं शङ्खचूडः पतगपतिमुखाद्वैनतेयो विनीत—
स्तेन प्राग्भक्षिता ये विषधरपतयो जीविताास्तेऽपि सर्वे ।
मत्प्राणाप्त्या विमुक्ता न गुरुभिरसवश्चक्रवर्तित्वमाप्तं
साक्षात् त्वं देवि दृष्टा प्रियमपरमतः किं पुनः प्रार्थ्यते यत् ॥३६॥

1 प्रचोदित sent, impelled, PP प्र+√चुद 10U 2 चटुल tremulous fine 3 मत्प्रचोदिता = मया प्रचोदिता (आनीता) 4 इन्द्रचापम rainbow 5 चटु–चूडामणिमरीचिरचितेन्द्रचापपङ्क्तय = चटुलाना चूडामणीना मरीचिभि रचिता इन्द्रचापाना पङ्क्तय य ते 6 अवनत bent 7 पूर्वकाय upper part of the body 8 अवनतपूर्वकाया = अवनता पूर्वकाया येषा ते 9 विनीत disciplined tamed PP वि+√नी 1U 10 मत्प्राणाप्त्या = मम प्राणाना आप्त्या 11 साक्षात् ind in person

अथ शङ्खचूड पतगपतिमुखात त्रात वैनतेय विनीत तेन प्राग्भक्षिता ये विषधरपतय ते सर्वे अपि जीविता मत्प्राणाप्त्या असव गुरुभि न विमुक्ता चक्रवर्तित्व आप्त देवि ! त्व साक्षात दृष्टा अत अपर प्रिय यत किं पुन प्रार्थ्यते ॥ स्रग्धरा

And yet see ! This King Matanga and other Vidyadhara chieftains are bowing to you with the upper parts of their bodies bent down with loyalty forming rows of rainbows by means of the rays of their tremulous crest gems They are brought by me So tell me what other favour I shall bestow upon you again !

Hero (kneeling down) *Is there any other favour beyond this ? From* Garuda's mouth this Shangkhachuda has been saved Garuda has been corrected, all the serpent lords that were devoured by him before have also been revived by my recovery of life my parents have not abandoned their lives, I have obtained the imperium, and O Goddess ! you are seen in person — what more favour is to be desired beyond this ?

तथापीदमस्तु ।                    (भरतवाक्यम्)

वृष्टिं हृष्टशिखण्डिताण्डवभृतो मुञ्चन्तु काले घनाः
कुर्वन्तः प्रतिरूढसन्ततहरिच्छस्योत्तरीयां क्षितिम् ।
चिन्वानाः सुकृतानि वीतविपदो निर्मत्सरैर्मानसै—
र्मोदन्तां घनबद्धबान्धवसुहृद्गोष्ठीप्रमोदाः प्रजाः ॥ ४० ॥

अपि च ।

शिवमस्तु सर्वजगतां परहितनिरता भवन्तु भूतगणाः ।
दोषाः प्रयान्तु नाशं सर्वत्र सुखी भवतु लोकः ॥ ४१ ॥

(इति निष्क्रान्ताः सर्वे)

## ❀ इति पञ्चमोऽङ्कः ❀

1 भरतवाक्यम् last verse in a drama, epilogue. 2 हृष्ट delighted, pp √हृष् 4P. 3 शिखण्डिन् m (in cpds. शिखण्डि) 4 ताण्डव dance 5 भृत borne, pp.√भृ 3U 6 हृष्टशिखण्डिताण्डवभृत =हृष्टानां शिखण्डिनां ताण्डवभृत 7 घन m cloud 8 प्ररूढ grown up; pp प्रति+√रुह् 1p 9 सन्तत a spread, extended 10 हरित् green 11 शस्यम् corn. 12 उत्तरीयम् covering, veil. 13 क्षिति f earth. 14 प्रतिरूढसन्ततहरिच्छस्योत्तरीयाम् =प्रतिरूढानि सन्ततानि हरिन्ति शस्यानि एव उत्तरीयाणि यस्याः सा 15 वीतविपद =वीता विपद यासां ता 16 निर्मत्सर free from jealousy 17 मोदन्ताम् let them rejoice, √मुद् 1A. 18 गोष्ठी f. association 19 प्रमोद joy, pleasure 19 प्रजा f subject. 20 घनबद्धबान्धवसुहृद्गोष्ठीप्रमोदा =घन बद्ध बान्धवानां सुहृदां गोष्ठीषु प्रमोदः याभिः ताः 21 निरत engrossed, attached to.

हृष्टशिखण्डिताण्डवभृतः घनाः प्रतिरूढसन्ततहरिच्छस्योत्तरीयां क्षितिं कुर्वन्तः वृष्टिं काले मुञ्चन्तु सुकृतानि चिन्वानाः वीतविपदः घनबद्धबान्धवसुहृद्गोष्ठीप्रमोदाः प्रजाः निर्मत्सरैः मानसैः मोदन्ताम् ॥ शार्दूलविक्रीडितम् ॥

सर्वजगतां शिवं अस्तु भूतगणाः परहितनिरताः भवन्तु दोषाः नाशं प्रयान्तु सर्वत्र लोकः सुखी भवतु ॥ आर्या

Yet let this be, —                    ((Epilogue))

Supported by the dances of delighted peacocks, let the clouds release rains in time, making the earth veiled by green corns grown and well-spread let the subjects free from calamities rejoice in the close-knit association with their relations and friends with minds without jealousy, accumulating meritorious deeds!

And furthermore,

May there be bliss for the entire universe, all the living beings be engrossed in the welfare of others sins be undone, and the world be completely happy!

(Exeunt Omnes)                    *Here Ends Act V*

हर्षविरचिता

# रत्नावली

# RAṬNĀVALĪ OF HARṢA

## DRAMATIS PERSONÆ

| | | |
|---|---|---|
| Udayana | = | The King of Kaushāmbī |
| Vidūsaka | = | The jester named Vasantaka |
| Yaugandharāyana | = | The Prime Minister |
| Bābhravya | = | The Chamberlain |
| Aindrajālika | = | A magician |
| Vijayavarmā | = | The Nephew of the Commander in-Chief |
| Vasubhūti | = | The Minister of Vikramabāhu, the Sinhala King |
| Ratnāvali | = | alias Sāgarikā, Vikramabāhu's daughter. |
| Vāsavadattā | = | The Queen |
| Susangatā | = | A maid, friend of Ratnāvali |
| Vasundharā | = | Female door-keeper |

## ❀ प्रथमोऽङ्कः ❀

पादाग्रस्थितया मुहुः स्तनभरेणानीतया नम्रतां
शंभोः सस्पृहलोचनत्रयपथं यान्त्या तदाराधने ।
ह्रीमत्या शिरसीहितः सपुलकस्वेदोद्गमोत्कम्पया
विश्लिष्यन्कुसुमाञ्जलिर्गिरिजया क्षिप्तोऽन्तरे पातु वः ॥१॥

1 पादाग्रम् tip of foot 2 पादाग्रस्थितया = पादाग्रेण स्थितया by her standing on tip toe 3 मुहुस् ind repeatedly 4 स्तन breast 5 भर burden, weight 6 आनीत brought, PP आ + √नी 1 U 7 नम्रता f bending 8 शम्भु m (gen s शम्भोः) Shiva 9 सस्पृह envious 10 लोचनम् eye 11 त्रयम् triad 12 पथिन् m path, it is changed into पथ at the end of a compound 13 सस्पृहलोचनत्रयपथम् = सस्पृहलोचनत्रयस्य पन्थानम् 14 यान्त, याती f (ins s यान्त्या) going falling into Pres Part √या 2P 15 आराधनम् adoration, worshipping 16 तदाराधने = तस्य शम्भोः आराधने 17 ह्रीमत (ins f s ह्रीमत्या) bashful 18 शिरस् n. (loc s शिरसि) head 19 ईहित aimed wished, PP √ईह् 1A. 20 पुलक thrill, horripilation 21 स्वेद perspiration 22 उद्गम rise, fit 23 उत्कम्प trembling 24 सपुलकस्वेदोदगमोत्कम्पया = पुलकः स्वेदोद्गमः उत्कम्पः च तैः सहितया 25 विश्लिष्यत् (nom s m विश्लिष्यन्) Pres Part वि + √श्लिष् 4 P to disjoin scatter 26 कुसुमम् flower. 27 अञ्जलि m handful 28 गिरिजा f (ins s गिरिजया) पार्वती daughter of Himalaya & Shiva's wife 29 क्षिप्त thrown, PP √क्षिप् 6 U 30 अन्तरे in the midway 31 पातु let it protect लोट् √पा 2P 32 वः = युष्मान् सर्वान्

तदाराधने पादाग्रस्थितया मुहुः स्तनभरेण नम्रतां आनीतया शम्भोः सस्पृहलोचनत्रयपथं यान्त्या ह्रीमत्या सपुलकस्वेदोदगमोत्कम्पया गिरिजया ((शम्भोः)) शिरसि ईहितः क्षिप्तः अन्तरे विश्लिष्यन् कुसुमाञ्जलिः वः पातु ॥ शार्दूलविक्रीडितम्

May the handful of flowers, which was in her worshipping of Shiva aimed at his head by Parvati standing on tip toe but repeatedly brought to a bended height by the weight of her bosoms and then falling into the range of his envious triple eyes and so overcome with shame, thrill, perspiration and tremor, but which was scattered in the midway, protect you all !

अप चि ।

औत्सुक्येन कृतत्वरा सहभुवा व्यावर्तमाना ह्रिया
तैस्तैर्बन्धुवधूजनस्य वचनैर्नीताभिमुख्यं पुनः ।
दृष्ट्वाग्रे वरमात्तसाध्वसरसा गौरी नवे संगमे
संरोहत्पुलका हरेण हसता श्लिष्टा शिवायास्तु वः ॥२॥

1 औत्सुक्यम् anxiety, eagerness 2 कृत done, made; PP √कृ 8 U. 3 त्वरा f haste 4 कृतत्वरा=कृता त्वरा यया सा 5 सहभू a (ins s सहभुवा) innate, natural 6 व्यावर्तमान turning away 7 ह्री f (ins s ह्रिया) shame 8 बन्धुवधूजन m (used in plural sense) kinswomen 9 वचनम् word 10 आभिमुख्यम् towards, forward 11 पुनर् again 12 दृष्ट्वा gerund of √दृश् 1 P to see. 13 अग्रे in front. 14 वर bridegroom 15 आत्त a taken, assumed 16 साध्वस terror 17 रस sentiment 18 आत्तसाध्वसरसा=आत्त साध्वसस्य रसः यया सा 19 गौरी=पार्वती 20 नव fresh 21 संगम union 22 संरोहत् growing, pres part सम् + √रुह् 1P. 23 पुलक horripilation 24 हर = शिव 25 संरोहत्पुलका=संरोहन्तः पुलकाः यस्याः सा 26 हसत् laughing, pres part √हस् 1P. 27 श्लिष्ट embraced, PP √श्लिष् 4P 28 शिवम् (dat s शिवाय) welfare, prosperity 29 अस्तु let her be, लोट् √अस् 2P to be

नवे संगमे औत्सुक्येन कृतत्वरा सहभुवा ह्रिया व्यावर्तमाना बन्धुवधूजनस्य तैः तैः वचनैः पुनः आभिमुख्यं नीता अग्रे वरं दृष्ट्वा आत्तसाध्वसरसा संरोहत्पुलका हसता हरेण श्लिष्टा गौरी वः शिवाय अस्तु ॥ वृत्तं शार्दूलविक्रीडितम् ॥

And,

May Pārvatī, who in her fresh union with Shiva eagerly hastened to him but turned back through her innate shyness and was again led forth to him by all persuasions of her kinswomen and on seeing her bridegroom became filled with a sense of fear and horripilation and was embraced by him with a smile, bestow upon you welfare!

अपि च ।

क्रोधेद्धैर्दृष्टिपातैर्मुहुरुपशमिता वह्नयोऽमी त्रयोऽपि
त्रासार्ता ऋत्विजोऽधश्चपलगणहृतोष्णीषपट्टाः पतन्ति ।
दक्षः स्तौत्यस्य पत्नी विलपति करुणं विद्रुतं चापि देवैः
शंसन्नित्यात्तहासो मखमथनविधौ पातु देव्यै शिवो वः ॥३॥

1 क्रोध wrath, anger 2 इद्ध kindled, burning, PP √इन्ध 7A 3 दृष्टि f glance, eye 4 पात fall 5 उपशमित extinguished, caus PP उप+√शम 4P 6 वह्नि m fire 7 अमी nom P m of अदस् that 8 त्रास terror 9 आर्त struck by pained 10 ऋत्विज (क्) m priest 11 अधस् ind down, below 12 चपल naughty, rash 13 गण a demi god attendant of Shiva 14 हृत snatched, PP √हृ 1U 15 उष्णीष m n turban diadem 16 पट्ट m n cloth 17 पतन्ति they fall √पत 1P 18 चपलगणहृतोष्णीषपट्टाः = चपलैः गणैः हृताः उष्णीषाणां पट्टाः यषां ते 19 दक्ष name of प्रजापति 20 स्तौति he praises √स्तु 2P 21 विलपति she laments, वि+√लप 1P 22 करुणम् pathetically 23 विद्रुत run away PP वि+√द्रु 1P 24 देव god 25 देवैः विद्रुतम् (passive impersonal) gods fled 26 शंसन् nom s m pres part act शंसत् √शंस 1P to tell, praise 27 हास laughter 28 मख sacrifice 29 मथनम् destruction 30 विधि m action 31 देवी = पार्वती

'क्रोधेद्धदृष्टिपातैः मुहुः त्रयः वह्नयः अपि उपशमिताः चपलगणहृतोष्णीषपट्टाः त्रासार्ताः ऋत्विजः अधः पतन्ति दक्षः स्तौति अस्य पत्नी करुणं विलपति देवैः अपि च विद्रुतं, इति मखमथनविधौ आत्तहासः देव्यै शंसन् शिवः वः पातु ॥ वृत्तं स्रग्धरा ॥

Also,

> May Shiva protect you all!—Shiva who relates to his consort, Parvati with a smile his story of destroying the sacrifice, how the triple fires were extinguished by his repeated glances burning with wrath how the frightened priests fell down when their turbans were snatched away by the rash demi gods, how Daksa praised him, his wife pathetically wept and gods fled

जितमुडुपतिना नमः सुरेभ्यो द्विजवृषभा निरुपद्रवा भवन्तु ।
भवतु च पृथिवी समृद्धसस्या प्रतपतु चन्द्रवपुर्नरेन्द्रचन्द्रः ॥४॥

( नान्द्यन्ते )

सूत्रधार :— अलमतिविस्तरेण । अद्याहं वसन्तोत्सवे सबहुमानमाहूय नानादिग्देशागतेन राज्ञः श्रीहर्षदेवस्य पादपद्मोपजीविना राजसमूहेनोक्तः ।

1 जित won a victory, PP √जि 1P 2 उडुपति m the moon 3 नम salutation to 4 सुर god 5 द्विज twice born, Brahmin 6 वृषभ bull, best (समासान्ते) 7 निरुपद्रव free from calamity 8 भवतु let it be √भू 1P 9 पृथिवी f earth 10 समृद्ध prosperous 11 सस्यम harvest, corn 12 समृद्धसस्या=समृद्धानि सस्यानि यस्या तादृशी 13 प्रतपतु let it shine प्र+√तप 1P 14 चन्द्र moon 15 वपुस n body form 16 नरेन्द्रचन्द्र king 17 नान्दी f invocation benediction 18 अन्त end 19 अलम ind (+Ins and gerund) away with enough of 20 अतिविस्तर prolixity 21 अद्य today, now 22 अहम I 23 वसन्त spring 24 उत्सव joy, festival 25 सबहुमानम respectfully 26 आहूय gerund of आ+√ह्वे 1U to summon call 27 नाना manifold, various 28 दिग्देश quarter 29 आगत come pp आ+√गम 1P 30 राज्ञ gen s of राजन king 31 पादपद्मम lotus foot 32 उपजीविन a subsisting, dependent on 33 समूह assemblage, multitude 34 उक्त told spoken pp √वच 2P

उडुपतिना जितं सुरेभ्य नम द्विजवृषभा निरुपद्रवा भवन्तु पृथिवी च समृद्धसस्या भवतु चन्द्रवपु नरेन्द्रचन्द्र प्रतपतु ॥ पुष्पिताग्रा वृत्तम् ॥

And morever

> May the moon be victorious, salutation to the gods, may the illustrious Brahmins be free from calamity may the earth swell with bumper crops and the king resembling the moon shine !
> (After the invocations)

Stage director—Enough of prolixity ! Today on the occasion of the Spring Festival I was summoned and told by the assembly of the kings who came from various quarters and who are dependent upon the lotus feet of the King, Shri Harṣadeva ,—

यथा अस्मत्स्वामिना श्रीहर्षदेवेनापूर्ववस्तुरचनालंकृता रत्नावली नाम नाटिका कृता। सा चास्माभिः श्रोत्रपरम्परया श्रुता। न तु प्रयोगतो दृष्टा। तत्तस्यैव राज्ञः सकलजनहृदयाह्लादिनो बहुमानादस्मासु चानुग्रहबुद्ध्या यथावत्प्रयोगेण त्वया नाटयितव्या इति। तद्यावदिदानीं नेपथ्यरचनां कृत्वा यथाभिलषितं संपादयामि।

1 यथा as 2 अस्मत्स्वामिन् m our lord master 3 अपूर्व novel, wonderful 4 वस्तु n plot, subject 5 रचना f arrangement composition 6 अलङ्कृत decorated, furnished, PP अलम + √कृ 8U 7 नाटिका a kind of a drama 8 अस्माभि by us 9 श्रोत्रम ear, 10 परम्परा succession 11 श्रोत्रपरम्परया by hearsay 12 श्रुत heard, PP √श्रु 5 P 13 तु but 14 प्रयोगतम ind from or in performance 15 दृष्ट seen, PP √दृश 1P 16 तत् so 17 एव just, only 18 सकल जन entire people 19 हृदयम् heart 20 आह्लादिन् a delighting 21 अस्मासु in (for) us 23 अनुग्रहबुद्धि f a favouring mind 24 यथावत ind duly, properly (it has the force of an adjective, too) 25 प्रयोग performance, representation 26 त्वया by thee 27 नाटयितव्य pot PP of √नट् 1P to act 28 यावत in the meanwhile 29 इदानीम् now 30 नेपथ्यम् green room 31 अभिलषित desired, PP अभिलष् 1 4 P 32 संपादयामि I do, caus सम् + √पद् 4A

> "As our lord Shri Harsa composed a play entitled Ratnāvali furnished with a novel plot and construction and it was heard by us through hearsay, but was not witnessed by us in actual performance Therefore, out of your respect for the sovereign who delights the hearts of his entire subjects and out of your favour for us thou shouldst stage it with due performance"

So now having made the arrangements of the green room I shall act as desired.

अये, आवर्जितानि च मया सकलसामाजिकानां मनांसीति मे निश्चयः । यतः

श्रीहर्षो निपुणः कविः परिषदप्येषा गुणग्राहिणी
लोके हारि च वत्सराजचरितं नाट्ये च दक्षा वयम् ।
वस्त्वेकैकमपीह वाञ्छितफलप्राप्तेः पदं किं पुन—
र्मद्भाग्योपचयादयं समुदितः सर्वो गुणानां गणः ॥ ५ ॥

1 आवर्जित won over, pleased, PP आ+√वृज् 10 U 2 मया by me 3 सामाजिकः spectator 4 मनस् n mind 5 निश्चय belief 6 यतस् ind whence, for 7 निपुण skilled, shrewd 8 कवि m poet 9 परिषद f assembly, audience 10 एषा f this 11 गुण merit 12 ग्राहिन् a captivating appreciating 13 लोक world, populace 14 हारिन् charming 15 चरितम exploit, deed 16 नाट्यम् acting 17 दक्ष capable, skilled 18 वयम् we 19 वस्तु एकैकम् every part, role, plot 20 वाञ्छित desired, PP√वाञ्छ 1P. 21 प्राप्ति f attainment 22 पद m n state, position. 23 किं पुनर् what more needless to say 24 मद्=मम my 25 भाग्यम् luck 26 उपचय accumulation, growth 25 समुदित assembled, risen PP सम्+उद्+√इ 2 P 26 गण multitude 27 इह here

श्रीहर्षः निपुण कवि, एषा परिषद् गुणग्राहिणी, वत्सराजचरित च लोके हारि, वय च नाट्ये दक्षा वस्तु एकैक इह वाञ्छितफलप्राप्ते पद, किं पुन गुणाना अय सर्वः गण मद्भाग्योपचयात् समुदित ॥ शार्दूलविक्रीडितम्

Ah ! It is my belief that the minds of all the spectators are won by me, for,—

Shri Harsa is a shrewd poet, this audience, too, can grasp merits In the world the exploit of the king of Vatsa is captivating and we, too, are skilled in performance Every plot of it here will attain the desired result, and what more, at the growth of my luck all these merits are assembled together

तद्यावद्गृहं गत्वा गृहिणीमाहूय संगीतकमनुतिष्ठामि ।

(परिक्रम्य नेपथ्याभिमुखमवलोक्य) इदमस्मदीयं गृहम् । यावत्प्रविशामि ।

(प्रविश्य) आर्ये, इतस्तावत् ।

(प्रविश्य)

नटी — आर्यपुत्र ! इयमस्मि । आज्ञापयत्वार्यः को नियोगोऽनुष्ठीयतामिति ।

सूत्रधारः— आर्ये ! रत्नावलीदर्शनसमुत्सुकोऽयं राजलोकः । तद्गृह्यतां नेपथ्यम् ।

1 गृहम् house 2 गत्वा gerund of √गम् 1 P to go 3 गृहिणी f housewife 4 सगीतकम् music 5 अनुतिष्ठामि I perform, अनु+√स्था 1 P 6 परिक्रम्य gerund of परि+√क्रम् 1U 4P to walk about 7 नेपथ्यम green room curtain, dress 8 अवलोक्य gerund of अव+√लोक् 1A 10U to look at 9 इदम् nom s n this 10 अस्मदीय our, ours 11 प्रविशामि I enter, प्र+√विश 6P 12 आर्या a noble, worthy 13 इतस् hither 14 तावत् just, now 15 नटी actress 16 इयम् अस्मि here I am 17 आज्ञापयतु let him command, लोट् आ+√ज्ञा 9U caus 18 क नियोग what function, duty 19 अनुष्ठीयताम् it must be performed, कर्मणि लोट अनु+√स्था 1P 20 दर्शनम् seeing 21 समुत्सुक eager, anxious 22 लोक class, assembly 23 गृह्यताम it must be taken (worn) कर्मणि लोट √ग्रह 9U

In the meantime I go home, call my wife and perform music and acting (walking about and looking at the dressing room) Here is our house Let me enter (Entering) Wife, just now come hither

Actress— (Entering) My husband, here I am Command me as to what I have to do

Director— Worthy wife, the assembly of kings is eager to witness 'Ratnāvali' Therefore dress yourself

नटी — (सोद्वेगम्) आर्यपुत्र ! निश्चिन्त इदानीमसि त्वम्। तत्किमिति न नृत्यसि। मम मन्दभाग्यायाः पुनरेकैव दुहिता। सापि त्वया कस्मिंश्चिद्देशान्तरे दत्ता। कथमेवं दूरदेशस्थितेन जामात्रा सहास्याः पाणिग्रहणं भविष्यतीत्यनया चिन्तयात्मापि न मे प्रतिभाति। किं पुनर्नर्तितव्यम्।

सूत्रधारः— आर्ये, दूरस्थेनेत्यलमुद्वेगेन। पश्य

1 सोद्वेगम् sorrowfully, excitedly. 2 निश्चिन्त free from anxiety. 3 नृत्यसि thou dancest,√नृत् 4 P. 4 मन्दभाग्य-या f. unlucky. 5 पुनर् but. 6 दुहिता nom. s. of दुहितृ daughter. 7 देशान्तरे=अन्यस्मिन् देशे in another country. 8 दत्त given away (in marriage) PP.√दा 3U. 9 कथम् how 10 एवम् thus, in this way. 11 दूर far. 12 स्थित standing, living. 13 जामातृ m son-in-law. 14 सह with, together 15 अस्याः her. 16 पाणिग्रहणम् marriage 17 भविष्यति it will be,√भू 1P. 18 चिन्ता f anxiety, worry. 19 आत्मन् m (nom आत्मा) self, one's self 20 मे to me. 21 प्रतिभाति it appears, manifests, प्रति+√भा 2P. 22 नर्तितव्य pot. PP.√नृत् 4 P. to dance. 23 पश्य 2nd s. लोट्√दृश् 1P. to see.

Actress — (sorrowfully) Husband, now you have no anxiety. So why should you not dance? Unfortunate that I am, I have only one daughter. She, too, is to be given away in some other country. Because of my worry as to how her wedding with our son-in law (bride-groom) will take place I can not even think of my own self, not to say about dancing.

Director—My worthy wife, do not be dejected though the bride groom is in a far-off land, see !

द्वीपादन्यस्मादपि मध्यादपि जलनिधेर्दिशोऽप्यन्तात् ।
आनीय झटिति घटयति विधिरभिमतमभिमुखीभूतः ॥ ६ ॥

(नेपथ्ये) साधु, भरतपुत्र, साधु । एवमेतत् । कः संदेहः ।
('द्वीपात्······' इत्यादि पठति)

सूत्रधारः—(आकर्ण्य, सहर्षम्) आर्ये ! नन्वयं मम यवीयान् भ्राता गृहीतयौगंधरायणभूमिकः प्राप्त एव । तदेहि । आवामपि नेपथ्यग्रहणाय सज्जीभवावः । (इति निष्क्रान्तौ)

## ❀ इति प्रस्तावना ❀

1 द्वीप : island. 2 मध्य middle. 3 जलनिधि m. ocean. 4 दिश् f. direction, quarter 5 अन्त : border, end 6 झटिति ind. quickly, at once. 7 घटयति it joins, brings in contact with, caus घट 1 A. or 10u. 8 विधि . m. fate. 9 अभिमतम् desired end. 10 अभिमुखीभूत favourable 11 साधु will. 12 भरतपुत्र · actor. 13 संदेह doubt. 14 आदि beginning with, and so forth. 15 पठति he recites, √ पठ् 1P. 16. आकर्ण्य gerund of आ + कर्ण् 10P. 17 सहर्षम् joyfully. 18 ननु indeed, certainly 19 यवीयस् भ्रातृ (nom. s यवीयान् भ्राता) younger brother. 20 भूमिका f. part, role. 21 गृहीतयौगंधरायणभूमिक =गृहीता यौगंधरायणस्य भूमिका येन सः 22 प्राप्त reached, turned up, pp प्र + √ आप् 5 P. 23 एहि 2nd s. लोट् √ इ 2P. to go. 24 आवाम् we two. 25. सज्जीभवाव : let us (two) be ready. 26 प्रस्तावना prelude.

अन्यस्मात् द्वीपात् अपि जलनिधे मध्याद् अपि दिश अन्तात् अपि अभिमुखीभूत विधि अभिमत आनीय झटिति घटयति ॥ आर्या ॥

Even from a far-off island, even from the heart of an ocean or even from the end of the world a favourable fate brings a desired object and at once places it (on us).

(Behind the curtain) Well, actor, well spoken!
Exactly so, no doubt. (Recites 'Even from.......' etc.)

Director—(Listening, with joy) Good wife, it is certainly my younger brother who has come, playing the role of Yaugandharāyana. So come, let us be prepared for dressing. (Both exit)

HERE ENDS PRELUDE.

(तत प्रविशति यथानिर्दिष्टो यौगधरायण )

योगंधरायण :—एवमेतत् । कः संदेहः । ('द्वीपात् ' इति पुन पठित्वा) अन्यथा क्व सिद्धादेशप्रत्ययप्रार्थितायाः सिंहलेश्वरदुहितुः समुद्रे प्रवहणभङ्गनिमग्नायाः फलकासादनम् । क्व च कौशाम्बीयेन वणिजा सिंहलेभ्यः प्रत्यागच्छता तदवस्थायाः संभावनम् । रत्नमालाचिह्नायाः प्रत्यभिज्ञानादिहानयनं च ।

1 ततस् then 2 यथानिर्दिष्ट as mentioned above (√ दिश् 6U ) 3 अन्यथा otherwise 4 क्व whither, where (when repeated it implies a great incongruity or difference) 6 सिद्ध : sage, seer 7 आदेश : prediction 8 प्रत्यय conviction 9 प्रार्थित desired, sought, pp प्र + √ अर्थ् 10A 10 सिद्धादेशप्रत्ययप्रार्थितायाः = सिद्धादेशप्रत्ययन (राजार्थम्) प्रार्थितायाः 11 सिंहलेश्वर king of Lanka 12 समुद्रे sea 13 प्रवहणभङ्ग ship-wreck. 14 निमग्न drowned 15 फलकम् plank, board 16 आसादनम् aquisition 17 कौशाम्बीयेन वणिजा by a merchant of Kāushambi, the capital of वत्सदेश 18 प्रत्यागच्छत् returning, pres. part act प्रति + आ + √ गम् 1P. 19 अवस्था f situation, condition 20 तदवस्थायाः = तदवस्था यस्याः सा. 21 संभावनम् honour by rescue 22 रत्नमाला f jewel-necklace 23 चिह्नम् mark, indication 24 प्रत्यभिज्ञानम् recognition 25 आनयनम् bringing

(Then enters above-mentioned Yaugandharāyana)

Yaugandharāyana—Exactly so, no doubt (Repeating "Even from .. .." etc ) Otherwise where could the daughter of the king of Singhala who had been sought (by me for our monarch) through a firm belief in *the seer's prediction grasp a plank* when drowned at the sea due to a shipwreck? Otherwise, how could she under such circumstances be honoured by a rescue rendered to her by a merchant of Kaūshāmbi while he was returning from Singhala, and be brought over here on being recognised (as the princess) because she bore the indication of her jewel necklace?

(सहर्षम्) सर्वथा स्पृशन्ति नः स्वामिनमभ्युदयाः । (विचिन्त्य) Rc
मयापि चैनां देवीहस्ते सगौरवं निक्षिपता युक्तमेवानुष्ठितम् । श्रुतं च मया बाभ्रव्योऽपि कञ्चुकी सिंहलेश्वरामात्येन वसुभूतिना सह कथं कथमपि समुद्रादुत्तीर्य कोसलोच्छित्तये गतवता रुमण्वता मिलित इति । तदेवं निष्पन्नप्रायमपि प्रभुप्रयोजनं न मे धृतिमावहतीति कष्टोऽयं खलु भृत्यभावः । कुतः
Rc

1 सहर्षम् joyfully 2 सर्वथा completely, by all means 3 स्पृशन्ति they reach, attend, touch, √स्पृश् 6P 4 अभ्युदयः well being, prosperity 5 विचिन्त्य gerund of वि+√चिन्त् 10U to reflect, think 6 एनाम् her 7 देवीहस्त. hand of the queen 8 सगौरवम् respectfully 9 निक्षिपत् pres part act of नि+√क्षिप् 6P to deposit, to throw 10 युक्त proper, fit 11 श्रुत heard, pp √श्रु 5P to hear 12. कञ्चुकिन् m chamberlain 13 अमात्य. minister 14 कथं कथमपि somehow, with much difficulty 15 उत्तीर्य gerund of उद्+√तॄ 1P to rise, cross over. 16 कोसल King of Kosala. 17 उच्छित्ति f destruction 18 गतवत् going 19 मिलित met, joined, PP √मिल् 6P. 20 निष्पन्न accomplished, PP निस्+√पद् 4A 21 प्राय (समासान्त) for the most part, generally, almost 22 प्रभु king master 23 प्रयोजनम् aim, .cause 24 धृति contentment, firmmess 25 आवहति it bears, brings, आ+√वह् 1P 26 कष्ट painful difficult 27 भृत्य-भाव slavery.

(Joyously) In every way prosperity and happiness visit our monarch (Reflecting) And I, too, have done a proper thing by respectfully offering her to the hands of the queen, and it has come to my ears that our chamberlain, Bābhravya, having somehow crossed the sea along with Vasubhūti, the minister to the king of Singhala joined General Rumanvān who had gone to defeat the king of Kosala Thus the aim of my lord, though almost accomplished, does not bring satisfaction to me, painful is, indeed, this servitude of mine, for —

प्रारम्भेऽस्मिन्स्वामिनो वृद्धिहेतौ दैवेनेत्थं दत्तहस्तावलम्बे ।
सिद्धेर्भ्रान्तिर्नास्ति सत्यं तथापि स्वेच्छाचारी भीत एवास्मि भर्तुः ॥७॥

(नेपथ्य कलकल)

**यौगंधरायणः** — (आकर्ण्य) अये, मधुरमभिहन्यमानमृदुमृदङ्गानुगतसंगीतमधुरः पुरः पौराणां समुच्चरति चर्चरीध्वनिः । तथा तर्कयामि यदेनं मदनमहमहीयांसं पुरजनप्रमोदम् अवलोकयितुं प्रासादाभिमुखं प्रस्थितो देव इति । य एषः

1 प्रारम्भ undertaking, commission. 2 वृद्धि f prosperity 3 हेतु m cause, reason 4 दैवम् fate. 5 इत्थम्=एवम् 6 अवलम्ब· help, prop 7 दत्तहस्तावलम्बे=दत्त हस्तस्य अवलम्ब येन तस्मिन् 8 सिद्धि f success 9 भ्रान्ति f mistake 10 सत्यम् truly 11 तथापि yet nevertheless. 12 स्वेच्छाचारिन् a acting of one's own accord 13 भीत afraid, frightened, pp,√भी 3U 14 कलकल noise of a crowd 15 मधुर sweet 16 अभिहन्यमान being beaten, कर्मणि अभि+√हन् 2P 17 मृदु soft. 18 मृदङ्ग kind of drum 19 अनुगत a following. 20 पुरस् in front 21 पौर citizen 22 समुच्चरति it moves, सम्+उद्√चर् 1P 23 चर्चरी f. a kind of dancing and singing 24 ध्वनि m sound 25 तर्कयामि I think, suppose,√तर्क् 10U 26 यत् that (conjunction) 27 मदनमहस् m festival of the god of love 28 महीयांसम m acc s of महीयस् greater 29 पुरजन citizen 30 प्रमोद· joy. 31 प्रासाद· palace 32 प्रस्थित set out, pp प्र+√स्था 1P. 33 देव king.

स्वामिन वृद्धिहेतौ दैवेन इत्थ दत्तहस्तावलम्बे अस्मिन् प्रारम्भे सत्य सिद्धे भ्रान्ति न अस्ति तथापि स्वेच्छाचारी भर्तुः भीत एव अस्मि ॥ शालिनी ॥

Truly, there is no mistake about the success of this undertaking as a helping hand is thus given by fate for our lord's prosperity Yet I, *acting on my own whim, am just afraid of him* (Behind the scenes a noise of a crowd)

Yaugandharāyana— (Listening) Oh! The sound of Charchari of the townsfolk in front sweet with songs accompanied by soft drums which are sweetly beaten fills up the air. So I suppose the king has headed for the palace to observe the joy of the folk heightened in the course of the 'Love Festival.'

विश्रान्तविग्रहकथो रतिमाञ्जनस्य
चित्ते वसन्प्रियवसन्तक एव साक्षात् ।
पर्युत्सुको निजमहोत्सवदर्शनाय
वत्सेश्वरः कुसुमचाप इवाभ्युपैति ॥ ८ ॥

(ऊर्ध्वमवलोक्य) अये, कथमधिरूढ एव देवः प्रासादम् । तद्यावद्गृहं गत्वा कार्यशेषं चिन्तयामि ।(इति निष्क्रान्त)

## ❀ इति विष्कम्भकः ❀

1 विश्रान्त rested, ended, PP. वि+√श्रम् 4P. 2 विग्रह battle, war 3 कथा f. tale, talk. 4 विश्रान्तविग्रहकथः=विश्रान्ता विग्रहस्य कथा यस्य स 5 रतिमान् (nom.s of रतिमत्) possessed of Rati (love) 6 चित्तम् mind, heart 7 वसन् nom s m pres. part act वसत्,√वस् 1P. to dwell 8 प्रिय dear. 9 वसन्तक spring 10 साक्षात् ind in person 11 पर्युत्सुक eager, anxious. 12 निज a. one's own 13 कुसुमचाप flower-arrowed Cupid 14 अभ्युपैति approaches, अभि+उप+√इ 2P. 15 ऊर्ध्वम् overhead 16 अधिरूढ mounted, ascended, PP. अधि+√रुह 1P. 17 शेष remaining 18 कार्यशेषम् the rest of work, remaining work 19 विष्कम्भक interlude

विश्रान्तविग्रहकथ रतिमान् जनस्य चित्ते साक्षात् एव वसन् प्रियवसन्तक पर्युत्सुक वत्सेश्वरः कुसुमचाप इव निजमहोत्सवदर्शनाय अभ्युपैति ॥ वसन्ततिलका ॥

Putting an end to his tale of battle, dwelling in the hearts of men in person and loving spring season the king of Vatsa full of love approaches, eager to appreciate his own great festival like the flower-arrowed one (Looking overhead) Oh ! how the king has just ascended the palace ! In the meantime I shall go home and consider my remaining work

( Exit )

HERE ENDS INTERLUDE

(ततः प्रविशत्यासनस्थो गृहीतवसन्तोत्सववेषो राजा विदूषकश्च)

राजा — (सहर्षमवलोक्य) सखे वसन्तक !

विदूषकः— आज्ञापयतु भवान् ।

राजा — राज्यं निर्जितशत्रु योग्यसचिवे न्यस्तः समस्तो भरः
सम्यक्पालनलालिताः प्रशमिताशेषोपसर्गाः प्रजाः ।
प्रद्योतस्य सुता वसन्तसमयस्त्वं चेति नाम्ना धृतिं
कामः काममुपैत्वयं मम पुनर्मन्ये महानुत्सवः ॥ ६ ॥

1 आसनम् seat chair 2 स्थ seated, standing 3 वेष dress 4 गृहीतवसन्तोत्सववेष =गृहीत वसन्तोत्सवस्य वेष येन स 5 विदूषक clown, jester 6 सखे voc s of सखि m friend 7 राज्यम् kingdom, reign 8 निर्जित overcome, defeated, PP निस्+√जि 1P 9 शत्रु enemy 10 निर्जितशत्रु=निर्जिता शत्रुव यस्मिन् तत् 11 योग्य capable 12 सचिव minister 13 न्यस्त put, placed, PP नि+√अस् 4P 14 समस्त all, entire 15 भर burden of government 16 सम्यक् properly 17 पालनम् protection 18 लालित fondled, PP √लल् 1P 19 अशेष entire 22 उपसर्ग trouble 21 प्रशमिताशेषोपसर्गा = प्रशमिता अशेषा उपसर्गा येषा ते 22 प्रद्योत the king of Magadha 23 सुता f daughter 24 समय time, season 25 नाम्ना ins s of नामन् n name 26 धृति satisfaction 27 काम Cupid 28 कामम् ind really indeed 29 महत् (महान् nom s m ) great 30 मन्ये I think, √मन् 4A

राज्य निर्जितशत्रु, योग्यसचिवे न्यस्त समस्त भर, सम्यक्पालनलालिता प्रजा प्रशमिताशेषोपसर्गा, प्रद्योतस्य सुता (मम पत्नी), वसन्तसमय त्व (मम मित्रे), काम च (मदनमहोत्सव) इति नाम धृति उपैतु पुन मन्ये अय मम महान् उत्सव ॥ शार्दूलविक्रीडितम् ॥

(Then enter the King dressed in an outfit of Spring Festival and seated, and the clown )

King— (Looking joyously) My friend, Vasantaka !

Clown— May your Majesty command

King— My kingdom is free from enemies, the entire burden of government is entrusted to an able minister, and my subjects fondled by proper protection are free from all troubles
The daughter of Pradyota is my wife thou and the spring season are my friends
Let the God of Love be satisfied with his name alone ! But this great festival is mine I think

विदूषक :— (सहर्षम्) भो वयस्य ! एवं नेदम् । अहं पुनर्जानामि न भवतो न कामदेवस्य ममैवैकस्य वटुकस्यायं मदनमहोत्सवो येन प्रियवयस्येनैवं मंत्र्यते । तत्किं पुनरनेन । प्रेक्षस्व तावदेतस्य मधुमत्तकामिनीजनस्वयंग्राहगृहीतश्रृङ्गकजलप्रहारनृत्यन्नागरजन - जनितकौतूहलस्य समन्ततः सुवृत्तमर्दलोद्दामचर्चरीशब्दमुखर-रथ्यामुखशोभिनः प्रकीर्णपटवासपुञ्जपिञ्जरीकृतदिशामुखस्य श्रियं मदनमहोत्सवस्य ।

1 जानामि I know, √ ज्ञा 9 U 2 वटुक lad 3 मन्त्र्यते it is spoken कर्मणि लट् √ मन्त्र 10 A 4 तत therefore, so 5 प्रेक्षस्व behold thou, लोट् √ ईक्ष 1A 6 मधुमत्त wine drunken 7 कामिनीजन lovely women 8 स्वयंग्राह a self choosing, voluntary 9 श्रृङ्गक m n syringe 10 जलम् water 11 प्रहार shooting. 12 जनित caused, generated, caus pp √ जन 4A 13 कौतूहलम् interest 14 समन्ततस् ind on all sides 15 सुवृत्त circular 16 उद्दाम excessive 17 मुखर a resounding 18 रथ्या f highway 19 शोभिन charming 20 प्रकीर्ण scattered, pp प्र + √ कृ 6P 21 पटवास distinguished perfume 22 पुञ्ज heap 23 पिञ्जरीकृत rendered yellow 24 दिशामुखम quarter, direction 25 श्रियम acc s of श्री f charm, beauty. 26 मधुमत्त—कौतूहलस्य, सुवृत्त—शोभिन and प्रकीर्ण—मुखस्य qualify मदनमहोत्सवस्य

Clown — (joyfully) O my Pal nay, nay I know, however, this great Festival of Love is neither for you nor for Cupid but for this lad, wherefore you, my dear friend say so What more ? Do now behold the charm of the grand Festival of Love in which interest is encouraged by the townsmen dancing at the sprays of water being shot from the syringes voluntarily held by the beautiful women who are intoxicated with wine, and which is attractive because the openings of the highways are resounding with the sound of charchari accompanied by excessive beating of round drums, all quarters are turned yellowish with the scattered heaps of nose-bleeding perfume powder on all sides !

राज — (सहर्ष समन्तादवलोक्य) अहो परां कोटिमधिरोहति प्रमोदः पौराणाम् ।

तथा हि ।

कीर्णैः पिष्टातकौघैः कृतदिवसमुखैः कुङ्कुमक्षोदगौरै-
र्हेमालंकारभाभिर्भरनमितशिरःशेखरैः कैङ्किरातैः ।
एषा वेषाभिलक्ष्यस्वविभवविजिताशेषवित्तेशकोशा
कौशाम्बी शातकुम्भद्रवखचितजनेवैकपीता विभाति ॥ १० ॥

1 समन्तात् everywhere 2 पर a highest 3 कोटि f climax, excellence 4 अधिरोहति it mounts अधि + √ रुह् 1P 5 प्रमोद gaiety, joy 6 तथा हि for 7 पिष्टातक scented powder 8 ओघ mass, flood 9 दिवसमुखम daybreak 10 कृतदिवसमुखै =कृत दिवसस्य मुख यै तै 11 कुकुमम् saffron 12 क्षोद dust 13 गौर golden 14 हेमालकार golden ornament. 15 भा f lustre 16 नमित bent, caus pp √नम् 1U 17 शिरःशेखर crest 18 कैङ्किरात amorous person 19 अभिलक्ष्य noticeable 20 स्वविभव its own wealth 21 अशेष entire 22 वित्तेश Kubera and god of wealth 23 कोश treasure 24 वेषाभिलक्ष्यस्वविभवविजिताशेषवित्तेशकोशा=वेषेषु अभिलक्ष्येन स्वविभवेन विजित अशेष वित्तेशस्य कोष यया सा 25 शातकुम्भम् gold 26 द्रव. liquid 27 खचित full of, blended with 28 पीत yellow 29 शातकुम्भद्रवखचितजना=शातकुम्भस्य द्रवेण खचिताः जनाः यस्यां सा 30 विभाति it shines, appears, वि + √ भा 2P

कीर्णै पिष्टातकौघै. कुङ्कुमक्षोदगौरै कृतदिवसमुखै हेमालकारभाभि भरनमितशिर.शेखरै कैङ्किरातै वेषाभिलक्ष्यस्वविभवविजिताशेषवित्तेशकोशा शातकुम्भद्रवखचितजना एषा कौशाम्बी एकपीता इव विभाति ॥ स्रग्धरा

King — (joyously looking round) Oh the festivity of the townsfolk is reaching the climax ! For —

With the spread floods of scented powder yellowish with saffron dust, thus imitating a golden daybreak, with the glare of gold ornaments and with amorous persons whose crests are bent down by the weight this capital, Kaushambi that defeats the entire treasury of Kubera, the God of wealth by means of its own affluence and where the people are blended with liquid gold shines like a single flood of golden hue; its own riches being observable in their attires

अपि च।

धारायन्त्रविमुक्तसंततपयःपूरस्नुते सर्वतः
सद्यः सान्द्रविमर्दकर्दमकृतक्रीडे क्षणं प्राङ्गणे।
उद्दामप्रमदाकपोलनिपतत्सिन्दूररागारुणैः
सैन्दूरीक्रियते जनेन चरणन्यासैः पुरः कुट्टिमम् ॥११॥ ✓

विदूषकः— (विलोक्य) एतदपि सुविदग्धजनजलभरितशृङ्गकजलप्रहारमुक्तसीत्कारमनोहरं वारविलासिनीजनविलसितमालोकयतु प्रियवयस्य।

1 धारायन्त्रम् jet, fountain. 2 विमुक्त discharged, pp. वि + √ मुच् 6P. 3 सतत uninterrupted, continual 4 पयपूर stream, or flood of water 5 स्नुत flooded; pp. √ स्नु 2P 6 सर्वतम् entirely, everywhere 7 सद्यस् just now, at once. 8 सान्द्र thick. 9 विमर्दः trampling 10 कर्दम mud 11 क्रीडा f. play, sport. 12 क्षणम in a moment 13 सान्द्रविमर्दकर्दमकृतक्रीडे=सान्द्रविमर्देन (जनिते) कर्दमे कृता क्रीडा यस्मिन् तस्मिन्. 14 प्राङ्गणम् couttyard 15 उद्दाम free, bold, proud 16 प्रमदा f. damsel. 17 कपोलः cheek 18 सिन्दूरम् vermilion. 19 राग colour. 20 अरुण red. 21 सैन्दूरीक्रियते it is turned red, कर्मणि लट् सैन्दूरी + √ कृ 8U 22 जन people. 23 चरणन्यास foot-print. 24 पुरम् in front 25 कुट्टिमम् pavement. 26 सुविदग्ध very clever. 27 भरित filled with, full of 28 सीत्कार hissing sound 29 मनोहर charming. 30 वारविलासिनी f. courtesan 31 विलसितम् sport.

सर्वत धारायन्त्रविमुक्तसततपयपूरस्नुते सद्यःसान्द्रविमर्दकर्दमकृतक्रीडे प्राङ्गणे उद्दामप्रमदाकपोलनिपतत्सिन्दूररागारुणै चरणन्यासै जनेन पुरः कुट्टिम क्षण सैन्दूरीक्रियते ॥ शार्दूलविक्रीडितम्।

And yet

In the courtyard flooded with uninterrupted streams of water discharged from the fountains all over where the people play in the mud instantly caused by massive tramplings; in front the pavement is turned scarlet by people through their foot prints red with the colour of vermilion falling from the cheeks of naughty damsels

Clown—(Beholding) My dear friend, see, also, the frolic of the courtesans which is charming with the hissing sound caused by shooting of water-sprays from syringes in which water is filled up by clever ones!

राजा — (विलोक्य) वयस्य सम्यग्दृष्टं भवता । कुतः ।

अस्मिन्प्रकीर्णपटवासकृतान्धकारे
दृष्टो मनाङ्मणिविभूषणरश्मिजालैः ।
पातालमुद्यतफणाकृतिशृङ्गकोऽयं
मामद्य संस्मरयतीव भुजङ्गलोकः ॥१२॥

विदूषकः— (विलोक्य) भो वयस्य प्रेक्षस्व प्रेक्षस्व । एषा खलु मदनिका मदनवशविसंष्ठुलं वसन्ताभिनयं नृत्यन्ती चूतलतिकया सहेत एवागच्छतीत्यवलोकयतु प्रियवयस्यः ।

1 सम्यक properly, well 2 दृष्ट seen, pp √दृश 1P 3 कुत whereas 4 अधकार darkness 5 प्रकीणपटवासकृताधकार=प्रकीर्णेन पटवासेन कृत अन्धकार तस्मिन 6 मनाक a little slightly 7 मणिविभूषणम ornament of gems 8 रश्मि m ray 9 जालम mass 10 पातालम nether world where Nagas dwell 11 उद्यत raised 12 फणा f hood of a serpent 13 आकृति f form shape 14 उद्यतफणाकतिशृङ्गक =उद्यता फणा इव आकृति येषा ते शृङ्गका =यस्य स 15 सस्मरयति it reminds, caus सम + √स्मृ 1P 16 भुजङ्ग serpent paramour, gallant 17 लोक group 18 खलु indeed 19 मदनवश a enamoured, m influence of love 20 विसष्ठुल unsteady, agitated 21 मदनवशविसष्ठुलम is an adverb here 22 वसन्ताभिनय spring dance (literally dramatic action) 23 नृत्यत (नृत्यन्ती nom s f) dancing pres part √नृत 4P

अस्मिन प्रकीणपटवासकृताधकार मणिविभूषणरश्मिजालै मनाक दृष्ट उद्यतफणाकृतिशृङ्गक अय भुजङ्ग लोक मा पाताल अद्य सस्मरयति इव ॥ वसन्ततिलकानाम वृत्तम ।

King — (Eyeing) Friend, you have well observed, for
In this darkness wrought out by the perfume powder scattered about, the multitude of paramours slightly visible through the enmassed rays of jewel ornaments, holding their syringes resembling the raised hoods of serpents reminds me as it were of the nether world

Clown—( Beholding ) Hello pal behold behold! Indeed Madanika, dancing the spring dance agitatedly under the influence of love, just comes hither along with Chutalatika

(तत प्रविशतो मदनलाला नाटयन्त्यौ द्विपदीखण्ड गायन्त्यौ चेट्यौ)

मदनिका — (गायति)

कुसुमायुधप्रियदूतको मुकुलीकृतबहुचूतकः ।
शिथिलितमानग्रहणको वाति दक्षिणपवनकः ॥१३॥
विकसितबकुलाशोकक उत्कण्ठितप्रियमेलकः ।
प्रतिपालनासमर्थकस्ताम्यति युवतीसार्थकः ॥१४॥

1 ततस् thence, then 2 प्रविशत they two enter प्र + √ विश् 6 P 3 मदन: love, cupid 4 लीला f playful sport 5 नाटयत् (nom f dual नाटयन्त्यौ) gesticulating, acting, pres part caus √ नट् 1P 6 द्विपदी a kind of Prakrit metre consisting of two feet 7 खण्ड piece 8 गायन्त (nom f dual गायन्त्यौ) singing, pres part √ गै 1P. 9 चेटी f maid attendant 10 कुसुमायध flower arrowed cupid 11 प्रिय a dear, loving 12 दूतक messenger 13 मुकुलीकृत made to bud or blossom 14 बहु many 15 चूतक mango 16 मुकुलीकृतबहुचूतक = मुकुलीकृता बहव चूता येन सैपिक 17 शिथिलित languid, loosened 18 मान self respect, pride 19 ग्रहणक involving, seizing 20 वाति it blows, √ वा 2P 21 दक्षिण पवनक south wind 22 विकसित blossomed, blooming 23 बकुल the name of a flower tree 24 अशोक the name of a tree 25 विकसितबकुलाशोकक = विकसिता बकुला अशोका च येन (क्प) 26 उत्कण्ठित anxious, longing 27 मेलक unifying, unifier 28 प्रतिपालनम waiting protection 29 असमर्थक unable 30 ताम्यति it pines away, wastes away, √ तम 4P 31 युवती f young woman 32 सार्थक useful, serviceable m troop

(Then enter the two maids gesticulating an amorous sport and singing the lines of Dvipadis )

Madanikā—(sings)

The south wind—the beloved messenger of Cupid blows causing many a mango tree to bear buds and loosening the jealous minds (of women)

Troops of youthful women now pine away eager to have reunion with their lovers anxious so hardly able to wait for them, and making the Bakulas and Ashokas bloom

अथवा ।

इह प्रथमं मधुमासो जनस्य हृदयानि करोति मृदुलानि ।
पश्चाद्विध्यति कामो लब्धप्रसरैः कुसुमबाणैः ॥१५॥

राजा — (निर्वर्ण्य) अहो, मधुरोऽयमासां निर्भरः क्रीडारसः । तथाहि ।

1 अथवा or, yet. 2 इह here 3 मधुमास sweet month, *i.e.* spring. 4 जनः man. 5 हृदयम् heart. 6 करोति it makes; √ कृ 8 U. 7 मृदुल tender, soft. 8 प्रथमम् adv. at first. 9 पश्चात् thereafter. 10 विध्यति it pierces, √ व्यध् 4 P. 11 कामः god of love, love 12 लब्ध obtained; pp. √ लभ् 1A. 13 प्रसर unimpeded motion, free access. 14 लब्धप्रसरैः=लब्ध प्रसरः यैः तैः 15 कुसुमबाणः flower-arrow. 16 निर्वर्ण्य gerund of निस् + √ वर्ण् 10U. to behold 17 मधुर sweet. 18 निर्भर excessive, ardent 19 आसाम्=स्त्रीणाम्. 20 क्रीडारस sportful passion.

इह मधुमासः प्रथमं जनस्य हृदयानि मृदुलानि करोति, पश्चात् कामः लब्धप्रसरैः कुसुमबाणैः (हृदयानि) विध्यति ॥

And yet,

Here the sweet spring first softens the heart of men, and then cupid with his flower-arrows of unimpeded motion does pierce them.

King— (looking) Ah, sweet and ardent is their sportful passion ! For;—

Note.—The Ashoka tree, as the saying goes, blooms when striken *by the left foot of a young lady, while the Bakula blossoms on being* sprinkled with a mouthful of wine by her. Cupid bears a bow of bees and arrows of flowers which he shoots at the heart of a lover.

स्रस्तः स्रग्दामशोभां त्यजति विरचितामाकुलः केशपाशः
क्षीबाया नूपुरौ च द्विगुणतरमिमौ क्रन्दतः पादलग्नौ ।
व्यस्तः कम्पानुबन्धादनवरतमुरो हन्ति हारोऽयमस्याः
क्रीडन्त्याः पीडयेव स्तनभरविनमन्मध्यभङ्गानपेक्षम् ॥१६॥

विदूषकः— भो वयस्य, अहमप्येतेषां वधूपरिजनानां मध्ये नृत्यन् मदनमहोत्सवं मानयिष्यामि ।

1 स्रस्त a. hanging down, loosened. 2 स्रज् f. (स्रग्) garland 3 दामन् n. string (nom. and acc. s. and in compounds दाम). 4 शोभा f. beauty. 5 त्यजति it abandons; √ त्यज् 1P. 6 विरचित arranged; pp. वि + √ रच् 10U. 7 आकुल confounded, distracted. 8 केश hair. 9 क्षीब a. excited, drunken. 10 पाशः mass. 11 नूपुर m. n. anklet. 12 द्विगुण a twofold. 13 द्विगुणतरम् ad. in a twofold way. 14 क्रन्दतः they two creak, cry, √ क्रन्द् 1P. 15 पाद foot. 16 लग्न stuck; pp. √ लग् 1P. 17 व्यस्त a. upset. 18 कम्प tremor. 19 अनुबन्ध continuity. 20 अनवरतम् continually. 21 उरस् n (acc s. उरः) breast. 22 हन्ति it strikes, √ हन् 2P. 23 हार. pearl-necklace. 24 क्रीडत् (gen s. f. क्रीडन्त्याः) playing; pres. part. √ क्रीड् 1P 25 पीडा f. pain, torment. 26 स्तनभर weight of breasts. 27 विनमत् bending. 28 मध्य· waist. 29 भङ्ग breaking, contraction 30 अनपेक्षम् indifferently, without regard 31 वधूपरिजन maid-attendant.

क्षीबाया स्तनभरविनमन्मध्यभङ्गानपेक्ष क्रीडन्त्या अस्या स्रस्तः आकुलः केशपाश विरचिता स्रग्दामशोभा त्यजति, इमौ च पादलग्नौ नूपुरौ द्विगुणतर क्रन्दतः, कम्पानुबन्धात् व्यस्त अय हार· अनवरत उरः पीडया इव हन्ति ॥ स्रग्धरा ।

The distracted, low-hanging hair of the drunken girl playing regardless of the breaking of the waist bending under the burden of the breasts abandons the charm of well-decorated garland-string, the pair of her anklets clinging to the feet shriek in a redoubled manner, and this pearl-necklace of hers continually strikes the bosom as if troubled on account of the series of tremor due to her movement.

Clown — Hello friend, I, too, will honour the grand Festival of Love by dancing in the midst of these maids.

राजा— (सस्मितम्) वयस्य, एवं क्रियताम् ।

विदूषक :— यद्भवानाज्ञापयति । (उत्थाय चेटयोर्मध्ये नृत्यति) भवति मदनिके ! भवति चूतलतिके ! मामप्येतच्चर्चरिकं शिक्षापयथ ।

उभे— भो वयस्य हताश, न खलु एषा चर्चरी । द्विपदीखण्डं खलु एतत् ।

विदूषक :— (सहर्षम्) किमेतेन खण्डेन मोदकाः क्रियन्ते ?

मदनिका— (विहस्य) नहि नहि । पठ्यते खल्वेतत् ।

1 सस्मितम् ad with a smile. 2 क्रियताम् (त्वया) let it be done (by thee), thou shouldest do so. (passive impersonal) कर्मणि लोट् √ कृ 8 U. 3 यत् as 4 भवत् (nom m.s. भवान् , voc. f s. भवति) Your Honour ; an honorific term of address. 5 उत्थाय gerund of उद् + √ स्था 1 P. to rise 6 नृत्यति he dances ; √ नृत् 4 P. 7 चर्चरिक a kind of dance & song. 8 शिक्षापयथ you teach ; caus. लट् √ शिक्ष् 1 A. 9 हताश hopeless, wretched. 10 मोदक sweetmeat. 11 सहर्षम् ad. joyfully. 12 विहस्य gerund of वि + √ हस् 1 P. to laugh. 13 पठ्यते it is read, recited ; कर्मणि लट् √ पठ् 1 P.

K i n g — (with a smile) Friend, do so

Clown — As your Honour commands me. (Rising, and dances between the two maids) Lady Madanikā, lady Chūtalatikā ! You teach me this Charchari, too.

B o t h — O hopeless friend, this is not indeed a Charchari, this is really a piece of Dvipadī

Clown — (joyfully) Are sweetmeats made of this ?

Madanikā—(Laughing) Nay, nay, this is really recited.

विदूषकः— (सविषादम्) यदि पठ्यते तदलमेतेन। वरं प्रियवयस्यस्यैव सकाशं गमिष्यामि। (गन्तुमिच्छति)

उभे— एहि क्रीडामः। वसन्तक, कुत्र गच्छसि ? (इति बहुविधं वसन्तकमाकर्षतः। विदूषकश्च बलाद्गच्छति।)

विदूषकः— (राजानमुपसृत्य) वयस्य, नर्तितोऽस्मि। नहि नहि, क्रीडित्वा पलायितोऽस्मि।

राजा— साधु कृतम्।

चूतलतिका— हञ्जे मदनिके, चिरं खल्वावाभ्यां क्रीडितम्। तदेहि निवेदयावस्तावत् भट्टिन्याः संदेशं महाराजस्य।

मदनिका— एहि, त्वरावः।

1 विषाद dejection 2 सविषादम् sorrowfully 3 यदि if 4 अलम् ( + ins and gerund ) away with, enough of 5 वरम् it is better to, 6 सकाशम् ind. = समीपम् near in the presence of 7 गमिष्यामि I shall go, लृट् √ गम् 1 P 8 गन्तुम् to go, inf √गम् 9 इच्छति he wishes √ इष् 6 P 10 एहि go thou (but it is often used in the sense of ' come ! ') लोट् √ इ 2 P 11 क्रीडामः we play, √ क्रीड् 1 P 12 कुत्र where 13 बहुविधम् ad in manifold ways 13 आकर्षतः they two pull आ + √ कृष् 6 U 14 बलात् forcibly 15 उपसृत्य gerund of उप + √ सृ 1 3 P to approach 16 नर्तित made to dance, caus PP √ नृत् 1 P 17 पलायित fled, run away; PP √ पलाय् 1 A 18 हञ्जे o maid ! (a vocative particle) 19 चिरम् for a long time 20 निवेदयाव we inform, communicate, caus नि + √ विद् 1 2 P 21 तावत् now. 22 भट्टिनी queen 23 संदेश message 24 त्वराव we two creep, √ त्वर् 1 P to creep 1 A to haste

Clown — (dejected) Away with it, if it is to be recited I had better go to the presence of my dear friend (intends to go)
Both — Come let's play Vasantaka, where are you going ? (Thus by many means they pull him, but the jester goes away by force)
Clown—(approaching the king) O Pal, I have been made to dance Nay nay rather I have fled after playing
King — Well done !
Chūtalatika—O maid Madanikā we have been playing for a long time So now let us communicate the queen's message to the king
Madanika—Come, let us hurry up (or creep)

उभे— (उपसृत्य) जयतु जयतु भर्ता । भर्तः देवी आज्ञापयति । (इत्यर्धोक्ते लज्जा नाटयन्त्यौ) नहि नहि, विज्ञापयति ।

राजा— (सहर्षं विहस्य सादरम्) नन्वाज्ञापयतीत्येव रमणीयम् । विशेषतोऽद्य मदनमहोत्सवे । तत्कथय किमाज्ञापयति देवी ।

विदूषक :— आः दास्याः पुत्रि । किं देवी आज्ञापयति ।

चेट्यौ— एवं देवी विज्ञापयति । अद्य खलु मया मकरन्दोद्यानं गत्वा रक्ताशोकपादपतलसंस्थापितस्य भगवतः कुसुमायुधस्य पूजा निर्वर्तयितव्या । तत्र आर्यपुत्रेण संनिहितेन भवितव्यम् ।

1 जयतु may he gain victory, लोट् √ जि 1 P 2 भर्तृ m (nom s भर्ता, voc. s भर्तर्) lord 3 देवी queen 4 आज्ञापयति she commands, caus लट् आ + √ ज्ञा 9 U 5 अर्धोक्त half spoken, PP अर्ध + √ वच 2 P 6 लज्जा f shame 7 विज्ञापयति she informs respectfully 8 आदर respect 9 सादरम् respectfully 10 ननु certainly 11 रमणीय delightful 12 विशेषतस् and particularly, especially 13 विशषत. especially. 14 तत् so 15 कथय tell thou, लोट √ कथ 10 U 16 दासी f female servant (it is often used in a mocking way) 17 पुत्री (Voc s पुत्रि) daughter 18 किम what? 19 मकरन्द flower-honey 20 उद्यानम garden 21 रक्त red 22 पादप tree 23 तल m n base 24 संस्थापित fixed, erected, caus PP सम् + √ स्था 1P 25 भगवत् lord, god 26 पूजा f worship 27 निर्वर्तयितव्य to be performed, pot PP caus निस् + √ वृत् 1A 28 आर्यपुत्र husband 29 संनिहित present

Both —(creeping) May Your Mjesty be victorious ! Sire, the queen commands ... (Half-saying became bashful) No, no Respectfully she informs

King —(joyfully laughing, with respect) Certainly, it is delightful that she commands, especially on the occasion of Grand Love Festival So tell us what the Queen commands

Clown —Ah, you daughter of a slave girl ! What, the queen commands ?

Two maids—Her Majesty informs thus —"Today, I am going to the garden of flower-honey and will worship the God of Love erected on the base of a red Ashoka tree I hope my husband should be present there"

राजा— (सानन्दम्) वयस्य, ननु वक्तव्यमुत्सवादुत्सवान्तरमापतितम् ।
विदूषक :— भो वयस्य, तदुत्तिष्ठ तत्रैव गच्छावः येन तत्र गतस्य ब्राह्मण-वालकस्य मम स्वस्तिवायनं किमपि भविष्यतीति ।
राजा— मदनिके, गम्यतां देव्यै निवेदयितुमयमहमागत एव मकरन्दोद्यानमिति ।
चेट्यौ— यद्भर्ताऽऽज्ञापयति । (इति निष्क्रान्ते)
राजा— वयस्य, आदेशय मकरन्दोद्यानस्य मार्गम् ।
विदूषक :— एतु, एतु भर्ता (इति परिक्रामत)

1 आनन्दः joy. 2 सानन्दम् joyfully. 3 वक्तव्यम् (भावे प्रयोगः) it must be said; pot. PP. √ वच् 2 P. 4 उत्सवान्तरम् (नित्यः समासः) = अन्यः उत्सवः another festival 5 आपतित befallen ; PP· आ + √ पत् 1P. 6 उत्तिष्ठ stand up thou ; लोट्, उद् + √ स्था 1 P. 7 येन so that, whereby. 8 ब्राह्मणः Brahmin. 9 वालकः boy. 10 स्वस्तिवायनम् sweetmeat offered to Brahmins on ceremonial occasions. 11 किमपि some; 12 भविष्यति it will be ; लृट् √ भू 1 P. 13 निवेदयितुम् to inform; inf. caus. नि + √ विद् 1.2 P. 14 आगत come, PP. आ+ √ गम् 1P. 15 निष्क्रान्त departed, PP. निस् + √ क्रम् 1 U. 4 P. 16 आदेशय show thou; caus. लोट् आ + √ दिश् 6 U. 17 मार्गः way. 18 परिक्रामतः they two walk about ; परि + √ क्रम् 1U 4P. 19 एतु let him come (literally let him go) लोट् √ इ 2 P.

King —(in a joy) O friend, certainly we must say that another festival has occurred out of the festival

Clown —Ho my friend, rise, let us just go there, so that I may have some sweetmeat when I, a Brahmin boy, arrive there.

King —Madanikā, go and inform the Queen that I am just coming to the Garden of Honey.

Two maids—As my lord commands. (move out).

King —My companion, show us the way to the Garden of Honey.

Clown —Come this way. (They two walk round.)

विदूषक :— (अवलोक्य सविस्मयम्) एतत्तन्मकरन्दोद्यानं तदेहि प्रविशावः। (इति प्रविशत) भो महाराज, प्रेक्षस्व प्रेक्षस्व तावदेतत् खलु मलयमारुतान्दोलितमुकुलायमानसहकारमञ्जरीरेणुपटलप्रतिबद्ध-पटवितानं मत्तमधुकरमुक्तझङ्कारमिलितकोकिलालापसंगीत-सुखावहं तवागमनदर्शितादरमिव मकरन्दोद्यानं लक्ष्यते। तत्प्रविशतु भवान्।

1 अवलोक्य gerund of अव + √ लोक् 1 A. 10 U. to see. 2 विस्मय, wonder. 3 सविस्मयम् ad. in wonderment. 4 एहि go thou; लोट् √ इ 2 P 5 प्रविशावः we two enter; प्र + √ विश् 6 P. 6 मलय a mountain range in S. India 7 मारुतः wind. 8 आन्दोलित swung, shaken; PP. √ आदोल 10 P. 9 मुकुलायमान budding, नामधातु मुकुलाय्. 10 सहकारः mango tree. 11 मञ्जरी f cluster of blossoms 12 रेणु m. f. pollen. 13 पटलम् heap, mass. 14 प्रतिबद्ध bound, furnished with; PP.प्रति + √ बन्ध् 9 P. 15 वितान m n. canopy. *16 पट m n. fine cloth* 17 मलयमारुता – वितानम् = मलयस्य मारुतेन आन्दोलिताः मुकुलायमानसहकारमञ्जर्य. तासा रेणुपटलेन प्रतिबद्ध पटस्य वितान यास्मिन् तत् 18 मत्त intoxicated. 19 मधुकरः bee. 20 मुक्त released, PP √ मुच् 6 P. 21 झंकारः humming. 22 मिलित joined; PP. √ मिल् 6P. 23 कोकिलः cuckoo. 24 आलाप warbling. 25 संगीतम् music. 26 सुखावह comfortable, pleasant. 27 आगमनम् coming 28 दर्शित shown; caus PP. दृश् 1P. आगमनदर्शितादरम्=आगमनेन (आगमने) दर्शितः आदरः येन तत्

Clown —(Beholding in wonder) This is the very Garden of Honey. Come, let us enter *(They enter) O king, now behold, behold! This garden* appears to display its respect on thy arrival, delightfully performing a canorous concert of the warblings of the cuckoos and hummings sung by the intoxicated honey-bees, with its canopy of fine cloth furnished by the heaps of pollen from the blooming blossoms of the mango trees shaken by the breeze from the Malaya mountain. May Your Majesty, therefore, enter.

राजा — (समन्तादवलोक्य) अहो मकरन्दोद्यानस्य परा श्रीः । इह हि,

उद्यद्विद्रुमकान्तिभिः किसलयैस्ताम्रां त्विषं बिभ्रतो
भृङ्गालीविरुतैः कलैरविशदव्याहारलीलाभृतः ।
घूर्णन्तो मलयानिलाहतिचलैः शाखासमूहैर्मुहु-
र्भ्रान्तिं प्राप्य मधुप्रसंगमधुना मत्ता इवामी द्रुमाः ॥ १७॥

1 श्री f beauty 2 उद्यत् a rising, lofty 3 विद्रुम coral tree 4 कान्ति beauty 5 उद्यद्विद्रुमकान्तिभि = उद्यता विद्रुमाणां कान्ति इव कान्ति येषा तैं 6 किसलय m n sprout, tender leaf 7 ताम्र red 8 त्विष f lustre 9 बिभ्रत (nom m p बिभ्रत) bearing, pres part. √ भृ 3P 10 भृङ्ग large black bee 11 आली f row line 12 विरुतम् humming 13 कल melodious 14 अविशद indistinct 15 व्याहार voice, speech. 16 लीला f semblance 17 भृत a (समासान्ते) bearing, having 18 अविशदव्याहारलीलाभृत अविशदस्य व्याहारस्य लीला बिभ्रति ये ते 19 घूर्णत् (nom m p घूर्णन्त) shaking, pres part. √ घूर्ण 1 A 6P 20 अनिल wind 21 आहति f blow 22 चल a moving. 23 मलयानिलाहतिचलैं = मलयानिलस्य आहतिभि चलैं 24 शाखा f bough, branch 25 भ्रान्ति. f wandering 26 प्राप्य gerund, प्र + √ आप् 5 P to obtain 27 मधु m spring; n honey a sweet 28 द्रुम tree 29 मत्त drunk

उद्यद्विद्रुमकान्तिभि किसलयै ताम्रा त्विष बिभ्रत कलै भृङ्गालीविरुतै अविशदव्याहारलीलाभृत मलयानिलाहतिचलै शाखासमूहै घूर्णन्त मुहु भ्रान्ति प्राप्य अमी द्रुमा मधुप्रसगमधुना मत्ता इव ॥ शार्दूलविक्रीडितम् ।

King —(looking around) Oh, excellently beautiful is the Garden of Honey! For here,

On account of the delicate foliages lovely as rising coral trees, bearing a reddish lustre, possessing the semblance of indistinct speech because of the melodious humming of the rows of large bees, and shaking with their boughs moving at the strokes of the Malaya wind, these trees, giddy, seem to be intoxicated with the Spring wine

अपि च।

मूले गण्डूपसेकासव इव बकुलैर्वास्यते पुष्पवृष्ट्या
मध्वाताम्रे तरुण्या मुखशशिनि चिराच्चम्पकान्यद्य भांति ।
आकर्ण्याशोकपादाहतिषु च रसितं निर्भरं नूपुराणां
झङ्कारस्यानुगीतैरनुकरणमिवारभ्यते भृङ्गसार्थैः ॥ १८ ॥

मूलम् base, root. 2 गण्डूषः mouthful. 3 सेकः sprinkling. 4 आसवः liquor. 5 वास्यते it is perfumed ; कर्मणि लट् √ वास् 10P. 6 पुष्पम् flower. 7 वृष्टिः f. shower. 8 आताम्र slightly red. 9 मध्वाताम्रे = मधुना आताम्रे 10 तरुणी (gen. s. तरुण्याः) damsel. 11 मुखम् face. 12 शशिन् m. moon. 13 चिरात् after a long time. 14 चम्पकम् the name of a flower. 15 भान्ति they shine ; √ भा 2P. 16 आकर्ण्य gerund, आ + √ कर्ण् 10U. to hear. 17 अशोकपादाहतिषु=अशोकेषु पादाभ्यां आहतिषु. 18 रसितम् sound. 19 निर्भर excessive. 20 अनुगीत sung after – ; PP. अनु + √ गै 1P. 21 अनुकरणम् imitation. 22 आरभ्यते it is begun ; कर्मणि लट् आ + √ रभ् 1A. 23 सार्थः multitude.

मूले गण्डूषसेकासवः बकुलैः पुष्पवृष्ट्या वास्यते इव, मध्वाताम्रे तरुण्याः मुखशशिनि चम्पकानि अद्य चिरात् भान्ति, अशोकपादाहतिषु च निर्भरं नूपुराणां रसितं आकर्ण्य भृङ्गसार्थैः अनुगीतैः झङ्कारस्य अनुकरणं आरभ्यते इव ॥ स्रग्धरावृत्तम्

And also,

A mouthful of wine sprinkled at the root is scented by Bakulas with a shower of blossoms, as it were, the Champakas shine today after a long time as the moon-face of a damsel is slightly red on account of wine, and hearing the excessive sound of the anklets at the time of kicking the Ashoka trees by the feet, the swarms of large black bees begin to sing in imitation of the jingling sound.

विदूषक :— (श्रुत्वा) भो वयस्य, नैते मधुकरा नूपरशब्दं अनुहरन्तः। नूपुरशब्द एवैष देव्याः परिजनस्य।

राजा — वयस्य, सम्यगुपलक्षितं भवता।

(तत प्रविशति उज्ज्वलवेषा वासवदत्ता काञ्चनमाला च पूजोपकरणहस्ता सागरिका च।)

वासवदत्ता — हञ्जे काञ्चनमाले, आदेशय मकरन्दोद्यानस्य मार्गम्।

काञ्चनमाला — एतु एतु भट्टिनी।

वासवदत्ता — (परिक्रम्य) हञ्जे काञ्चनमाले, अथ कियद्दूरे स रक्ताशोकपादपो यत्र मया भगवतः कुसुमायुधस्य पूजा निर्वर्तयितव्या।

1 श्रुत्वा gerund, √श्रु 5P to hear 2 शब्द sound. 3 नूपुरशब्दम्=नूपुराणा शब्दम्. अनुहरत् (nom m p. अनुहरन्त) imitating; pres. part अनु + √ हृ 1U 5 परिजनः attendant, retinue 6 उपलक्षित observed PP. उप + √ लक्ष् 1A. 10 U. 7 उज्ज्वल bright. 8 वेषः dress. 9 उज्ज्वलवेषा = उज्ज्वल वेषः यस्या सा 10 उपकरणम् material. 11 हस्तः hand 12 पूजोपकरणहस्ता=पूजोपकरण हस्ते यस्याः सा 13 अथ ind. now. 14 कियत् a. how much. 15 दूरम् distance, दूर far, दूरे far away. 16 यत्र relat. ad. where.

Clown —(hearing) Ho friend, it is not the bees that are imitating the sound of anklets It is the very anklet sound of the retinue of the queen.

King —Friend, you have well observed

(At that time enter Vāsavadattā in bright attire, Kānchanamālā and Sāgarikā with Pūjā materials in her hand )

Vāsavadattā—Maid Kānchanamālā, show us the way to the garden of Honey.

Kānchanamālā—My queen come this way

Vāsavadattā—(walking round) Maid Kānchanamālā, now how far is it to the red Ashoka tree where I have to worship the Lord of Love ?

काञ्चनमाला — भट्टिनि, आसन्न एव किं न प्रेक्षते भट्टिनी। इयं खलु सा निरन्तरोद्भिन्नकुसुमशोभिनी भट्टिन्या परिगृहीता माधवीलता। एषाऽपरा नवमालिकालता यस्या अकालकुसुमसमुद्गमश्रद्धालुना भर्त्रानुदिनमायास्यत आत्मा। तदेनामतिक्रम्य दृश्यत एव स रक्ताशोकपादपो यत्र देवी पूजां निर्वर्तयिष्यति।

वासवदत्ता — तदेहि तत्रैव लघु गच्छामः।

काञ्चनमाला — एतु एतु भट्टिनी। (सर्वा परिक्रामन्ति)

वासवदत्ता — अयं स रक्ताशोकपादपो यत्राहं पूजां निर्वर्तयिष्ये। तत्पूजानिमित्तान्युपकरणानि मे उपनय।

1 आसन्न near, imminent 2 प्रेक्षते she sees; प्र + √ ईक्ष् 1 A. 3 निरन्तर a. *constant, faithful.* 4 उद्भिन्न *produced, germinated*, *PP* उद् + √ भिद् *7U.* 5 कुसुमम् flower. 6 शोभिन् a. (nom s f शोभिनी) charming. 7 परिगृहीत accepted, favoured; PP. परि + √ ग्रह 9U. 8 माधवीलता f. the spring creeper. 9 अपर another 10 नवमालिका-लता f. a kind of jasmine 11 अकाल *a untimely, premature.* 12 समुद्गम. budding, origin. 13 श्रद्धालु a believing in, longing for 14 अनुदिनम् everyday. 15 आयास्यते it is afflicted, troubled; caus pass. आ + √ यस् 4P. 16 आत्मन् (nom. s. आत्मा) m self, mind 19 अतिक्रम्य having crossed over; gerund अति + √ क्रम् 1U. 4P. 18 लघु lightly, quickly 19 निमित्तम् cause, reason 20 उपनय offer, or bring thou, लोट् उप + √ नी 1U

Kānchanamālā—*O queen, it is near.* Does Your *Majesty not see? This is,* indeed, the spring-creeper favoured by Your Majesty beautiful on account of its constant blooming There is another Navamālikā jasmine here, longing for and believing in the untimely blossoming of which His Majesty is anxious. Beyond this is the red Ashoka tree seen where Your Majesty will worship

Vāsavadattā—Then come, let us go there quickly

Kānchanamālā—*May the queen proceed (All walk round).*

Vāsavadattā—Here is the red Ashoka where I will worship. Do bring me the materials for worshipping.

सागरिका — (उपसृत्य) भट्टिनि, एतत्सर्वं सज्जम् ।

वासवदत्ता — (निरूप्यात्मगतम्) अहो प्रमादः परिजनस्य । यस्यैव दर्शनपथात्प्रयत्नेन रक्ष्यते तस्यैव दृष्टिगोचरे पतिता भवेदियम् । भवतु । एवं तावद्भणिष्यामि । (प्रकाशम्) हञ्जे सागरिके, कस्मात्त्वमद्य मदनमहोत्सवपराधीने परिजने सारिकामुज्झित्वेहागता । तत्तत्रैव लघु गच्छ । एतदपि सर्वं पूजोपकरणं काञ्चनमालाया हस्ते समर्पय ।

सागरिका — यद्भट्टिन्याज्ञापयति । (इति कतिचित्पदानि गत्वा आत्मगतम्) सारिका मया पुनः सुसङ्गताया हस्ते समर्पिता । एतदप्यस्ति मे प्रेक्षितुं कौतूहलम् ।

1 सज्ज a, ready 2 निरूप्य gerund of नि + √ रूप् 10U to look. 3 आत्मगतम् aside, to oneself (a dramatic term) 4 प्रमाद blunder, negligence 5 दर्शनपथ range of sight 6 प्रयत्न labour effort 7 रक्ष्यते she is kept away, is avoided; √रक्ष् 1P 8 दृष्टिगोचरे=दर्शनपथे 9 पतित fallen, PP √पत् 1P 10 भवेत् she should be, विधिलिङ् √भ 1P 11 भवतु well 12 पराधीन dependent upon others (this may be rendered as absorbed in महोत्सव) 13 मदनमहोत्सवपराधीने परिजने (सति) a locative absolute construction 14 सारिका f canary, parrot 15 कस्मात् why? 16 भणिष्यामि I will say, लृट् √भण् 1P 17 प्रकाशम् aloud (a dramatic term) 18 उज्झित्वा gerund; √उज्झ् 6P. to abandon 19 समर्पय hand over, entrust thou, caus लोट् √ऋ 1. 3P 20 कतिचित् some, several 21 पुनर् but 22 कौतूहलम् curiosity.

Sāgarikā—(Advancing) O queen, everything is ready

Vasavadattā—(carefully looking at her, to herself) Ah! The attendants' negligence Should she, who is kept away from his sight through much effort, fall into it well, I will say thus (Aloud) O maid Sāgarikā, why have you come over here abandoning the Sarikā bird when the attendants are absorbed in the grand Love Festival? So go there quickly Also, hand over all these worshipping materials to the hand of Kānchanamala

Sāgarikā—As Your Majesty commands (Having gone a few steps, to herself) The Sārika was entrusted by me to the hand of Susangata Yet I am curious to see the worshipping, too

किं यथा तातस्यान्तःपुरे भगवाननङ्गोऽर्च्यते, अत्रापि तथैव किमन्यथेति। तदलक्षिता भूत्वा प्रेक्षिष्ये। (परिक्रम्यावलोक्य च) तद्यावदिह पूजासमयो भवति तावदहमपि भगवन्तमनङ्गमेव पूजयितुं कुसुमान्यवचेष्यामि। (इति कुसुमावचयं नाटयति)

वासवदत्ता — काञ्चनमाले, प्रतिष्ठापयाशोकमूले भगवन्तं प्रद्युम्नम्।

काञ्चनमाला — यद्भट्टिन्याज्ञापयति। (इति तथा करोति)

विदूषकः— (परिक्रम्यावलोक्य च) भो वयस्य, यथा विश्रान्तो नूपुरशब्दस्तथा तर्कयाम्यागता देव्यशोकमूलमिति।

1 यथा ~ तथा as ~ so. 2 तातः papa, dear father. 3 अन्तःपुरम् harem. 4 अनङ्गः Cupid (literally, the formless one) 5 अर्च्यते he is worshipped; कर्मणि लट् √अर्च् 1U 6 अत्र here 7 अन्यथा otherwise. 8 अलक्षित unobserved 9 यावत् ~ तावत् while 10 समयः time. 11 पूजयितुम् to worship; inf. √पूज् 10U 12 अवचेष्यामि I will gather; लृट् अव + √चि 5U. 13 अवचयः ~ *gathering*. 14 प्रतिष्ठापय *fix, erect thou*; caus. लोट् प्रति + √स्था 1P. 15 प्रद्युम्न Cupid. 16 विश्रान्त eased, rested, PP वि + √श्रम् 4P. 17 तर्कयामि I conjecture; √ तर्क् 10U.

*Placing myself in concealment* I shall see whether the formless God of Love is worshipped here as he is in the harem of my dear dad, or otherwise. (Walking about and looking) I will, also, gather flowers to worship the Lord of Love while (till) it is the time for worshipping. (Thus gesticulates gathering flowers).

Vāsavadattā—Kānchanamālā, establish the God of Love at the base of the Ashoka.

Kānchanamālā — Madame, *I will do so*. (*She does so*.).

Clown — (*walking round and observing*) O *friend*, as the sound of the anklets has ceased, I imagine the queen has reached the foot of the Ashoka tree.

राजा — वयस्य, सम्यगवधारितम् । पश्येयं देवी । या किलैषा,

कुसुमसुकुमारमूर्तिर्दधती नियमेन तनुतरं मध्यम् ।
आभाति मकरकेतोः पार्श्वस्था चापयष्टिरिव ॥ १६ ॥ आर्या

तदेहि उपसर्पावः । (उपसृत्य) प्रिये वासवदत्ते ।

वासवदत्ता — (विलोक्य) कथमार्यपुत्रः । जयतु जयतु आर्यपुत्रः । अलंकरोत्विमं देशमासनपरिग्रहेण । एतदासनं, अत्रोपविशत्वार्यपुत्रः ।

(राजा नाट्येनोपविशति)

काञ्चनमाला — भट्टिनि, स्वहस्तदत्तैः कुसुमकुंकुमचन्दनवासोभिः शोभितं रक्ताशोकपादपं गत्वार्च्यतां भगवान्प्रद्युम्नः ।

1 अवधारित determined, known; PP caus अव+√धृ 10U 2 पश्य see thou; लोट् √दृश् 1P 3 किल verily, 4 एषा ~ या she who ~ 5 सुकुमार very tender, delicate 6 मूर्ति. f form, image 7 कुसुमसुकुमारमूर्ति = कुसुम इव सुकुमारा मूर्ति यस्या सा 8 दधत् (nom s f दधती) placing holding, pres part √धा 3U 9 नियम penance 10 तनुतर thinner 11 आभाति she seems, appears, आ+√भा 2P 12 मकरकेतो (nom s मकरकेतु॰) Cupid 13 चाप bow 14 यष्टि f stick, staff, a (समासान्ते) delicate, tender 15 उपसर्पाव we two approach, उप+√सृप् 1U 16 प्रिय (voc s f प्रिये) dear, darling. 17 अलंकरोतु let him decorate, लोट् अलम्+√कृ 8U. 18 देश॰ spot, place 19 आसनम् seat. 20 परिग्रह acceptance, favour 21 उपविशतु let him sit down, उप+√विश् 6P. 22 नाट्यम् acting 23 स्व one's own 24 दत्त given, PP √दा 3U 25 कुंकुमम् saffron. 26 चन्दन m n sandal 27 वासस् n (ins p वासोभि) cloth 28 शोभित decorated, brightened, PP √शुभ् 1A

King —Friend, you have well understood See the queen! Verily, she who possesses a form so tender as a flower bearing her waist thinner due to her penance appears like the bow-staff standing beside Cupid So come, let us approach (Advancing) O darling Vāsavadatta!

Vasavadatta—(Beholding) How, it is my lord! May my lord be victorious! Pray decorate this spot by taking a seat Here is the seat. My husband will be seated here
(The king sits down)

Kānchanamālā—O queen, repairing close to the red Ashoka beautifully decorated by your own hands with flowers, saffron, sandal and garment, pray worship Lord Cupid

वासवदत्ता — उपनय मे पूजोपकरणानि ।

(काञ्चनमाला उपनयति । वासवदत्ता तथा करोति)

राजा — प्रिये,

प्रत्यग्रमज्जनविशेषविविक्तकान्तिः
कौसुम्भरागरुचिरस्फुरदंशुकान्ता ।
विभ्राजसे मकरकेतनमर्चयन्ती
बालप्रवालविटपिप्रभवा लतेव ॥ २० ॥

1 प्रत्यग्र very fresh. 2 मज्जनम् ablution. 3 विशेष: distinction. 4 मज्जनविशेष: special bath. 5 विविक्त pure 6 कान्ति f. beauty. 7 प्र-यग्रमज्जनविशेषविविक्तकान्ति:= प्रन्यग्रेण मज्जनविशेषेण विविक्ता कान्ति: यस्या: सा. 8 कौसुम्भ a. prepared with or dyed with saffron. 9 राग: colour. 10 रुचिर lovely. 11 स्फुरत् glittering, pres. part. √स्फुर् 6P. 12 अशुकम् silk *garment* 13 अन्त: *edge, border, end.* 14 कौसुम्भरागरुचिरस्फुरदंशुकान्ता= कौसुम्भरागेण रुचिर अशुकस्य अन्त: स्फुरन् यस्या' तादृशी. 15 विभ्राजसे thou shinest; वि+√भ्राज् 1A. 16 बाल young. 17 प्रवालम् coral. 18 विटपिन् m (in compounds विटपि) tree. 19 प्रभव: birth. 20 बालप्रवालविटपिप्रभवा=बाल: प्रवालविटिपी तस्मिन् प्रभव यस्या. सा. 21 लता f. creeper. 22 मकरकेतन: cupid.

प्रत्यग्रमज्जनविशेषविविक्तकान्ति· कौसुम्भरागरुचिरस्फुरदशुकान्ता मकरकेतन अर्चयन्ती बालप्रवाल-विटपिप्रभवा लता इव विभ्राजसे ॥ वसततिलका ।

Vāsavadattā—Do bring me the worshipping materials. (Kanchanamālā offers them. Vāsavadattā worships.)

King —My beloved!

With your beauty purified by a fresh, special ablution and the lovely edge of your silk dress dyed with saffron colour glittering, you, *now worshipping the God of Love, shine like a creeper begotten* from a young coral tree.

अपि च ।

स्पृष्टस्त्वयैव दयिते स्मरपूजाव्यापृतेन हस्तेन ।
उद्भिन्नापरमृदुतरकिसलय इव लक्ष्यतेऽशोकः ॥ २१ ॥

अपि च ।

अनङ्गोऽयमनङ्गत्वमद्य निन्दिष्यति ध्रुवम् ।
यदनेन न संप्राप्तः पाणिस्पर्शोत्सवस्तव ॥ २२ ॥

काञ्चनमाला — भट्टिनि, अर्चितो भगवान् प्रद्युम्नः । तत्कुरु भर्तुरुचितं पूजासत्कारम् ।

1 स्पृष्ट touched, PP √स्पृश् 6P 2 दयित a (voc s f दयिते) beloved 3 स्मर god of love. 4 व्यापृत busily engaged in, PP व्या + √पृ 6A 5 उद्भिन्न formed, produced, PP उद् + √भिद् 7U 6 अपर matchless, another 7 मृदुतर tenderer, soft 8 किसलय m n shoot tender leaf 9 अनङ्गत्वम् formlessness, invisibility 10 निन्दिष्यति he will condemn, लृट √निन्द् 1P 11 ध्रुवम् ad very much, firmly. 12 यत्=यस्मात्, यतस् 13 संप्राप्त obtained, secured, PP सम् + प्र + √आप् 5P 14 पाणि m hand 15 स्पर्श touch 16 उत्सव joy. 17 पाणिस्पर्शोत्सव = पाणिस्पर्श तेन उत्सव. 18 उचित appropriate, suitable 19 सत्कार adoration, honour 20 उद्भिन्नापरमृदुतरकिसलय = उद्भिन्न अपर मृदुतर किसलय यस्य स

दयिते ! त्वया स्मरपूजाव्यापृतेन हस्तेन स्पृष्ट एव अशोक उद्भिन्नापरमृदुतरकिसलय इव लक्ष्यते ॥ आर्या ॥

अद्य अयं अनङ्ग अनङ्गत्व ध्रुव निन्दिष्यति यत् अनेन तव पाणिस्पर्शोत्सव न संप्राप्त ॥ अनुष्टुप् ॥

And

O beloved, just touched by thy hand busily engaged in the worship of Cupid the Ashoka appears as if it has put on another tenderer foliage

And moreover,

This formless Cupid will today very much reproach his own formlessness, for the joy of being touched by thy hand is not obtained by him

Kanchanamālā—O queen God of Love is worshipped So now perform appropriate adoration to your lord

वासवदत्ता — तेन ह्युपनय मे कुसुमानि विलेपनं च ।

काञ्चनमाला — भट्टिनि, एतत्सर्वं सज्जम् । (वासवदत्ता नाटयेन राजानं पूजयति)

सागरिका — (गृहीतकुसुमा) हा धिक् हा धिक् । कथं कुसुमलोभोत्क्षिप्तहृदययातिचिरमेव मया कृतम् । तदनेन सिन्धुवारविटपेनापवारितशरीरा भूत्वा प्रेक्षे । (विलोक्य) कथं प्रत्यक्ष एवापूर्वः कुसुमायुधः । अस्माकं तातस्यान्तःपुरे चित्रगतोऽर्च्यते । इह प्रत्यक्षीकृतः । तदहमप्येभिः कुसुमैरिह स्थितैव भगवन्तं कुसुमायुधं पूजयिष्ये । (इति कुसुमानि प्रक्षिपति)

1 विलेपनम् cosmetic, anointing material. 2 पूजयति she worships ; √पूज् 10U. 3 धिक् ind. fie on. 4 लोभः avarice, desire for. 5 उत्क्षिप्त struck with, seized by. 6 कुसुमलोभोत्क्षिप्तहृदयया=कुसुमलोभेन उत्क्षिप्तं हृदयं यस्या तया 7 अतिचिरम् *for a long time.* 9 सिन्धुवार name of a tree. 10 विटप tree. 11 अपवारित covered, caus. PP. अप+√वृ 1.5.9U. 12 शरीरम्. 13 अपवारितशरीरा = अपवारित शरीर यस्या सा. 14 प्रत्यक्ष visible. 15 अपूर्व quite new, strange. 16 चित्रगत =चित्रे गतः लिखितः. 17 प्रत्यक्षीकृत made visible. 18 स्थित (f. स्थिता) stood, PP.√स्था 1P. 19 प्रक्षिपति she throws forth ; प्र+√क्षिप् 6U.

Vāsavadattā—Then offer me the flowers and anointing cosmetic

Kānchanamālā—Your Majesty, everything is ready here.

(By acting Vāsavadattā worships the king.)

Sāgarikā—(holding flowers) Ah fie, ! Much time has been spent by me with my heart seized by the greed for flowers. So concealing my body with this Sindhuvāra tree I will see. (looking) How is it that the God of Love, so strange, is visible ! In my dear father's harem he *is worshipped in picture.* Here he is made to appear in true form. So standing here I will also worship the flower-arrowed God of Love with these flowers. (Thus, she throws the flowers forth.)

नमस्ते भगवन् कुसुमायुध, शुभदर्शनो मे भविष्यसि । दृष्टं यद्द्रष्टव्यम् । अमोघदर्शनो मे भविष्यसि । (इति प्रणमति) आश्चर्यमाश्चर्यम् । दृष्टोऽपि पुनः प्रेक्षितव्यः । तद्यावन्न कोऽपि मां प्रेक्षते तावदेव गमिष्यामि । (इति कतिचित्पदानि गच्छति)

काञ्चनमाला — आर्य वसन्तक, एहि सांप्रतं त्वमपि स्वस्तिवायनं प्रतीच्छ ।
(विदूषक उपसर्पति)

वासवदत्ता — (विलेपनकुसुमाभरणदानपूर्वकम्) आर्य स्वस्तिवायनं प्रतीच्छ । (इत्यर्पयति)

विदूषक :— (सहर्षं गृहीत्वा) स्वस्ति भवत्यै ।

1 नमस् ind salutation to 2 ते to thee 3 शुभ auspicious 4 दर्शनम् sight 5 शुभदर्शन = शुभं दर्शनं यस्य स 6 प्रणमति she bows, प्र + √नम् 1U 7 आश्चर्यम् miracle 8 अमोघ unfailing unerring 9 प्रेक्षितव्य pot PP प्र + √ईक्ष् 1A to observe, to gaze 10 क अपि anyone 11 गमिष्यामि I will go लृट् √गम् 1P 12 आर्य noble 13 साम्प्रतम् ind now 14 प्रतीच्छ receive thou, लोट् प्रति + √इष् 1P 15 आभरणम् ornament 16 दानम् giving 17 पूर्वक preceded by 18 स्वस्ति ind hail 19 गृहीत्वा gerund of √ग्रह् 9U. to seize

Salutation to thee, O flower arrowed god ! Show me an auspicious sight What is to be seen has been seen Appear unfailingly to me (Thus she salutes) Ah miracle, miracle ! Though seen he is again to be seen While nobody sees me I will go away (She goes several steps)

Kānchanamala—Sir Vasantaka, come, you, too receive a ceremonial sweetmeat
(The jester advances)

Vasavadatta—(After giving anointing cosmetic, flowers and ornament) Noble one, accept a sweetmeat
(she offers)

Clown—(joyfully accepting) Hail to your Ladyship !

(नेपथ्ये वैतालिक: पठति)

अस्तापास्तसमस्तभासि नभसः पारं प्रयाते रवा-
वास्थानीं समये समं नृपजनः सायंतने संपतन्।
संप्रत्येष सरोरुहद्युतिमुषः पादांस्तवासेवितुं
प्रीत्युत्कर्षकृतो दृशामुदयनस्येन्दोरिवोद्वीक्षते ॥ २३ ॥

सागरिका — (श्रुत्वा सहर्षं परिवृत्य राजानं दृष्ट्वा सस्पृहम्) कथमयं स राजा उदयनो यस्याहं तातेन दत्ता। तत्परप्रेषणकलुषमपि मे शरीरमेतस्य दर्शनेनेदानीं बहुमतं संवृत्तम्।

1 वैतालिक: bard. 2 अस्त: the Western mountain behind which the sun is supposed to set. 3 अपास्त flung or thrown away, pp. अप+√अस् 4U. 5 समस्त a. whole. 6 भास् f. ray. 7 अस्तापास्तसमस्तभासि=अस्ते अपास्ता समस्ता भास: येन तस्मिन्. 8 नभस् n (gen. s. नभस) sky. 9 पार m n. extreme limit, end. 10 प्रयात gone, PP. प्र+√या 2P. 11 रवि: m. sun. 12 अस्तापास्तसमस्तभासि रवौ प्रयाते (locative absolute) 13 आस्थानी f. assembly-room. 14 समय time 15 समम् together. 16 नृपजन. group of kings. 17 सायंतने a. belonging to evening. 18 संपतत् (nom m s. संपतन्) meeting together, pres. part. Act. सम्+√पत् 1P. 19 *संप्रति ind. now.* 20 *सरोरुहम्* lotus. 21 द्युति. f. light, beauty. 22 √मुष् 1.9P. to steal, to resemble. 23 सरोरुहद्युतिमुष:=सरोरुहाणां द्युतिं मुष्णन्ति ते तान्. 24 आसेवितुम् to serve; inf. आ+√सेव् 1A. 25 प्रीति. f love, joy. 26 उत्कर्ष: excess. 27 कृत् a (समासान्ते) doer, giver, accomplisher 27 दृश् f. eye. 28 इन्दु. m (gen s. इन्दो) moon. 29 उद्वीक्षते he waits for, उद्+√ईक्ष् 1A. 30 परप्रेषणम् menial service 31 बहुमत a. much prized. 32 संवृत्तम्=भूतम्.

अस्तापास्तसमस्तभासि रवौ नभसः पारं प्रयाते सायंतने समये आस्थानीं समं संपतन् एष नृपजनः संप्रति इन्दो (पादान्) इव दृशां प्रीत्युत्कर्षकृतः उदयनस्य तव सरोरुहद्युतिमुषः पादान् आसेवितुं उद्वीक्षते ॥ शार्दूलविक्रीडितम् ॥

(Behind the curtain a bard recites)

When the sun has gone to the end of the sky with his entire rays thrown over the western mountain, assembled together in the assembly-hall in the evening hour these princes are now waiting to pay respect to the feet, like the moon-beams stealing the beauty of lotuses, of thee, Udayana who givest excessive joy to the eyes.

Sāgarikā—(Having heard with joy, turning back and gazing on the king, affected.) How this is the king Udayana to whom I have been betrothed by my dear father! So my body, though insignificant due to my servitude, has now become much prized at his sight.

राजा — कथमुत्सवापहृतचेतोभिरस्माभिः सन्ध्यातिक्रमोऽपि नोपलक्षितः । देवि, पश्य ।

उदयतटान्तरितमियं प्राची सूचयति दिङ् निशानाथम् ।
परिपाण्डुना मुखेन प्रियमिव हृदयस्थितं रमणी ॥ २४ ॥

देवि, तदुत्तिष्ठावः । आवासाभ्यन्तरमेव प्रविशावः ।

(सर्वे उत्थाय परिक्रामन्ति)

सागरिका — कथं प्रस्थिता देवी । भवतु । त्वरितं गमिष्यामि । (राजानं सस्पृहं दृष्ट्वा निःश्वस्य) हा धिक् । मन्दभागिन्या मया प्रेक्षितुमपि चिरं न पारितोऽयं जनः । (इति निष्क्रान्ता)

1 अपहृत captivated, overpowered; PP. अप+√हृ 1U. 2 चेतस् n. mind. 3 उत्सवापहृतचेतोभिः=उत्सवेन अपहृतानि चेतांसि येषां तैः. 4 सन्ध्या f. twilight. 5 अतिक्रमः passing away, lapse. 6 उदय the Eastern mountain from which the sun and the moon are said to rise. 7 प्राची दिश् f. east. 8 निशानाथ lord of night, moon. 9 सूचयति she points out, reveals, √सूच् 10U. 10 तट. slope 11 अन्तरित screened, concealed; PP. अन्त+√इ 2P. 12 परिपाण्डु pale. 13 रमणी f. wife. 14 आवास. apartment, house. 15 अभ्यन्तरम् interior 16 त्वरितम् hurriedly. 17 निःश्वस्य gerund, निस्+√श्वस् 2P. to sigh. 18 मन्दभागिन् a. (ins.s.f. मन्दभागिन्या) hapless, unlucky. 19 पारित been able, possible, pp.√पृ 10U. 20 प्रस्थित departed, pp. प्र+√स्था 1P.

रमणी परिपाण्डुना मुखेन हृदयस्थितं प्रियं ((सूचयति)) इव इयं प्राची दिश् उदयतटान्तरितं निशानाथं सूचयति ॥ आर्यावृत्तम् ।

King—How we did not observe even the passing away of the twilight as our minds were captivated by the festival ! O queen, behold !

*As a mistress reveals with her pale face her lover fixed in her bosom*, the East points out the lord of night (the moon) screened behind the slopes of the Udaya mountain.

My queen, let us, therefore, rise, and enter into the palace.

(All rising walk round)

Sāgarikā—How, the queen has departed. Well, I will go quickly. (Enviously looking at the king, sighing) Ah fie ! Unlucky that I am, I am not able even to behold this person for a long time. (Exit)

राजा — (परिक्रामन्) -

देवि त्वन्मुखपङ्कजेन शशिनः शोभातिरस्कारिणा
पश्याब्जानि विनिर्जितानि सहसा गच्छन्ति विच्छायताम् ।
श्रुत्वा ते परिवारवारवनितागीतानि भृङ्गाङ्गनाः
लीयन्ते मुकुलान्तरेषु शनकैः संजातलज्जा इव ॥ २५॥

( इति निष्क्रान्ताः सर्वे)

❀ इति मदनमहोत्सवो नाम प्रथमोऽङ्कः समाप्तः ❀

1 त्वत्=तव. 2 मुखपङ्कजम् lotus-face. 3 शशिन् *m.* (*gen.s.* शशिनः) *the moon.* 4 शोभा f. beauty. 5 तिरस्कारिन् a. abusing, surpassing. 6 अब्जम् lotus. 7 विनिर्जित conquered, defeated; pp. विनिस्+√जि 1P. 8 सहसा ind. all of a sudden. 9 विच्छायता f. discolouring, faintness. 10 परिवारः retinue. 11 वारवनिता *f. harlot*, palace-lady. 12 गीतम् song. 13 अङ्गना woman 14 लीयन्ते they disappear, hide; √ली 4A. 15 मुकुल m.n. bud 16 अन्तरम् interior, inside. 17 शनकैः slowly. 18 संजात occurred; pp. सम्+√जन् 4A. 19 लज्जा f. shame. 20 संजातलज्जा=संजाता लज्जा यासां ताः

देवि, पश्य ! शशिनः शोभातिरस्कारिणा त्वन्मुखपङ्कजेन विनिर्जितानि अब्जानि सहसा विच्छायतां गच्छन्ति, ते परिवारवारवनितागीतानि श्रुत्वा संजातलज्जाः इव भृङ्गाङ्गनाः मुकुलान्तरेषु शनकैः लीयन्ते ॥ शार्दूलविक्रीडितम् ।

King—(Walking about)

Behold, O queen ! the lotuses, defeated by thy lotus face surpassing the beauty of the moon, all of a sudden turn discoloured, and as if blushed with shame on hearing the songs of thy retinue and harlots the female-bees slowly disappear into the flower buds.

(Exeunt Omnes)

*Here Ends Act I entitled "Grand Festival of Love"*

## ❀ द्वितीयोऽङ्कः ❀

( ततः प्रविशति सारिकापञ्जरव्यग्रहस्ता सुसङ्गता)

सुसङ्गता — हा धिक् हा धिक् । अथ कुत्रेदानीं मम हस्त इमां सारिकां निक्षिप्य गता मे प्रियसखी सागरिका । तत्कुत्र पुनरेनां प्रेक्षिष्ये । (अन्यतो दृष्ट्वा) कथमेषा खलु निपुणिका इत एवागच्छति । तद्यावदेनां प्रक्ष्यामि ।

(ततः प्रविशति निपुणिका)

निपुणिका — (सविस्मयम्) आश्चर्यम्, आश्चर्यम् । अनन्यसदृशप्रभावो मन्ये देवतायाः । उपलब्धः खलु मया भर्तुर्वृत्तान्तः । तद्गत्वा भट्टिन्यै निवेदयिष्यामि । (इति परिक्रामति)

1 सारिका a talking bird 2 पञ्जरम् cage. 3 व्यग्र a. engaged, busy. 4 सारिकापञ्जरव्यग्रहस्ता = सारिकाया पञ्जरे व्यग्र हस्त यस्या सा. 5 अथ now 6 कुत्र where? 7 इदानीम् now. 8. हस्त इमा = (सन्धि) हस्ते इमा. 9 निक्षिप्य having entrusted, deposited; gerund नि + √क्षिप् 6U. 10 प्रियसखी f. dear friend. 11 अन्यतस् ind in other direction 12 प्रक्ष्यामि I will ask; लृट् √प्रच्छ् 6P, 13 अनन्य = न अन्य not other. 14 सदृश a. like, resembling, 15 प्रभाव power, magnanimity. 16 अनन्यसदृशप्रभाव unique power. 17 मन्ये I think; √मन् 4A. 18 देवता f. deity. 19 उपलब्ध obtained, pp उप् + √लभ् 1A. 20 वृत्तान्त story, news 21 तत् therefore.

ACT—II

(Then enters Susangatā, her hand engaged with the Sārikā-cage)

Susangatā — Ah fie, ah fie! Now, after placing this Sārikā in my hand where has my dear friend, Sāgarikā gone? And where shall I see her again? (gazing in another direction) It is, really, Nipunikā who is coming here. So I shall ask her now.

(Then appears Nipunikā)

Nipunikā — (in wonder) Wonderful, wonderful! I think the deity has a unique power As I have obtained His Majesty's news I am going to inform the Queen about it. (She walks round)

सुसंगता — (उपसृत्य) हला निपुणिके, कुत्रेदानीं विस्मयोत्क्षिप्तहृदयेवेह स्थितां मामवधीर्य कुतोऽतिक्रामसि ।

निपुणिका — कथं सुसंगता । हला सुसंगते, सुष्ठु त्वया ज्ञातम् । एतत् खलु मम विस्मयस्य कारणम् । अद्य किल भर्ता श्रीपर्वतादागतस्य श्रीकण्ठदासनामधेयस्य धार्मिकस्य सकाशादकालकुसुमसञ्जननदोहदं शिक्षित्वाऽऽत्मनः परिगृहीतां नवमालिकां कुसुमसमृद्धिशोभितां करिष्यतीति । तत्रैतद् वृत्तान्तं ज्ञातुं देव्या प्रेषितास्मि । त्वं पुनः कुत्र प्रस्थिता ।

1. विस्मयोत्क्षिप्तहृदया = विस्मयेन उत्क्षिप्त हृदय यस्या सा. 2 अवधीर्य gerund of अव + √धीर् 10P. to disregard. 3 कुतः whence, where. 4 सुष्ठु ind. properly, well 5 ज्ञात known; pp. √ज्ञा 9U. 6 कारणम् cause, reason. 7 किल ind verily, as they say. 8 नामधेयम् name. 9 श्रीकण्ठदासनामधेयस्य = श्रीकण्ठदासः इति नामधेय यस्य तस्य 10 धार्मिक a. religious; m. monk. 11 सकाशात् ind. from 12 सञ्जननम् creation, producing. 13 दोहद m. n. wish, strong desire, recipe, means 14 शिक्षित्वा gerund √शिक्ष् 1A. to learn. 15 समृद्धिः f. abundance, prosperity. 16 शोभित adorned, beautiful; pp. √शुभ् 1A. 17 करिष्यति he will make; √कृ 8U. 18 प्रेषित sent; caus. pp. प्र + √इष् 1U.4P.

Susangatā — (approaching) Hello Nipuṇikā, where are you going now, ignoring me who stand here, as if your heart is ensnared by some wonder ?

Nipuṇikā — It is Susangatā ! Hello Susangatā, you have well guessed. This is the cause of my wonder ;— They say that today His Majesty will learn the method of producing untimely flowers from a religious mendicant by the name of Shrī Kaṇṭhadāsa who hails from Shrī Parvata, and will adorn his favourite Navamālikā with abundant blossoms. I have been sent there by the Queen to find out this news. But where are you departing ?

सुसंगता — प्रियसखीं सागरिकामन्वेषितुम् ।

निपुणिका — सखि, दृष्टा मया ते प्रियसखी सागरिका गृहीतसमुद्गकचित्रफलकवर्तिका समुद्विग्नेव कदलीगृहं प्रविशन्ती । तद्गच्छ प्रियसखीम् । अहमपि देवीसकाशं गमिष्यामि ।

(इति निष्क्रान्ते)

॥ इति प्रवेशकः ॥ 5H

1 अन्वेषितुम् to speak to look for, inf caus अनु + √इष 1U 4P 2 समुद्गक box, casket 3 चित्रफलकम् painting board 4 वर्तिका f painting brush 5 गृहीतसमुद्गकचित्रफलकवर्तिका = गृहीता समुद्गक चित्रफलक वर्तिका च यया सा 6 समुद्विग्न frightened, saddened pp सम + उद + √विज 3P 7 कदली f plantain tree 8 गृहम् house 9 प्रवेशक interlude, prelude

Susangata — To look for my dear friend Sagarika

Nipunika — Dear friend I saw your loving friend, Sagarika enter the plantain arbour appearing sorrowful taking with her a casket, a painting board and a brush So go to see your dear friend I will, also, go to the presence of the queen (Both move out)

*End of the Prelude to the Act II*

सुसंगता — (उपसृत्य) हला निपुणिके, कुत्रेदानीं विस्मयोत्क्षिप्तहृदयेवेह स्थितां मामवधीर्य कुतोऽतिक्रामसि ।

निपुणिका — कथं सुसंगता । हला सुसंगते, सुष्ठ त्वया ज्ञातम् । एतत् खलु मम विस्मयस्य कारणम् । अद्य किल भर्ता श्रीपर्वतादागतस्य श्रीकण्ठदासनामधेयस्य धार्मिकस्य सकाशादकालकुसुमसञ्जननदोहदं शिक्षित्वाऽऽत्मनः परिगृहीतां नवमालिकां कुसुमसमृद्धिशोभितां करिष्यतीति । तत्रैतद् वृत्तान्तं ज्ञातुं देव्या प्रेषितास्मि । त्वं पुनः कुत्र प्रस्थिता ।

1. विस्मयोत्क्षिप्तहृदया = विस्मयेन उत्क्षिप्तं हृदयं यस्याः सा. 2 अवधीर्य gerund of अव + √धीर् 10P. to disregard. 3 कुतः whence, where. 4 सुष्ठु ind. properly, well 5 ज्ञात known; pp. √ज्ञा 9U. 6 कारणम् cause, reason. 7 किल ind. verily, as they say. 8 नामधेयम् name. 9 श्रीकण्ठदासनामधेयस्य = श्रीकण्ठदासः इति नामधेयं यस्य तस्य 10 धार्मिक a. religious; m. monk. 11 सकाशात् ind. from 12 सञ्जननम् creation, producing. 13 दोहद m. n. wish, strong desire, recipe, means. 14 शिक्षित्वा gerund √शिक्ष् 1A. to learn. 15 समृद्धिः f. abundance, prosperity. 16 शोभित adorned, beautiful; pp. √शुभ् 1A. 17 करिष्यति he will make; √कृ 8U. 18 प्रेषित sent; caus. pp. प्र + √इष् 1U.4P.

Susangatā — (approaching) Hello Nipuṇikā, where are you going now, ignoring me who stand here, as if your heart is ensnared by some wonder ?

Nipuṇikā — It is Susangatā ! Hello Susangatā, you have well guessed. This is the cause of my wonder ;— They say that today His Majesty will learn the method of producing untimely flowers from a religious mendicant by the name of Shrī Kaṇṭhadāsa who hails from Shrī Parvata, and will adorn his favourite Navamālikā with abundant blossoms. I have been sent there by the Queen to find out this news. But where are you departing ?

भगवन् कुसुमायुध, निर्जितसकलसुरासुरो भूत्वा कथं स्त्रीजनं प्रहरन् न लज्जसे। (विचिन्त्य) अथवानंगोऽसि। सर्वथा मम मन्दभागिन्या अनेन दुर्निमित्तेनावश्यं मरणमेवोपस्थितम्। (फलकमवलोक्य) तद्यावदिह कोऽपि न आगच्छति तावदेवालेख्य-समर्पितं तमभिमतं जनं प्रेक्ष्य यथा समीहितं करिष्यामि। (सावष्टम्भमेकमना भूत्वा नाट्येन फलकं गृहीत्वा निःश्वस्य) यद्यपि मे अतिसाध्वसेन वेपतेऽयमतिमात्रमग्रहस्तस्तथापि तस्य जनस्यान्यो दर्शनोपायो नास्तीति तद्यथातथाऽऽलिख्यैनं प्रेक्षिष्ये। (इति नाट्येन लिखति)

1 सकल entire 2 सुर god. 3 असुर demon. 4 निर्जितसकलसुरासुर = निर्जिता सकला सुरा असुरा च येन स 5 स्त्रीजन m woman. 6 प्रहरत् (nom m s. प्रहरन्) striking; pres part. प्र + √हृ 1U 7 विचिन्त्य gerund वि + √चिन्त् 10U reflect. 8 सर्वथा ind by all means, completely. 9 दुर्निमित्तम् bad omen 10 अवश्यम् inevitably. 11 मरणम् death 12 उपस्थित befallen; pp उप + √स्था 1U. 13 आलेख्यम् painting, writing 14 समर्पित committed to; PP caus सम् + √ऋ 1.3P. 15 अभिमत a loving. 16 समीहित desired; pp सम् + √ईह् 1A 17 अवष्टम्भ prop, courage. 18 सावष्टम्भम् ad courageously 19 एकमना = एकं मनः यस्याः सा तथाभूता 20 यद्यपि~तथापि although~~yet 21 अतिसाध्वसम् excessive fear 22 वेपते it trembles; √वेप् 1A 23 अतिमात्रम् very much 24 उपाय means. 25 आलिख्य gerund of आ + √लिख् 6P. to write, to paint.

O lord Cupid, having conquered all the gods and demons dost thou not feel ashamed of thy striking a woman thus? (Reflecting) I see thou art formless Completely hapless that I am, death is inevitably brought to me by this ill omen (gazing on the painting board) So, while nobody comes here I will paint the loving one, and behold him and do as desired (concentrating her mind with courage, holding the board and sighing) Although this tip of my hand is immeasurably trembling in an excessive fear, yet there is no other means to have his image Somehow, therefore, I shall paint and see him. (Thus she paints in a dramatic mood.)

(ततः प्रविशति गृहीतचित्रफलकवर्तिका मदनावस्थां नाटयन्ती सागरिका)

सागरिका — हृदय, प्रसीद प्रसीद । किममुनायासमात्रफलकेन दुर्लभजनप्रार्थनानुबन्धेन । अन्यच्च । येनैव दृष्टेन त ईदृशः सन्तापो ननु वर्धते, पुनरपि तमेव प्रेक्षितुमभिलषसीत्यहो ते मूढता । अयि नृशंस हृदय, जन्मतः प्रभृति सह संवर्ध्येमं जनं परिहृत्य क्षणमात्रदर्शनपरिचितं जनमनुगच्छत् कथं न लज्जसे। अथवा कस्तव दोषः । अनंगशरपतनभीतेन त्वयैवमद्य व्यवसितम् । भवतु, तं तावदुपालप्स्ये । (सास्रमञ्जलिं बध्वा जानुभ्यां स्थित्वा)

1 मदन-अवस्था f love lorn condition 2 प्रसीद be favouble, be thou firm, लोट् प्र + √सद् 1P 3 किम् ( + inst) what is the use of 4 आयास trouble, anguish 5 मात्र suffix only, as much 6 फलम् result, fruit 7 आयासमात्रफलकेन = आयासमात्रं फलं यस्य तेन 8 दुर्लभ hard to obtain unattainable 9 प्रार्थना f desire, solicitation 10 अनुबन्ध repeated pursuit continuity 11 अन्यत् moreover, besides 12 जन=महाराजन 13 ईदृश a such 14 सन्ताप agony 15 वर्धते it increases, √वृध् 1A 16 अभिलषसि thou longest for; अभि + √लष् 1 4U 17 मूढता f foolishness 18 नृशंस wicked, cruel 19 जन्मतः प्रभृति since (my) birth 20 संवर्ध्य having grown gerund, सम् + √वृध् 1A 21 इमं जनम्=सागरिकाम् 22 परिहृत्य gerund परि + √हृ 1U to avoid 23 परिचित acquainted pp परि + √चि 5U 24 अनुगच्छत् following, pres part अनु + √गम् 1P. 24 लज्जसे thou art ashamed, √लज्ज् 6A 25 दोष fault 26 शर arrow 27 पतनम् fall 28 भीत frightened, pp √भी 3U 29 व्यवसित striven conducted, pp वि + अव + √सो 1P 30 उपालप्स्ये I will blame, लृट् उप + √लभ् 1A 31 अञ्जलिम् √बध् PP to fold hand 32 जानु n knee

(Then appears Sagarika with a painting board and a brush, gesticulating a love-lorn condition)

Sāgarikā — O heart, be calm, be calm! What is the use of your obstinate longing for an unattainable person resulting only in agony? And moreover your pain certainly grows at his mere sight You long to see him just once again Alas your stupidity! Also, O cruel heart! After growing up together since my birth don't you feel ashamed of your following after him who is just known at a momentary sight, abandoning me? Or what is your fault? Today you have behaved in this manner frightened at the fall of the shaft of Cupid! Well I will blame him.(Holding her hands and kneeling down in tears)

भगवन् कुसुमायुध, निर्जितसकलसुरासुरो भूत्वा कथं स्त्रीजनं प्रहरन् न लज्जसे। (विचिन्त्य) अथवानंगोऽसि। सर्वथा मम मन्दभागिन्या अनेन दुर्निमित्तेनावश्यं मरणमेवोपस्थितम्। (फलकमवलोक्य) तद्यावदिह कोऽपि न आगच्छति तावदेवालेख्य-समर्पितं तमभिमतं जनं प्रेक्ष्य यथा समीहितं करिष्यामि। (सावष्टम्भमेकमना भूत्वा नाट्येन फलकं गृहीत्वा नि श्वस्य) यद्यपि म अतिसाध्वसेन वेपतेऽयमतिमात्रमग्रहस्तस्तथापि तस्य जनस्यान्यो दर्शनोपायो नास्तीति तद्यथातथाऽऽलिख्यैनं प्रेक्षिष्ये। (इति नाट्येन लिखति)

1 सकल entire 2 सुरः god. 3 असुरः demon. 4 निर्जितसकलसुरासुरः = निर्जिता सकलाः सुरा असुराः च येन सः 5 स्त्रीजन m woman. 6 प्रहरन् (nom. m. s. प्रहरन्) striking; pres. part. प्र + √हृ 1U. 7 विचिन्त्य gerund वि + √चिन्त् 10U. reflect. 8 सर्वथा ind by all means, completely. 9 दुर्निमित्तम् bad omen 10 अवश्यम् inevitably. 11 मरणम् death. 12 उपस्थित befallen; pp उप + √स्था 1U. 13 आलेख्यम् painting, writing. 14 समर्पित committed to; PP. caus सम् + √ऋ 1.3P. 15 अभिमत a loving. 16 समीहित desired; pp सम् + √ईह् 1A. 17 अवष्टम्भ prop, courage. 18 सावष्टम्भम् ad courageously 19 एकमना = एकं मन यस्या सा तथाभूता 20 यद्यपि~तथापि although~~yet 21 अतिमाध्वसम् excessive fear. 22 वेपते it trembles; √वेप् 1A. 23 अतिमात्रम् very much. 24 उपाय means. 25 आलिख्य gerund of आ + √लिख् 6P. to write, to paint.

O lord Cupid, having conquered all the gods and demons dost thou not feel ashamed of thy striking a woman thus? (Reflecting) I see thou art formless. Completely hapless that I am, death is inevitably brought to me by this ill omen (gazing on the painting board) So, while nobody comes here I will paint the loving one, and behold him and do as desired (concentrating her mind with courage, holding the board and sighing) Although this tip of my hand is immeasurably trembling in an excessive fear, yet there is no other means to have his image. Somehow therefore, I shall paint and see him. (Thus she paints in a dramatic mood.)

(ततः प्रविशति सुसङ्गता)

सुसंगता — एतत्तत्कदलीगृहम् । तत्प्रविशामि । (प्रवेशं नाटयति, प्रविश्यावलोक्य च सविस्मयम्) एषा मे प्रियसखी सागरिका । किं पुनरेषा गुर्वनुरागोत्क्षिप्तहृदया किमप्यालिखन्ती मामपि न प्रेक्षते । भवतु । तद्यावदस्या दृष्टिपथं परिहृत्य निरूपयिष्यामि किमेषाऽऽलिखतीति । (स्वैरं पृष्ठतोऽस्या भूत्वा दृष्ट्वा सहर्षम्) कथमेतया भर्ताऽऽलिखितः । साधु सागरिके, साधु । अथवा न कमलाकरमुज्झित्वा राजहंस्यन्यत्राभिरमते ।

1 प्रवेश: entrance. 2 गुरु heavy. 3 अनुराग: attachment, passion. 4 गुर्वनुरागोत्क्षिप्तहृदया = गुरुणा अनुरागेण उत्क्षिप्तं हृदयं यस्याः सा. 5 अस्या. her. 6 दृष्टिपथ: range of sight. 7 परिहृत्य gerund परि + √हृ 1U. 8 निरूपयिष्यामि I will see; लृट् नि + √रूप् 10U. 9 स्वैरम् ind. indistinctly, of ones's own accord. 10 पृष्ठतस् ind. behind, from behind. 11 एतया by her. 12 आलिखित painted; pp आ + √लिख् 6P. 13 साधु well. 14 कमलम् lotus. 15 आकर source, collection 16 राजहंसः m. राजहंसी f. royal swan. 17 अन्यत्र ind. elsewhere. 18 अभिरमते she rejoices, enjoys.

(Then appears Susangatā)

Susangatā — *This is the very plantain bower. Let me enter it. (She gesticulates entering. Entering and looking with wonder.)* Here is my dear friend, Sāgarikā! But drawing something with her mind captivated by heavy passion she does *not even see me. Well, then,* now avoiding the range of her sight I shall see what she paints (Secretly standing behind her and looking with joy) How she has painted the king! Well done, Sāgarikā, well done! But abandoning the lotuses a female royal swan does not enjoy elsewhere.

सागरिका — (सबाष्पम्) आलिखितो मयैषः । किं पुनरनवरतनिपतद्बाष्पसलिलेन मे दृष्टिः प्रेक्षितुं न प्रभवति । (मुखमुत्तानीकृत्याश्रूणि निवारयन्ती सुसङ्गता दृष्ट्वोत्तरीयेण फलकं प्रच्छादयन्ती स्मितं कृत्वा) कथं प्रियसखी सुसङ्गता । सखि, इहोपविश । (इत्युत्थाय हस्ते गृहीत्वा)

सुसङ्गता — (उपविश्य बलात्फलकमाकृष्य) सखि, क एष त्वयात्र चित्रफलक आलिखितः ।

सागरिका — प्रवृत्तमदनमहोत्सवे भगवाननङ्गः ।

सुसङ्गता — (सस्मितम्) अहो ते निपुणत्वम् । किं पुनः शून्यमिव चित्रं प्रतिभाति । तदहमप्यालिख्य रतिसनाथं करिष्ये ।

1 बाष्प m n tear 2 सबाष्पम् tearfully 3 अनवरत continual 4 सलिलम् water 5 दृष्टि f eye 6 प्रभवति (+ inf) it can, प्र + √भू 1P 7 उत्तानीकृत्य gerund उत्तानी + √कृ 8U to stretch out 8 अश्रु n (p अश्रूणि) tear 9 निवारयत् (nom f s निवारयन्ती) avoiding, Pres Part नि + √वृ 1.5 9U 10 उत्तरीयम् upper garment 11 प्रच्छादयत् (nom f s प्रच्छादयन्ती) Covering, Pres Part प्र + √छद् 10U 12 स्मितम् smile 13 बलम् force 14 बलात् by force 15 आकृष्य gerund आ + √कृष् 6U to draw 16 प्रवृत्त begun, gone, PP प्र + √वृत् 1A 17 निपुणत्वम् dexterity, skill 18 शून्य devoid of, empty 19 रतिसनाथ a possessed of endowed with Rati रति is goddess of love and wife of Cupid

Sāgarikā—(Shedding tears) I have painted him But why my eyes can not see due to continually falling tear drops (Raising her face and avoiding tears and on seeing Susangata she covers the board smiling) Ah it is my dear friend Susangata! (Standing up and holding her hands) My friend, sit down here

Susangatā—(Sitting down and pulling the board by force) Friend who is he that you have painted here on this painting board?

Sāgarikā—He is the god of love in the previous grand Love Festival

Susangatā—(Smiling) Ah how skilful you are! But it seems that something is absent in the picture So I will draw and furnish it with Rati

( वर्णिका गृहीत्वा नाट्येन रतिव्यपदेशेन सागरिकामालिखति )

सागरिका — (विलोक्य सक्रोधम्) सखि, किमिति त्वयात्राहमालिखिता ।

सुसङ्गता — (विहस्य) सखि, किमकारणे कुप्यसि । यादृशस्त्वया कामदेव आलिखितस्तादृशी मया रतिरालिखिता । तदन्यथासम्भाविनि, किं तवैतेनालपितेन । कथय सर्वं वृत्तान्तम् ।

सागरिका — (सलज्जा स्वगतम्) ननु ज्ञातास्मि प्रियसख्या । (सुसङ्गताया हस्त गृहीत्वा प्रकाशम्) प्रियसखि, महती खलु मे लज्जा । तत्तथा कुरु यथा न कोऽप्यपर एतद्वृत्तातं जानातीति ।

1 व्यपदेश pretext 2 क्रोध anger. 3 सक्रोधम् angrily. 4. विहस्य gerund वि + √हस् 1P. 5 अकारणम् a thing without cause. 6 कुप्यसि thou art angry; √कुप् 4P 7 यादृश (—शी f.) ~ तादृश (—शी) such ~ as, of such kind ~ of that kind. 8 अन्यथा ind in a different manner, otherwise. 9 सम्भाविन् a considering (voc. f s सम्भाविनि). 10 आलपितम् talking. 11 कथय tell thou, √कथ् 10U. 12 स्वगतम् aside, to one's own self (a dramatic term). 13 ज्ञात known; pp. √ज्ञा 9U. 14 महत् (nom. s.f. महती) great. 15 लज्जा f shame. 16 यथा ~ तथा as ~ so. 17 कुरु do thou; लोट् √कृ 8U.

(Taking up the brush she draws Sāgarikā under the pretext of painting Rati)

Sāgarikā—(looking, angrily) Friend, what have you painted me here for?

Susangatā—(ridiculing) O friend, why are you angry for nothing? I have painted Rati exactly as you painted the God of love. O you who think it otherwise (misunderstanding one!) ! so what is the use of this word of yours? Do tell me the whole story

Sāgarikā—(blushing, to herself) Indeed, I am found out by my dear companion. (Holding Susangatā's hand, aloud) My dear friend, really great is my shame. Do so that no one else may know about this event!

सुसङ्गता — सखि, मा लज्जस्व । ईदृशस्य कन्यारत्नस्यावश्यमेवेदृशे वर अभिलाषेण भवितव्यम् । तथापि यथा न कोऽप्यपर एतद्वृत्तान्तं ज्ञास्यति तथा करोमि । एतया पुनर्मेधाविन्या सारिकयात्र कारणेन भवितव्यम् । कदाचिदेषास्यालापस्य गृहीताक्षरा कस्यापि पुरतो मन्त्रयिष्यते ।

सागरिका — (सोद्वेगम्) सखि, अतोऽपि मे अधिकतरं संतापो वर्धते ।
(इति मदनावस्था नाट्यति)

सुसङ्गता — (सागरिकाया हृदये हस्तं दत्त्वा) सखि, समाश्वसिहि, समाश्वसिहि ।

1 ईदृश a, such, of this type 2 कन्या f daughter, girl 3 रत्नम् gem, jewel 4 कन्यारत्नस्य = कन्यासु कन्यानां वा रत्नस्य of jewel among girls, of jewel-like girl. 5 वर bridegroom 6 मेधाविन a (ins s f मेधाविन्या) intelligent, wise 7 कदाचित् whenever 8 आलाप conversation 9 अभिलाष object of longing or desire 10 अक्षरम् syllable word, 11 अत्र in this case 12 गृहीताक्षरा = गृहीतानि अक्षराणि यया सा 13 पुरतस् afterwards 14 मन्त्रयिष्यते it will speak, लृट् √ मन्त्र् 10A 15 उद्वेग agitation fear 16 सोद्वेगम् with fear, agitatedly 17 अतस् ind from this, hence 18 समाश्वसिहि take thou courage, लोट् सम् + आ + √श्वस् 2P

Susangatā—Friend, be not ashamed It is inevitable that such a precious girl like you must have such a bridegroom as the object of her longing So I will see to it that no one else might discover this event But I am afraid this clever Sārikā might become a cause of disclosure in this case As she has caught the words of our conversation she will at any time in the future speak to someone else

Sāgarikā—(in agitation) Hence, O my friend, my agony becomes redoubled (She expresses her love-sick)

Susangatā—(placing her hand on the heart of Sāgarikā) Friend, cheer up, cheer up!

यावदस्या दीर्घिकाया नलिनीपत्राणि मृणालिकां च गृहीत्वा लघ्वागच्छामि (निष्क्रम्य पुनः प्रविश्य च नाट्येन नलिनीपत्रैः शयनीयं मृणालवलयानि च रचयित्वा परिशिष्टानि नलिनीपत्राणि सागरिकाया हृदये निक्षिपति ।)

सागरिका — सखि, अपनयेमानि नलिनीपत्राणि मृणालिकानि च । अलमेतेन, किमकारणं आत्मानमायासयसि ।

दुर्लभजनानुरागो लज्जा गुर्वी परवश आत्मा ।
प्रियसखि विषमं प्रेम मरणं शरणं नु वरमेकम् ॥ १.॥

(इति मूर्च्छति)

1 यावत् in the meantime. 2 दीर्घिका f lake, pond. 3 नलिनी-पत्रम् lotus-leaf. 4 मृणालिका f. lotus-stalk. 5 शयनीयम् bed, couch 6 वलयम् bracelet, circle 7 रचयित्वा gerund √रच् 10U. to form 8 परिशिष्ट a supplementary, remaining. 9 अपनय *remove thou ; लोट् अप + √नी 1U. 10 आयासयसि you trouble ;* caus. आ + √ यस् 1 4P. 11 परवश dependent upon others. 12 विषम adverse, uneven. 13 प्रेमन् m. n. (nom s n प्रेम) love. 14 शरणम् refuge, shelter. *15 आत्मन् m. (nom s. आत्मा, acc. s आत्मानम्) self, oneself. 16 नु ind, possibly,* indeed 17 वरम् it is better. 18 मूर्च्छति she faints, loses consciousness; √मुर्च्छ् 1P.

दुर्लभजनानुराग , गुर्वी लज्जा, आत्मा परवश , प्रेम विषम, मरण नु एक वर शरण (अस्ति), प्रियसखि ।

In the meantime I shall quickly fetch from this lake lotus-leaves and lotus-stalk. (Having moved out re-entering, and making a bed out of lotus-leaves and bracelets out of lotus-stalks she places the remaining leaves on the bosom of Sāgarikā.)

Sāgarikā—My friend, do remove these lotus-leaves and stalks. Enough of them. Why do you trouble yourself without cause ?

My love for a person unattainable, my shame great and myself dependent upon others ; dear friend, my love is uneven; possibly death alone is a better refuge.

(She faints.)

सुसङ्गता — (सकरुणम्) प्रियसखि सागरिके, समाश्वसिहि समाश्वसिहि ।

(नपथ्ये कलकल)

कण्ठे कृत्तावशेषं कनकमयमधः शृङ्खलादाम कर्ष-
न्क्रान्त्वा द्वाराणि हेलाचलचरणरणत्किङ्किणीचक्रवालः ।
दत्तातङ्कोऽङ्गनानामनुसृतसरणिः संभ्रमादश्वपालैः
प्रभ्रष्टोऽयं प्लवङ्गः प्रविशति नृपतेर्मन्दिरं मन्दुरायाः ॥ २ ॥

1 करुण pity a pitiable 2 सकरुणम् pitiably 3 कलकल confused noise of a crowd 4 कण्ठ neck 5 कृत्त cut, pp √कृत् 6P 6 अवशेष remnant remaining 7 कृत्तावशेषम् = कृत्तस्य अवशेषम् 8 कनकम् gold 9 मय (suffix) consisting of 10 अधस् ind beneath below 11 शृङ्खला f chain fetter 12 दामन् n (nom and acc s दाम) rope, string 13 कर्षत् (nom s m कर्षन्) dragging pulling pres part √कृष् 6U 14 द्वारम् gate door 15 हेला f wanton sport 16 हेलया (ins s) easily at ease 17 चल a fickle moving 18 चरण m n foot 19 रणत् thinking (√रण् 1P) 20 किङ्किणी f small bell 21 चक्रवाल m n group, ring 22 हेलाचलचरणरणत्किङ्किणीचक्रवाल —हेलया चला चरणा तेषु रणत् किङ्किणीनां चक्रवालं यस्य सः 23 दत्त given pp √दा 3U 24 आतङ्क panic fear 25 दत्तातङ्क = दत्तः आतङ्कः येन सः 26 अनुसृत pursued, pp अनु + √सृ 1 3P सरणि f way 27 अनुसृतसरणि = अनुसृता सरणिः यस्य सः 28 सम्भ्रमात् hastily 29 अश्वपाल horseman groom 30 प्रभ्रष्ट fled, pp प्र + भ्रंश् 1A 4P 31 प्लवङ्ग monkey 32 नृपति (gen s नृपतेः) king 33 मन्दुरा f stable cage

मन्दुरायाः प्रभ्रष्टः अयं प्लवङ्गः कण्ठे कृत्तावशेषं कनकमयं शृङ्खलादाम अधः कर्षन् हेलाचलचरणरणत्किङ्किणीचक्रवालः द्वाराणि क्रान्त्वा अङ्गनानां दत्तातङ्कः सम्भ्रमात् अश्वपालैः अनुसृतसरणिः नृपतेः मन्दिरं प्रविशति ॥ छन्दः स्रग्धरा ।

Susangata — (pathetically) Dear friend, Sagarika take heart take heart!

(Behind the scene a confused noise of crowd.)

The monkey that hath fled from the stable (or cage) enters the king's apartment dragging the remnant of the gold chain cut off at the neck with those small bells tinkling on its swiftly moving feet, jumping over the doors causing a panic to the harem ladies and with his path being hastily pursued by the grooms

अपि च,

नष्टं वर्षवरैर्मनुष्यगणनाभावादपास्य त्रपा-
मन्तः कञ्चुकिकञ्चुकस्य विशति त्रासादयं वामनः ।
पर्यन्ताश्रयिभिर्निजस्य सदृशं नाम्नः किरातैः कृतं
कुब्जा नीचतयैव यान्ति शनकैरात्मेक्षणाशङ्किनः ॥ ३ ॥

सुसंगता—(आकर्ण्याग्रतोऽवलोक्य ससंभ्रममुत्थाय सागरिकां हस्ते गृहीत्वा) सखि, उत्तिष्ठोत्तिष्ठ। एष खलु दुष्टवानर इत एवागच्छति ।

1 नष्ट vanished pp √नश् 4P 2 वर्षवर eunuch 3 मनुष्य man human 4 गणनम् गणना f counting, calculation 5 अभाव non being, non existence. 6 अपास्य gerund, अप + √अस् 4P to leave, quit 7 त्रपा f shame, bashfulness 8 अन्तर् ind inside, in the middle 9 कञ्चुकिन् m (nom s कञ्चुकी, in compounds कञ्चुकि) chamberlain 10 कञ्चुक dress 11 त्रास alarm, terror 12 वामन dwarf 13 पर्यन्त side, border, neighbouring place 14 आश्रयिन् a resorting to refuged in 15 पर्यन्ताश्रयिभि = समीपवर्तिभि 16 निज a innate one's own 17 सदृशम् befitting deed 18 नामन् n (gen s नाम्न) name 19 किरात groom, forester, hunter 20 कुब्ज hunch back 21 नीचता lowness, *low stature* 22 यान्ति they go, √या 2P 23 ईक्षणम् look, eye 24 आशङ्किन् a fearing 25 आकर्ण्य gerund of आ + √कर्ण् 10U to hear 26 अग्रतस् ind ahead 27 दुष्ट a wicked

वर्षवरै मनुष्यगणनाभावात् त्रपा अपास्य नष्टम् अयं वामन त्रासात् कञ्चुकिकञ्चुकस्य अन्त विशति, पर्यन्ताश्रयिभि किरातै निजस्य नाम्न सदृशं कृतम्, कुब्जा आत्मेक्षणाशङ्किन नीचतया शनै एव यान्ति ॥ शार्दूलविक्रीडितम् ॥

And,

> The eunuchs have vanished throwing off shame for they are not included in the number of men This dwarf, alarmed steals into the robe of the chamberlain the *grooms (or hunters) stationed in the* neighbourhood behaved in a way worthy of their own names and the hunchbacks fearing that their look might be seen, disappear slowly owing to their low heights

Susangatā — (listening and looking ahead and then hastily rising and holding Sagarika by the hand ) Friend, stand up, stand up! Really a wicked *monkey is coming here*

सागरिका — किमिदानीं कुर्वः ।

सुसङ्गता — एहि । अस्मिन् तमालविटपान्धकारे प्रविश्यैनमतिवाहयावः ।

(परिक्रम्योभे सभय पश्यन्त्यावेकान्ते पर्यवस्थिते)

सागरिका — कथं सुसंगते त्वया चित्रफलक उज्झितः । कदापि कोऽपि तं प्रेक्षते ।

सुसंगता — अयि सुस्थिते, किमद्यापि चित्रफलकेन करिष्यसि । एषोऽपि दधिभक्तलम्पट एतत्पञ्जरमुद्घाट्य दुष्टवानरोऽतिक्रान्तः । एषा खलु मेधाविन्युड्डीनाऽन्यतो गच्छति । तदेहि, लघ्वनुसरावः । अस्यालापस्य गृहीताक्षरा कस्यापि पुरतो मन्त्रयिष्यते ।

1 तमाल name of a tree. 2 अतिवाहयाव we two let it pass; caus. अति + √वह, 1P. 3 भयम् fear 4 सभयम् fearfully 5 एकान्त lonely place, one side 6 पर्यवस्थित stood still; pp. परि + अव + √स्था 1P. 7 कदा when? 8 सुस्थित (voc. s f. सुस्थिते) healthy, steady, in happy condition. 9 दधि n. curd 10 भक्तम् food, boiled rice. 11 लम्पट greedy. 12 उद्घाट्य geruud उद् + √घट् 1A. to open, 13 उड्डीन flown, soared up; pp. उद् + √डी 1.4A to fly 14 पुरतम् afterward

Sāgatikā — What shall we do now?

Susangatā — Come, let us enter into the dark shade of this Tamāla tree and let him pass. (Both walking about and looking with fear stand still in the solitary place)

Sāgarikā — Susangatā, what, you have left the painting board! Will anybody see it at any time?

Susangatā — Ah you steadfast one! What will you do with the painting board now? The curd-and-rice-gready, wicked monkey has crossed over, after opening the bird-cage And the clever Sārikā is flying away. So come, let us quickly follow it. The bird will repeat the words of our talk to any other person afterwards as it caught them.

सागरिका — सखि, एवं कुर्वः । (इति परिक्रामत )

(नेपथ्ये )

ही ही आश्चर्यम् आश्चर्यम् ।

सागरिका — विलोक्य) सुसंगते, ज्ञायते । कथं पुनर्दुष्टवानर एवागच्छति ।

सुसंगता — (दृष्ट्वा विहस्य) अयि कातरे, न बिभीहि । भर्तुः परिपार्श्ववर्ती खलु एष आर्यवसन्तकः ।

(तत प्रविशति वसन्तक )

वसन्तकः — ही ही भोः । आश्चर्यम् आश्चर्यम् । साधु रे श्रीकण्ठदास धार्मिक साधु ।

सागरिका — (सस्पृहमवलोकयति) सखि सुसंगते, दर्शनीयः खल्वयं जनः ।

1 ज्ञायते it is known, *कर्मणि लट् √ज्ञा 9U* ⊙ज्ञायते *(त्वया) (भावे प्रयोग) you* know (literally, it is known by you) 2 कातर a (Voc s f कातरे) timid 3 बिभीहि *fear thou* लोट् √भी 3P 4 परिपार्श्ववर्तिन् *companion* 5 रे (*voc* particle) Oh, Oh 6 दर्शनीय handsome

Sāgarikā—Friend, let us do so (Both walk round)

(Behind the curtain) Hi hi, miracle, miracle!

Sagarikā—(eyeing) O Susanggatā, don't you know that the wicked monkey is again coming?

Susanggatā—(looking and laughing) Ah timid one, don't be afraid! It is, indeed Sir Vasantaka, the close companion of the king

(At the moment enters the clown)

Vasantaka—Ha Ha Ho! Miracle, Miracle! Well done, O monk Shri Kanthadāsa, well done!

Sāgarikā- (enviously she looks at him) My friend Susanggatā, truly this person is handsome

सुसङ्गता — सखि, सुस्थिते, किमनेन दृष्टेन । दूरीभूता सारिका । तदेहि । अनुसराव: । (इति निष्क्रान्ते)

वसन्तक:— साधु रे श्रीकण्ठदास धार्मिक साधु । येन दत्तमात्रेणैव तेन दोहदकेनेदृशी नवमालिका संवृत्ता । येन निरन्तरोद्भिन्नकुसुमगुच्छाच्छादितविटपोपहसन्तीव लक्ष्यते देवीपरिगृहीतां माधवीलताम् । तद्यावद्गत्वा प्रियवयस्यं निवेदयामि । (परिक्रम्यावलोक्य च) एष खलु प्रियवयस्यस्तस्य दोहदस्य लब्धप्रत्ययतया परोक्षामपि तां नवमालिकां प्रत्यक्षामिव कुसुमितां प्रेक्षन् हर्षोत्फुल्ललोचन इत एवागच्छति । तद्यावदेनमुपसर्पामि ।

1 दूरीभूत gone far away, PP दूरी + √भू 1P. 2 सवृत्त happened, become, PP. सम् + √वृत् 1A 3 निरन्तर compact, dense. 4 उद्भिन्न appeared, formed ; PP. उद् + √भिद् 7U. 5 गुच्छ m bunch, bundle. 6 छादित covered, PP √छद 10U 7 विटप twig, branch 8 निरन्तरोद्भिन्नकुसुमगुच्छाच्छादितविटपा = निरन्तर उद्भिन्ना कुसुमाना गुच्छा तै आच्छादिता विटपा यस्या सा (नवमालिका). 9 प्रत्ययता f conviction, reliability. 10 परोक्ष invisible, absent 11 प्रत्यक्ष visible 12 कुसुमित a blooming. 13 हर्ष joy. 14 उत्फुल्ल a expanded, wide-open 15 लोचनम् eye. 16 हर्षोत्फुल्ललोचन = हर्षेण उत्फुल्ले लोचने यस्य स

Susangatā—My self-assured friend, what will you do with him who has been seen? The Sārikā has gone far away So come alsong, let us pursue it (Both exit)

Vasantaka—Well done, O monk Shrī Kanthadāsa, well done! As soon as the recipe has been tried, the Navamālikā has grown to such an extent that with its twigs covered with bunches of compactly blooming blossoms it appears as if ridiculing the Mādhavīlatā which is favoured by the queen Now I will go and inform my dear friend about this (walking round and looking) Really, it is my dear friend who is coming hither, his eyes wide-open with joy, beholding his blossoming Navamālikā as if it were visible, though it is out of his sight, on account of his faith in the reliability of the recipe So now let me approach him

(इति राजानं प्रति निर्गतः) (ततः प्रविशति यथानिर्दिष्टो राजा)

**राजा —** (सहर्षम्)

> उद्दामोत्कलिकां विपाण्डुररुचं प्रारब्धजृम्भां क्षणा-
> दायासं श्वसनोद्गमैरविरतैरातन्वतीमात्मनः ।
> अद्योद्यानलतामिमां समदनां नारीमिवान्यां ध्रुवम्
> पश्यन्कोपविपाटलद्युति मुखं देव्याः करिष्याम्यहम् ॥ ४ ॥

**वसन्तकः—** (सहसोपसृत्य) जयतु जयतु प्रियवयस्यः । भो वयस्य, दिष्ट्या वर्धसे । येन दत्तमात्रेणैव तेन दोहदकेनेदृशी नवमालिका संवृत्ता ।

1 उद्दाम excessive, unrestrained 2 उत्कलिका f bud 3 उद्दामोत्कलिकाम् = उद्दामा उत्कलिका यस्या ताम् 4 विपाण्डुर white 5 रुच f lustre 6 विपाण्डुररुच = विपाण्डुरा रुक् यस्या ताम् 7 प्रारब्ध begun, commenced, PP प्र + √रभ 1A 8 जृम्भा f yawning blossoming 9 प्रारब्धजृम्भाम् = प्रारब्धा जृम्भा यया ताम् 10 क्षण delight 11 आयास trouble, weariness 12 श्वसनम् wind, sighing 13 उद्गम apparition 14 अविरत continual 15 आतन्वत (acc s f. आतन्वतीम) spreading making, displaying, Pres Part आ + √तन् 8U 15 समदनाम् = मदनमहिताम 16 नारी woman 17 कोप anger 18 विपाटल pale red, reddish 19 कोपविपाटलद्युति = कोपेन विपाटला द्युति यस्य तत् 20 दिष्ट्या ind fortunately

उद्दामोत्कलिका विपाण्डुररुच प्रारब्धजृम्भा अविरतैं श्वसनोद्गमैं आत्मन क्षणात आयास आतन्वती इमां उद्यानलता समदना अन्या नारी इव अद्य पश्यन अहं देव्या मुख कोपविपाटलद्युति ध्रुव करिष्यामि ॥ शार्दूलविक्रीडितवृत्तम् ।

(He moves out towards the king) (Then enters the king as mentioned)

King—(joyfully)

> Today I will certainly render the queen's face blood shot with wrath beholding this garden creeper, as if it were another amorous woman, full of flower buds and white in hue, that has begun to blossom and is displaying weariness after its own delight on account of the incessant blows of the wind

Vasantaka—(suddenly advancing) Victory to my dear friend! O pal, you are fortunately prosperous No sooner the method has been tried than the Navamalikā has become like this

येन निरन्तरोद्भिन्नकुसुमगुच्छाच्छादितविटपोपहसन्तीव लक्ष्यते देवीपरिगृहीतां माधवीलताम् ।

राजा — वयस्य, कः संदेहः । अचिन्त्यो हि मणिमन्त्रौषधीनां प्रभावः । पश्य,

कण्ठे श्रीपुरुषोत्तमस्य समरे दृष्ट्वा मणिं शत्रुभि-
र्नष्टं मन्त्रवरैर्वसन्ति वसुधामूले भुजंगा हताः ।
पूर्वं लक्ष्मणवीरवानरभटा ये मेघनादाहताः
पीत्वा तेऽपि महौषधेर्गुणनिधेर्गन्धं पुनर्जीविताः ॥ ५ ॥

1 संदेह doubt 2 अचिन्त्य unthinkable 3 मणि gem (m) 4 मन्त्र spell, charm 5 ओषधि (ओषधी) f herb 6 श्रीपुरुषोत्तम = पुरुषेषु उत्तम विष्णु 7 समर m n war 8 शत्रु m foe, enemy 9 नष्ट destroyed, PP √नश् 4P 10 मन्त्रवर best of charm 11 वसन्ति they dwell 12 वसुधा f earth 13 मूलम् bottom, root 14 वसुधामूले = वसुधाया मूले, in the nether world 15 भुजङ्ग serpent 16 हत stricken, killed, PP √हन् 2P 17 पूर्वम् formerly, once upon a time 18 लक्ष्मण Rama's brother 19 वीर a mighty m hero 20 भट warrior 21 मेघनाद Indrajit, son of the demon Ravana 22 पीत्वा gerund, √पा 1P to drink 23 गुण merit, virtue, 24 निधि ocean, store, treasure. 25 गुणनिधे = गुणाना निधि यस्या तस्या 26 गन्ध odour 27 जीवित lived, survived

समरे श्रीपुरुषोत्तमस्य कण्ठे मणि दृष्ट्वा शत्रुभि नष्ट, मन्त्रवरैं हता भुजङ्गा वसुधामूले वसन्ति, पूर्वं मेघनादाहता ये लक्ष्मणवीरवानरभटा ते अपि गुणनिधे महौषधे गन्ध पीत्वा पुन जीविता ॥ वृत्त शार्दूलविक्रीडितम् ।

So much so, with its twigs covered by dense bunches of blooming flowers it appears to be laughing at the Mādhavi creeper, the favourite of the queen.

King—My companion, no doubt For the power of gems, spells and herbs is unthinkable Behold!

By seeing the gem on the neck of Visnu his foes in war did perish, the serpents stricken by the excellent spells dwell in the nether region, and once upon a time Laxmana and his heroic monkey warriors who had been killed by Meghanāda came to life again after inhaling the odour of the great herb — the store of merits

तदादेशय मार्गं येन वयमद्य तदवलोकनेन चक्षुषः फलमनुभवामः ।

वसन्तकः— (साटोपम्) एतु एतु भवान् ।

राजा — गच्छाग्रतः । (उभौ सगर्वं परिक्रामतः)

वसन्तकः— (आकर्ण्य सभयं निवृत्य राजानं हस्ते गृहीत्वा ससंभ्रमम्) भो वयस्य, एहि पलायावः ।

राजा — किमर्थम् ।

वसन्तक — भोः एतस्मिन् वकुलपादपे कोऽपि भूतः प्रतिवसति ।

राजा — धिङ् मूर्ख, विस्रब्धं गम्यताम् । कुत ईदृशानामत्र प्रभावः ।

वसन्तकः— स्फुटाक्षरमेव मन्त्र्यते । यदि मम वचनं न प्रत्याययसि तदग्रतो भूत्वा स्वयमेवाकर्णय ।

1 अवलोकनम looking 2 चक्षुष n eye 3 अनुभवाव we two enjoy, experience, अनु + √भू 1P 4 आटोप pride, arrogance 5 साटोपम् ad proudly, arrogantly 6 गर्व pride, arrogance 7 निवृत्य gerund, नि + √वृत 1A to return 8 पलायाव we two flee, √पलाय् 1A 9 किम् अर्थम् why, what for ? 10 भूत ghost, spirit 11 मूर्ख fool 12 विस्रब्धम् confidently 13 स्फुट clear, manifest 14 वचनम् speech word 15 प्रत्याययसि thou believest, caus लट प्रति + √इ 2P 15 अग्रतस् ahead 17 स्वयम personally

So tell me the way, so that we might enjoy the fruit of our eyes by appreciating it today

Vasantaka—(proudly) May Your Honour move forth

King—Go ahead of me (Both proudly walk round)

Vasantaka—(listening fearfully turning back and seizing the king by the hands, with haste) O, O friend let us run away !

King—What for ?

Vasantaka—Oh in this Bakula tree dwells some ghost

King—Fie ! You idiot ! Go confidently Whence such things can have a power here ?

Vasantaka—It speaks in a clear tone If you do not trust my word, go ahead and listen yourself

राजा — (तथा कृत्वा श्रुत्वा च)

स्पष्टाक्षरमिदं यस्मान्मधुरं स्त्रीस्वभावतः ।
अल्पांगत्वादनिर्ह्लादि मन्ये वदति सारिका ॥ ६ ॥

(ऊर्ध्वं निरूप्य निपुणमवलोक्य) कथं सारिका ।

वसन्तकः— (विचार्य) कथं सत्यमेव सारिका ।

राजा —(सस्मितम्) वयस्य, एवम् ।

वसन्तकः— भो वयस्य, त्वं भयालुकः येन सारिकां भूत इति मंत्रयसे ।

राजा — धिङ् मूर्ख, यदात्मना कृतं तन्मयि सम्भावयसि ।

वसन्तकः— भो यद्येवं, मा खलु मां निवारय ।

1 स्पष्टाक्षरम् = स्पष्टानि अक्षराणि यस्मिन् तत्. 2 यस्मात् for that reason, therefore. 3 मधुर sweet. 4 स्वभावतस् innate nature 5. अल्प small, little. 6 अङ्गत्वम् stature, bodily shape 7 अनिर्ह्लादिन् a (nom of acc. n अनिर्ह्लादि) not resonant. 8 मन्ये I think ; √मन् 4A. 9 वदति it speaks ; √वद् 1P. 10 ऊर्ध्वम् overhead. 11 निपुणम् accuratelly, skilfully. 12 विचार्य. caus gerund वि + √चर् 1P. to think. 13 भयालुक coward, timid. 14 यत तत् that which, what 15 आत्मना = त्वया वसन्तकेन. 16 सम्भावयसि thou attributest, considerest, caus लट् सम् + √भू 1 P. 17 निवारय avoid, or oppose, or suppress thou , caus लोट् नि + √वृ 1.5 9U.

इद स्पष्टाक्षर स्त्रीस्वभावतः मधुर अल्पाङ्गत्वात् अनिर्ह्लादि (अस्ति) यस्मात् सारिका वदति मन्ये ॥ अनुष्टुप् ॥

King—(doing so and listening)
This speech is endowed wtih clear-cut syllables and is sweet as spoken from the innate nature of a female sex, but is not resonant because of the smallness of the speaker, hence I consider a Sārikā bird is muttering
(Looking overhead and accurately watching) Ah it is a Sārikā !
Vasantaka—(thinking) Is it truly a Sārikā ?
King—(with a smile) Friend, it is.
Vasantaka—Friend, you are a coward since you describe a Sārikā as a spectre.
King—Fie on you idiot ! You attribute to me what has been committed by you.
Vasantaka—O pal, if so, do not indeed ward me off !

आः दास्याः पुत्रि, त्वं जानासि सत्यमेव वसन्तको बिभेतीति। तत्तिष्ठ तिष्ठ तावन्मुहूर्तं यावदेतेन पिशुनजनहृदयकुटिलेन दण्डकाष्ठेन परिपक्वमिव कपित्थफलमस्माद्बकुलपादपादाहत्य भूमौ पातयिष्यामि।

राजा — (निवारयन्) मूर्ख, किमप्येषा रमणीयं व्याहरति। तत्किमेनां त्रासयसि। शृणुवस्तावत्। (उभावाकर्णयत)

वसन्तकः— एवं भणति एतस्य ब्राह्मणस्य भोजनं देहीति।

राजा — सर्वमप्यौदरिकस्याभ्यवहार एव पर्यवस्यति। तत्सत्यं वद। किमालपति सारिका।

1 बिभेति he fears, √भी 3P. 2 तिष्ठ wait or stand thou still; लोट् √स्था 1P 3 मुहूर्तं moment 4 मुहूर्तम for a moment 5 पिशुन wicked vile 6 कुटिल a crooked 7 पिशुनजनहृदयकुटिलेन = पिशुनजनस्य हृदय इव कुटिलेन 8 दण्डकाष्ठम् whip 9 परिपक्व (√पच्) a ripe 10 कपित्थम् wood apple 11 आहत्य gerund आ + √हन् 2P to strike 12 भूमि f (loc s भूमौ) ground, earth 13 पातयिष्यामि I will drop; caus लृट √पत् 1P 14 रमणीय delightful 15 व्याहरति it talks, व्या + √हृ 1U 16 त्रासयसि *thou frightenest* caus लट् √त्रस् 1 4P 17 भणति *it speaks*, √भण् 1P 18 भोजनम् food, meal 19 देहि give thou, लोट √दा 3U 20 एतस्य ब्राह्मणस्य=एतस्मै ब्राह्मणाय 21 औदरिक glutton 22 अभ्यवहार eating, food 23 पर्यवस्यति it results in, पयव + √सो 4P 24 आलपति it speaks, आ + √लप 1P

Ah you daughter of a bitch, do you know this Vasantaka is really afraid? Keep still for a moment till I strike you like a ripe wood-apple with this whip as crooked as the heart of a wicked man and drop you *down from the* Bakula *tree onto the* ground

King—(Preventing) Idiot! She mutters something delightful So why do you *frighten her* Now we will hear the Sārikā

(Both listen)

Vasantaka—She says like this, "Give food to this Brahmin"

King—For a glutton everything results just in food Tell me in earnest what the Sārika pronounces

वसन्तकः— (आकर्ण्य) भो वयस्य, श्रुतं त्वया यदेतया मन्त्रितम् । एषा भणति सखि क एष त्वयाऽऽलिखितः । प्रवृत्तमदनमहोत्सवे भगवाननंग इति । पुनरपि भणति । सखि, कस्मात्त्वयाहमत्रालिखिता । सखि, किमकारणे कुप्यसि । यादृशस्त्वया कामदेव आलिखितस्तादृशी मया रतिरालिखितेति । तदन्यथासम्भाविनि, किं तवैतेनालपितेन । कथय सर्वं वृत्तान्तम् । तत् भो वयस्य, किं न्विदम् ।

राजा — वयस्य, एवं तर्कयामि । कयापि हृदयवल्लभोऽनुरागादभिलिख्य कामदेवव्यपदेशेन सखीपुरतोऽपह्नुतः । तत्सख्यापि प्रत्यभिज्ञाय वैदग्ध्यादसावपि तत्राऽऽलिख्य रतिव्यपदेशेन दर्शितेति ।

1 तर्कयामि I suppose, √तर्क 10U 2 वल्लभ lover 3 अनुराग love, 4 पुरतम् ind in front, before 5 अपह्नुत hidden, denied, PP अप + √ह्नु 2A 6 प्रत्यभिज्ञाय having recognized, gerund प्रति + अभि + √ज्ञा 9U 7 वैदग्ध्यम skill, proficiency. 8 दर्शित shown, caus PP दृश् 1P

Vasantaka— (listening) Hello friend, do you hear it saying? It says "Friend who is he that you have painted? He is the god of love in the previous grand Love Festival" It mutters again "Friend, what you have painted me here for? O friend why are you angry for nothing? I have painted Rati exactly as you did paint the God of Love O you misunderstanding one! so what is the use of this word of yours? Do tell me the whole story" Then, O Pal what does this possibly mean?

King — My friend, I suppose that some woman having drawn her heart's lover through her passion, denied him before her friend under the pretext that he was Cupid, sensing the fact of which her friend, too, skilfully painted the very woman there and showed her under the pretext that she was Rati

वसन्तक :— (छोटिका दत्वा) भो वयस्य, युज्यते खल्वेतत् ।

राजा — भो वयस्य, तूष्णीं भव । पुनरपि व्याहरति । तच्छृणुवस्तावत् ।
(उभावपि शृणुत )

वसन्तक :— भोः पुनरप्येषैवं भणाति । सखि, मा लज्जस्व । ईदृशस्य कन्यारत्नस्यावश्यमेवेदृशे वरेऽभिलाषेण भवितव्यम् । भो वयस्य मा पण्डितगर्वमुद्वह । अहं त एतस्या मुखाच्छ्रुत्वा सर्वं व्याख्यास्यामि । या एषा आलिखिता सा खलु कन्या दर्शनीया ।

राजा — यद्येवमवहितैः श्रोतव्यम् । अस्त्यत्रावकाशो नः कुतूहलस्य ।
(इत्युभावाकर्णत )

1 छोटिका f snapping the thumb and fore finger together to create a sound 2 युज्यते it is proper √ युज 4A 3 तूष्णीम silently 4 पण्डित learned, well informed 5 गर्व pride 5 उद्वह wear thou, लोट उद + √ वह 1P 6 व्याख्यास्यामि I will extol communicate, लृट व्या + √ख्या 2P 7 अवहित attentive PP अव + √धा 3U 8 अवकाश chance occasion 8 नः our, to us 9 कुतूहलम delight curiosity

Vasantaka — (making a sound by striking the thumb and the fore finger together) Ah friend, really it is likely

King — Hello companion keep silent ! Again it speaks Let us here now
(Both listen to it )

Vasantaka — Ho, again it mutters out, "— Friend, be not ashamed It is inevitable that such a precious girl like you must have such a bride groom as the object of her longing " O pal do not wear the pride of a well informed man After hearing everything from its beak I will transmit it to you Indeed the girl that was painted must be charming

King — If so it must be heard attentively There is a room for our curiosity here
( Thus both listen )

वसन्तकः—भो वयस्य, श्रुतं त्वया यदेतया मन्त्रितम्। सखि, अतोऽपि मे अधिकतरं संतापो वर्धते। सखि अपनयेमानि नलिनीपत्राणि मृणालवलयानि च। अलमेतेन। कस्मादकारण आत्मानमायासयसि।

राजा—वयस्य, न केवलं श्रुतं अभिप्रायोऽपि लक्षितः।

वसन्तकः—भो वयस्य, अद्यापि कुरकुरायते एव एषा सारिका दास्याः पुत्री। तत्सर्वं श्रुत्वा व्याख्यास्यामि।

राजा—युक्तमभिहितम्। (पुनराकर्णयतः)

वसन्तकः—भो वयस्य, एषा खलु सारिका दास्या' दुहिता चतुर्वेदी ब्राह्मण इव ऋचो भणितुं प्रवृत्ता।

1 केवलम् only simply 2 अभिप्राय sense, import 3 कुरकुरायते it sounds, नामधातु from कुरकुर sound 4 युक्त proper fit 5 अभिहित spoken PP अभि + √धा 3U 6 दुहित (nom s दुहिता) daughter 7 चतुर्वेदिन् a (nom m s चतुर्वेदी) proficient in 4 Vedas 8 ऋच f acc p ऋच) Vedic hymn 9 प्रवृत्त begun, PP प्र + √वृत 1A

Vasantaka — Hello pal, do you hear it saying? "—Hence, O my friend, my agony becomes re doubled My friend, do remove these lotus-leaves and stalks Enough of them Why do you trouble yourself without a cause"

King — My companion, not only have I heard the word but I have detected its import, too

Vasantaka— O friend, even now this Sarika — a damned slave girl's daughter mutters Hearing it all I will transmit it to you

King — You have spoken properly (Again both listen)

Vasantaka— Oh pal this damned slave girl's daughter this Sarika has begun to chant Hymns of Rgveda like a Brahmin well versed in the four Vedas

राजा — वयस्य, कथय किमप्यन्यचेतसा मया नावधारितं किमनयोक्तमिति ।

वसन्तक :— भो एवं भणाति ।

दुर्लभजनानुरागो लज्जा गुर्वी परवश आत्मा ।
प्रियसखि, विषमं प्रेम मरणं शरणं नु वरमेकम् ॥

राजा — (सस्मितम्) एवंविधं भवन्तं ब्राह्मणं मुक्त्वा कोऽन्य एवंविधानामृचामभिज्ञः ।

वसन्तक :— ततः किं नु खल्विदम् ।

राजा — ननु गाथिकेयम् ।

1 अन्यचेतस a having a mind fixed on something else 2 अन्यचेतसा=अन्यस्मिन् वस्तुनि चेत यस्य तेन 3 अवधारित known, PP अव + √ धृ 10U 4 उक्त said PP √वच् √ ब्रू 2U 5 एवंविध a such, such a kind 6 मुक्त्वा ind excepting except 7 विधा f mode, manner, form 8 एवंविधानाम्=एव विधा यासा तासाम् (ऋचाम्) 9 अभिज्ञ a. knowing 10 गाथिका f song verse

King — O companion, tell me what it has said as I have not caught its words with my mind fixed on something else

Vasantaka— It says as follows —

' My love for a person unattainable, my shame great and myself dependent upon others, dear friend, my love is uneven: possibly death alone is a better solace"

King — (smiling) Except for you, a Brahmin of such type, is there any one proficient in such Rg hymns ?

Vasantaka— Then what can it be?

King — Surely it is a simple song

वसन्तक :— किं गाथिका । ततः किं कथितम् ।

राजा — वयस्य, कयापि श्लाघ्ययौवनया प्रियतममनासादयन्त्या जीवितनिरपेक्षयोक्तम् ।

वसन्तक :— (उच्चैर्विहस्य) भोः किमेतैर्वक्रभणितैः । ऋजुकमेव किं न भणसि यथा मामेवानासादयन्त्येति । अन्यथा कोऽन्यः कुसुमचापव्यपदेशेन निह्नूयते ।

राजा — (ऊर्ध्वमवलोक्य) धिङ् मूर्ख, किमुच्चैर्विहसता त्वया तपस्विनी त्रासितेयं येनोड्डीयान्यत्र क्वापि गता । (इति निरूपयतः)

वसन्तक :— (विलोक्य) भो वयस्य, अन्यथा मा संभावय । एषा कदलीगृहमेव गता । तदेह्यनुसरावः । (इति परिक्रामत )

1 श्लाघ्य praiseworthy, respectable. 2 यौवनम् youth. 3 यौवनया—यौवन यस्या तया. 4 प्रियतम beloved, lover. 5 अनासादयत् (f. ins. s अनासादयन्त्या) not joining, not obtaining; Pres Part. caus अ+आ + √ सद् 1P. 6 जीवितम् life 7 निरपेक्ष a. no need of, indifferent. 8 उच्चैः loudly. 9 वक्र crooked, round-about. 10 भणितम् talking. 11 ऋजुक simple, straightforward. 12 निह्नूयते he is concealed; कर्मणि लट् नि + √ ह्नु 2A. 13 तपस्विन् a (तपस्विनी f.) poor, helpless. 14 त्रासित frightened; caus. PP' √ त्रस् 1 4 P 15 उड्डीन PP. उद् + √ डी 4A. to fly, to soar.

Vasantaka — What is a song? And what it means?

King — Companion, it was sung by some praiseworthy young lady who is not able to obtain her beloved lover and who consequently is in no need of life

Vasantaka— (laughing aloud) Ho, what is the use of round-about talks? Why don't you speak out straightforwardly that she is not able to obtain yourself? Otherwise, what other man is concealed under the pretext of Cupid?

King — (eyeing overhed) Fie idiot! the poor bird, frightened by you loudly laughing, has flown to somewhere else. (Both look.)

Vasantaka—(looking) Oh friend, do not misunderstand me! She has gone to the plantain bower Come, let us follow her.

(Both men walk round.)

राजा — दुर्वारां कुसुमशरव्यथां वहन्त्या
कामिन्या यदभिहितं पुरः सखीनाम् ।
तद्भूयः शुकशिशुसारिकाभिरुक्तं
धन्यानां श्रवणपथातिथित्वमेति ॥७॥

वसन्तकः— भो वयस्य, एतत्खलु कदलीगृहम् । यावत्प्रविशावः ।
(इत्युभौ प्रविशतः)

वसन्तकः— भो अलं दास्याः पुत्र्याः सारिकाया अन्वेषणप्रयत्नेन । इह तावन्मन्दमारुतोद्वेलद्बालकदलीदलशीतले शिलातल उपविश्य मुहूर्तं विश्राम्यावः ।

1 दुर्वार irresistible 2 व्यथा f pain, pang 3 कामिनी f (ins s कामिन्या) amorous woman, loving woman 4 पुरस् ind before, in the presence of 5 भूयस् again 6 शुक parrot 7 शिशु m child, young one 8 शुकशिशुसारिकाभि = शुकानां शिशवः सारिकाः च ताभिः 9 धन्य lucky, blessed 10 श्रवणपथ range of hearing 11 अतिथित्वम् the state of being a guest 12 एति it goes, attains, √इ 2P 13 अन्वेषणम् search after 14 प्रयत्न effort 15 मन्दमारुत breeze. 16 उद्वेलत् moving Pres Part उद् + √वेल 1P 17 शीतल cool 18 शिला-तल m n stone slab 19 विश्राम्याव we rest, वि + √श्रम् 4P

दुर्वारां कुसुमशरव्यथां वहन्त्या कामिन्या यत् सखीनां पुरः अभिहितं तत् भूयः शुकशिशुसारिकाभिः उक्तं धन्यानां श्रवणपथातिथित्वं एति ॥ प्रहर्षिणीवृत्तम् ।

King—What was narrated by a loving lady bearing the irresistible pang of love in the presence of her friends becomes the guest of lucky men's hearing, being re told by young parrots and Sārikas

Vasantaka- Oh friend, this is the very plantain bower Now we will enter
(Both enter)
Hello pal, we have had enough of our effort spent on searching after this Sarika—the cursed daughter of a female slave ! So let us rest here for a while sitting down on the stone slab which is cool on account of the young Banana leaves where a breeze is blowing

राजा — यदभिरुचितं भवते । (इत्युपविशतः)

राजा — (निःश्वस्य 'दुर्वारा ..... ' इति पुनः पठति)

वसन्तक :— (पार्श्वतोऽवलोक्य) भो वयस्य, एतेनोद्घाटितद्वारेण दुष्टवानरेण तस्याः सारिकायाः पञ्जरेण भवितव्यम् ।

राजा — वयस्य, निरूप्यताम् ।

वसन्तक :— यद्भवानाज्ञापयति । (परिक्रम्यावलोक्य च) एषोऽपि चित्रफलकः । यावदेनं गृह्णामि । (गृहीत्वा निरूप्य च हर्षं नाटयति)

राजा (सकौतुकम्) वयस्य, किमेतत् ।

वसन्तक :— भो वयस्य, दिष्ट्या वर्धसे । एतत्तद्यन्मया भणितं त्वमेवात्राऽऽलिखितः । अन्यथा कोऽन्यः कुसुमचापव्यपदेशेन निह्नूयत इति ।

1 अभिरुचित liked ; P. P. अभि + √रुच् 1·A 2 पार्श्वतम् ind. close at hand. 3 उद्घाटित opened ; P.P. उद् + √घट् 10U. 4 द्वारम् door. 5 उद्घाटितद्वारेण = उद्घाटित द्वार यस्य तेन (पञ्जरेण) 6 निरूप्यताम् it must be seen or investigated , लोट् कर्मणि नि + √रूप 10U. 7 कौतुकम् curiosity.

King —As you like (Both seat themselves)
(The King, sighing, again recites the poem— "What was narrated.. ..")

Vasantaka—(looking near by) Hoy friend, this must be the Sārikā's cage whose door is broken open by the wicked monkey

King —Friend, investigate it.

Vasantaka—I will do so (walking round and looking) Here is, also, a picture board I will pick it up now.
(Picking up and looking with care he expresses joy.)

King —(with a curiosity) Friend, what is it ?

Vasantaka—Hallo Pal, congratulations ! This is the very painting board as referred to by me, saying , "You are just painted here. Otherwise, what other man is denied under the pretext of Cupid—."

राजा — (सहर्षं हस्तौ प्रसाय) सखे, दर्शय दर्शय ।

वसन्तक :— (बलादगृहीत्वा पश्यति । विलोक्य सविस्मयम्) वयस्य, पश्य पश्य,

लीलावधूतपद्मा कथयन्ती पक्षपातमधिकं नः ।
मानसमुपैति केयं चित्रगता राजहंसीव ॥ ८ ॥

अपि च,

विधायापूर्वपूर्णेन्दुमस्या मुखमभूद्ध्रुवम् ।
धाता निजासनाम्भोजविनिमीलनदुःस्थितः ॥ ९ ॥

1 प्रसाय having extended forth, or stretched out caus gerund प्र + √सृ 1 3P 2 कन्यका f virgin 3 पारितोषिकम reward, present 4 विना (+ ins or acc ) without 5 लीला f play, grace, beauty 6 अवधूत shaken off , PP अव + धू 6P 1 5 9 10U 7 पद्मम् lotus 8 लीलावधूतपद्मा = लीलया अवधूतानि पद्मानि यया सा 9 पक्षपात winged flight, affection 10 मानस n mind, m name of a lake 11 उपैति it approaches , उप + √इ 2P 12 चित्रगत a painted 13 विधाय gerund वि + धा 3U to shape, to form 14 अपूर्व quite new wonderful 15 पूर्णेन्दु full moon 16 अभूत he was , लुङ √भू 1P 17 धातृ m ( nom s धाता ) creator 18 आसनाम्भोज lotus as a seat 19 विनिमीलनम shutting of petals 20 दुःस्थित distressed, unhappy

लीलावधूतपद्मा न अधिक पक्षपात कथयन्ती मानस उपैति राजहंसी इव चित्रगता इयं का ? आर्यावृत्तम् ॥ अपूर्वपूर्णेन्दु अस्या मुख विधाय धाता निजासनाम्भोज विनिमीलनदु स्थित ध्रुव अभूत ॥ अनुष्टुब्वृत्तम्

King —(joyfully stretching out his hands) O friend show me, show me !

Vasantaka—I will not show you The virgin is also painted here So how such a precious girl will be shown without any reward ?

King—(seizing it by force he looks Observing in astonishment) O friend behold, behold !

*Who is she painted in picture that comes to mine heart, sur* passing Padma in point of beauty and showing me her excessive love as a female royal swan goes to the lake Manasa, gracefully shaking off lotuses and showing us her great winged flight ?

And moreover,

Having shaped her unique full moon face the Creator was very much uneasy at the closing of the lotus as his own seat

(तत प्रविशति सागरिका ससङ्गता च)

सागरिका — सखि, सुसङ्गते, न समासादितास्माभिः सारिका। तच्चित्रफलकमपि तावदेतस्मात्कदलीगृहाद्गृहीत्वा लघु गच्छावः।

सुसंङ्गता — सखि, एवं कुर्वः। (इत्युपसपत)

वसन्तक :— भो वयस्य, कस्मात्पुनरेषावनतमुख्यालिखिता।

सुसंगता — (आकण्य) सखि, यथा वसन्तको मन्त्रयते तथा तर्कयामि भर्त्राप्यत्रैव भवितव्यम्। तत्कदलीगृहगुल्मान्तरिते भूत्वा प्रेक्षावहे। (इ युभ आकणयत)

राजा — पश्य पश्य। (विधायापूवपूर्ण द इत्यादि पुन पठति)

1 समासादित obtained, caus P P सम + आ + $\sqrt{}$सद 1P 2 अवनतमुख a (f nom s अवनतमुखी) with face bent down 3 भर्त्रा भवितव्यम (भाव प्रयोग) the king must be present 4 गुल्म m n thicket bush wood 5 अन्तरित screened concealed, P P अन्तर + $\sqrt{}$इ 2P 6 कदलीगृहगुल्मान्तरित = कदलीगृहस्य गुल्म अन्तरित।

(Then enter Sagarika and Susangata)

Sagarika—Friend Susangata we have not caught the Sarika So we shall quickly carry away only the painting board from this plantain arbour

Susangata—Friend let us do so (Both advance)

Vasantaka—Hello friend, why is she painted, her face hung down?

Susangata—(listening) Friend Vasantaka is speaking So I suppose the king must be here too We will therefore see, being concealed in the thicket of the plantain bower (Both girls listen)

King —Behold behold! (Again he recites Having shaped her unique full moon etc)

सुसंगता — सखि, दिष्ट्या वर्धसे । एष ते हृदयवल्लभस्त्वामेव वर्णयति ।

सागरिका — (सलज्जम्) सखि, कस्मात्परिहासशीलतयेमं जनं लघूकरोषि ।

वसन्तकः— (राजानं चालयित्वा) ननु भणामि । कस्मादेषावनतमुख्यालिखिता ।

राजा — वयस्य, सारिकयैव सकलमावेदितम् ।

सुसंगता — (विहस्य) सखि, दर्शितं सारिकयात्मनो मेधावित्वम् ।

वसन्तकः— अपि सुखयति ते लोचनयोर्न वेति ।

सागरिका — (ससाध्वसम्) किमेष भणिष्यति इति सत्यमेव मरणजीवितयोरन्तरे वर्ते ।

1 वर्णयति he describes ; √वर्ण 10U 2 परिहास joke, laughter 3 शीलता f disposition, nature 4 लघूकरोषि thou humblest, √कृ 8U 5 चालयित्वा caus gerund √चल् 1P to move 6 सकल entire 7 मेधावित्वम् wisdom intelligence 8 सुखयति it pleases ; नामधातु √सुखय 9 अन्तरे in between 10 वर्ते I exist वृत् 1A

Susangata—Congratulations, friend! Your heart's lover is describing you only

Sāgarikā—(blushing) Friend, why do you humble me with your joking disposition ?

Vasantaka—(moving the king) Sure I say why is she painted, hanging down her face ?

King —O companion, everything was explained by the Sārikā

Susangata—(laughing) Friend, the Sārikā has shown her own intelligence.

Vasantaka—Does she please your eyes ?

Sāgarika—(with fear) What will he say ? Truly, I exist in between life and death

राजा — सुखयतीति किमुच्यते ।

कृच्छ्रादूरुयुगं व्यतीत्य सुचिरं भ्रान्त्वा नितम्बस्थले
मध्येऽस्यास्त्रिवलीतरंगविषमे निस्पन्दतामागता ।
मद्दृष्टिस्तृषितेव संप्रति शनैरारुह्य तुङ्गौ स्तनौ
साकांक्षं मुहुरीक्षते जललवप्रस्यन्दिनी लोचने ॥ १० ॥

सागरिका — (श्रुत्वा स्वगतम्) हृदय, प्रसीद प्रसीद । समाश्वसिहि समाश्वसिहि । मनोरथोऽपि त इदानीमियतीं भूमिं गतः ।

1 उच्यते it is said, कर्मणि लट √वच् 2P 2 कृच्छ्रात् ind with much difficulty 3 व्यतीत्य having passed, gerund व्यति + √इ 2P 4 सुचिरम् for a very long time. 5 नितम्ब hip, buttocks 6 स्थलम् place 7 मध्य waist 8 त्रिवली f the threefold wrinkles above the navel of a woman 9 तरग wave 10 विषम uneven, rugged 11 त्रिवलीतरगविषमे — त्रिवली एव तरगा तै विषमे 12 निस्पन्दता f motionlessness, stoppage 13 मद्दृष्टि f = मम दृष्टि 14 तृषित thirsty, , longed P P √तृष् 4P. 15 सप्रति ind now 16 तुग lofty 17 स्तन breast 18 आकाक्षा f lust, longing 19 साकाक्षम् lustfully 20 जलम water (tear) 21 लव drop 22 प्रस्यन्दिन् shedding, oozing 23 मनोरथ wish 24 इयत् a (acc s f इयतीम्) this much, such a limited 25 भूमि f. ground

मद्दृष्टि कृच्छ्रात् ऊरुयुग व्यतीत्य नितम्बस्थले सुचिर भ्रान्त्वा अस्या त्रिवलीतरगविषमे मध्ये निस्पन्दतां आगता सप्रति तुङ्गौ स्तनौ शनै आरुह्य तृषिता इव मुहु साकाङ्क्ष जललवप्रस्यन्दिनी लोचने ईक्षते ॥ शार्दूलविक्रीडितम् ।

King—Why do you ask,—"Does she please your eyes?'

My eyes, passing over the pair of her thighs with much difficulty and for a considerable time roaming about her buttocks, come to a standstill at her waist uneven with the wavelets in the form of the three folds of skin above the navel, and now slowly mounting her plump breasts as if feeling thirsty lustfully drink her eyes shedding tear-drops again and again

Sagarikā—(on hearing to herself) My heart be calm, be calm! Cheer up, cheer up! The object of your wish is now come to this limited ground

सुसङ्गता — सखि, श्रुतं त्वया ।

सागरिका — (विहस्य) त्वमेव शृणु । यस्या आलेख्यविज्ञानं वर्ण्यते ।

वसन्तकः— (फलक निर्वर्ण्य) भो वयस्य, यस्य पुनरीदृश्योऽप्येवं प्रियसमागमं बहु मन्यन्ते तस्याप्यात्मन उपरि कः परिभवः। येनात्रैव तया लिखितमात्मानं न प्रेक्षसे ।

राजा — (निर्वर्ण्य) वयस्य, अनया लिखितोऽहमिति यत्सत्यमात्मन्येव बहुमानः । तत्कथं न पश्यामि । पश्य ।

1 यस्या = सुसङ्गतायाः । 2 आलेख्यविज्ञानम् knowledge or skill of painting 3 यस्य = राजात्मन । 4 ईदृश्य (f nom p of ईदृशी) such girls 5 प्रियसमागम dear union 6 परिभव = पराभव insult, disrespect 7 उपरि (+ acc gen loc) above, upon, towards 8 येन whereby, since 9 बहुमान high esteem, honour 10 यत् = यस्मात् therefore 11 निर्वर्ण्य having minutely seen, gerund निस् + √वर्ण 10U

Susangatā—Friend, have you heard ?

Sāgarikā—(laughing) Do listen yourself alone whose proficiency in painting is described (by him)

Vasantaka—(minutely looking at the board) Oh friend ! Since you do not observe yourself painted by her here, what insult is this upon your own person, *whose loving union (with them) such girls* highly think of ?

King —(observing in earnest) O my companion ! I consider myself honoured since I am painted by her
So how do I not see it ? Behold !

भाति पतितो लिखन्त्यास्तस्या बाष्पाम्बुसीकरकणौघः ।
स्वेदोद्गम इव करतलसंस्पर्शादेष मे वपुषि ॥ ११ ॥

सुसङ्गता — सखि, त्वमेव धन्या श्लाघनीया सा यया भर्तैवं संतोष्यते।

वसन्तकः— (पार्श्वतोऽवलोक्य) भो वयस्य, एतत्खलु तस्याः सरसकमलिनी-दलमृणालविरचितं मदनावस्थासूचकं शयनीयं लक्ष्यते ।

1 भाति it appears, √भा 2P 2 पतित dropped, PP √पत् 1P 3 बाष्प m n tear, 4 अम्बु n water 5 सीकर spray, rain, drizzling 6 ओघ flood 7 कण drop, particle 8 बाष्पाम्बुसीकरकणौघ = बाष्पाणां अम्बूनि तथा सीकरा तेषां कणा तथा ओघ 9 स्वेद sweat, perspiration 10 उद्गम appearance 11 करतल m n palm of hand 12 संस्पर्श touch 13 वपुस् n (loc s वपुषि) body 14 धन्य happy, blessed 15 श्लाघनीय commendable 16 संतोष्यते it is pleased; caus कर्मणि लट √तुष 4P 17 सरस wet, juicy 18 सूचक indicative of 19 शयनीयम् bed, couch

लिखन्त्या तस्या पतित एष बाष्पाम्बुसीकरकणौघ करतलसंस्पर्शात् स्वेदोद्गम इव मे वपुषि भाति ॥ आर्यावृत्तम् ।

This flood of streaming tear drops fallen from her while she was painting appears like perspiration in my body caused by the touch of her palm

Susangatā—Friend, you are just a lucky and praiseworthy girl with whom the king is so pleased

Vasantaka—(looking close at hand) Oh friend here appears, indeed, her couch arranged with wet lotus leaves and stalks, which indicates her love-sick

राजा — वयस्य, निपुणमुपलक्षितम् । तथा हि

परिम्लानं पीनस्तनजघनसंगादुभयत-
स्तनोर्मध्यस्यान्तः परिमिलनमप्राप्य हरितम् ।
इदं व्यस्तन्यासं श्लथभुजलताक्षेपवलनैः
कृशाङ्ग्याः संतापं वदति नलिनीपत्रशयनम् ॥ १२ ॥

1 परिम्लान faded, withered. 2 पीन plump, fat, 3 जघनम् hip, buttocks 4 सङ्ग· touch, contact. 5 पीनस्तनजघनसङ्गात् = पीनौ स्तनौ च जघन च तेषां सगात्. 6 उभयतस् ind on both sides. 7 तनु (gen, s तनो ) a. thin, delicate, f. body. 8 अन्तर् ind. in the middle, inside. 9 परिमिलनम् touch, contact. 10 अप्राप्य not having obtained; gerund अ + प्र + √आप् 5P. 11 हरित green. 12 श्लथ loose. 13 व्यस्त upset, dispersed ; PP. वि + √अस् 4P. 14 न्यास. placing, planting, arrangement 15 व्यस्तन्यासम् = व्यस्त न्यास यस्य तत्. 14 भुजलता f. creeper-like arm. 15 आक्षेप· movement. 16 वलनम् moving about. 17 श्लथभुजलताक्षेपवलनै· = श्लथयो. भुजलतयो. आक्षेपवलनै. 18 कृशाङ्गी f. a woman with slender form.

पीनस्तनजघनसङ्गात् उभयत परिम्लान तनो मध्यस्य परिमिलन अप्राप्य अन्तः हरित श्लथभुजलता-क्षेपवलनै व्यस्तन्यास इदं नलिनीपत्रशयनं कृशाङ्ग्या. सताप वदति ॥ वृत्तं शिखरिणी ।

King —O friend, you have carefully observed. Whereas,—

This bed of lotus-leaves, the arrangement of which is upset on account of moving to and fro of the languid creeper-like arms, which is withered on both sides through the contact of the plump breasts and hips and *which is green in the middle* escaping the touch of the narrow waist, tells the agony of the slender one.

अपि च ।

स्थितमुरसि विशालं पद्मिनीपत्रमेतत्
कथयति न तथान्तर्मन्मथोत्थामवस्थाम् ।
अतिशयपरितापग्लापिताङ्ग्या यथास्याः
स्तनयुगपरिणाहं मण्डलाभ्यां ब्रवीति ॥ १३ ॥

विदूषकः— (नाट्येन मृणालिकां गृहीत्वा) भो वयस्य, अयं खलूपलब्धोऽपरस्तस्या एव पीनस्तनयोग्यः क्लिश्यत्कोमलमृणालहारः । तत्प्रेक्षतां भवान् ।

1 स्थित stood, placed ; PP. √स्था 1P. 2 उरस् n (loc s उरसि) breast. 3. विशाल large, broad 4 पत्रम् leaf 5 यथा-तथा as so, so much as 6 अन्तर्मन्मथ secret or inward love 7 उत्थ a. (only at the end of a compound) produced from, caused by 8 अतिशय excess. 9 परिताप pain, heat 10 ग्लापित withered, emaciated ; caus PP. √ग्लै 1P. 11 अतिशयपरितापग्लापिताङ्ग्या = अतिशय य परिताप तेन ग्लापित अङ्ग यस्या तस्या 12 परिणाह extent, width, breadth. 13 मण्डलम् disc, circle. 14 ब्रवीति it speaks ; लट् √ब्रू 2P 15 योग्य fit 16 क्लिश्यत् fading, paining ; pres. part √क्लिश् 4U. 9P. 17 कोमल tender. 18 हार necklace

उरसि स्थित विशाल एतत् पद्मिनीपत्र यथा अतिशयपरितापग्लापिताङ्ग्या अस्या स्तनयुगपरिणाहं मण्डलाभ्या ब्रवीति तथा अन्तर्मन्मथोत्था अवस्था न कथयति ॥ वृत्त मालिनी ।

And morever,

> This large lotus-leaf placed upon her breast would not indicate her internal state produced from love as much as this bespeaks with its two circles the extent of the pair of the bosoms of the girl whose frame is withered by the excessive pain

Jester (Vasantaka)—(taking up a stalk by gesticulation) Ho friend, I have got another fading, tender necklace of lotus-stalk here belonging to her and fitted to her plump breasts May you behold it, sire !

राजा — (गृहीत्वोरसि विन्यस्य सोपालम्भम्) अयि जडप्रकृते !

परिच्युतस्तत्कुचकुम्भमध्यात् किं शोषमायासि मृणालहार ।
न सूक्ष्मतन्तोरपि तावकस्य तत्रावकाशो भवतः किमु स्यात् ॥१४॥

सुसङ्गता — (आत्मगतम्) हा धिक् हा धिक् । गुर्वनुरागाक्षिप्तहृदयो भर्ताऽसंबद्धमपि मन्त्रयितुं प्रवृत्तः। तदतः परं पुनर्न युक्तमुपेक्षितुं तावत् । (प्रकाशम्) सखि, यस्य कृते त्वमागता सोऽयं तिष्ठति ।

1 विन्यस्य having placed gerund वि + नि + √अस् 4P 2 उपालभ censure 3 सोपालम्भम् ad censuringly 4 जड dull, senseless 5 प्रकृति f nature 6 जडप्रकृते = जडा प्रकृतिः यस्य स सबोधनम् 7 परिच्युत dropped, PP परि + √च्यु 1A 8 तत्कुच = तस्या कुच her breast, or nipple 9 कुभ pitcher 10 तत्कुचकुम्भमध्यात् = तस्या कुचौ कुम्भौ इव तयो मध्यात 11 शाष dryness, emaciation 12 आयासि thou comest, attainest आ + √या 2P 13 सूक्ष्म delicate, minute 14 तन्तु m (gen. s तन्तो) string fibre 15 तावक thy, thine 16 तत्र = कुचकुम्भयो मध्ये भाग 17 अवकाश chance, access, room 17 किमु (doubtfully) how why ? 18 असबद्ध senseless incoherent 13 उपेक्षितुम to neglect, inf उप + √ईक्ष 1A 22 कृते ind (+ gen) for the sake of

मणालहार ! तत्कुचकुम्भमध्यात परिच्युत (त्वम्) किं शोष आयासि ? तावकस्य सूक्ष्मतन्तो अपि अवकाश तत्र न, भवत [(अवकाश)] किमु स्यात ? ॥ उपजाति

King —(picking it up and placing it on his bosom, reproachfully) Ah you, senseless natured one !
Dropped *off the middle of her pitcher like bosoms why dost thou fade away ? Even they own delicate fibre could not gain a chance there how, then thou ? O necklace of lotus stalk !*

Susangata—(Aside) Ha fie ha fie ! The King with his heart captivated by a profound passion has begun to speak a senseless thing So further it is improper to neglect him now (Aloud) Friend, He, for whose sake you have come is waiting

सागरिका — (सासूयम्) सखि, कस्य कृतेऽहमागता ।

सुसंगता —(विहस्य) अयि अन्यशङ्किते, ननु चित्रफलकस्य । तद्गृहाण तम् ।

सागरिका — (सरोषम्) अयि निपुणा खलु त्वमपीदृशानामालापानाम् । तदन्यतो गमिष्यामि । (इति गन्तुमिच्छति)

सुसंगता — अयि असहने, इह तावन्मुहूर्तं तिष्ठ । यावदस्मात्कदलीगृहाचित्रफलकं गृहीत्वागच्छामि ।

सागरिका — सखि, एवं कुरु ।

सुसंगता — एवं करोमि । (सुसंगता कदलीगृहाभिमुखं परिक्रामति)

विदूषकः— (सुसङ्गतां दृष्ट्वा ससंभ्रमम्) भो वयस्य, प्रच्छादयैतच्चित्रफलकमनेन कदलीपत्रेण । एषा खलु देव्याः परिचारिका सुसंगताऽऽगता ।

1 असूया f envy anger 2 सासूयम् angrily, enviously, 3 रोष anger. 4 सरोषम् angrily 5 असहन impatient 6 अभिमुखम् towards

Sāgarikā—(enviously) Friend, for whose sake I am come ?

Susangatā—(laughing) Ay suspecting one! Certainly for the sake of the painting board So take it

Sagarikā—(angrily) Ay, indeed you are skilled in such round about talks I will go away (she intends to go )

Susangatā—Ah impatient one, wait here for a moment till I bring back the picture-board from this plantain-arbour

Sāgarika—Friend, do so

Susangatā—I will do so (Susangatā moves towards the plantain bower )

Jester—(looking at Susangata, with haste) Oh friend, do cover this picture-board with this Banana leaf ! Surely Susangatā the queen's maid has come

( राजा पटान्तेन फलकमाच्छादयति )

सुसंगता — (उपसृत्य) जयतु जयतु भर्ता ।

राजा — सुसंगते, स्वागतम् । इहोपविश्यताम् ।

(सुसङ्गता उपविशति)

राजा — सुसंगते, कथमिहस्थोऽहं भवत्या ज्ञातः ।

सुसंगता — (विहस्य) न केवलं देवः । चित्रफलकेन सह सर्वो वृत्तान्तोऽपि मया विज्ञातः । तद्देव्यै गत्वा निवेदयिष्ये । (इति गन्तुमिच्छति)

वसन्तकः— (अपवार्य सभयम्) भो वयस्य, सर्वं संभाव्यते । मुखरा खल्वेषा गर्भदासी । तत्परितोषयैनाम् ।

राजा — युक्तमुक्तं भवता । (सुसंगतां हस्ते गृहीत्वा) सुसंगते, क्रीडामात्रमेतत् । अकारणे त्वया देवी न व्यथयितव्या । इदं ते पारितोषिकम् ।

(इति कर्णादवतार्याभरणं दातुमिच्छति )

1 पट m n garment 2 अन्त end 3 स्वागतम् ind welcome 4 अपवार्य ind (a dramatical term) Aside 5 भयम् fear 6 सभयम् fearfully 7 संभाव्यते it is possible, caus कर्मणि लट् सम् + √भू 1P 8 मुखर talkative 9 गर्भ womb 10 गर्भदासी = गर्भात् प्रभृति दासी 11 परितोषय लोट् caus 2nd person single, परि + √तुष् 4P to satisfy with some present 12 व्यथयितव्य ought to be vexed Pot PP √व्यथ् 1A 13 कर्ण ear 14 अवतार्य having taken off, caus gerund अव + तॄ 1P आभरणम् ornament

(The King covers the board with the end of his dress )

Susangata—(advancing) May my lord win victory!

King —O Susangata welcome! Be seated here (Susangata sits ) O Susangata, how did you know my presence here?

Susangata—(laughing) Not only Your Majesty but everything together with the picture board I have known So I will go and inform the queen (She intends to go )

Vasantaka—(*aside to the king, in fear*) O friend *everything is possible* Really she is a talkative slave girl since she was in her mother's womb So coax her with some gift!

King —You have spoken a proper thing (Holding Susangata by the hand ) O Susangata it is just a play Do not vex the queen for nothing Here is a present for you (Taking off an earring from his ear he wishes to give it )

सुसंगता — (स्वगतम्) प्रसन्नो भर्ता। (प्रकटम्) अलं शंकयैतेन भर्तुः प्रसादेन च व्याक्रीडितमेव। तत्किं कर्णाभरणेन। एष एव मे गुरुः प्रसादः यत् किमिति त्वयाऽत्र चित्रफलकेऽहमालिखितेति भणित्वा कुपिता मे प्रियसखी सागरिका वर्तते। तद्गत्वा प्रसादयतु।

राजा — (ससम्भ्रमम्) सुसंगते, दर्शय दर्शय, क्वासौ।

सुसंगता — भर्तः, एषा कदलीगुल्मान्तरिता तिष्ठति।

राजा — आदेशय मार्गम्।

1 प्रसन्न a (प्र + √सद् 1P) favourable, kind, gracious 2 प्रकटम् clearly 3 शङ्का f (ins s शङ्कया) fear, doubt 4 प्रसाद favour, grace, kindness 5 व्याक्रीडित played amused, PP व्या + क्रीड 1P 6 कुपित angered, PP √कुप 4P 7 वर्तते she is, she exists, √वृत् 1A 8 प्रसादयतु may he show grace, or favour, or may he please, caus लोट प्र + √सद् 1P

Susangata—(to herself) Gracious is the king (Clearly) Away with your fear! I have just played with this grace of Your Majesty Therefore there is no need of the ear ornament There is a loving friend of mine, Sāgarikā who became angry after saying,—"Why did you paint me here in this painting board?" It would be a great favour, should Your Majesty go and show her his grace

King—(hastily) O Susangata show me, show me! Where is she?

Susangatā—Sire! She stands concealed in the thicket of plantain trees

King—Lead me to the way

सुसंगता — इत इतो भर्ता । (इति परिक्रामत.)

वसन्तक :— भोः, गृह्णाम्येतच्चित्रफलकम् । एतस्य कार्यं भविष्यति ।
(इति तथा करोति)

(सर्वे कदलीगृहान्निष्क्रान्ता )

सागरिका — (राजान दृष्ट्वा सहर्ष ससा वस सकम्प च स्वगतम्) हा धिक् हा धिक् । एनं प्रेक्ष्यातिसाध्वसेन न शक्नोमि पदात् पदमपि चलितुम् । तत्किं वात्र करिष्ये ।

वसन्तक :— (सागरिका दृष्ट्वा) हीही भीः । आश्चर्यम् । आश्चर्यम् । ईदृशं कन्यारत्नं मनुष्यलोके न दृश्यते । तत्तर्कयामि प्रजापतेरपीदं निर्माय विस्मयः समुत्पन्न इति ।

1 कार्यम् work, business, need 2 शक्नोमि (+ inf) I am able to, I can ; √शक् 5P 3 पद m n foot 4 पदात पदम् from foot to foot 5 चलितुम् to move, stir, inf √चल् 1P 6 करिष्ये I will do, लट √कृ 8U 7 मनुष्यलोक mortal or human world 8 प्रजापति m (gen s प्रजापत) creator 9 निर्माय having created; gerund निस् + √मा 2P 3 4A

Susangatā—This way, this way, my lord (Two persons walk )

Vasantaka—Hello ! I am taking up this picture board
There shall be a need of this (He does so )

(All depart from the plantain bower )

Sāgarikā—(on beholding the king with joy, fear and tremor, to herself) Ah fie, ah fie ! On seeing him I am not able to stir a single step due to an extreme fear Then, what shall I possibly do here ?

Vasantaka—(looking at Sagarika) Oh, oh hallo ! Wonderful, wonderful ! This kind of jewel among girls is not visible in the mortal world So I assume that after creating her even the Creator must have felt wonder stricken

राजा — वयस्य, ममाप्येवं मनसि वर्तते ।

दृशः पृथुतरीकृता जितनिजाब्जपत्रत्विष-
श्चतुर्भिरपि साधु साध्विति मुखैः समं व्याहृतम् ।
शिरांसि चलितानि विस्मयवशाद्ध्रुवं वेधसा
विधाय ललनां जगत्त्रयललामभूतामिमाम् ॥ १५ ॥

सागरिका — (सासूयं सुसंगतामालोक्य) सखि, ईदृशश्चित्रफलकस्त्वयाऽऽनीतः ।
(इति गन्तुमिच्छति)

1 दृश् f. (p. दृश ) eye 2 पृथुतरीकृत widened, broadened. 3 अब्जम् lotus. 4 पत्रम leaf, petal. 5 त्विष् f. beauty, lustre 6 जितनिजाब्जपत्रत्विष =जिता निजस्य अब्जस्य पत्राणां त्विट् (त्विष्) याभि ता . 7 समम् ind. together, in the same manner. 8 व्याहृत spoken, pronounced; PP व्या+√हृ 1U 9 शिरस् n. (p शिरांसि) head 10 वश influence, force 11 वेधस् m (ins. वेधसा) Brahmā, creator 12 विधाय having shaped; gerund वि+√धा 3U 13 ललना woman 14 जगत् n. world. 15 त्रयम् triad, group of three 16 ललामम् best ornament. 17 सासूयम् angrily, intolerably, enviously. आनीत brought; PP. आ+√नी 1U.

जगत्त्रयललामभूता इमा ललना विधाय विस्मयवशात् ध्रुव वेधसा शिरासि चलितानि जितनिजाब्ज-पत्रत्विष दृश पृथुतरीकृता चतुर्भि मखैं अपि 'साधु साधु' इति मम व्याहृतम् ॥ वृत्त पृथ्वी ।

King—My friend, the same is, also, in my mind Having shaped this woman to be the best ornament of the three worlds the Creator under the influence of wonder must have nodded his heads, more widened his eyes surpassing the lustre of his own lotus-petals, and simultaneously uttered with his four mouths; — 'Excellent ! Excellent !'

Sāgarikā—(intolerably looking at Susangatā) Friend, so you have brought this kind of picture-board ! (So saying, she wants to go )

राजा — दृष्टि रुषा क्षिपसि भामिनि यद्यपीमां
स्निग्धेयमेष्यति तथापि न रूक्षभावम्।
त्यक्त्वा त्वरां व्रज पदैः स्खलितैरयं ते
खेदं गमिष्यति गुरुर्नितरां नितम्बः ॥ २६ ॥

सुसङ्गता — भर्तः अतिकोपना खल्वेषा। तदग्रहस्ते गृहीत्वा प्रसादयैनाम्।

1 रुष f (ins s रुषा) anger 2 क्षिपसि thou castest, √क्षिप 6U 3 भामिनी f (voc s भामिनि) very beautiful woman, passionate woman 4 यद्यपि~तथापि although~yet 5 स्निग्ध charming, lovely इयम=दृष्टि 7 एष्यति it will attain go, लृट√इ 2 P 8 रूक्ष cruel rough 9 भाव state, temper 10 त्यक्त्वा having abandoned, gerund√त्यज 1P 11 त्वरा f urgency haste 12 व्रज walk thou! लोट√व्रज 1P 13 स्खलित a tottering stumbling 14 खेद trouble fatigue 15 गमिष्यति it will attain or go, लृट√गम 1P 16 *नितम्ब hips* 17 *नितराम extremely,* certainly 18 अतिकोपन a very angry

भामिनि! यद्यपि रुषा इमां दृष्टि क्षिपसि तथापि स्निग्धा इयं रूक्षभावं न एष्यति त्वरां त्यक्त्वा व्रज, स्खलितैः पदैः अयं ते गुरुः नितम्बः नितरां खेदं गमिष्यति॥ वृत्तं वसन्ततिलका।

King—O passionate one! although thou castest such a glance out of anger yet it (i e the glance) does not turn cruel in temper
Leaving thy haste aside walk thou! By thy tottering steps these thy heavy hips *might get very much fatigued*

Susangata—*Your Majesty indeed, she is very angry Therefore holding her* by the tip of the hand, propitiate her!

राजा — (सानन्दम्) यथाह भवती । (सागरिका हस्ते गृहीत्वा स्पर्शसुखं नाटयति)

वसन्तक :— भोः एषा खलु त्वयाऽपूर्वा श्रीः समासादिता ।

राजा — वयस्य, सत्यम् ।

श्रीरेषा पाणिरप्यस्याः पारिजातस्य पल्लवः ।
कुतोऽन्यथा स्रवत्येष स्वेदच्छद्मामृतद्रवम् ॥ १७ ॥

सुसंगता — सखि, अतिनिष्ठुरेदानीमसि त्वम् । यैवं भर्त्रा हस्तेऽवलम्बितापि कोपं न मुञ्चसि ।

1 सानन्दम् joyfully 2 आनन्द joy 3 आह she said, लिट् √ब्रू 2U 4 श्री f beauty goddess of wealth 5 पाणि m hand 6 पारिजात a kind of wish yielding tree of Paradise 7 पल्लव shoot, leaf, sprout 8 स्रवति it flows, oozes, √स्रु 1P 9 छद्मन् n (छद्म nom acc, or in compounds) disguise, plea, pretext 10 अमृतम nectar 11 द्रव juice, fluidity 12 स्वेदच्छद्मामृतद्रवम् = स्वेदस्य छद्म यस्य स अमृतस्य द्रव तम् । 13 अतिनिष्ठुर hard hearted, cruel, rough 14 अवलम्बित a leaning on अव + √लम्ब् 1A 15 कोप anger 16 मुञ्चसि thou leavest √मुच 6P

एषा श्री अस्या पाणि अपि पारिजातस्य पल्लव, अन्यथा कुत एष (पाणि) स्वेदच्छद्मामृतद्रव स्रवति ॥ वृत्त अनुष्टुप ।

King — (joyfully) As you have said (Catching Sagarika by the hand he expresses the happiness of her touch)

Vasantaka— O friend she is, indeed, a new Laxmi you have acquired

King —True, my friend

She is a Laxmi her hand a shoot of Parijata the tree of Paradise
Otherwise why her hand oozes the juice of nectar under the disguise of sweat ?

Susangata—My friend, now you are very hard hearted, inasmuch as you do not cast off your anger even though held by the King by the hand

सागरिका — (सभ्रूभङ्गम्) अयि सुसंगते, अद्यापि न विरमसि ।

राजा — प्रिये सागरिके, न खलु सखीजने युक्त एवं कोपानुबन्धः कर्तुम् ।

वसन्तक :— भवति, बुभुक्षितो ब्राह्मण इव किं कुप्यसि ।

सुसंगता — सखि, त्वया सह न विह्लिष्ये ।

राजा — अयि कोपने, नैतद्युक्तं समानप्रतिपत्तिषु सखीषु ।

वसन्तक :— एषा खलु अपरा देवी वासवदत्ता ।

(राजा सचकित सागरिकाया हस्त मुञ्चति)

1 सभ्रूभङ्गम् ad. knitting eyebrows 2 विरमसि thou stoppest ; वि + √रम् 1A ; but with वि it takes परस्मैपद 3 अनुबन्ध continuity, persistence. 4 बुभुक्षित hungry. 5 कुप्यसि thou art angry ; √कुप् 4P. 6 विह्लिष्ये is very doubtful since this verbal form does not exist , hence it should be replaced by व्याहरिष्ये or वक्ष्यामि, both meaning 'I will talk or speak' 7 समान equal, same 8 प्रतिपत्तिः undertaking, assessment, or occupation, etc 9 समानप्रतिपत्तिषु = समाना प्रतिपत्ति यासां तासु । 10 अपर another.

Sāgarikā—(knitting her eye-brows) Ah Susangatā, even now you don't stop

King —Darling Sāgarikā, to continue to be angry with your friends in this manner is not proper

Vasantaka—Lady, why are you wrathful like a hungry Brāhmin ?

Susangatā—Friend, I will not speak to you

King—Ah angry one, it is not proper for your friends in the same occupation,

Vasantaka—Really, here is another queen, Vasavadattā

( The king startled, loosens Sāgarikā's hand)

सागरिका — (ससम्भ्रमम्) सुसंगते, किमिदानीं करिष्ये ।

सुसंगता — सखि, एतत्तमालविटपमन्तर्य इतो निष्क्रामावः ।

(इति निष्क्रान्ते)

राजा — (पार्श्वतोऽवलोक्य सविस्मयम्) क्वासौ देवी वासवदत्ता ।

वसन्तक :— भोः, तदेतत् । सा खल्वपरा देवी वासवदत्ताऽतिदीर्घरोषतयेति भणितम् ।

राजा — धिङ्मूर्ख ।

प्राप्ता कथमपि दैवात्कण्ठमनीतैव सा प्रकटरागा ।
रत्नावलीव कान्ता मम हस्ताद्भ्रंशिता भवता ॥ १८ ॥

1 अन्तर्य having concealed, gerund अन्तर् + √इ 2P 2 इतम् from here 3 अतिदीर्घ very long, lengthy 4 रोषता state of anger 5 प्राप्त obtained, PP प्र + √आप 5P 6 दैवम् fate, fortune 7 अनीत not brought, (or not embraced, in this case) PP अ + √नी 1P 8 प्रकट transparent, evident 9 राग passion, love 10 प्रकटरागा = प्रकट राग यस्या सा 11 रत्न-आवली f pearl or jewel necklace. 12 कान्त lovely. 13 भ्रंशित fallen off, PP caus √भ्रंश 1A 4P कथमपि somehow

कथमपि दैवात् प्राप्ता सा प्रकटरागा रत्नावली इव कान्ता कण्ठ अनीता एव मम हस्तात् भवता भ्रंशिता ॥ आर्यावृत्तम् ।

Sāgarikā— (hurriedly) O Susangatā what shall I do now ?

Susangatā—Friend, covered by this Tamāla tree we shall go away from here.

(Both girls depart )

King — (looking aside, startled) Where is Queen Vāsavadattā ?

Vasantaka— Hello friend ! It is like this I meant to say that she was really another queen Vāsavadatta on account of her prolonged anger

King —Fie on you fool !

She beautiful like a jewel necklace, whose love is manifest, was obtained by me somehow through luck, but was made to fall off from mine hand by you before her neck was embraced

(ततः प्रविशति वासवदत्ता काञ्चनमाला च)

वासवदत्ता — हञ्जे काञ्चनमाले, अथ कियद्दूर इदानीं सा आर्यपुत्रेण परिगृहीता नवमालिका ।

काञ्चनमाला — एतत्कदलीगृहमतिक्रम्य दृश्यते ।

वासवदत्ता — तेन हि आदेशय मार्गम् । तत्रैव गच्छावः ।

काञ्चनमाला — तदेतु एतु भट्टिनी । (इति परिक्रामतः)

राजा — वयस्य, क्वेदानीं प्रियतमा द्रष्टव्या ।

काञ्चनमाला — भट्टिनि, यथा समीपे भर्ता मन्त्रयति तथा तर्कयामि भट्टिनीमेव परिपालयंस्तिष्ठति । तदुपसर्पतु भट्टिनी ।

वासवदत्ता — (उपसृत्य) जयतु जयतु आर्यपुत्रः ।

1 द्रष्टव्य to be seen, pot P P √दृश् 1P. 2 परिपालयत् (nom. m s. परिपालयन्) waiting, Pres Part परि + √पाल् 10U.

(Then enter Vāsavadattā and Kānchanamālā)

Vāsavadattā—Maid Kānchanamāla, how far is it now to the Navamālikā favoured by my husband ?

Kānchanamālā—It is seen beyond this plantain bower

Vāsavadattā—Then show me the way. We will go there

Kānchanamālā—Then, this way, this way, Your Majesty.

(Both walk on)

King —Friend, now where is my dearest one to be seen ?

Kānchanamālā—O queen, as His Majesty speaks nearby, I think he stands waiting for Your Majesty
So may Your Majesty approach

Vāsavadattā—(approaching) May my lord be victorious !

वसन्तकः—एषा खलु देवी आगता ।

राजा — (अपवार्य) वयस्य, प्रच्छादय चित्रफलकम् । (विदूषको गृहीत्वा कक्षे स्थापयति)
(राजा प्रकाशम्) देवि, स्वागतम् । इहाऽऽस्यताम् ।

वासवदत्ता — (उपविश्य) आर्यपुत्र, अथ सत्यमेव कुसुमिता नवमालिका ।

राजा — (सविस्मयम्) देवि, प्रथममागतैरस्माभिस्त्वं चिरयसीति न सा दृष्टा। तदेहि । समेतावेव तां पश्यावः ।

वासवदत्ता — (निर्वर्ण्य) आर्यपुत्रमुखानुरागत एव मया ज्ञातं यथा कुसुमिता नवमालिकेति । तत् गमिष्ये ।

वसन्तकः—भवति, यद्येवं तज्जितमस्माभिः ।

(इति बाहू प्रसार्य नृत्यति । कक्षाया फलक पतति, तद् दृष्ट्वा विषाद नाटयति)

1 कक्ष m कक्षा f armpit, girdle, hiding place 2 चिरयसि thou delayest; नामधातु चिरय 3 समेत assembled met together, PP सम्+√इ 2P 4 अनुरागतस from the hue, lustre 5 बाहु m (बाहू nom and acc dual) arm 6 नृत्यति he dances, √नृत् 4P 7 विषाद dejection 8 गमिष्ये is for गमिष्यामि,√गम् 1P.

Vasantaka -Really the Queen has come

King—(aside) O friend, conceal the painting board ! (The jester taking it up places under his armpit ) (The king, aloud) O queen, welcome ! Be seated here

Vāsavadatta—(sitting down) My husband, now is it true that the Navamālikā has opened its flowers ?

King—(in wonderment) Queen, we though came earlier have not seen it as you are late in coming So come let us see it together

Vasavadatta—(minutely observing) From the lustre of my husband's face I have found out that the Navamalika has blossomed So I am going.

Vasantaka—Your ladyship if so we have won (Thus making long arms he dances From his armpit the board falls down, seeing which he expresses dejection )

(राजाङ्गुल्या दर्शयन्वसन्तकमुख पश्यति)

वसन्तक :— (अपवार्य) भोः, मा कुप्य । त्वं तिष्ठ । अहमेवात्र ज्ञास्ये ।

काञ्चनमाला — (फलक गृहीत्वा) भट्टिनि, प्रेक्षस्व तावत् किमत्र चित्रफलके आलिखितम् ।

वासवदत्ता — निर्वर्ण्य स्वगतम्) अयमार्यपुत्रः । इयं पुनः सागरिका । (प्रकाश राजानं प्रति सकोपहासम्) आर्यपुत्र, किमेतत् ।

राजा — (सवैलक्ष्यमपवार्य) वयस्य, किं ब्रवीमि ।

वसन्तक :— (अपवार्य) भोः, मा चिन्तां कुरु । अहमुत्तरं दास्यामि । (प्रकाश वासवदत्ता प्रति) आत्मा किल दुःखं लिखति इति मम वचनं श्रुत्वा प्रियवयस्येनेदं विज्ञानं दर्शितम् ।

1 कुप्य be thou angry; लोट् √कुप् 4P. 2 ज्ञास्ये I will know; लृट् √ज्ञा 9U. 3 अहमेवात्र ज्ञास्ये = अत्र एव किं किं कर्तव्यं इति अहं ज्ञास्ये । 4 सवैलक्ष्यम् ad. dejectedly, shamefully. 5 वैलक्ष्यम् dejection, shame. 6 चिन्ता f. worry. 7 उत्तरम् reply. 8 आत्मा = स राजा । 9 दुःखम् ad. badly, n. unhappiness. 10 अगुलि. f. अगुली finger.

(The king pointing his finger sees Vasantaka's face)

Vasantaka—(aside) Friend, be not angry. You wait. I will see what ought to be done in this matter.

Kāñchanamālā—(taking up the board) O queen, now do behold what is painted here in this picture-board!

Vāsavadattā—(minutely observing it, to herself) This is my husband and that is Sāgarikā. (Aloud, with an angry laughter to the king) My lord, what is this?

King —(ashamed, aside) My friend, what shall I say?

Vasantaka—(aside to the king) O do not worry! I will answer her. (Aloud, to Vāsavadattā) After hearing my word; "They say you draw badly," my dear friend has shown his skill.

राजा — यथाह वसन्तकस्तथैवैतत् ।

वासवदत्ता — (फलकं निर्दिश्य) आर्यपुत्र, एषाऽपि याऽपरा तव समीपे आलिखिता तत्किं वसन्तकस्य विज्ञानम् ।

राजा — (सवैलक्ष्यस्मितम्) देवि, अलमन्यथा शङ्कया । इयं हि कापि कन्यका स्वचेतसैव परिकल्प्याऽऽलिखिता । न तु दृष्टपूर्वा ।

विदूषकः — सत्यं शपे ब्रह्मसूत्रेण यदि कदाप्यस्माभिरीदृशी दृष्टपूर्वा ।

काञ्चनमाला — (अपवार्य) भट्टिनि, कदापीदृशं घुणाक्षरं संभवत्येव । तदलं कोपेन ।

वासवदत्ता — (अपवार्य) अयि ऋजुके, एतस्य वक्रभणितानि न जानासि । वसन्तकः खल्वेषः । (प्रकाशं राजानं प्रति) आर्यपुत्र,

निर्दिश्य having pointed out; gerund निस् + √दिश् 6U. 2 परिकल्प्य having thought; caus gerund परि + √क्लृप् 1A 3 दृष्टपूर्वा = पूर्वं दृष्टा seen before. 4 शपे I take an oath, swear; √शप् 1.4U. 5 ब्रह्मसूत्रम् sacred thread of a Brahmin hung over the shoulder. 6 घुणाक्षरम् coincidence; literally an incision by an insect somewhat resembling a letter. 7 संभवति it arises, happens; सम् + √भू 1P. 8 ऋजुक straight, simple-minded. 9 वक्रभणितम् equivocation, round-about talk.

King —It is exactly as Vasantaka has said.

Vasavadattā—(pointing out the board) My lord, another lady is also painted besides you Is she Vasantaka's skill?

King —(ashamed, with a smile) Queen, do not misunderstand! It is some girl I painted through my own imagination, but has never been seen before.

Clown —Truly I make an oath by the sacred thread of a Brahmin that such one has never been seen before.

Kānchanamālā—(aside to the queen) O queen, this sort of mere coincidence happens some times. So restrain your anger.

Vāsavadattā—(aside) Ay simpleton, you do not know his equivocation. He is really none other than Vasantaka. (To the king, aloud) My husband,

मम पुनरिदं चित्रं प्रेक्ष्य शीर्षवेदना समुत्पन्ना । तत्सुखं तिष्ठत्वार्यपुत्रः । अहं गमिष्ये । (इति उत्थाय गन्तुमिच्छति)

राजा — (पटान्तेन गृहीत्वा) देवि,

प्रसीदेति ब्रूयामिदमसति कोपे न घटते
करिष्याम्येवं नो पुनरिति भवेदभ्युपगमः ।
न मे दोषोऽस्तीति त्वमिदमपि च ज्ञास्यसि मृषा
किमेतस्मिन्वक्तुं क्षममिति न वेद्मि प्रियतमे ॥ १६ ॥

वासवदत्ता — (सविनय पटान्तमाकर्षन्ती) आर्यपुत्र, माऽन्यथा संभावय । सत्यं शीर्षवेदना बाधते । तद्गमिष्ये । (इति निष्क्रान्ते)

1 शीर्षम् head 2 वेदना f pain, 3 शीर्षवदना headache 4 समुत्पन्न occurred, PP सम् + उद् √पद् 4A 5 ब्रूयाम् I should say, विधिलिङ् √ब्रू 2U. 6 असत् non-extant 7 कोपे असति (loc. absolute) as there is not an anger 8 घटते it is possible, proper √घट् 1A. 9 नो ind. no, not 10 अभ्युपगम confession 11 दोष fault 12 मृषा ind falsely, in vain 13 क्षम favourable, appropriate 14 वेद्मि I know; √विद् 1 2P. 15 बाधते it troubles, √बाध् 1A. 16 सविनयम् modestly 17 विनय modesty

प्रसीद इति ब्रूया इद कोपे असति न घटते, एव पुन नो करिष्यामि इति (ब्रूयाम्) अभ्युपगम भवेत्, मे दोष न अस्ति इति (ब्रूयाम्) च त्व इद अपि मृषा ज्ञास्यसि, एतस्मिन् किं क्षम वक्तु इति न वेद्मि, प्रियतमे ॥ शिखरिणीवृत्तम् ।

after seeing this picture I feel a headache So may my lord remain here in happiness I am going

(rising she intends to go)

King —(holding the end of her garment) O queen!

Should I say 'Be favourable!' it would be improper as you are not angry, 'Such a thing I will not do again' would be a confession of my sin, and should I say 'I have no fault,' you will believe it to be false: I know not what is appropriate to say in this matter, Oh dearest!

Vāsavadattā—(modestly pulling the end of her garment)

My lord, do not regard me as otherwise. Really headache is troubling me So I will go (Exit)

वसन्तक :— भोः, दिष्ट्या वर्धसे । क्षेमेणातिक्रान्ता वासवदत्ताऽकालवातूलिकेव ।

राजा — धिङ्मूर्ख, अलं परितोषेण । यान्त्या निगूढो न लक्षितस्त्वया देव्याः कोपानुबन्धः । पश्य ।

भ्रूभङ्गे सहसोद्गतेऽपि वदनं नीतं परां नम्रता-
मीषन्मां प्रति भेदकारि हसितं नोक्तं वचो निष्ठुरम् ।
अन्तर्बाष्पजडीकृतं प्रभुतया चक्षुर्न विस्फारितं
कोपश्च प्रकटीकृतो दयितया मुक्तश्च न प्रश्रयः ॥ २० ॥

1 क्षेमेण happily. 2 क्षेम m. n. happiness, peace. 3 वातूलः वातूलिका f. whirlwind. 4 परितोषः satisfaction. 5 निगूढ hidden; PP. नि + √गुह् 1U. 6 सहसा ind. suddenly. 7 उद्गत arisen ; PP. उद्+गम 1P. 8 वदनम् face, mouth. 9 पर a. distant, further. 10 नम्रता f. bending. 11 ईषत् ind. a little. 12 भेदकारिन् a (भेदकारि is neuter nom. form) betraying, treacherous. 13 भेदः splitting, estrangement, betrayal. 14 जडीकृत made motionless, stupefied 15 प्रभुता f mastery. 16 विस्फारित a. tremulous, expanded. 17 दयिता loving woman. - 18 प्रश्रयः civility, courtesy, good breeding.

भ्रूभङ्गे सहसा उद्गते अपि वदन परा नम्रतां नीतं, मां प्रति ईषन् भेदकारि हसितं निष्ठुरं वचः न उक्तं अन्तर्बाष्पजडीकृतं चक्षुः न विस्फारितं, दयितया कोपः च प्रकटीकृतः प्रश्रयः च प्रभुतया न मुक्तः ॥ शार्दूलविक्रीडितम् ।

Vasantaka—Hello, you are fortunate. Like a whirlwind Vāsavadattā has happily passed over.

King —O fie on you idiot! Don't be satisfied. You have not noticed the continued wrath of the queen when going. Behold!

When a knitting of her eyebrows did appear, even then through her self-mastery her face was hung very low, to me a laugh of betrayal was a little cast, yet no harsh word was spoken, her eyes were stupefied by tears within but not opened wide, and her anger was clearly shown, but her courtesy was not given up by my beloved lady.

वसन्तकः— गता देवी वासवदत्ता । तत्कस्मात्त्वमरण्यरुदितं करोषि ।

राजा — तदेहि । देवीं प्रसादयितुमभ्यन्तरमेव प्रविशावः ।

(इति निष्क्रान्तौ)

## (इति कदलीगृहो नाम द्वितीयोऽङ्कः)

1 अरण्यम् woodland, forest. 2 रुदितम् weeping, crying. 3 अरण्यरुदितम् weeping in the wilderness where nobody pays any attention to it; useless word or cry.

Vasantaka—Queen Vāsavadattā has gone. Nevertheless, why do you cry alone in the woodland?

King —Then, come, we will enter the inner palace in order to propitiate the queen.

(Exeunt omnes)

*End of Act Two Entitled Plantain Bower*

## ❀ तृतीयोऽङ्कः ❀

(ततः प्रविशति मदनिका)

मदनिका — (आकाशे) कौशाम्बिके, अपि दृष्टा त्वया भर्तुः सकाशे काञ्चनमाला न वेति। (कर्णं दत्वाऽऽकर्ण्य) किं भणसि कोऽपि कालस्तयाऽऽगत्य गतया इति। तत्कुत्रेदानीं प्रेक्षिष्ये। कथमेषा खलु काञ्चनमालेत एवाऽऽगच्छति। तद्यावदेनामुपसर्पामि।

(ततः प्रविशति काञ्चनमाला)

काञ्चनमाला — (सोत्प्रासम्) साधु रे वसन्तक, साधु। अतिशयितस्त्वयामात्ययौगन्धरायणोऽप्यनया संधिविग्रहचिन्तया।

मदनिका — (सस्मितमुपसृत्य) हला कांचनमाले, किमद्य वसन्तकेन कृतं येन स एवं श्लाघ्यते।

1 आकाश air, sky 2 आकाशे (a dramatic term used by a person on the stage to address to another person not on the stage) into the air 3 कः अपि कालः तया = बहुः कालः गमितः तया 4 अतिशयित excelled, surpassed PP अति + √शी 2A 5 अमात्य prime minister 6 सन्धि friendship, alliance, peace 7 विग्रह discord, war 8 चिन्ता f consideration, thoughtful scheme 9 सन्धिविग्रहचिन्तया = सन्धिविग्रहयोः तया चिन्तया। 10 सोत्प्रासम् ironically, sarcastically 11 उत्प्रास irony satire 12 श्लाघ्यते he is praised, √श्लाघ् 1A

### ACT III

(Madanikā appears)

Madanikā—(into the air) Ah Kaushambikā, did you see Kanchanamāla in the presence of the king? (Listening) What do you say? A long time has passed since she came there and went away? Then, now where shall I see her? How, really Kānchanamala is coming hither! Well, I will approach her (Then enters Kanchanamalā)

Kānchanamālā—(sarcastically) Fine, O Vasantaka, very fine! Even the Prime Minister Yaugandharayana has been surpassed by you by dint of your thoughtful strategy of peace and war

Madanikā—(with a smile approaching) Friend Kanchanamāla, what did Vasantaka do today, on account of which he is praised thus?

काञ्चनमाला — हला मदनिके, किं तवैतेन पृष्टेन प्रयोजनम्। त्वमिदं
रहस्यं रक्षितुं न पारयसि।

मदनिका — शपे देव्याश्चरणौर्यदि कस्यापि पुरतः प्रकाशयामि।

काञ्चनमाला — तद्यावच्छृणु। अद्य खलु मया राजकुलात्प्रतिनिवर्तमानया
चित्रशालिकाद्वारे वसन्तकस्य सुसङ्गतया सममालापः श्रुतः।

मदनिका — (सकौतुकम्) सखि, कीदृशः।

काञ्चनमाला — यथा, सुसङ्गते, न हि सागरिकां वर्जयित्वा प्रियवयस्य-
स्यान्यत्किमप्यस्वस्थतयाः कारणम्। तदत्र प्रतीकारं चिन्तय।

1 पृष्टम् (ins s पृष्टेन) inquiry, questioning 2 प्रयोजनम् use, fruit 3 रहस्यम् secret 4 रक्षितुम् to guard to protect, √रक्ष् 1P 5 पारयसि thou art able to, √पृ 10U 6 चरणम् foot, 7 पुरतम् ind before, in front of 8 प्रकाशयामि I disclose, publish, caus प्र + √काश् 1A 9 राजकुलम् (abl s राजकुलात) royal family or home 10 प्रतिनिवर्तमान returning, pres part प्रति + नि + √वृत् 1A 11 शाला, शालिका f room, hall, gallery 12 कीदृश what kind of ? 13 वर्जयित्वा gerund of √वृज् 10U to except, exclude 14 अस्वस्थता f indisposition, illness 15 कारणम् cause, reason 16 प्रतीकार remedy

Kānchanamālā—Friend Madanikā, what will you gain by making this question ? You are not able to guard this secret

Madanikā—By the feet of the queen I swear that I shall disclose it before no one

Kānchanamālā—If so do listen Today when I was returning from the royal apartment I overheard the conversation between Vasantaka and Susangatā at the door of the picture gallery

Madanikā—(with a curiosity) *O friend, what kind of . . ?*

Kānchanamala—Like this, "O Susangatā, there is, indeed no other cause for my dear friend's indisposition except for Sāgarikā Do think out a remedy for this case."

मदनिका — ततः सुसंगतया किं भणितम् ।

काञ्चनमाला — ततः तयैवं भणितम् ~~ अद्य खलु देव्या चित्रफलकवृत्तान्तशङ्कितया सागरिकां मम हस्ते समर्पयन्त्या यन्नेपथ्यं मे प्रसादीकृतं ततस्तस्मिन्नेव विरचितभर्त्रीवेषां सागरिकां गृहीत्वाऽहमपि काञ्चनमालावेषधारिणी भूत्वा प्रदोपकाले भर्तुरागमिष्ये । त्वमपीहास्थितः प्रतिपालयिष्यसि । ततो माधवीलतामण्डपे तया सह भर्तुः समागमो भविष्यति ।

मदनिका — सुसङ्गते, हतासि खलु त्वं यद्येवं परिजनवत्सलां देवीं वञ्चयसि ।

1 शङ्कित doubted, suspected, PP √शङ्क 1A 2 चित्रफलकवृत्तान्तशङ्कितया = चित्रफलकस्य वृत्तान्तेन शङ्कितया । 3 नेपथ्यम् dress 4 प्रसादीकृत given. 5 यत (नेपथ्य) तस्मिन् = the dress in which 6 विरचित arranged, PP वि + √रच् 10U 7 वेष dress 8 विरचितभर्त्रीवेषाम् = विरचित भर्त्र्या वेष यया ताम् । 9 धारिन a (nom s f धारिणी) holding, bearing, wearing. 10 प्रदोष nightfall 11 भर्तु आगमिष्ये = भर्तारं वा भर्तु समीपे वा आगमिष्ये । 12 समागम. union, rendezvous 13 वत्सल fond of, affectionate 14 वञ्चयसि thou deceivest, caus लट् √वञ्च् 1P

Madanikā—Then, what did Susangata say?

Kānchanamāla—Then she spoke as follows, — "Today the queen who has grown suspicious on account of the picture-board incident gave me a dress placing Sāgarikā in my charge So dressing Sagarikā up in the attire of the queen and myself in the dress of Kānchanamālā I will bring her to His Majesty at nightfall You, too will wait for us here Thereafter the king will meet with her in the Spring creeper bower"

Madanikā—O Susangatā, you will be ruined, indeed should you deceive Her Majesty thus, who is affectionate towards her retinue

काञ्चनमाला — हला मदनिके, इदानीं त्वं क्व प्रस्थिता ।

मदनिका — अस्वस्थशरीरस्य भर्तुः कुशलवृत्तान्तं ज्ञातुं गता त्वं चिरयसी-
त्युत्ताम्यन्त्या देव्या तव सकाशं ज्ञातुं प्रेषितास्मि ।

काञ्चनमाला — अतिऋजुका सा देवी यैवं प्रत्यायते । कथमत्रैष खलु भर्ताऽस्वस्थतामिषेणात्मनो मदनावस्थां प्रच्छादयन्दन्ततोरणवलभ्या उपर्युपविष्टस्तिष्ठति । तदेहि । एतद्वृत्तान्तं भट्टिन्यै निवेदयावः । (इति निष्क्रान्ते)

❀ इति प्रवेशकः ❀ 52'

1 अस्वस्थ a indisposed, ill 2 शरीरम् body 3 अस्वस्थशरीरस्य = अस्वस्थं शरीरं यस्य तस्य । 4 कुशलम् welfare 5 उत्ताम्यत् (ins f s उत्ताम्यन्त्या) pining away, being impatient, pres part उद् + √तम् 4P 6 प्रेषित sent, caus PP प्र + इष् 1U. 7 प्रत्यायते she believes, caus लट् प्रति + √इ 2P 8 मिषम् pretext, fraud 9 दन्त. elephant tusk, ivory. 10 तोरण m n arch gate, outer-gateway 11 वलभि, वलभी f roof, terrace 12 उपरि on, above

Kānchanamālā—Hello Madanikā, where are you going now ?

Madanikā—I am sent to you by Her Majesty who is pining away as you, who have gone out to find out the intelligence of the welfare (or condition) of His Majesty now indisposed, have delayed

Kānchanamālā—Very simple-minded is the queen who believes this story As a matter of fact the king is now sitting on the terrace of the Ivory Arch-gate, camouflaging his own love-sick with the pretext that he is ill So come along, we are to inform the queen about all this news

(Exeunt)

END OF PRELUDE

(तत प्रविशति मदनावस्था नाटयन्नुपविष्टो राजा)

राजा — (सोत्कण्ठ नि श्वस्य)

संतापो हृदय स्मरानलकृतः संप्रत्ययं सह्यतां
नास्त्येवोपशमोऽस्य तां प्रति पुनः किं त्वं मुधा ताम्यसि ।
यन्मूढेन मया तदा कथमपि प्राप्तो गृहीत्वा चिरं
विन्यस्तस्त्वयि सान्द्रचन्दनरसस्पर्शो न तस्याः करः ॥१॥

अहो महदाश्चर्यम् ।

मनश्चलं प्रकृत्यैव दुर्लक्ष्यं च तथापि मे ।
कामेनैतत्कथं विद्धं समं सर्वैः शिलीमुखैः ॥ २ ॥

1 सोत्कण्ठम् longingly, anxiously 2 उत्कण्ठ anxiety, longing, eagerness 3 सताप heat, pain 4 स्मर love 5 अनल fire 6 स्मरानलकृत = स्मरस्य अनलेन कृत 7 सह्यताम् it must be endured, or borne up, कर्मणि लोट् √सह् 1A 8 उपशम pacification, calming down 9 मुधा in vain 10 मूढ deluded, foolish 11 चिरम् for a long time 12 सान्द्र thick, strong 13 चदन m n sandal 14 चल fickle 15 प्रकृ या by nature 16 दुर्लक्ष्य unperceptible 17 विद्ध pierced, PP व्यध् 4 18 शिलीमुख arrow, bee

हृदय, स्मरानलकृत अय सताप सप्रति सह्यता अस्य उपशम एव न अस्ति किं पुन ता प्रति त्व मुधा ताम्यसि यत् मूढेन मया तदा कथमपि प्राप्त सान्द्रचन्दनरसस्पर्श तस्या कर चिर गृहीत्वा त्वयि न विन्यस्त ॥ शार्दूलविक्रीडितम् ॥ मन चल प्रकृत्या दुर्लक्ष्य एव च तथापि एतत् मे (मन) कामेन सर्वै शिलीमुखै सम कथ विद्धम् ॥ अनुष्टुप् ।

(Then appears the king seated, demonstrating his love-lorn condition )

King —(sighing with a longing)

O heart, this burning torment made by Love's fire you must bear now as there is nothing to calm it down yet why do you pine away for her in vain, since I, foolish that I was, did not place upon you her obtained hand fragrant with the touch of strong liquid sandal perfume, after holding it for a long time then ?

Ah a grand marvel !

My mind is fickle and hardly perceptible by nature, yet this my mind was pierced by Cupid with all his arrows Why ?

(ऊर्ध्वमवलोक्य) भोः कुसुमधन्वन् ।

वाणाः पञ्च मनोभवस्य नियतास्तेषामसंख्यो जनः
प्रायोऽस्मद्विध एव लक्ष्य इति यल्लोके प्रसिद्धिं गतम् ।
दृष्टं तत्त्वयि विप्रतीपमधुना यस्मादसंख्यैरयं
विद्धः कामिजनः शरैरशरणो नीतस्त्वया पञ्चताम् ॥ ३ ॥

(विचिन्त्य) न तथाहमेवंविधावस्थमात्मानमनुचिन्तयामि यथान्तर्गूढकोपसंभाराया देव्या लोचनगोचरगतां तामेव तपस्विनीं सागरिकाम् । तथा हि ।

1 कुसमधन्वन m Cupid 2 पञ्चन (nom m पञ्च) five 3 मनोभव Cupid, a mind born 4 नियत fixed, PP √यम् 1P 5 तेषाम्—बाणानाम् 6 असंख्य numberless 7 प्रायस् ind mostly, generally 8 अस्मद्विध = my kind अस्माक विध (विधा वा) यस्य स 9 लक्ष्य target, butt 10 लोक = जन 11 प्रसिद्ध f fame, success 12 गतम = प्राप्तम् 13 विप्रतीप a contrary 14 यस्मात whereas 15 कामिजन love affected man 16 शर = बाण 17 अशरण = शरण न अस्ति यस्य स helpless 18 पञ्चता f death, five elements 19 एवंविध a of such kind 20 अनुचिन्तयामि I consider, call to mind, अनु + √ चिन्त् 10U 21 संभार heap 22 अन्तर्गूढकोपसंभाराया = अन्तर्गूढ कोपसंभार यस्या तस्या । 23 तपस्विनी hapless poor girl

मनोभवस्य पञ्च बाणा तेषां असंख्य. अस्मद्विध जन प्राय लक्ष्य एव इति नियता, लोके यत् प्रसिद्धिं गत तत् (ते चरितम्) त्वयि अधुना विप्रतीप दृष्टं यस्मात असंख्यै शरै त्वया विद्ध अशरण अय कामिजन पञ्चता नीत ॥ शार्दूलविक्रीडितम् ।

(Looking overhead) O Cupid !
It is well known in the world that the arrows of Cupid are fixed at five and numberless persons of my kind serve as their target in general, but the contrariety is seen in thee now whereas this helpless lover is pierced with innumerable arrows and destroyed by thee (i e reduced to the original five elements of which the body is made)
(Reflecting) I do not so much think of myself reduced to thus state as I call to mind the poor girl, Sāgarikā fallen into the sight of the queen whose weighty, smouldering anger is concealed in her mind
For,

ह्रिया सर्वस्याधो नयति विदितास्मीति वदनं
द्वयोर्दृष्ट्वाऽऽलापं कलयति कथामात्मविषयाम् ।
सखीषु स्मेरासु प्रकटयति वैलक्ष्यमधिकं
प्रिया प्रायेणास्ते हृदयनिहितातङ्कविधुरा ॥ ४ ॥

प्रेषितश्च मया तद्वार्तान्वेषणाय वसन्तकः । तत्कथं चिरयति ।

(ततः प्रविशति हृष्टो वसन्तकः)

वसन्तक :— (सपरितोषम्) हीही भोः । आश्चर्यम्, आश्चर्यम् ।

1 ह्री f. (ins. s. ह्रिया) shame. 2 सर्वस्य विदित – ता known to all. 3 वदनम् face. 4 आलाप conversation 5 कलयति she counts, assumes; √ कल् 10U. 9 कथा f. talk. 7 विषय subject, object 8 आत्मविषयाम् = आत्मा विषयः यस्याः ताम्. 9 स्मेर a. smiling, blooming. 10 सखीषु स्मेरासु (loc. abs.) when her friends are smiling. 11 प्रकटयति she manifests; नामधातु or प्र + √ कट् 1P. causative 12 वैलक्ष्यम् shame, embarrassment. 13 प्रायेण ad mostly. 14 आस्ते she is, or sits; √ आस् 2A. 15 आतङ्क pain. 16 विधुर distressed 17 हृदयनिहितातङ्कविधुरा = हृदये निहितेन आतङ्केन विधुरा. 18 वार्तम् welfare, happiness. 19 अन्वेषणम् inquiry into, search

सर्वस्य विदिता अस्मि इति ह्रिया वदनं अधः नयति, द्वयोः आलापं दृष्ट्वा आत्मविषयां कथां कलयति, सखीषु स्मेरासु अधिकं वैलक्ष्यं प्रकटयति, प्रायेण प्रिया हृदयनिहितातङ्कविधुरा आस्ते ॥ शिखरिणीवृत्तम् ।

She hangs her face low with shame, thinking that she is known to all (i.e. her affair), on hearing any two persons in conversation construes it to be about herself and manifests embarrassment more when her friends smile: in most cases my beloved one remains distressed by the pain deposited in her heart

Well, Vasantaka was sent by me to make an inquiry into her welfare, but why does he delay ?

(Then enters Vasantaka pleased.)

Vasantaka—(with satisfaction) Ha ha ho ! wonderful, wonderful !

कौशाम्बीराज्यलाभेनापि न तादृशः प्रियवयस्यस्य हृदयाभिलाप आसीद्यादृशो मत्सकाशादद्य प्रियवचनं श्रुत्वा भविष्यतीति तर्कयामि। तद्यावद्गत्वा प्रियवयस्यस्य निवेदयिष्ये। (परिक्रम्यावलोक्य च) कथमेष प्रियवयस्यो यथेमामेव दिशमवलोकयंस्तिष्ठति तथा तर्कयामि मामेव प्रतिपालयति। तद्यावदेनमुपसर्पामि। जयतु जयतु प्रियवयस्यः। भो वयस्य, दिष्ट्या वर्धसे त्वं समीहित-कार्यसिद्ध्या (इति उपसर्पति)

राजा — (सहर्षम्) वयस्य, अपि कुशलं प्रियायाः सागरिकायाः।

1 राज्यम् kingdom, reign 2 लाभ gain 3 अभिलाप pleasure, desire 4 आसीत् it was, लङ् √ अस् 2P 5 मत्सकाशात् from me 6 दिश् f (दिशम् acc s) direction. 7 समीहित wished, PP सम् + √ ईह् 1A 8 सिद्धि f (ins s सिद्ध्या) accomplishment 9 कुशलम् welfare

I suppose that when my dear friend hears the fond word from me now there shall arise his heart's satisfaction even incomparable to that when he acquired the kingship of Kaushambi
(walking round & looking) How, my dear friend stands looking in this direction So I imagine he is just waiting for me So let me approach him May my fond friend be victorious! O friend, luckily you prosper through the accomplishment of your desired work (Thus he approaches)

King—(joyously) Friend, is my beloved Sāgarikā fine ?

वसन्तक :— (सहर्षम्) भो वयस्य, अचिरेण स्वयमेव प्रेक्ष्य ज्ञास्यसि ।

राजा — (सपरितोषम्) वयस्य, दर्शनमपि भविष्यति प्रियायाः ।

वसन्तक :— (साहङ्कारम्) भोः । किमिति न भविष्यति यस्य त उपहसित-बृहस्पतिबुद्धिविभवोऽयममात्यः ।

राजा — (विहस्य) न खलु चित्रम् । किं न संभाव्यते त्वयि । तत्कथय । विस्तरतः श्रोतुमिच्छामि ।

(विदूषक कर्ण एवमेव कथयति)

राजा — (सपरितोषम्) वयस्य, इदं ते पारितोषिकम् ।

(इति हस्तादवतार्य कटक ददाति)

1 अचिरेण soon 2 स्वयम् ind in person 3 साहङ्कारम ad egoistically, with self importance 4 अहङ्कार ego, self importance, selfishness 5 उपहसित ridiculed, PP उप + √ हस् 1P 6 बुद्धि f wisdom 7 विभव power 8 उपहसितबृहस्पतिबुद्धिविभव = उपहसित बृहस्पते बुद्धिविभव येन स 9 चित्र strange 10 विस्तरतस ind in abundance, in detail 11 कटक m n gold bracelet

Vasantaka—(joyously) O friend, soon you will see and know personally

King—(with satisfaction) Friend, I can see her too ?

Vasantaka—(with an air of self importance) Why not ?
This minister of yours, who has ridiculed the power of the wisdom of Brhaspati, can do anything

King—(laughing) Not, indeed, singular What is not possible for thee ? So tell me I want to hear in detail (The jester whispers into his ear thus, thus)

King—(with pleasure) Friend here is a present for you (he gives a gold-bracelet, pulling it off from his hand )

वसन्तक :— (कटक परिधायात्मानं निर्वर्ण्य) भवत्वेवं तावत् । इमं शुद्धसौवर्ण-कटकमण्डितहस्तमात्मनो ब्राह्मण्यै गत्वा दर्शयिष्यामि ।

राजा — (हस्ते गृहीत्वा निवारयन्) सखे, पश्चाद्दर्शयिष्यसि । ज्ञायतां तावदधुना किमवशिष्टमह्न इति ।

वसन्तक :— (परिक्रम्यावलोक्य च ) भोः प्रेक्षस्व प्रेक्षस्व । एष खलु गुर्वनुरागोत्क्षिप्तहृदयः वारुणीवधूदत्तसंकेत इवास्तगिरिशिखरकाननमनुसरति भगवान्सहस्ररश्मिः ।

राजा — (विलोक्य सहर्षम्) सखे, सम्यगुपलक्षितम् । पर्यवसितमहः । तथा हि ।

1 परिधाय having put on; gerund परि + √ धा 3U. 2 शुद्ध pure. 3 सौवर्ण a golden 4 मण्डित adorned; *PP.* √ मण्ड् *1P 10U.* 5 ब्राह्मणी f wife of a Brahmin 6 शुद्धसौवर्णकटकमण्डितहस्तम्=शुद्धेन सौवर्णेन कटकेन मण्डित हस्तम्. 7 अवशिष्ट left.; PP. अव + √ शिष् 1.7P 10U 8 अहन् n. (abl gen. s. अह्नः) day. *9* वारुणी *f* west. 10 सकेत appointment, rendezvous *11* वारुणीवधूदत्तसकेत = वारुणी एव वधू तया दत्त. सकेत यस्य स 12 अस्तगिरि. *m western mountain.* 13 शिखर *m. n* peak, *top.* 14 काननम् forest 15 सहस्ररश्मिः *m the sun* the possessor of a thousand rays. 16 पर्यवसित finished, ended, PP परि+अव + √ सो 1P. 17 अहन् n. (nom. s. अहः) day.

Vasantaka—(putting on the gold bangle and observing himself) Well, now I am going to show my wife this hand of mine adorned with a pure gold-bracelet

King—(taking his hand, checking him) O friend, now ascertain how much of the day is left You will show her later on.

Vasantaka—(walking about and looking) Hello, behold, behold! The lord sun with a thousand rays pursues the forest on the top of the Western mountain as if to keep an appointment given by the West, his wife, with his heart overcome with profound love.

King—(beholding with joy) O friend, you did observe well. The day is ended, for ;—

अध्वानं नैकचक्रः प्रभवति भुवनभ्रान्तिदीर्घं विलङ्घ्य
प्रातः प्राप्तुं रथो मे पुनरिति मनसि न्यस्तचिन्तातिभारः ।
संध्याकृष्टावशिष्टस्वकरपरिकरस्पष्टहेमारपङ्क्ति-
र्व्याकृष्यावस्थितोऽस्तक्षितिभृति नयतीवैष दिक्चक्रमर्कः ॥ ५ ॥

अपि च ।

यातोऽस्मि पद्मवदने समयो ममैष सुप्ता मयैव भवती प्रतिबोधनीया ।
प्रत्यायनामयमितीव सरोरुहिण्याः सूर्योऽस्तमस्तकनिविष्टकरः करोति ॥६॥

1 अध्वन n (acc. s अध्वानम) way orbit 2 चक्रम wheel 3 एकचक्र =एक चक्र यस्य स 4 भुवनम world earth 5 भ्रान्ति f wandering, revolution 6 विलङ्घ्य having transgressed, gerund वि + √ लघ 1U 7 प्रातर ind daybreak 8 रथ chariot 9 अतिभार heavy burden 10 न्यस्तचिन्तातिभार = न्यस्त चिन्ताया अतिभार येन स 11 आकृष्ट pulled drawn, PP आ + √ कृष 6U 12 स्वकर his own hand ray 13 परिकर multitude 14 स्पष्ट distinctly visible 15 हेमार golden spoke of wheel 16 पङ्क्ति f line, series 17 सध्याकृष्टावशिष्टस्वकरपरिकरस्पष्टहेमारपङ्क्ति = सध्याया आकृष्टस्य अवशिष्ट स्वकराणा परिकर एव स्पष्टा हेमाराणा पङ्क्ति यस्य स 18 अवस्थित rested, stayed PP अव + √ स्था 1P 19 क्षितिभृत m mountain 20 अर्क sun 21 प्रत्यायना f setting of sun, confidence, explaining 22 सरोरुहिणी f lotus plant 23 निविष्ट entered, PP नि + √ विश 6P 24 अस्तमस्तकनिविष्टकर =अस्तस्य मस्तके निविष्टा करा यस्य स 25 मस्तकम top, head

एकचक्र मे रथ भुवनभ्रान्तिदीर्घं अध्वान विलङ्घ्य पुन प्रात प्राप्तु न प्रभवति इति मनसि न्यस्त चिन्तातिभार सध्याकृष्टावशिष्टस्वकरपरिकरस्पष्टहेमारपङ्क्ति अर्क अस्तक्षितिभृति दिक्चक्र व्याकृष्य नयति इव अवस्थित ॥ स्रग्धरा ॥ पद्मवदने ! यात अस्मि एष मम समय सुप्ता भवती मया एव प्रतिबोधनीया अस्तमस्तकनिविष्टकर अयं सूर्य सरोरुहिण्या प्रत्यायना करोति इव ॥ वसन्ततिलका ॥

'My single wheeled chariot, having travelled the orbit long on account of its world revolution will not be able to return at the morrow's dawn,' thus a heavy load of anxiety placed in his mind, this sun seems to rest after driving his heavenly car over the Western mountain with the streak of the golden spokes manifest in the form of the mass of his rays left over by the twilight after drawing in some of them

And furthermore,

Throwing his hands (rays) onto the top of the Western mountain the sun gives a confidence (or comfort) as it were, to the lotus plant saying, 'O lotus face! I am going This is my hour to go You, now asleep will have to be awakened again just by me (tomorrow)"

तदुत्तिष्ठ । तत्रैव माधवीलतामण्डपे गत्वा प्रियतमासंकेतावसरं प्रतिपालयावः ।

वसन्तक :—शोभनं भणितम् । (इत्युत्तिष्ठति । विलोक्य) भो वयस्य, प्रेक्षस्व प्रेक्षस्व । एष खलु वहलीकृतविरलवनराजिसंनिवेशो गृहीतघन-पङ्कपीवरवनवराहमहिषकृष्णच्छविरपसरति पूर्वदिशां प्रच्छाद-यंस्तिमिरसंघातः ।

राजा — (सहर्षं समन्ताद्विलोक्य) वयस्य, सम्यगुपलक्षितम् । तथा हि

1 अवसर time, opportunity 2 शोभन fine good 3 वहलीकृत thickened, strengthened 4 विरल few rare 5 वनराजि f row of woods 6 संनिवेश form vicinity 7 वहलीकृतविरलवनराजिसंनिवेश = वहलीकृत विरलाया वनराज्या संनिवेश येन स 8 घन thick, dense 9 पङ्क m n mire, mud 10 पीवर fat, plump 11 वन-वराह wild boar 12 महिष buffalo 13 कृष्ण dark black 14 छवि f colour, complexion 15 गृहीतघनपङ्कपीवरवनवराहमहिषकृष्णच्छवि = गृहीत घन पङ्क येन स पीवर वनवराह महिष च तद्वत कृष्णा छवि यस्य स 16 अपसरति it goes away it moves about 17 तिमिरम् blindness darkness 18 संघात collection, mass 19 पूर्वदिशा eastern quarter

Therefore, stand up We shall go to the bower of Spring creeper and await the hour of my appointment with my dearest one there

Vasantaka—You have spoken a fine thing (he stands up and beholding) Ho friend, behold behold ! Really this massive darkness, thicken ing the form of the thin row of woods and possessed of the *dark hue of a buffalo and plump wild boar besmeared with thick* mud, moves everywhere, blanketting the eastern quarter

King—(joyously looking about) Friend, Well observed, for ,—

पुरः पूर्वामेव स्थगयति ततोऽन्यामपि दिशं
क्रमात्क्रामन्नद्रिद्रुमपुरविभागांस्तिरयति ।
उपेतः पीनत्वं तदनु च जनस्येक्षणपथं
तमःसंघातोऽयं हरति हरकण्ठद्युतिहरः ॥७॥

तदादेशय मार्गम् ।

वसन्तकः— एतु एतु प्रियवयस्यः । (इति परिक्रामतः)

(वसन्तक निरूप्य) भो वयस्य, एतत् खलु समासन्नं बहलपादपतया पिण्डीकृतान्धकारमिव मकरन्दोद्यानम् । तत्कथमत्र मार्गो लक्ष्यते ।

1 स्थगयति it covers, caus √स्थग 1P 2 क्रम step, pace 3 क्रमात् step by step 4 क्रामत् (क्रामन् nom s m) walking, Pres Part √क्रम् 1U 4P 5 अद्रि m mountain 6 द्रुम tree 7 पुरम् town 8 विभाग portion, part 9 अद्रिद्रुमपुरविभागान् = अद्रे द्रुमा पुरस्य विभागा च तान 10 तिरयति it obscures conceals, नामधातु √तिरय् 11 तदनु after that 12 उपेत approached, attained, PP उप + √ इ 2P. 13 पीनत्वम् plumpness, density 14 हर-कण्ठ Shiva's neck 15 द्युतिहर bearing the lustre or hue of 16 समासन्न = समीप near. 17 पिण्डीकृत made solid, dense 18 अन्धकार darkness. 19 पिण्डीकृतान्धकारम् = पिण्डीकृत अन्धकार यस्मिन तत

हरकण्ठद्युतिहर अय तम मघात पुर पूर्वां दिश एव स्थगयति तत अन्या [(दिशम्)] स्थगयति, क्रमात् क्रामन् अद्रिद्रुमपुरविभागान् तिरयति तदनु पीनत्व उपेत जनस्य ईक्षणपथ च हरति ॥ शिखरिणीवृत्तम ।

This mass of blinding darkness bearing the hue of Shiva's neck just conceals the east in front, and then another direction Moving step by step it covers all the quarters from the mountain trees to the town, and after that becoming denser removes the range of men's sight

Show me, therefore, the path !

Vasantaka—May my dear friend proceed (Both walk on) (Vasantaka looking) Oh pal, indeed, this Garden of Honey is approaching near where the darkness is intensified by abundant trees So how is the path visible here ?

राजा — (गन्धमाघ्राय) वयस्य, गच्छाग्रतः। ननु सुपरिज्ञात एवात्र मार्गः।
तथा हि

पालीयं चम्पकानां नियतमयमसौ सुन्दरः सिन्दुवारः
सान्द्रा वीथी तथेयं बकुलविटपिनां पाटला पङ्क्तिरेषा।
आघ्रायाघ्राय गन्धं विविधमधिगतैः पादपैरेवमस्मिन्
व्यक्तिं पन्थाः प्रयाति द्विगुणतरतमोनिह्नुतोऽप्येष चिह्नैः॥८॥

(इति परिक्रामतः)

1 आघ्राय having smelled; PP आ + √घ्रा 1P 2 सुपरिज्ञात thoroughly known, PP सु + परि + √ज्ञा 9U 3 पालि पाली f row, margin 4 चम्पक name of a tree 5 नियतम् ind surely, always 6 सुन्दर lovely 7 सिन्दुवार name of a tree 8 सान्द्र thick 9 वीथी f row, way 10 पाटल reddish 11 विविध various 12 अधिगत known, attained, PP अधि + √गम् 1P 13 व्यक्ति f manifestation 14 पन्थन् m (पन्था nom s) Path 15 द्विगुण (comparative द्विगुणतर) twofold, double 16 तमस darkness (n) 17 निह्नुत hidden, PP नि + √ह्नु 2A 18 चिह्नम sign, mark 19 पादपैं चिह्नैं = पादपरूपैं चिह्नैं

इय चम्पकाना पाली, अय असौ नियत सुन्दर सिन्दुवार तथा इय बकुलविटपिना सान्द्रा वीथी एषा पाटला पङ्क्ति, अस्मिन विविध गन्ध आघ्राय आघ्राय एव अधिगतैं पादपैं चिह्नैं द्विगुणतरतमोनिह्नुत अपि एष पन्था व्यक्ति प्रयाति। स्रग्धरावृत्तम्।

King—(smelling odour) Friend, go ahead! Certainly this path is thoroughly understood for

*Here is a row of Champaka trees, surely this is a charming Sinduvara tree, here appears a dense row of Bakula trees, and here is also a line of Patala trees Smelling again and again various perfumes here this path, though concealed by the heavy twofold darkness, manifests itself by dint of the signs in the shape of different trees ascertained in this manner*

(Both walk round.)

वसन्तक :— भोः, एतत्खलु निपतन्मत्तमधुकरवकुलकुसुमामोदवासितदिड्मुखं मसृणमरकतमणिशिलाकुट्टिमसुखायमानचरणसंचारसूचितं तमेव माधवीलतामण्डपं संप्राप्तौ स्वः। तदिहैव तिष्ठतु भवान्यावदहं देवीवेषधारिणीं सागरिकां गृहीत्वा लघ्वागच्छामि।

राजा — वयस्य, तेन हि त्वर्यताम्।

वसन्तक :— वयस्य, मा उत्ताम्य। एष आगतोऽस्मि। (इति निष्क्रान्त)

राजा — तावदहमप्यस्यां मरकतशिलावेदिकायामुपविश्य प्रियायाः संकेतसमयं प्रतिपालयामि। (उपविश्य सचिन्तम्)

1 आमोद scent 2 वासित perfumed PP √वास 10P 3 दिड्मुखम् quarter 4 निपतन्मत्तमधुकरवकुलकुसुमामोदवासितदिड्मुखम = निपतन्त मत्ता मधुकरा येषु बकुलानां कुसुमानि तेषा आमोदेन वासितानि दिड्मुखानि येन तम् 5 मसृण smooth, mild 6 मरकतम emerald 7 कुट्टिम m n pavement 8 सुखायमान being happy pleased, Pres Part नामधातु √सुखाय् 9 सचार passage, narrow entrance 10 सूचित pointed out PP √सूच 10U 11 मसृणमरकतमणिशिलाकुट्टिमसुखायमानचरणसचारसूचितम् = मसृणा मरकतमणीनां शिला तासा कुट्टिमे सुखायमानौ चरणौ तयो सचारेण सूचितम् 12 सप्राप्त reached, PP सम् + प्र + √आप् 5P 13 वेदिका f seat, raised place.

Vasantaka—Hello, we have just reached the bower of Spring Creeper which is indicated by the pleasing tread of the feet on the pavement of smooth emerald stone slabs and by which all the quarters are scented with the fragrance of the Bakula flowers to which intoxicated bees are flying So you may just stay here till I lightly bring with me Sagarika in the disguise of the queen

King—Friend, then hurry up !

Vasantaka—O friend be not impatient ! I will be back in a moment (He departs )

King—In the meantime sitting on this dais of emerald stone I will, also, wait for the moment of rendezvous with my love (sitting down, thoughtfully )

अहो ! कोऽपि कामिजनस्य स्वगृहिणीसमागमपरिभाविनोऽभिनवजनं प्रति पक्षपातः । तथा हि

प्रणयविशदां दृष्टिं वक्त्रे ददाति न शङ्किता
घटयति घनं कण्ठाश्लेषे रसान्न पयोधरौ ।
वदति बहुशो गच्छामीति प्रयत्नधृताप्यहो
रमयतितरां संकेतस्था तथापि हि कामिनी ॥ ६ ॥

अये कथं चिरयति वसन्तकः । तत्किं नु खलु विदितः स्यादयं वृत्तान्तो देव्या वासवदत्तया ।

1 कामिजनः lover. 2 स्वगृहिणी f. one's own wife. 3 परिभाविन् a despising. 4 अभिनवजन. = अभिनवस्त्री 5 पक्षपात· one-sided affection, partiality. 6 प्रणय. love. 7 विशद bright, clear. 8 प्रणयविशदाम् = प्रणयेन विशदाम् 9 शङ्कित doubted, dreaded; PP. √शङ्क् 1A. 10 घटयति she joins, unites; √घट् 10U. 11 घनम् ad closely, profoundly. 12 कण्ठ-आश्लेषः embrace of neck. 13 रसः (abl. s. रसात्) passion, love 14 पयोधरः breast. 15 वदति she speaks, √वद् 1P. 16 प्रयत्नः effort. 17 धृत held; PP. √धृ 10U. 18 प्रयत्नधृता = प्रयत्नेन धृता. 19 संकेतस्थ abiding by appointment, *staying at rendezvous*. 20 कामिनी *loving woman.*

शङ्किता कामिनी प्रणयविशदां दृष्टिं [रमणस्य] वक्त्रे न ददाति कण्ठाश्लेषे रसात् पयोधरौ घनं न घटयति प्रयत्नधृता अपि गच्छामि इति बहुशः वदति अहो ! तथापि हि संकेतस्था रमयतितराम् ॥ हरिणीवृत्तम् ।

Oh how strange is the one-sided affection of a lover for a strange woman, even ignoring his union with his own wife! Whereas,

A woman in love, frightened, does not cast her eyes beaming with love onto his face, does not out of passion press *her* bosoms hard when her neck is embraced and often says;—'I am going away', though held on with an effort. O, nevertheless, she keeps the rendezvous and is the more pleasing!

But why does Vasantaka delay? Has this news been possibly known to Queen Vāsavadattā?

(तत प्रविशति वासवदत्ता काञ्चनमाला च)

वासवदत्ता — हञ्जे काञ्चनमाले, सत्यमेव मम वेषधारिणी भूत्वा सागरिकार्यपुत्रमभिसरिष्यति ।

काञ्चनमाला — कथमन्यथा भट्टिन्यै निवेद्यते । अथवा चित्रशालाद्वार उपविष्टो वसन्तक एव ते प्रत्ययमुत्पादयिष्यति ।

वासवदत्ता — ततस्तत्रैव गच्छावः ।

काञ्चनमाला — एतु भट्टिनी । (इति परिक्रामत )

(तत प्रविशत्युपविष्ट कृतावगुण्ठनो वसन्तक )

वसन्तक :— (वर्णौ दत्वा) यथायं चित्रशालिकाद्वारे पदशब्दः श्रूयते तथा तर्कयाम्यागता सागरिकेति ।

काञ्चनमाला — भट्टिनि, इयं सा चित्रशालिका । तद्यावद्वसन्तकस्य संज्ञां करोमि । (इति छोटिका ददाति)

1 अभिसरिष्यति she will meet by appointment; लृट् अभि + √सृ 1 3P. 2 निवेद्यते it is informed, कर्मणि लट् caus नि + √विद् 1 2 P 3 प्रत्यय conviction, certainty 4 उत्पादयिष्यति he will produce, लृट् caus उद् + √पद् 4A 5 कृतावगुण्ठन = कृत अवगुण्टनम् येन स 6 अवगुण्ठनम् veil, covering 7 पदशब्द sound of foot-step 8 सज्ञा f token, sign

(Then enters Vāsavadattā and Kānchanamālā)

Vāsavadattā—O maid Kanchanamālā, is it true that Sāgarikā in my attire will have a rendezvous with my lord ?

Kānchanamālā—Otherwise how is it informed to Your Majesty ? Anyhow Vasantaka sitting at the door of the Arts Gallery will only produce a conviction to you

Vāsavadattā—Then let us go there

Kānchanamālā—May the queen proceed (Both walk on) (At the time his face concealed in a veil Vasantaka appears seated )

Vasantaka—(turning his ears) As a sound of foot step is heard, I think Sāgarikā is come to the door of the picture gallery

Kānchanamālā—O queen, this is the picture gallery I will give the signal to Vasantaka now

(Thus snaps her fingers)

वसन्तक :— (सहर्षमुपसृत्य सस्मितम्) सुसङ्गते, सदृशः खलु त्वया कृतः काञ्चनमालाया वेषः । अथ सागरिका कुत्रेदानीम् ।

काञ्चनमाला — (अङ्गुल्या दर्शयन्ती) नन्वेषा ।

वसन्तक :— (दृष्ट्वा सविस्मयम्) एषा स्फुटमेव वासवदत्ता ।

वासवदत्ता — (साशंकमात्मगतम्) कथं प्रत्यभिज्ञाताऽस्म्यनेन । तद्गमिष्यामि ।

(इति गन्तुमिच्छति)

वसन्तक :— भवति सागरिके, इत आगच्छ ।

( वासवदत्ता विहस्य कांचनमालामवलोकयति)

काञ्चनमाला — (अपवार्याङ्गुल्या विदूषकं तर्जयन्ती) हताश, स्मरिष्यसीदं वचनम् ।

वसन्तक :— त्वरतां त्वरतां सागरिका । एष खलु पूर्वदिशात उद्गच्छति भगवान्मृगलाञ्छनः ।

1 सदृश befitting, similar. 2 स्फुटम् ad. clearly. 3 प्रत्यभिज्ञात recognised; PP. प्रति + अभि + √ज्ञा 9U. 4 तर्जयत् (तर्जयन्ती f. nom s.) threatening; Pres. Part. √तर्ज् 1.10P. 5 स्मरिष्यसि thou wilt remember; लृट् √ स्मृ 1P. 6 पूर्वदिशातस् ind. from the east. 7 मृगलाञ्छन the moon.

Vasantaka—(joyously approaching with a smile) O Susangatā, truly Kānchanamālā's dress you put on is well fit. But where is Sāgarikā now?

Kānchanamāla—(pointing her finger) She is here.

Vasantaka—(looking in wonder) This is clearly Vāsavadattā!

Vāsavadattā—(suspecting, to her own self) Am I recognised by him? If so, I will go. (she intends to go)

Vasantaka—Lady Sāgarikā, do come hither.
(Vāsavadattā, laughing, eyes Kānchanamālā.)

Kānchanamālā—(Aside, threatening the jester with her finger)
Wretched man, you will remember this word.

Vasantaka—Sāgarikā, hurry, hurry up! Lord Moon appears from the eastern sky.

वासवदत्ता — (ससंभ्रममपवार्य) भगवन्मृगलाञ्छन, नमस्ते । मुहूर्तं तावद-
पवारितशरीरो भव । येन प्रेक्षिष्येऽस्य भावानुबन्धनम् ।
(सर्वे परिक्रामन्ति)

राजा — (सोत्कण्ठमात्मगतम्) उपस्थितप्रियासमागमस्यापि किमिदमत्यर्थमुत्ता-
म्यति मे मनः । अथवा

तीव्रः स्मरसंतापो न तथादौ बाधते यथाऽऽसन्ने ।
तपति प्रावृषि नितरामभ्यर्णजलागमो दिवसः ॥ १० ॥

वसन्तकः— (आकर्ण्य) भवति सागरिके, एष खलु प्रियवयस्यस्त्वामेवोद्दिश्यो-
त्कण्ठानिर्भरं मन्त्रयते। तत्तिष्ठ त्वम् । निवेदयाम्यस्मै तवागमनम् ।

1 अपवारितशरीर = अपवारित शरीर यस्य स 2 भाव अनुबन्धनम् continual or persistent love 3 उपस्थित approached, PP. उप + √स्था 1P 4 उपस्थितप्रिया समागमस्य = उपस्थित प्रियाया समागम यस्य तस्य [मे] 5 अत्यर्थम् too much, exceedingly 6 तीव्र sharp 7 आदौ ind at first, from the first 8 आसन्न a imminent, near 9 तपति it burns, √तप् 1P 10 प्रावृष् (–ट्) f rainy season 11 नितराम् ind excessively 12 अभ्यर्ण a near, proximate 13 दिवस day 14 उद्दिश्य ind (+acc) with reference to, for the sake of 15 निर्भर excessive

तीव्र स्मरसंताप यथा आसन्ने तथा आदौ न बाधते, प्रावृषि अभ्यर्णजलागम दिवस नितरां तपति ॥ आर्यावृत्तम् ।

Vāsavadattā—(aside, hurriedly) O Lord Moon who art marked by the form of a deer, salutation to thee! Now conceal thy form for a while, so that I might observe his persistent love (All walk round)

King —(eagerly, to himself) Though my union with my loving one is approaching, why this my mind pines away too much? The fierce torment of love did not torture me at first so much as it does now — In the rainy season the day burns excessively when the rain is at hand

Vasantaka—(listening) Lady Sāgarikā, it is really my dear friend who speaks about you with an extreme longing So wait I will inform him of your arrival

(वासवदत्ता शिर सञ्ज्ञा ददाति)

वसन्तक :— (राजानमुपसृत्य) भो वयस्य, दिष्ट्या वर्धसे । एषा खलु मयाऽऽनीता सागरिका ।

राजा — (सहर्षं सहसोत्थाय) वयस्य, क्वासौ क्वासौ ।

वसन्तक :— (सभ्रूभङ्गम्) नन्वेषा ।

राजा — (उपसृत्य) प्रिये सागरिके

शीतांशुर्मुखमुत्पले तव दृशौ पद्मानुकारौ करौ
रम्भागर्भनिभं तवोरुयुगलं बाहू मृणालोपमौ ।
इत्याह्लादकराखिलाङ्गि रभसान्निःशङ्कमालिङ्ग्य मा-
मङ्गानि त्वमनङ्गतापविधुराण्येह्येहि निर्वापय ॥ ११ ॥

1 शीतांशु m. moon. 2 उत्पलम् lotus. 3 दृश् f. (dual दृशौ) eye. 4 अनुकार imitation, resemblance. 5 पद्मानुकारौ = पद्मस्य अनुकार ययो तौ. 6 रम्भा f. banana tree. 7 गर्भः interior. 8 निभ similar. 9 रम्भागर्भनिभम् = रम्भाया गर्भ. तेन निभम्. 10 युगलम् pair. 11 उपमा f. comparison, resemblance. 12 मृणालोपमौ = मृणालस्य उपमा ययो तौ. 13 आह्लादः joy. 14 करः maker. 15 अखिल entire. 16 अङ्गिन् a corporeal, having limbs 17 रभसात् violently. 18 निःशङ्कम् fearlessly. 19 आलिङ्ग्य having embraced; gerund आ + √लिङ्ग् 1P. 20 निर्वापय soothe or extinguish thou; लोट् caus. निस् + √वा 2P.

शीतांशु तव मुख, उत्पले दृशौ, पद्मानुकारौ करौ, रम्भागर्भनिभ तव ऊरुयुगलं मृणालोपमौ बाहू, इति *आह्लादकराखिलाङ्गि ! निःशङ्क रभसात् त्वं मा आलिङ्ग्य, एहि एहि, अनङ्गतापविधुराणि अङ्गानि निर्वापय ॥*

(*Vāsavadattā makes a signal with her head.*)

Vasantaka—(approaching the king) O friend, congratulations ! I have really brought Sāgarikā.

King—(with joy at once rising) Where is she ? Where is she ?

Vasantaka—(knitting his eyebrows) She is here.

King—(advancing) O loving Sāgarikā !

The moon is thy face, the blue lotuses thy eyes, thy hands resemble the white lotuses, the pair of thy thighs the interior of the plantain-tree and thy arms are slender as the lotus-stalks : – O thou thus possessed of the entire limbs that give delight, come, come, embracing me violently without fear soothe thou my limbs burning with Love's fever !

वासवदत्ता — (अपवार्य) काञ्चनमाले, एवं स्वयं मन्त्रयत आर्यपुत्रः । पुनरपि मां कथमालापयिष्यतीत्यहो आश्चर्यम् ।

काञ्चनमाला — (अपवार्य) भट्टिनि, एवमिदम् । किं पुनरपरं साहसिकानां पुरुषाणां न संभाव्यते । R C

वसन्तकः— भवति सागरिके, विश्रब्धा - भूत्वा प्रियवयस्यमालापय । अद्यापि तावन्नित्यरुष्टाया देव्या वासवदत्ताया दुष्टवचनैः कटुकिताः कर्णाः । सुखयतु मृदुमधुरवचनोपन्यासः ।

वासवदत्ता — (अपवार्य सरोषस्मितम्) हञ्जे काञ्चनमाले, अहमीदृशी कटुकवचना । अद्य वसन्तकः पुनः प्रियंवदः ।

1 अपर another, other, n the latter 2 साहसिक adulterer, adventurist, 3 पुरुष man 4 विश्रब्ध quiet at heart, confident 5 नित्य constant 6 रुष्ट (रुष्टाया f. gen s ) angered angry; PP √ रुष् 4U 7 कटुकित embittered, PP. नामधातु √ कटुक् 8 उपन्यास propitiating statement 9 कटुक bitter, pungent 10 कटुकवचना = कटुकं वचनं यस्या सा 11 प्रियंवद a sweet speaking

Vāsavadatta—(aside) O Kānchanamālā, my husband speaks like this personally. I wonder how he will speak to me again !

Kānchanamālā—( aside ) O queen, exactly. What else is not possible for adulterers ?

Vasantaka—Lady Sāganikā, confidently do address my fond friend ! Even now our ears are poisoned by the vile words of Queen Vasavadattā who is ever angry Please him with a statement of your soft and sweet words

Vāsavadattā—(aside with an angry smile) O maid Kānchanamālā, I am now such a bitter speaker. Vasantaka is but a sweet-speaker

कान्चनमाला — (अपवार्याङ्गुल्या तर्जयन्ती) हताश, स्मरिष्यसीदं वचनम् ।

वसन्तक :— (विलोक्य) भो वयस्य, प्रेक्षस्व प्रेक्षस्व । एष खलु कुपितकामिनीकपोलसंनिभः पूर्वदिशं प्रकाशयन्नुदितो भगवान्मृगलाञ्छनः ।

राजा — (निरूप्य सस्पृहम्) प्रिये, पश्य पश्य ।

आरुह्य शैलशिखरं त्वद्वदनापहृतकान्तिसर्वस्वः ।
प्रतिकर्तुमिवोर्ध्वकरः स्थितः पुरस्तान्निशानाथः ॥ १२ ॥

1 कपोल: temple, cheek. 2 संनिभ (in compds.) like, similar. 3 प्रकाशयत् (प्रकाशयन् m. nom s.) brightening; Pres Part. caus. प्र+√काश् 1A 4 उदित risen; PP. उद् +√ इ 2P. 5 आरुह्य having mounted; gerund आ +√ रुह् 1P. 6 शैल mountain. 7 शिखर m. n. summit. 8 अपहृत taken away, deprived of; PP. अप +√हृ 1U 9 सर्वस्वम् whole property, possession. 10 त्वद्वदनापहृतकान्तिसर्वस्व =तव वदनेन अपहृत कान्तिसर्वस्व यस्य एतादृश 11 प्रतिकर्तुम् to return; inf. प्रति +√ कृ 8U. 12 ऊर्ध्वंकर. = ऊर्ध्वा. करा यस्य सः 13 पुरस्तात् ind. in front. 14 निशानाथ. moon, lord of night.

त्वद्वदनापहृतकान्तिसर्वस्व निशानाथः शैलशिखर आरुह्य प्रतिकर्तुं इव ऊर्ध्वंकर पुरस्तात् स्थित. ॥ आर्या ।

Kānchanamālā—(threatening with a finger aside) Oh wretched man, thou wilt remember this word.

Vasantaka—(looking) Ho friend, behold! behold! Truly the Blessed Lord moon resembling the cheek of an angry woman has risen, brightening the eastern quarter.

King—(*observing affectedly*) O beloved, behold! behold! *After mounting* the mountain-summit the lord of Night, whose entire possession of beauty is deprived of by thy face, stands in front shooting his lofty rays as if to challenge [thee].

ननु प्रिये, किं न दर्शितमनेनोद्गच्छता जडत्वम्। कुतः

किं पद्मस्य रुचिं न हन्ति नयनानन्दं विधत्ते न किं
वृद्धिं वा झषकेतनस्य कुरुते नालोकमात्रेण किम्।
वक्त्रेन्दौ तव सत्ययं यदपरः शीतांशुरुज्जृम्भते
दर्पः स्यादमृतेन चेदिह तवाप्यस्त्येव बिम्बाधरे ॥१३॥

वासवदत्ता — (सरोषमवगुण्ठनपटमपनीय) आर्यपुत्र, सत्यमेवाहं सागरिका। त्वं पुनः सागरिकाऽऽक्षिप्तहृदयः सर्वमेव सागरिकामयं प्रेक्षसे।

1 उद्गच्छत (उद्गच्छता m ins s) rising, Pres Part उद् + √ गम् 1P. 2 जडत्वम् dullness, slothfulness 3 रुचि f lustre 4 हन्ति it kills, destroys, √ हन् 2 P. 5 विधत्ते it accomplishes, वि + √ धा 3U 6 वृद्धि f increase, swelling 7 झष fish. 8 केतनम् place, banner. 9 झषकेतन sea, Cupid 10 आलोक appearance, sight. 11 तव वक्त्रेन्दौ सति (loc abs) when there is thy moon face 12 उज्जृम्भते it rises, उद् + √ जृम्भ् 1A 13 दर्प vanity, pride 14 अमृतम् nectar 15 चेत् if, whether 16 बिम्ब m n Bimba fruit 17 अधर *lower lip* 18 बिम्बाधरे = बिम्ब इव अधर तस्मिन्.

[(शीतांशु तव वक्त्रेन्दु वा)] किं पद्मस्य रुचिं न हन्ति किं नयनानन्द न विधत्ते किं वा आलोकमात्रेण *झषकेतनस्य वृद्धि न कुरुते, तव वक्त्रेन्दौ सति यत् अयं अपर शीतांशु उज्जृम्भते, इह अमृतेन दर्प स्यात् चेत् तव* बिम्बाधरे अपि अस्ति एव ॥ वृत्त शार्दूलविक्रीडितम्।

Certainly, my love, has the rising moon not shown its dullness? For,
Does the moon, or your moon–face not destroy the charm of the lotus, does it not create a joy to the eyes, or does it not swell in the sea or love merely by its appearance?
Despite there presents your moon-face the moon rises · should there be pride in it on account of its nectar, so should it be in your cherry-like lower lip

Vāsavadattā—(removing her veil in anger) My husband, is it true that I am Sāgarikā? But with your heart ensnared by Sagarika you see Sāgarikā in everything

राजा — (दृष्ट्वा सवैलक्ष्यम्। अपवार्य) हा धिक् कष्टम्। कथं देवी वासवदत्ता। वयस्य, किमेतत्।

वसन्तक :— (सविषादम्) भो वयस्य, किमपरम्। अस्माकं जीवितसंशयो जात एषः।

राजा — (उपविश्याञ्जलिं बद्ध्वा) प्रिये वासवदत्ते, प्रसीद, प्रसीद।

वासवदत्ता — (तदभिमुखमश्रूणि निपातयन्ती) आर्यपुत्र, मा एवं भण। अतिक्रांतानीदानीमेतान्यक्षराणि।

वसन्तक :— (आत्मगतम्) किमिदानीमत्र विरचयामि। भवतु। एवं तावत्। (प्रकाशम्) भवति, महानुभावा खलु त्वम्। तत्क्षम्यतां तावदेकोऽपराधः प्रियवयस्यस्य।

1 कष्टम् n evil, sin, and alas ! 2 संशय peril, danger 3 जात happened; PP √ जन् 4A 4 तदभिमुखम् towards him 5 निपातयत् (निपातयन्ती f nom s) dropping, shedding, Pres Part caus नि + √ पत् 1P 6 विरचयामि I do, arrange, वि + √रच् 10U 7 महानुभाव वा f magnanimous 8 अनुभाव magnanimity, power. 9 क्षम्यताम् it must be forgiven , कर्मणि लोट् √ क्षम 1A 4P 10 अपराध offence

King—(looking with fear, aside) Ha fie ! alas ! How it is queen Vāsavadattā ! O friend what is it ?

Vasantaka—(sadly) O friend, *it is nothing, but our life is in danger*

King—(sitting *down, folding his hands) Beloved Vāsavadattā, forgive, for give* me !

Vāsavadatta—(dropping tears, towards him) My husband, say not so These words are now gone over

Vasantaka—(to himself) What shall I do in this case ? Well, like this (Aloud) *Lady, you are truly magnanimous So now endure this single* offence of my dear friend

वासवदत्ता — आर्य वसन्तक, ननु प्रथमसंगमे विघ्नं कुर्वत्या मयैवैतस्यापराद्धम् ।

राजा — एवं प्रत्यक्षदृष्टव्यलीकः किं ब्रवीमि । तथापि विज्ञापयामि ।

आताम्रतामपनयामि विवर्ण एष
लाक्षाकृतां चरणयोस्तव देवि मूर्ध्ना ।
कोपोपरागजनितां तु मुखेन्दुबिम्बे
हर्तुं क्षमो यदि परं करुणा मयि स्यात् ॥ १४ ॥

(इति पादयो पतति)

1 प्रथमसगम first union. 2 विघ्न obstacle 3 अपराद्ध offended ; PP अप +√ राध् 5 P. 4 प्रत्यक्ष visible. 5 व्यलीकम् fault, falsehood 6 प्रत्यक्षदृष्टव्यलीकः =प्रत्यक्ष दृष्ट व्यलीक यस्य स 7 विज्ञापयामि I request, beg, caus लट् वि +√ज्ञा 9 U. 8 आताम्रता f. reddish tint 9 विवर्ण pale 10 लाक्षा f. red dye 11 मूर्धन् m (ins s मूर्ध्ना) head. 12 उपराग injury, redness 13 जनित produced, caus PP. √ जन् 4A. 14 बिम्ब m m disc 15 मखेन्दुबिम्बे = मखमव इन्दुबिम्ब तस्मिन् 16 क्षम able, patient 17 परम् ind only, very much 18 करुणा f pity.

देवि ! विवर्णं एष लाक्षाकृता तव चरणयो आताम्रता मूर्ध्ना अपनयामि यदि पर [[तव]] करुणा मयि स्यात् तु मुखेन्दुबिम्ब कोपोपरागजनिता [(आताम्रता)] हर्तुं क्षमः ॥ वसन्ततिलकावृत्तम् ।

Vāsavadatta—Sir Vasantaka, I have certainly offended him by becoming an obstacle to his first union

King —What do I say when my offence is crystal clearly detected ? Yet, I beg of you ,—

O queen, I, a pale man, would remove with my head the reddish tint upon thy feet created by red lac

Shouldst thou but show pity on me, I could even remove the same hue on thy full moon-face caused by the passion of wrath

(He falls at her feet )

वासवदत्ता — (हस्तेन वारयन्ती) आर्यपुत्र, उत्तिष्ठोत्तिष्ठ । निर्लज्जः खल्वेष जनो आर्यपुत्रस्येदृशं हृदयं ज्ञात्वा पुनरपि कुप्यति । तत्सुखं तिष्ठत्वार्यपुत्रः । अहं गमिष्ये ।

काञ्चनमाला — भट्टिनि, कुरुष्व अस्मै प्रसादम् । एवं चरणपतितं महाराजमुज्झित्वा गताया देव्याः पश्चात्तापेन भवितव्यम् ।

वासवदत्ता — अपेहि अपण्डिते, कुतः अत्र प्रसादस्य पश्चात्तापस्य वा कारणं, तदेहि गच्छावः । (इति निष्क्रान्ते)

राजा — देवि, प्रसीद प्रसीद । (आताम्रतामपनयामीति पुन पठति)

वसन्तक :— भोः । उत्तिष्ठ । गता सा वासवदत्ता देवी । तत्कस्मात् अत्रारण्यरुदितं करोषि ।

राजा — (मुखमुन्नमय्य) कथमकृत्वैव प्रसादं गता देवी ।

1 निर्लज्ज shameles 2 एष जन = देवी 3 कुप्यति she is angry, √ कुप् 4 P 4 कुरुष्व do thou ! लोट √ कृ 8U 5 चरणपतितम् = चरणयो पतित तम् 6 पश्चात्ताप remorse 7 अपण्डित ignorant 8 उन्नमय्य having raised, gerund causal उद् + √नम 1U.

Vāsavadattā—(checking him with her hand) Husband rise ! rise ! Indeed, shameless that I am, I am again angry, after knowing the heart of my husband I am going May my lord be happy

Kānchanamālā—O queen, forgive him When you leave the king thus fallen at your feet, you will have a remorse

Vasavadattā—Away with your word ! Ignorant girl, there is no cause of remorse or tolerance Come, let us go

(Both women depart )

King —O queen, forgive me ! forgive me !

(He repeats "O queen, I, a pale man, would remove", etc )

Vasantaka—Hallo ! stand up Vāsavadattā the queen has left Why do you cry in the wild woodland ?

King —(raising his face) Ah my wife has gone without forgiving me !

वसन्तकः— न कृतः कथं प्रसादो यद्याप्यक्षतशरीरास्तिष्ठामः ।

राजा — धिङ्मूर्ख, किमेवमुपहससि माम् । ननु त्वत्कृत एवायमापतितोऽस्माकमनर्थक्रमः । यतः

समारूढा प्रीतिः प्रणयबहुमानादनुदिनं
व्यलीकं वीक्ष्येदं कृतमकृतपूर्वं खलु मया ।
प्रिया मुञ्चत्यद्य स्फुटमसहना जीवितमसौ
प्रकृष्टस्य प्रेम्णः स्खलितमविषह्यं हि भवति ॥ १५ ॥

1 अक्षत (√ क्षण् 8U) unhurt 2 अक्षतशरीरा = अक्षतानि शरीराणि येषा ते. 3 आपतित befallen; PP आ + √ पत् 1P 4 अनर्थ worthless, unfortunate. 5 क्रम course, turn of fate. 6 समारूढ matured, full grown; PP. सम् + आ + √ रुह 1P. 7 प्रणयबहुमान high consideration for love 8 अनुदिनम् ind everyday 9 अकृतपूर्वम् = पूर्वं न कृतम् not committed before 10 असौ प्रिया = वासवदत्ता 11 मुञ्चति she gives up; √मुच् 6P. 12 स्फुटम् ad clearly. 13 असहन intolerant, unforgiving 14 प्रकृष्ट a. strong protracted 15 प्रेमन् m n. (gen s प्रेम्ण) love 16 स्खलितम् blunder, fault 17 अविषह्य unbearable 18 हि for.

प्रणयबहुमानात् अनुदिन समारूढा प्रीति असहना असौ प्रिया खलु मया अकृतपूर्वं कृत इद व्यलीक वीक्ष्य जीवित अद्य स्फुट मुञ्चति प्रकृष्टस्य प्रेम्ण स्खलित अविषह्य भवति हि ।। शिखरिणीवृत्तम् ।

Vasantaka—Although not forgiven by her, we remain unhurt in our bodies.

King—Fie on you fool! Why do you ridicule me thus? Truly, because of your deed this unfortunate turn of fate has befallen us

With her love grown deeper day in and day out on account of her high estimation of it my sweetheart (i.e. Vasavadattā), having seen this offence committed by me but uncommitted before, growing intolerant, will surely give up her life now, for a blunder in the process of strong, lengthy affection is unbearable.

वसन्तकः—भोः, रुष्टा देवी तावन्न ज्ञायते किं करिष्यतीति। सागरिका पुनरद्य दुःखजीवना भविष्यतीति तर्कयामि।

राजा—वयस्य, अहमप्येवं चिन्तयामि। हा प्रिये सागरिके।
(ततः प्रविशति वासवदत्तावेषधारिणी सागरिका)

सागरिका—(सोद्वेगम्) दिष्ट्यानेन विरचितदेवीवेषेणास्याः संगीतशालाया निष्क्रामन्ती न केनापि लक्षितास्मि। तदिदानीमत्र किं करिष्यामि।
(इति सास्रं चिन्तयति)

वसन्तकः—भोः, किं मूढ इव तिष्ठसि। चिन्तयापराधप्रतीकारम्।

राजा—वयस्य, तदेव चिन्तयामि। देवीप्रसादं मुक्त्वा नान्यमुपायं पश्यामि। तदेहि। तत्रैव गच्छावः। (इति परिक्रामतः)

1 रुष्ट angered, PP √ रुष् 4U 2 ज्ञायते it is known, कर्मणि लट् √ ज्ञा 9U 3 सोद्वेगम् sorrowfully agitatedly 4 उद्वेग agitation sorrow 5 संगीतशाला f music hall 6 मूढ fool 7 अपराध offence 8 प्रतीकार retaliation, remedy 9 मुक्त्वा (gerund √ मुच् 6 P) excepting 10 उपाय means

Vasantaka—Hello, it is unknown now what the wrathful queen will do, but I think Sāgarika will be unhappy with her life

King—Friend, so do I Oh loving Sāgarika! (Then appears Sagarikā wearing Vāsavadatta's dress)

*Sāgarikā—(agitatedly) Fortunately clad in the garb of the queen I have not* been detected by anyone while coming out of the music hall But what shall I do now here *(she reflects with tears)*

Vasantaka—Friend, why do you stand like a fool? Do design a remedy for the offence!

King—O friend, I am thinking of it I do see no other means except for the queen's favour Come, we will just go there (Both move round)

सागरिका — (सास्रं विमृश्य) वरमिदानीं स्वयमेवात्मानमुद्बध्योपरता भविष्ये। येन न पुनर्ज्ञातसंकेतवृत्तान्तया देव्या सुसंगतेव परिभूतास्मि। तद्यावदहमशोकपादपे गत्वा यथासमीहितं करिष्ये। (इति परिक्रामति)

वसन्तकः— (आकर्ण्य) तिष्ठ तावत्तिष्ठ। ननु पदशब्दः श्रूयते। जानामि कदापि गृहीतपश्चात्तापा पुनरपि देव्यागता भवेत्।

राजा — वयस्य, महानुभावा खलु देवी। कदाचिदेवमपि स्यात्। तत्त्वरितं निरूपय।

वसन्तकः— यद्भवानाज्ञापयति। (इति निष्क्रामति)

सागरिका — (उपसृत्य) तद्यावदेतया माधवीलतया पाशं विरच्य अशोकपादप आत्मानमुद्बध्य व्यापादयामि। हा तात

1 विमृश्य having considered, gerund वि + √ मृश् 6 P  2 उद्बध्य having hung, gerund उद् + √ बन्ध् 9 P  3 उपरत died ceased; PP. उप + √ रम् 1A  4 भविष्ये=भविष्यामि.  5 येन=मरणेन  6 ज्ञातसकेतवृत्तान्तया=ज्ञात सकेतस्य वृत्तान्त यया तया  7 परिभूत=insulted, disgraced, PP परि + √ भू 1P.  8 गृहीतपश्चात्तापा=गृहीत पश्चात्ताप यया सा  9 कदाचित् = कदापि whenever, at some time or other.  10 त्वरितम् ad. quickly.  11 पाश noose, cord  12 व्यापादयामि I die, caus लट् व्या+√ पद् 4A

Sāgarikā—(reflecting in tears) It is now better for me to commit suicide by hanging myself Then, I will not be disgraced as Susangatā by the queen who discovered the news of my rendezvous with him So I shall repair to the Ashoka tree and do as I please

(She walks round)

Vasantaka—(listening) Wait, wait The sound of foot steps is heard I know the queen feeling remorseful would come at any time.

King —Friend, the queen is, indeed, generous-hearted She would at any moment So do you check swiftly!

Vasantaka—Yes, I will do so, Sire! (He moves)

Sāgarikā—(advancing) Now arranging a noose out of this Mādhavī creeper I will kill myself by hanging on the Ashoka tree. Alas, father!

हा तात। हा अम्ब हा अम्ब। एषेदानीमहमनाथाऽशरणा विपद्ये मन्दभागिनी। (इति कण्ठे लतापाशमर्पयति)

वसन्तक :— (विलोक्य) का पुनरेषा। कथं पुनर्देवी वासवदत्ता। (ससंभ्रममुच्चैः) भो वयस्य, परित्रायस्व परित्रायस्व। एषा खलु देवी वासवदत्तात्मानमुद्बध्य व्यापादयति।

राजा — (कण्ठात्पाशमपनयन्) अयि साहसकारिणि, किमिदमकार्यं क्रियते।

मम कण्ठगताः प्राणाः पाशे कण्ठस्थिते तव।
अतः स्वार्थप्रयत्नोऽयं त्यज्यतां साहसं प्रिये ॥ १६ ॥

सागरिका — (राजानं दृष्ट्वा) अयि कथमेष भर्ता। (इति सहर्षमात्मगतम्) यत्सत्यमेनं प्रेक्ष्य पुनरपि मे जीविताभिलाषः संवृत्तः। अथवा एनं प्रेक्ष्य कृतार्था भूत्वा सुखमात्मानमुद्बध्य जीवितं परित्यजे।

1 अम्बा f (voc s अम्ब) *mother* 2 अनाथ *orphan, forlorn, helpless*
3 विपद्ये I perish वि + √ पद् 4A 4 परित्रायस्व help thou, caus लोट् परि + √ त्रा 2A.
5 साहसम् violent deed 6 साहसकारिन् a rash, inconsiderate 7 प्राण breath
7 स्वार्थ a *self interested* 9 कृतार्थ content 10 अतस्=अस्मात् हेतो *for this reason*

प्रिये ! पाशे तव कण्ठस्थिते मम प्राणा कण्ठगता अत अय स्वार्थप्रयत्न, साहस त्यज्यताम् ॥ अनुष्टुब्वृत्तम्।

Ah father! Ah dear mother! Mother! I, luckless that I am perish now, forlorn and helpless (She places the creeper cord over her neck)

Vasantaka—(looking) Who is she? What it is again Queen Vasavadattā (aloud in haste) Oh my friend, help! help! Queen Vāsavadattā is committing suicide by hanging

King —(removing the noose from her neck) Ah rash one, why do you do this dreadful deed?

When the noose is on thy neck my life breath is choked at the throat · for this reason to take off the noose is my own self interested effort Give up the violent act, O my darling!

Sagarikā—(looking at the king) O it is my lord!
(joyously to herself) Truly on seeing him again I cherish a desire to live And yet, seeing him and being satisfied I must abandon my life by hanging myself in happiness

(प्रकाशम्) मुञ्चतु भर्ता। पराधीनः खल्वयं जनः। न पुनरीदृशमवसरं मर्तुं प्राप्स्यते। त्वमपि देव्यामात्मानमपराधिनं मा कुरुष्व। (इति पुन कण्ठे पाश दातुमिच्छति)

राजा — (निरूप्य सहर्षम्) कथं प्रिया मे सागरिका। (इति कण्ठात्पाशमाक्षिप्य)

अलमलमतिमात्रं साहसेनामुना ते
त्वरितमयि विमुञ्च त्वं लतापाशमेनम्।
चलितमपि निरोद्धुं जीवितं जीवितेशे
क्षणमिह मम कण्ठे बाहुपाशं निधेहि ॥ १७॥

(इति बाहुपाशमाक्षिप्य कण्ठे गृहीत्वा स्पर्शसुखमभिनीय विदूषक प्रति)

सखे, इयमनभ्रा वृष्टिः।

1 पर-अधीन a dependent upon others 2 अय जन = सागरिका 3 मर्तुम् to die, inf √मृ 6A 4 अपराधिन् a offending 5 चलित agitated, stirred, PP √ चल् 1P 6 निरोद्धुम् to oppose, to obstruct, inf नि + √ रुध् 7U 7 जीवितम् = राज्ञ जीवितम्. 8 ईश (+ gen & in compds) capable of, master of 9 जीवितेशे = मम (राज्ञ) जीवितस्य त्व ईशा तत्सबोधनम् 10 बाहुपाश = बाहू एव पाश तम् 11 निधेहि place thou, लोट् नि + √ धा 3U 12 अभ्रम् cloud 13 अनभ्र-भ्रा cloudless

अमुना ते साहसेन अतिमात्र अल अल, त्व त्वरित एन लतापाश विमुञ्च, अयि जीवितेशे! चलित अपि जीवित निरोद्ध क्षण इह मम कण्ठे बाहुपाश निधेहि ॥ वृत्त मालिनी।

(Distinctly) My lord, pray leave me alone Really this person is dependent upon others Such a chance to die as this may not be regained Do you never offend the queen! (Again places the cord on her neck)

King—(observing with joy) How, it is my darling Sāgarika! (throwing the noose from her neck)

Really enough enough of this thy inconsiderate deed! Abandon thou quickly this creeper cord! O thou who art master of my life, for a moment throw the noose in the form of thy arms here on my neck to extinguish my shaken life!

(casting his noose of arms at her neck and seizing it, feeling the happiness of her touch, to the clown)

O my frind, this is a shower without any cloud!

राजा — अयि, मिथ्यावादिनी खल्वसि । कुतः
श्वासोत्कम्पिनि कम्पितं कुचयुगे मौने प्रियं भाषितं
वक्त्रेऽस्याः कुटिलीकृतभ्रुणि तथा यातं मया पादयोः ।
इत्थं नः सहजाभिजात्यजनिता सेवैव देव्याः परं
प्रेमाबन्धविवर्धिताधिकरसा प्रीतिस्तु या सा त्वयि ॥ १८ ॥

वासवदत्ता — (उपसृत्य सरोषम्) आर्यपुत्र, युक्तमेतत् । सदृशमेतत् ।

राजा — (दृष्ट्वा सवैलक्ष्यम्) देवि, न खल्वकारणे मामुपालब्धुमर्हसि । त्वामेव मत्वा वेषसादृश्याद्विप्रलब्धा वयमिहागताः । तत्क्षम्यताम् ।

(इति पादयोः पतति)

1 मिथ्यावादिन् a (f nom s मिथ्यावादिनी) lying, telling untruth 2 श्वास breath 3 उत्कम्पिन् a heaving, throbbing 4 कम्पित trembled, PP √कम्प् 1A 5 कुच breast 6 कुचयुगे श्वासोत्कम्पिनि (सति) (loc abs ) when the pair of her breast throb with breaths 7 मौनम् silence 8 मौने (loc abs ) when she was silent 9 भाषित spoken, PP √ भाष् 1A 10 कुटिलीकृते bent, knitted 11 भ्रू f eyebrow 12 कुटिलीकृतभ्रुणि = कुटिलीकृते भ्रुवौ यस्मिन् तस्मिन् 13 यातम = पतितम् 14 इत्थम् ind thus 15 सहज inborn, innate 16 आभिजात्यम् noble birth 17 सेवा f service, duty 18 परम् ad only 19 प्रेम-आब न्ध tie of affection 20 विवर्धित increased, exhilarated, caus PP वि +√ वृध् 1A 21 प्रेमाबन्धविवर्धिताधिकरसा = प्रेम्ण आबन्धन विवर्धित अधिक रस यस्या सा (प्रीति ) 22 उपालब्धुम् to censure, inf उप +√ लभ् 1A. 23 अर्हसि (+ inf, a courteous expression) please you should ~, √ अर्ह् 1P

कुचयुगे श्वासोत्कम्पिनि कम्पित, मौने प्रिय भाषित, अस्या वक्त्रे कुटिलीकृतभ्रुणि तथा पादयो मया यात, इत्थ न सहजाभिजात्यजनिता देव्या सेवा पर एव त या प्रेमाबन्धविवर्धिताधिकरसा सा प्रीति त्वयि ((अस्ति)) ॥ शार्दूलविक्रीडितम् ।

King — O, you are really a liar For, when the pair of her breasts hove with heavy breaths I trembled, when she was silent I spoke lovingly, when her face displayed its knitted eyebrows I fell prostrate so at her feet Such is but *my obligation, begotten by the innate trait of my* noble birth, to the queen, but the very love whose passion is exhilarated *by the tie of my affection is only for thee !*

Vasavadatta—(advancing with anger) My husband this is fit, this is worthy of you!

King —(looking confused) Oh queen pray you should not rebuke me over a thing without reason Deceived by the similar dress, thinking her to be yourself we have come here *Therefore, overlook this!*

(He prostrates himself at her feet )

वासवदत्ता — (सरोषम्) आर्यपुत्र, उत्तिष्ठोत्तिष्ठ। किमद्यापि सहजाभिजातया सेवया दुःखमनुभाव्यते।

राजा — (स्वगतम्) किमेतदपि श्रुतं देव्या। तत्सर्वथा देवीप्रसादनोपायं प्रति निराशीभूताः स्मः। (इत्यधोमुखस्तिष्ठति)

वसन्तकः— भवति, त्वं किलास्मानमुद्बध्य विपद्यस इति वेषसादृश्य-मोहितेन मया प्रियवयस्योऽत्रानीतः। यदि मम वचनं न प्रत्याययसि तत्प्रेक्षस्वेमं लतापाशम्। (इति लतापाशं दर्शयति)

वासवदत्ता — (सकोपम्) हञ्जे काञ्चनमाले, एतेनैव लतापाशेन बद्ध्वा गृहाणैनं ब्राह्मणम्। एतां च दुष्टकन्यकामग्रतः कुरु।

1 अनुभाव्यते it is made to be suffered experienced णिजतात्कर्मणि लट् अनु + √ भू 1P 2 सर्वथा by all means, completely 3 निराशीभूत become hopeless, PP निस + आशी + √ भू 4 स्म we are, लट् √ अस 2P 5 अधोमुख = अध गत मुख यस्य स 6 मोहित deluded, infatuated, caus PP √ मुह 4P 7 आनीत brought, PP आ + √नी 1U 8 बद्ध्वा having tied, bound, gerund √ बन्ध 9P 9 गृहाण take or seize thou, लोट √ ग्रह् 9U 10 अग्रत कुरु put her in front ! लोट् √ कृ 8U

Vāsavadattā—(with anger) Husband stand up, stand up ! Even now are you caused by your noble born, innate obligation to suffer misfortune ?

King —(to himself) The queen has also overheard this Now I am without hope to take any means to propitiate the queen (He stands with his head bent down )

Vasantaka—Your Highness, I did bring my dear friend here, betrayed by the similarity of the dress, thinking that you were hanging yourself If you don t trust my word see this creeper noose

( He shows her the creeper-noose )

Vāsavadattā—(angrily) O maid Kanchanamāla, do seize this Brahmin by binding him up with this very creeper noose, and let this wicked girl lead him !

वसन्तकः—भोः, एवं न्विदम् । यद्यकालवातावली भूत्वा नायाति देवी वासवदत्ता । (तत प्रविशति वासवदत्ता काचनमाला च)

वासवदत्ता — हञ्जे काञ्चनमाले, तं तथा चरणनिपतितमार्यपुत्रमवधीर्या-गच्छन्त्या मयातिनिष्ठुरं कृतम् । तदिदानीं स्वयमेव गत्वाऽऽर्य-पुत्रमनुनेष्यामि ।

काञ्चनमाला — काऽन्या देवीं वर्जयित्वैवं भणितुं जानाति । वरं स एव देवो दुर्जनो भवतु न पुनर्देवी । तदेत्वेतु देवी । (इति परिक्रामत)

राजा—अयि मुग्धे, किमद्यापि मध्यस्थतया वयं विफलमनोरथाः क्रियामहे ।

न्विदम् = (सन्धि·) नु इदम्. 2 यदि perhaps, if 3 आवलि f line, series 4 वातावली f series of wind, whirlwind = वातालि 5 आयाति she comes, आ + √ या 2P. 6 अवधीर्य having disregarded, gerund अव + √ धीर् 10P 7 अतिनिष्ठुर very cruel, rough 8 अनुनेष्यामि I shall conciliate, please, लृट् अनु + √ नी 1U 9 वर्जयित्वा gerund √ वृज् 1P 10U. to exclude, to except 10 दुजन wicked man 11 मुग्ध a. (मुग्धे f voc s ) charming simple. 12 मध्यस्थता f impartiality, indifference 13 विफल fruitless 14 मनोरथ wish. 15 विफलमनोरथा = विफल मनोरथ येषां ते 16 क्रियामहे we are made, कर्मणि लट् √ कृ 8U

Vasantaka—Yes, it is exactly so Perhaps the queen, Vāsavadattā does not come back, becoming an untimely whirlwind

(Then appear Vāsavadatta & Kānchanamalā )

Vāsavadattā – O maid Kānchanamalā, I did a very cruel thing by going away and slighting my husband prostrated at my feet So now I will go and conciliate my husband in person

Kanchanamālā—Who else but the queen knows to speak like this? It is better the very king may be a bad person, but not the queen May Your Majesty come this way (Both walk round)

King—Ah charming one, even now why am I not enabled by your indifference to fulfill my wish?

काञ्चनमाला — (कर्णं दत्त्वा) भट्टिनि, यथा समीपे एष भर्ता मन्त्रयते तथा तर्कयामि त्वामेवानुनेतुमागच्छति । तदुपसर्पतु भट्टिनी ।

वासवदत्ता — (सहर्षम्) तदलक्षितैव पृष्ठतो गत्वा कण्ठे गृहीत्वा प्रसादयिष्ये ।

वसन्तकः — भवति सागरिके, विश्वस्ता भूत्वा प्रियवयस्यमालापय ।

वासवदत्ता — (आकर्ण्य सविषादम्) काञ्चनमाले, सागरिकाप्यत्र तिष्ठति । तच्छृणुवः । ज्ञात्वा पश्चादुपसर्पिष्यामि ।

सागरिका — भर्तः, किमेतेनालीकदाक्षिण्येन । जीविताद्प्यधिकवल्लभाया देव्याः पुनरप्यात्मानमपराधिनं किं करोषि ।

1 अनुनेतुम् to conciliate, inf अनु + √ नी 1U 2 पृष्ठतम् ind from behind 3 प्रसादयिष्ये I will please propitiate, caus लृट् प्र + √ सद् 1P 4 विश्वस्त confided, comforted, PP वि + √ श्वस् 2P 5 पश्चात् afterwards 6 अलीक false, pretended 7 दाक्षिण्यम् politeness, over-courtesy 8 वल्लभ a beloved 9 अपराधिन् a (acc s m अपराधिनम्) guilty, offending

Kānchanamāla – (listening) O madam, as His Majesty speaks close by I presume that he is coming to conciliate you May Your Majesty advance !

Vāsavadatta – (with joy) Then going from behind unobserved and holding him by the neck I will propitiate him

Vasantaka – Lady Sāgarikā with your mind at ease do speak to my dear friend !

Vāsavadattā – (listening, disappointed) O Kānchanamālā, Sagarikā is here, too Let us hear After knowing it I shall approach him

Sāgarikā—My lord what is the use of this false courtesy ? Again you make yourself guilty towards the queen whom you love more than your life

काञ्चनमाला — यद्भट्टिन्याज्ञापयति । (लतापाशेन वसन्तकं गले बध्वा ताडयति)

हताश, अनुभव तावदात्मनोऽविनयस्य फलम् । देव्या दुष्टवचनैः कटुकितौ कर्णाविति स्मर तद्वचनम् । सागरिके, त्वमप्यग्रतो भव ।

सागरिका — (स्वगतम्) अकृतपुण्यया मया मर्तुमप्यात्मन इच्छया नावापितम् ।

वसन्तकः — (सविषादम्) भो वयस्य, स्मर मामनाथं देव्या बन्धनाद्विवर्जितुम् । (इति राजानमालोकयति) (वासवदत्ता राजानमवलोकयन्ती सागरिकां वसन्तकं च गृहीत्वा काञ्चनमालया सह निष्क्रान्ता)

राजा — (सखेदम्) कष्टं भोः कष्टम् ।

1 गल throat, neck 2 अनुभव enjoy or taste thou; लोट अनु + √ भू 1P. 3 अविनय immodesty disrespect 4 पुण्यम् merit, virtue 5 अकृतपुण्यया = अकृतं पुण्यं यया तया 6 इच्छा f desire 7 अवापित made to secure or get, caus PP. अव + √ आप् 5P 8 बन्धनम् captivity, fetter 9 विवर्जितुम् to take away, to release, inf. वि + √ वृज् 1P 10U

Kānchanamālā As Your Majesty commands (Binding up Vasantaka by the neck she beats him) Wretched man, enjoy now the fruit of your disrespect ! Remember your own word that your ears were poisoned by the bitter words of the queen ! Sāgarikā, you, too, stand in front !

Sāgarikā—(to herself) I am not even allowed to die according to my own desire, as I have no virtue

Vasantaka—(sorrowfully) O my friend, try to set me, a helpless man, free from the queen's fetters. (He looks at the king) (Vāsavadattā moves away with Kānchanamālā, taking Vasantaka and Sāgarikā who is looking at the king)

King —(painfully) Alas ! alas !

किं देव्याः कृतदीर्घरोषमुषितस्निग्धस्मितं तन्मुखं
त्रस्तां सागरिकां सुसंभृतरुषा संतर्ज्यमानां तथा ।
बध्वा नीतमितो वसन्तकमहं किं चिन्तयामीत्यहो
सर्वाकारकृतव्यथः क्षणमपि प्राप्नोमि नो निर्वृतिम् ॥ १६ ॥

तत्किमिदानीमिह स्थितेन प्रयोजनम् । देवीमेव प्रसादयितुमभ्यन्तरं प्रविशामि । (इति निष्क्रान्ता सर्वे)

## इति संकेतकं नाम तृतीयोऽङ्कः

1 रोष anger, 2 मुषित stolen ; PP. √मुष् 9P 3 कृतदीर्घरोषमुषितस्निग्धस्मितम् = कृतेन दीर्घरोषेण मुषित स्निग्ध स्मित यस्मिन् तत्. 4 त्रस्त (acc s f त्रस्ताम्) frightened; PP √ त्रस् 1.4 P. 5 सुसभृत well collected, filled ; PP सु + सम् + √ भृ 1 3 P. 6 रुष् f anger. 7 सुसभृतरुषा = सुसभृता रुष् यया (वा यस्या ) तया (वासवदत्तया) 8 सतर्ज्यमान (सतर्ज्यमानाम् acc.s f.) being threatened; Passive Pres Part सम् + √ तर्ज् 1.10P. 9 आकार form, sign, token 10 व्यथा f Pain 11 सर्वाकारकृतव्यथ = सर्वै आकारै कृता व्यथा यस्य स 12 प्राप्नोमि I obtain, लट् प्र + √ आप् 5P 13 निर्वृति f. satisfaction

देव्याः कृतदीर्घरोषमुषितस्निग्धस्मित तत् मुख किं तथा सुसभृतरुषा सतर्ज्यमाना त्रस्ता सागरिका, बध्वा इत नीत वसन्तक अह चिन्तयामि किं, इति अहो ! सर्वाकारकृतव्यथः (अहं) क्षण अपि निर्वृति नो प्राप्नोमि । शार्दूलविक्रीडितम् ।

How do I forget the queen's face whose charming smile was robbed of by her great anger, and frightened Sāgarikā being threatened by her whose wrath is heightened so much, and Vasantaka tied up and led away ?
Alas ! pained by all the above signs I do not obtain satisfaction even for a moment

No use, therefore, staying here now Let me enter the inner palace to propitiate the queen alone

(Exeunt Omnes)

*Here ends Act III entitled 'Rendezvous'*

## ❀ चतुर्थोऽङ्कः ❀

(ततः प्रविशति रत्नमालामादाय सास्रा सुसङ्गता)

**सुसङ्गता** — (सकरुणं निःश्वस्य) हा प्रियसखि सागरिके, हा लज्जालुके, हा सखीगणवत्सले, हा उदारशीले, हा सौम्यदर्शने, कुत्र गतेदानीं त्वं मया प्रेक्षितव्याऽसि । (इति रोदिति । ऊर्ध्वमवलोक्य निःश्वस्य च) हंहो दैवहतक, अकरुण, असामान्यरूपशोभा तादृशी त्वया यदि निर्मिता तत्किमिति पुनरीदृशमवस्थान्तरं प्रापिता । इयं च रत्नमालापि जीवितनिराशया तया कस्यापि ब्राह्मणस्य हस्ते प्रतिपादयेति भणित्वा मम हस्ते समर्पिता । तद्यावत्कमपि ब्राह्मणमन्विष्यामि । (नेपथ्याभिमुखमवलोक्य) अये कथमेष खलु ब्राह्मणो वसन्तक इत एवागच्छति । तदेतां तावदेतस्मिन्नेव प्रतिपादयिष्यामि ।

1 रत्नमाला f string or necklace of jewels 2 सकरुणम् pathetically 3 लज्जालुक a (लज्जालुके voc s f) modest, bashful 4 गण multitude 5 वत्सल fond of affectionate 6 सखीगणवत्सले = सखीनां गणे वत्सला सा तत्सम्बोधनम् 7 उदार generous 8 शील disposition 9 उदारशीले = उदारं शीलं यस्याः सा तत्सम्बोधनम् 10 सौम्य blessed graceful 11 सौम्यदर्शन = सौम्यं दर्शनं यस्याः सा तत्सम्बोधनम् 12 रोदिति she cries, लट् √रुद् 2P 13 हंहो=हन्त अहो alas Hallo 14 हतक a (समासान्ते) vile wretched 15 असामान्य a unequalled 16 निर्मित built, created, pp निस् + √मा 2P 3 4A 17 अवस्थान्तरम् = अन्या अवस्थाम् 18 आशा f hope 19 जीवितनिराशया = जीविते निर्गता आशा यस्याः तया 20 प्रतिपादय offer thou ! लोट् णिजन्तात् प्रति + √पद् 4A

ACT — IV

(Then tearful Susangata appears, holding a jewel necklace)

Susangata — (pathetically sighing) Ah dear friend Sagarika, ah modest girl, *ah you who are affectionate towards all friends, ah generous hearted* one, ah beautiful looking one ! Where have you gone now ? Where must I see you ? (she weeps Looking overhead and sighing) Alas, cruel, wretched Fate ! Had you created her whose lovely form is unrivalled why should you again place her in another adverse state ? She whose hope in life is gone, placed this jewel necklace in my hand saying that I should offer it to any Brahmin So, now I shall *find* some Brahmin (looking at the curtain) Oh how Vasantaka, the Brahmin, is just coming hither ! Well, then, I will give it to him

(तत प्रविशति हृष्टो वसन्तक.)

वसन्तक:— ही ही भोः भोः । अद्य खलु प्रियवयस्येन प्रसादितया तत्रभवत्या वासवदत्तया बन्धनान्मोचयित्वा स्वहस्तदत्तैः मोदकलड्डुकैरुदरं मे सुपूरितं कृतम् । अन्यच्च । एतत् पट्टांशुकयुगलं कर्णाभरणं च दत्तम् । तद्यावदिदानीं प्रियवयस्यं प्रेक्षिष्ये ।

(इति परिक्रामति)

सुसङ्गता — (रुदती सहसोपसृत्य) आर्य वसन्तक, तिष्ठ तावत्त्वं मुहूर्तम् ।

वसन्तक:— (दृष्ट्वा) कथं सुसङ्गता । सुसङ्गते, अत्र किंनिमित्तं रुद्यते । न खलु सागरिकाया अत्याहितं किमपि संवृत्तम् ।

सुसङ्गता — एतदेव निवेदयितुकामा । सा खलु तपस्विनी देव्योज्जयिनीं नीतेति प्रवादं कृत्वोपस्थितेऽर्धरात्रे न ज्ञायते कुत्र नीतेति ।

1 तत्रभवती f. (तत्रभवत्या ins.s.) Her ladyship Her Majesty, etc. (By prefixing अत्र and तत्र to भवत् (m. भवान् f. भवती) a greater amount of respect is expressed. 2 मोचयित्वा having liberated ; caus PP.√मुच् 6U. 3 मोदकम् sweetmeat. 4 लड्डुकम् kind of sweetmeat 5 उदरम् belly 6 सुपूरित well-filled, PP. सु + √ पूर् 10 P. 7 अन्यत् च furthermore. 8 अंशुकम् silk garment. 9 आभरणम् ornament. 10 रुदत् (f. nom.s. रुदती) crying; Pres. Part √ रुद् 2P. 11 रुद्यते (भावे प्रयोग) it is wept (you weep.) √ रुद् 2P. 12 किंनिमित्तम् why ? 13 निमित्तम् reason, cause. 14 काम (f. कामा) + inf. म् of inf is dropped (तुमुन मकारलोप) desirous of. 15 प्रवादः rumour. 16 अर्धरात्र midnight 17 उज्जयिनी name of a town

(At the time gay Vasantaka appears.)

Vasantaka—Ha ha fine ! fine ! Today, indeed, my belly is well filled by pieces of sweetmeat given me from the hand of Vāsavadattā who liberated me from the prison, after being propitiated by my dear friend, and furthermore this pair of silk-garments and earring have been presented to me by her. So now I will have an audience with my fond friend.

(He walks round )

Susangatā—(weeping and at once approaching) Sir Vasantaka, wait a moment.

Vasantaka (looking) How, it is Susangatā ! O Susangatā, why are you crying here ? Has any calamity befallen Sāgarikā ?

Susangatā—I want to let you know about this. Making a rumour that the poor Sāgarikā was sent away to Ujjayinī the queen sent her away to where nobody knows when the midnight approached.

वसन्तकः— (सोद्वेगम्) हा भवति सागरिके, हा असामान्यरूपशोभे, हा मृदुभाषिणि, अतिनिर्घृणमिदानीं देव्या कृतम्। ततस्ततः।

सुसङ्गता— एषा रत्नमाला तया जीवितनिराशयार्यवसन्तकस्य हस्ते प्रतिपादयेत्युक्त्वा मम हस्ते समर्पिता। तन्ननु गृह्णात्वार्य एताम्।

वसन्तकः— (सास्रं सकरुणं कर्णौ पिधाय) भवति, न मे ईदृशे प्रस्ताव एतद्वोढुं हस्तः प्रसरति। (इत्युभौ रुदितः)

सुसङ्गता— (अञ्जलिं बद्ध्वा) तस्या एवानुग्रहं कुर्वन्नङ्गीकरोत्वेतदार्यः।

वसन्तकः— (विचिन्त्य) अथवा उपनय। येनैतयैव सागरिकाविरहकुण्ठितं प्रियवयस्यं विनोदयामि।

1 मृदुभाषिन् a (voc s f मृदुभाषिणि) soft-speaking 2 अतिनिर्घृण excessively cruel 3 अनुगृह्णातु let him accept, लोट् अनु + √ग्रह् 9U 4 पिधाय having covered; gerund अपि + √धा 3U (अ is dropped from अपि) 5 प्रस्ताव chance, time 6 एतत = रत्नमालारूपम् 7 वोढुम् to bear, to take, inf √वह् 1U 8 अनुग्रह acceptance, favour 9 तस्या = सागरिकाया 10 अङ्गीकरोतु let him or he must accept, लोट् अङ्गी + √कृ 8U. 11 एतया = रत्नमालया 12 कुण्ठित blunted, dulled, pp √कुण्ठ् 1P 13 विनोदयामि I comfort amuse, णिजन्तात्लट वि + √नुद 6U

Vasantaka — (sadly) Ah Lady Sāgarikā, ah possessor of unrivalled physical beauty, ah soft-spoken one! The queen did a very cruel thing Then, then?

Susangatā — She, who lost hope in life, placed this string of jewels in my hand, asking me to offer it to the hand of Vasantaka So please take it!

Vasantaka — (covering his ears compassionately in tears) Lady, on such an *occasion as this my hand does not move to take it* (Both weep)

Susangatā—(folding her hands) Doing a favour to her, pray accept this, Sir!

Vasantaka — (thinking) Then give me I shall console my dear friend, who is benumbed by his separation from Sagarikā, *by means of this* jewel-necklace

(सुसगता वसन्तकस्य हस्ते रत्नमाला ददाति)

वसन्तक :— (गृहीत्वा निरूप्य सविस्मयम्) भवति, कुतः पुनरीदृशस्यालंकारस्यागमः।

सुसङ्गता — आर्य, मयापि सा कौतूहलेन पृष्टाऽऽसीत्।

वसन्तक :— ततस्तया किं भणितम्।

सुसङ्गता — ततः सोर्ध्वं प्रेक्ष्य दीर्घं निःश्वस्य, सुसंगते, किमिदानीं तवानया कथयेति भणित्वा रोदितुं प्रवृत्ता।

वसन्तक :— ननु कथितमेव तया सामान्यजनदुर्लभेनानेन परिच्छदेन। सर्वथा महाभिजनसमुत्पन्नया तया भवितव्यम्। सुसंगते, प्रियवयस्य इदानीं कुत्र।

सुसङ्गता — आर्य, एष खलु भर्ता देवीभवनान्निष्क्रम्य स्फटिकशालामुपगतः। तद्गच्छत्वार्यः। अहमपि देव्या वासवदत्तायाः परिचारिणी भविष्यामि। (इति निष्क्रान्तौ) ॥ इति प्रवेशकः ॥

1 अलंकार decoration ornament 2 आगम coming, acquisition 3 सामान्यजन common or ordinary folk 4 परिच्छद personal belonging (here it is रत्नमाला) 5 अभिजन family noble descent 6 समुत्पन्न produced born, PP सम् + उद् + √पद् 4A 7 परिचारिन् a serving attending

(Susangata places the jewel string on Vasantaka's hand)

Vasantaka—Lady where did such an ornament as this come from ?

Susangatā—Sir, I too questioned her with a curiosity

Vasantaka—Then what did she say ?

Susangatā—Then looking overhead and sighing long, she said O Susangatā, why do you ask me such a question ?" and began to cry

Vasantaka—It is certainly indicated by her belonging (i e jewel string) that by all means she must be of a grand noble birth O Susangata, where is my dear friend now ?

Susangatā—Sir, coming out of the queen's inner palace His Majesty went to the Crystal Hall You may go there I will serve Queen Vasavadatta, too (Both move away)

(END OF PRELUDE)

(ततः प्रविशति आसनस्थो राजा)

**राजा** — (विचिन्त्य)

> सव्याजैः शपथैः प्रियेण वचसा चित्तानुवृत्त्याधिकं
> वैलक्ष्येण परेण पादपतनैर्वाक्यैः सखीनां मुहुः ।
> प्रत्यासत्तिमुपागता न हि तथा देवी रुदत्या यथा
> प्रक्षाल्येव तयैव बाष्पसलिलैः कोपोऽपनीतः स्वयम् ॥१॥

(सोत्कण्ठं निःश्वस्य) तावदिदानीं देव्यां प्रसादितायां सागरिकाचिन्तैव केवलं मां बाधते । कुतः

1 सव्याजैः = व्याजसहितैः a equivocal, with pretext 2 व्याज pretext 3 शपथ oath, curse 4 चित्तम् mind thought 5 अनुवृत्ति f. following, gratification. वैलक्ष्यम dejection, sorrow 7 पर a. highest. 8 पादपतनम् prostration, kneeling-down 9 वाक्यम् speech 10 प्रत्यासत्ति f close contact, calmness 11 प्रक्षाल्य having washed, gerund प्र + √क्षल् 10U. 12 तया = दे०्या 13 देव्या प्रसादितायाम् (loc abs ) although the queen was propitiated 14 चिन्ता f anxiety

सव्याजैं शपथैं प्रियेण वचसा अधिक चित्तानुवृत्त्या परेण वैंल्क्ष्येण पादपतनैं मुहु सखीना वाक्यैं तथा देवी प्रत्यासत्ति न हि उपागता यथा रुदत्या तया बाष्पसलिलैं एव प्रक्षाल्य इव स्वय कोप· अपनीत ॥ शार्दूलविक्रीडितम् ।

(Then appears the King seated)

King — (deeply reflecting)

The Queen did not get so tranquilized by equivocal oaths, by a fond word all the more by a gratification of mind, by profoundest dejection, by prostrations or again by her friends' persuations as by her weeping she removed her anger by herself just as washing it away with her tear water

(anxiously sighing) Although the Queen has been propitiated, my anxiety about Sāgarikā alone torments me For

अम्भोजगर्भसुकुमारतनुस्तदासौ
कण्ठग्रहे प्रथमरागघने विलीय ।
सद्यः पतन्मदनमार्गणरन्ध्रमार्गै-
र्मन्ये मम प्रियतमा हृदयं प्रविष्टा ॥ २॥

(विचिन्त्य) योऽपि मे विश्रामस्थानं वसन्तकः सोऽपि देव्या संयतः । तत्कस्याग्रतो वाष्पमोक्षं करिष्ये । (इति नि श्वसिति । तत प्रविशति वसन्तक·)

वसन्तक :— एष खलु प्रियवयस्यः निर्भरोत्कण्ठापरिक्षामामपि श्लाघनीयां तनुं समुद्वहन्नुदितो द्वितीयाचन्द्र इवाधिकतरं शोभते ।

1 अम्भोजम् lotus 2 गर्भ interior 3 तनु f body 4 अम्भोजगर्भसुकुमारतनु = अम्भोजस्य गर्भ इव सुकुमारा तनु यस्या सा 5 तदा ind at that time 6 असौ = सागरिका 7 कण्ठग्रह embrace of neck 8 घन close, firm 9 प्रथमरागघने = प्रथमेन रागेण घने 10 विलीय having melted, gerund वि + √ली 1 9P 4A 11 मार्गण arrow. 12 रन्ध्रम् hole 13 पतन्मदनमार्गणरन्ध्रमार्गै = पतन्त मदनस्य ये मार्गणा तेषा रन्ध्राणि तानि एव मार्गा तै 14 विश्राम· rest 15 संयत constrained, pp सम् + √यम् 1P 16 मोक्ष release 17 निर्भरोत्कण्ठा f ardent longing, excessive worry 18 परिक्षाम lean, emaciated 19 द्वितीया f second day of the lunar fortnight

अम्भोजगर्भसुकुमारतनु असौ प्रियतमा प्रथमरागघने कण्ठग्रहे तदा विलीय सद्य पतन्मदनमार्गणरन्ध्रमार्गै मम हृदय प्रविष्टा मन्ये ॥ वसन्ततिलकावृत्तम ।

My dearest one whose form is so tender as the interior of the lotus, melting away at that time when I embraced her neck closely on account of the first passion of love, entered into my heart through *the paths of holes made by the falling arrows of Cupid I believe*

(reflecting) Even Vasantaka who is the place of my re creation is constrained by the queen So now before whom shall I release my tears ? (he sighs ) (Then Vasantaka enters )

Vasantaka — Indeed here is my dear friend who appears very beautiful like the crescent moon, bearing a commendable body though emaciated due to excessive anxiety.

तद्यावदेनमुपसर्पामि । (उपसृत्य) स्वस्ति भवते । भोः, दिष्ट्या वर्धसे । देवीहस्तगतेनापि मया पुनरप्येतैरक्षिभिर्यद्दृष्टोऽसि ।

राजा — (परिष्वज्य) वेषेणैव निवेदितस्त्वया देव्याः प्रसादः । तत्कथ्यतामिदानीं सागरिकायाः का वार्तेति ।

वसन्तकः— (सवैलक्ष्यमधोमुखस्तिष्ठति)

राजा — वयस्य, किं न कथयसि ।

वसन्तकः— अप्रियमिति निवेदयितुं ते न पारयामि ।

राजा — (सोद्वेग ससभ्रमम्) वयस्य, कथमप्रियम् । किं व्यक्तमेवोत्सृष्टं जीवितं तया । हा प्रिये सागरिके ! (इति मोह नाटयति)

वसन्तकः— (ससभ्रमम्) समाश्वसितु समाश्वसितु प्रियवयस्यः ।

1 अक्षि n. eye. 2 यत् conj. that. 3 परिष्वज्य having embraced; gerund परि +√ स्वञ्ज् 1A. 4 वार्ता f. news. 5 अप्रिय inauspicious, unpleasant. 6 पारयामि I am able, √ पृ 10U. 7 व्यक्तम् clearly. 8 उत्सृष्ट given up; PP. उद् +√ सृज् 6P. 9 मोहः delusion, fainting.

Well, now I will approach him. (approaching) Hail to your Majesty ! Fortunately you prosper because with these eyes you are again seen by me, although I have fallen into the queen's hands.

King —(embracing) The queen's pardon is indicated by you with your attire alone. But tell me now what is Sāgarikā's news

Vasantaka—(sorrowfully stands, his face downcast.)

King —Friend, why do you not tell ?

Vasantaka—Since it is inauspicious I am not able to inform you.

King —(agitatedly in a haste) My companion, what inauspicious—? Did she really abandon her life ? Alas ! O loving Sāgarikā !

( thus he faints. )

Vasantaka—(hurriedly) Take heart, take heart, my dear pal !

राजा — (समाश्वस्य सास्रम्)

प्राणाः परित्यजत काममदक्षिणं मां
रे दक्षिणा भवत मद्वचनं शृणुध्वम् ।
शीघ्रं न यात यदि तन्मुषिताः स्थ मूढा
याता सुदूरमधुना गजगामिनी सा ॥ ३ ॥

वसन्तकः — भोः, मान्यथा संभावय । सा खलु तपस्विनी देव्योज्जयिनीं प्रेषितेति श्रूयते । अतो मयाऽप्रियमिति कृत्वा न भणितम् ।

राजा — कथमुज्जयिनीं प्रेषिता । अहो निरनुरोधा मयि देवी । वयस्य, केन तवैतदाख्यातम् ।

1 प्राण life breath 2 परित्यजत (you) abandon, लोट् √ परि + त्यज 1P 3 कामम् ind as much as desired at will 4 अदक्षिण silly, unfavourable, discourteous 5 दक्षिण courteous, favourable 6 भवत (you) be लोट् √ भू 1P 7 शृणुध्वम् (you) hear, लोट् √ श्रु 5P 8 यात (you) go लोट् √ या 2P 9 मुषित plundered, robbed deceived, PP √ मुष 4 9P 10 स्थ you are, लट् √ अस 2P 11 गजगामिनी = गज इव गच्छति सा, a woman walking in a dignified manner like an elephant does 12 निरनुरोध disregarding 13 आख्यात told, PP आ + √ ख्या 2P

रे प्राणाः ! अदक्षिणं मां कामं परित्यजत दक्षिणाः भवत, मद्वचनं शृणुध्वं यदि (यूयं) शीघ्रं न यात, तन्मुषिताः मूढाः स्थ सा गजगामिनी अधुना सुदूरं याता ॥ वसन्ततिलकावृत्तम् ।

King —(recovering with tears)
O life breaths, give me up at will silly as I am! Be favourable and listen to my word! Should you not depart quickly you will be fools deceived by her since she who had a dignified gait like an elephant is now gone fairly far away

Vasantaka—O pal do not misunderstand! It is heard that the poor girl was sent away by the queen to Ujjayini Hence, thinking it to be inauspicious I did not tell you

King —Sent to Ujjayini? Oh the queen ignores me! Friend who told you about this?

वसन्तक :— भोः, सुसंगतया। अन्यच्च। मम हस्ते तया केनापि कार्येणेयं रत्नमाला प्रेषिता।

राजा — किमपरं, मामाश्वासयितुम्। तद्वयस्य, उपनय।

(विदूषक उपनयति)

राजा — (गृहीत्वा रत्नमालां निर्वर्ण्य हृदये निधाय) अहह।

कण्ठाश्लेषं समासाद्य तस्याः प्रभ्रष्टयानया।
तुल्यावस्था सखीवेयं तनुराश्वास्यते मम ॥ ४ ॥

वयस्य, त्वं परिधत्स्वैनां येन वयमेनामपि तावद्दृष्ट्वा धृतिं करिष्यामः।

1 कार्यम् motive. 2 आश्वासयितुम् to cheer, comfort ; inf caus. आ + √श्वस् 2P. 3 कण्ठ-आश्लेष. embrace of neck. 4. समासाद्य having attained; caus. gerund सम् + आ √सद् 1P. 5 तस्या. = सागरिकाया. 6 प्रभ्रष्ट fallen off ; PP. प्र + √ भ्रश् 1A. 4P. 7 अनया = रत्नमालया. 8 तुल्य equal 9 तुल्यावस्था = तुल्या अवस्था यस्याः सा. 10 आश्वास्यते it is comforted ; णिजतात्कर्मणि लट् आ + √ श्वस् 2P. 11 परिधत्स्व wear thou ! लोट् परि + धा 3U. 12 धृतिः f. firmness, fortitude.

कण्ठाश्लेषं समासाद्य तस्याः प्रभ्रष्टया अनया तुल्यावस्था सखी इव इयं मम तनुः आश्वास्यते ॥

वृत्तमनुष्टुप्।

Vasantaka—O friend, Susanggatā told me so. And morever for some reason she sent to my hand this jewel-necklace.

King —No other reason, but to comfort me. O friend, bring it to me!

(The jester brings)

King —(accepting, examining and placing the jewel-necklace on his bosom) Oh oh oh!

Like a friend in the same fate this my body is comforted by this dropped off from her after attaining the embrace of her neck.

O my companion, you wear this so that I might gain strength by beholding this

वसन्तक :— भोः, यद्भवानाज्ञापयति । (इति कण्ठे परिदधाति)

राजा — (सास्रं निःश्वस्य) वयस्य, दुर्लभं पुनर्दर्शनं प्रियायाः ।

वसन्तक :— (सभयं दिशोऽवलोक्य) भोः, मैवमत्रोच्चैर्मन्त्रय । कदापि केचिदत्र संचरन्ति । (ततः प्रविशति वेत्रहस्ता वसुंधरा)

वसुंधरा — (उपसृत्य) जयतु जयतु भर्ता । भर्तः, एष खलु रुमण्वतो भागिनेयो विजयवर्मा प्रियमिव किमपि निवेदितुकामो द्वारि तिष्ठति ।

राजा — वसुंधरे, अविलम्बितं प्रवेशय ।

वसुंधरा — यद्देव आज्ञापयति । (निष्क्रम्य विजयवर्मणा सह पुनः प्रविश्य च) विजयवर्मन्, एष खलु भर्ता । उपसर्पतु आर्यः ।

1 कदापि at any time. 2 केचित् (m. p.) someones. 3 वेत्रः staff. 4 भागिनेयः sister's son 5 द्वार् f. (loc s द्वारि) door, gate 6 अविलम्बितम् ad. without delay. 7 प्रवेशय admit thou! णिजन्तात्लोट् प्र + √ विश् 6P.

Vasantaka—Yes, I will do so. (he places it round his neck)

King —(tearfully sighing) Friend, it is difficult to see my sweetheart again.

Vasantaka—(fearfully looking round) Friend, speak not aloud in this manner. At any moment any people will be roaming about here. (Then enters Vasundharā with her staff in her hand)

Vasundharā—(advancing) May Your Majesty be victorious! Sire! There stands Vijayavarmā, son of Rumanvān's sister, at the door, desirous to communicate something auspicious

King —O Vasundharā, at once admit him!

Vasundharā—As my lord commands. (moving out and re-entering with Vijayavarmā) Vijayavarmā, this is His Majesty. Approach him, sir!

विजयवर्मा — (उपसृत्य) जयतु जयतु देवः । देव, दिष्ट्या वर्धसे रुमण्वतो विजयेन ।

राजा — साधु रुमण्वन्, साधु । अचिरान्महत्प्रयोजनमनुष्ठितम् । विजयवर्मन्, इत आस्यताम् । (विजयवर्मा उपविशति)

राजा — (सपरितोषम्) विजयवर्मन्, अपि जितः कोसलेश्वरः ।

विजयवर्मा — देवस्य प्रभावेण ।

राजा — विजयवर्मन्, तत्कथय कथामतिविस्तरतः श्रोतुमिच्छामि ।

विजयवर्मा — देव, श्रूयताम् । इतो देवादेशात्कतिपयैरेवाहोभिरनेककरितुरगपत्तिदुर्निवारेण महता बलसमूहेन गत्वा

1 विजयः victory, conquest. 2 अचिरात् soon. 3 प्रयोजनम् enterprise, mission 4 अनुष्ठित performed, PP अनु + √स्था 1P. 5. कोसल the name of a country, 6 ईश्वरः king. 7 प्रभावः might, magnanimity. 8 अतिविस्तरतस् ind entirely. 9 आदेशः command. 10 कतिपय some. 11 अहस् n. (ins. p. अहोभि) day. 12 अनेक not one, many. 13 करिन् m. elephant. 14 तुरगः horse. 15 पत्ति f. infantry. 16 दुर्निवार irresistible. 17 अनेककरितुरगपत्तिदुर्निवारेण = अनेके करिणः तुरगाः पत्तय तैः दुर्निवारेण 18 बलम् army, power. 19 समूहः multitude.

Vijayavarmā—(approaching) May Your Majesty be victorious! Felicitations upon your prosperity through Rumanvān's conquest!

King —Very good, Rumanvān, very good! Soon a grand enterprise has been realized. O Vijayavarmā, be seated here (Vijayavarmā sits down)

King —(with satisfaction) Vijayavarmā, has the ruler of Kosala been defeated?

Vijayavarmā—By Your Majesty's might.

King —Vijayavarmā, tell me I want to hear everything about it.

Vijayavarmā—Sire! Pray listen. By Your Majesty's command within several days departing from here with huge armies irresistible on account of large numbers of elephants, cavalries and infantries,

विन्ध्यदुर्गावस्थितस्य कोसलनृपतेर्द्वारमवष्टभ्य सेनाः समावासयितुं समारब्धवान् ।

राजा — ततस्ततः ।

विजयवर्मा — ततः कोसलेश्वरोऽप्यतिदर्पात्परिभवमसहमानो हास्तिकप्रायमशेषमात्मसैन्यं सज्जीकृतवान् ।

वसन्तक :— भोः । लघ्वाचक्ष्व । वेपते मे हृदयम् ।

राजा — ततस्ततः ।

विजयवर्मा — देव, कृतनिश्चयश्चासौ

1 विन्ध्य the name of a mountain range. 2. नृपति (gen. s नृपतेः) king. 3 अवष्टभ्य *having blocked, overpowered ; अव +√स्तम्भ् 1A 4.9P* 4 सेना f. (P. सेना) army. 5 समावासयितुम् to encamp, lodge, to kill ; inf. समा + √ वस् 10U. & caus 6 समारब्धवत् (m. s. समारब्धवान्) he began ; Past. Part. act. समा +√रभ् 1A 7 अतिदर्पः excessive arrogance, pride. 8 परिभव insult, defeat. 9 असहमान not tolerating 10 हास्तिक elephant-soldier, rider. 11 प्राय. (समासान्ते) majority, larger part. 12 सैन्य army. 13 सज्जीकृतवत् (m nom. s सज्जीकृतवान्) being ready, fortifying ; Past. Part. act, सज्जी +√कृ 8U. 14 आचक्ष्व speak thou ! आ + √चक्ष् 2A. 15 निश्चयः conviction, resolution. 16 कृतनिश्चयः = कृत. निश्चय येत स. 17 असौ = कोसलेश्वरः

and blocking the passage of the king of Kosala who established himself in the castle on the Vindhya mountain, he (Rumanvān) began to encamp his troops.

King —Then, then ?

Vijayavarma—Then, out of his excessive pride the king of Kosala, unwilling to be defeated, prepared his whole army mostly of elephant-soldiers.

Vasantaka—Hallo, speak out quickly ! My heart trembles.

King —Then, then ?

Vijayavarmā—Sire ! Making up his mind,

योद्धुं निर्गत्य विन्ध्यादभवदभिमुखस्तत्क्षणं दिग्विभागा-
न्विन्ध्येनेवापरेण द्विरदपतिघटापीडबन्धेन रुन्धन् ।
वेगाद्बाणान्विमुञ्चन्समदगजघटोत्पिष्टपत्तिर्निपत्य
प्रत्यैच्छद्वाञ्छिताप्तिद्विगुणितरभसस्तं रुमण्वान्क्षणेन ॥ ५ ॥

1 योद्धुम् to fight ; inf. √युध् 4A. 2 अभवत् he was ; लङ् √ भू 1P. 3 अभिमुख a. facing. 4 तत्क्षणम् ad. at the moment. 5 दिग्विभाग: quarter. 6 अपर a. another. 7 द्विरद: elephant. 8 पति: m. lord. 9 द्विरदपति: big elephant, lord of elephants. 10 घटा f. troop, assemblage. 11 आपीड a. compact, compressing. 12 बन्ध: *tie*, position, *array*. 13 द्विरदपतिघटापीडबन्धेन = द्विरदपतीना घटा: एव आपीडबन्ध: तेन. 14 रुन्धत् (nom. s. m रुन्धन्) obstructing, blocking ; Pres. Part. √रुधं 7U. 15 वेगात् rapidly, speedily. 15 समद–गज: rutting elephant. 17 उत्पिष्ट crushed, pounded ; PP. उद् + √पिष् 7P. 18 पत्ति: m. foot-soldier. 19 समदगजघटोत्पिष्टपत्ति: = समदगजानां घटाभि: उत्पिष्टा: पत्तय यस्य स: 20 प्रत्यैच्छत् *he encountered, selected* ; लङ्. प्रति + √इष् 6P. 21 वाञ्छित desired, longed for ; PP. ∠वाञ्छ् 1P. 22 आप्ति: f. getting, encounter. 23 द्विगुणित a. doubled. 24 रभस: force, violence. 25 तम् = कोसलेश्वरम्. 26 वाञ्छिताप्तिद्विगुणितरभस: = वाञ्छितस्य तस्य कोसलेश्वरस्य आप्त्या द्विगुणित: रभस: यस्य स: 27 क्षणेन ad. *in a moment.*

योद्धुं विन्ध्यात् निर्गत्य अपरेण विन्ध्येन इव द्विरदपतिघटापीडबन्धेन दिग्विभागान् तत्क्षणं रुन्धन् अभिमुखः अभवत्, क्षणेन वेगात् बाणान् विमुञ्चन् समदगजघटोत्पिष्टपत्ति. वाञ्छिताप्तिद्विगुणितरभसः रुमण्वान् त निपत्य प्रत्यैच्छत् ॥ स्रग्धरा।

For a battle coming out of the Vindhya and obstructing all the quarters with compact array of troops of huge elephants as with another Vindhya mountain, faced us at the moment : In a moment speedily shooting arrows, Rumaṇvān, with his infantry-men crushed by the troops of rutting elephants and his valour redoubled by his longed-for encounter, challenged *him, falling* upon *him.*

अपि च ।

अस्त्रव्यस्तशिरस्त्रशस्त्रकषणैः कृत्तोत्तमाङ्गे क्षणं
व्यूढासृक्सरिति स्वनत्प्रहरणे वर्मोद्वमद्वह्निनि ।
आहूयाजिमुखे स कोसलपतिर्भग्ने प्रधाने बले *

राजा — कथमस्मदीयान्यपि बलानि भग्नानि ।

विजयवर्मा — एकेनैव रुमण्वता शरशतैर्मत्तद्विपस्थो हतः ॥ ६ ॥ *

वसन्तकः— जयतु जयतु भवान् । जितमस्माभिः । (इति नृत्यति)

1 अस्त्रम् weapon, arrow. 2 व्यस्त thrown off, PP. वि + √अस् 4P. 3 शिरस्त्रम् helmet 4 शस्त्रम् weapon 5 कषण rubbing, stroke. 6 अस्त्रव्यस्तशिरस्त्रशस्त्रकषणैः = अस्त्रैः व्यस्तानि शिरस्त्राणि तैः शस्त्राणां कषणैः 7 कृत्त cut; PP. √कृत् 6P. 8 उत्तमाङ्गम् upper body, head 9 कृत्तोत्तमाङ्गे = कृत्तानि उत्तमाङ्गानि यस्मिन् तस्मिन्. 10 व्यूढ arranged, PP. वि + √वह् 1A. 11 असृक् n (असृज्) blood 12 सरित् f (loc s सरिति) stream 13 व्यूढासृक्सरिति = व्यूढा असृजः सरित् यस्मिन् तस्मिन् 14 स्वनत् sounding; Pres Part √स्वन् 1P. 15 प्रहरणम् strokes, weapon 16 वर्मन् n. armour 17 उद्वमत् = बहिर्गच्छन् coming out 18 वह्निः m fire. 19 वर्मोद्वमद्वह्निनि = वर्मभ्यः उद्वमन् वह्निः यस्मिन् तस्मिन् 20 आजि m. f battle. 21 मुखम opening. 22 आहूय having called, gerund आ + √ह्वे to call (1P), to challenge (1A.) 23 प्रधान principal 24 बलम् force 25 प्रधाने बले भग्ने (loc) when his principal troop was routed 26 भग्न broken, routed, defeated, PP. √भञ्ज् 7P.

प्रधाने बले भग्ने क्षणं अस्त्रव्यस्तशिरस्त्रशस्त्रकषणे कृत्तोत्तमाङ्गे व्यूढासृक्सरिति स्वनत्प्रहरणे वर्मोद्वमद्वह्निनि आजिमुखे स कोसलपतिं आहूय एकेन एव रुमण्वता शरशतैः मत्तद्विपस्थः हतः ॥ शार्दूलविक्रीडितम् ।

And, When the principal force was routed at the opening battle, in which helmets were overturned by arrows, heads cut off by the strokes of arms, a stream of blood was created, weapons clanged, and flames shooting out of armours challenging the lord of Kosala,*

King —How, even our troops were routed ?

Vijayavarmā—Rumanwān, single-handed, killed him mounted* on a rutting elephant with hundreds of arrows

Vasantaka—Victory to your Majesty ! We have won !

(He dances)

राजा — साधु कोसलपते, साधु। मृत्युरपि ते श्लाघ्यः। यस्य हि रिपवोऽपि पुरुषकारमेवं वर्णयन्ति। ततस्ततः।

विजयवर्मा — देव, ततो रुमण्वानपि कोसलेषु मद्भ्रातरं ज्यायांसं जयवर्माणं स्थापयित्वा प्रहारव्रणितहास्तिकप्रायमशेषसैन्यमनुवर्तमानः शनैःशनैरागच्छत्येव।

राजा—वसुंधरे, उच्यतां यौगन्धरायणः प्रदर्श्यतां मत्प्रसादस्य विभव इति।

वसुंधरा — यद्देव आज्ञापयति। (इति विजयवर्मणा सह निष्क्रान्ता)

(ततः प्रविशति काञ्चनमाला)

काञ्चनमाला — आज्ञप्तास्मि देव्या। यथा गच्छ हञ्जे काञ्चनमाले, इममैन्द्रजालिकमार्यपुत्रस्य दर्शय। (इति परिक्रम्यावलोक्य च) एष खलु भर्ता। तद्यावदेनमुपसर्पामि। (उपसृत्य)

1. मृत्यु: m death 2 श्लाघ्य commendable 3 यस्य = कोसलपतेः. 4 रिपु m enemy 5 पुरुषकार manliness, prowess 6 प्रहारः stroke of weapon 7 व्रणित wounded; PP √व्रण् 10U 8 अनुवर्तमान following, अनु + √वृत् 1A 9 विभव wealth, power 10 आज्ञप्त ordered, PP caus आ + √ज्ञा 9U 11 ज्यायस् older elder (acc s m ज्यायांसम्)

King —Very fine O master of Kosala, fine! Even your death is commendable, for even your enemies praise your prowess. Then then?

Vijayavarmā—Sire! Then placing my elder brother Jayavarmā in Kosala, Rumanvān is now coming back slowly, following after the remaining army mostly consisting of war wounded elephant-riders.

King —Vasundharā tell Yaugandharāyana to show him the glory of my favour

Vasundharā—As your Majesty commands (exit with Vijayavarmā) (Then enters Kānchanamālā)

Kānchanamāla—I am commanded by the queen thus, 'Go, O maid Kānchanamāla, and present to my husband this Indrajālika!" (walking round and looking) O there is the king. Now let me approach him. (approaching).

जयतु जयतु भर्ता । भर्तः देवी विज्ञापयति । एष खलूज्जयिनीतः संवरणसिद्धिनामेन्द्रजालिक आगतः । तत्प्रेक्षतु भर्ता ।

राजा — अस्ति नः कौतुकमिन्द्रजालिके । ततः शीघ्रं प्रवेशय ।

काञ्चनमाला — यद्भर्ताज्ञापयति । (इति निष्क्रम्य पिच्छिकाहस्तेनेन्द्रजालिकेन सह प्रविशति)

भर्तः, एष इन्द्रजालिकः ।

इन्द्रजालिक :— (उपसृत्य) जयतु जयतु महाराजः । (पिच्छिका भ्रामयित्वा बहुधा हास्यं कृत्वा)

प्रणमत चरणे इन्द्रस्येन्द्रजालिकपिनद्धनाम्नः ।
तथैवापि शम्बरस्य सुपरिस्थितयशसः ॥७॥

1 इन्द्रजालिक. juggler, magician 2. पिच्छिका f. a bundle of peacock's tail, feather-brush 3 भ्रामयित्वा having waved; caus. gerund √भ्रम् 1.4P. 4 बहुधा ad. very much, in many ways. 5 हास्यम् laughter. 6 प्रणमत लोट् 2nd P प्र + √नम् 1U. 7 पिनद्ध bound, arranged; PP. अपि, पि + √ नह् 4U 8 इन्द्रजालिकपिनद्धनाम्न· = इन्द्रजालिक· इति पिनद्ध नाम यस्य तस्य. 9 शम्बर a. excellent, m. demon. 10 यशस् n. fame. 11 सुपरिस्थितयशसः = सुपरिस्थित यशः यस्य तस्य.

इन्द्रजालिकपिनद्धनाम्न तथा एव अपि सुपरिस्थितयशस· शम्बरस्य इन्द्रस्य चरणे प्रणमत ॥

May Your Majesty be victorious! Sire, Her Majesty cordially informs that a juggler named Samvaranasiddhi who hails from Ujjayinī has come May Your Majesty see him.

King —I am interested in a juggler. Then quickly admit him!

Kānchanamālā—Yes, I will do so (After moving out re-enters with the juggler, a bundle of peacock's tails in his hand.) This is the juggler, Sire!

Juggler—(approaching) Victory to the great king! (waving the feather-bundle and causing laughter very much)

Bow down to the feet of this demon who goes by the name of magician, and whose reputation is also well established!

महाराज कौशांबीपते, कि बहुना ।

किं धरण्यां मृगाङ्क आकाशे महीधरो जले ज्वलनः ।
मध्याह्ने प्रदोषो दर्शयामि देह्याज्ञप्तिम् ॥ ८ ॥

वसन्तक :— भो वयस्य, अवहितो भव । ईदृशोऽस्यावष्टम्भो येन सर्वमपि सम्भाव्यते ।

इन्द्रजालिक :— देव,

किं जल्पितेन बहुना यद्यद्धृदये समीहितं द्रष्टुम् ।
तत्तद्दर्शयाम्यहं गुरोर्मन्त्रप्रभावेण ॥ ९ ॥

धरणी f (loc s धरण्याम्) earth 2 मृगाङ्क = मृग अङ्क यस्य स चन्द्र moon 3 महीधर mountain 4 ज्वलन fire 5 मध्याह्ने = अह्न मध्य इति मध्याह्न तस्मिन in daytime 6 प्रदोष nightfall 7 देहि give thou ! लोट् √ दा 3U 8 आज्ञप्ति f command 9 अवहित attentive 10 अवष्टम्भ boldness 11 यस्य = इन्द्रजालिकस्य 12 जल्पितम् talk (from √ जल्प 1P) 13 यत् यत् तत whatever 14 मन्त्रप्रभाव spell-power

धरण्या मृगाङ्क आकाशे महीधर जले ज्वलन मध्याह्ने प्रदोष दर्शयामि किम् ? आज्ञप्ति देहि ॥
किं बहुना जल्पितेन ? यत यत् हृदये समीहित द्रष्टु तत् तत अह गुरो मन्त्रप्रभावेण दर्शयामि ॥

O king, O ruler of Kaūshambi, what more ?
Shall I show you the moon on the earth, a mountain in the space, fire in the water, and a nightfall in daytime ? Give me a command !

Vasantaka—Hello friend, be attentive ! He has such a boastful boldness So everything is even possible

Juggler—Your Majesty
What is the use of talking too much ? Whatever you desire to see in your heart I will display it by the spell power of my preceptor

राजा — भद्र, तिष्ठ तावत्। काञ्चनमाले, उच्यतां देवी। युष्मदीय एवायमिन्द्रजालिकः। विजनीकृतश्चायमुद्देशः। तदागच्छ। सहितावेव पश्यावः।

काञ्चनमाला — यद्भर्ताऽऽज्ञापयति (इति निष्क्रम्य वासवदत्तया सह प्रविशति)

वासवदत्ता — काञ्चनमाले, उज्जयिनीत आगत इत्यस्ति मे तस्मिन्नैन्द्रजालिके पक्षपातः।

काञ्चनमाला — नाभिकुलबहुमानः खलु एष देव्याः। तदेतु एतु भट्टिनी। (इति परिक्रामतः)

काञ्चनमाला — भट्टिनि, एष भर्ता। तदुपसर्पतु देवी।

वासवदत्ता — (उपसृत्य) जयत्वार्यपुत्रः।

राजा — देवि, बहुतरमनेन गर्जितम्। तदिहस्थावेव पश्यावस्तावत्।

1 भद्र a (voc.s) good 2 युष्मदीय a your, yours 3 विजन a lonely, solitary 4 विजनीकृत rendered solitary 5 उद्देश spot 6 पक्षपात partiality, affection 7 नाभि m f navel, home 8 नाभिकुल native home or family 9 बहुतर very much 10 गर्जित roared, thundered (i e talked), PP √गर्ज् 1P 10U

King—O good man, wait for a moment O Kānchanamala, communicate to the queen as follows,—'Here is your magician And this spot is rendered solitary, so do come! Let us observe (his magic) together"

Kānchanamalā—As your Majesty commands (Having moved out re-enters with Vasavadattā)

Vasavadatta—O Kānchanamāla I feel partiality for the juggler since he has come from Ujjayini

Kanchanamalā—Indeed, it is Your Majesty's high consideration for her native home So may the queen come this way! (Both walk round)

Kānchanamala—O queen, here is His Majesty May your Majesty approach him!

Vāsavadattā—(advancing) Victory to my husband!

King —O my consort he has boasted too much So we will appreciate it, seated together here

(वासवदत्तोपविशति ।)

राजा — भद्र, प्रस्तूयतां बहुविधमिन्द्रजालम् ।

इन्द्रजालिक :— यद्देव आज्ञापयति । (बहुविधं नाट्यं कृत्वा पिच्छिकां भ्रामयन्)

हरिहरब्रह्मप्रमुखान्देवान्दर्शयामि देवराजं च ।
गगनेऽपि सिद्धविद्याधरवधूसार्थं च नृत्यन्तम् ॥ १० ॥

(सर्वे सविस्मयं पश्यन्ति)

राजा — (ऊर्ध्वं दृष्ट्वासनादवतरन्) आश्चर्यमाश्चर्यम् ।

वसन्तक :— आश्चर्यम्, आश्चर्यम् ।

राजा — देवि, पश्य ।

1 प्रस्तूयताम् it must be begun or praised; कर्मणि लोट् प्र + √ स्तु 2U. 2 बहुविध various. 3 इन्द्रजालम् jugglery, magic. 4 नाट्यम् gesticulation, act. 5 हरिः m. = विष्णु. 6 हर. = रुद्र. 7 ब्रह्मन् m. (nom s. ब्रह्मा) creator. 8 प्रमुख a. (acc.p. प्रमुखान्) facing, headed by. 9 देव god. 10 देवराजः = देवाना राजा Indra 11 गगनम् heaven 12 सिद्ध and विद्याधरः a kind of demi-god 13 वधू f. wife 14 सार्थ. herd, crowd, troop. 15 सिद्धविद्याधरवधूसार्थम् = सिद्धाः विद्याधरा. तेषा वध्व तासा सार्थः तम्

हरिहरब्रह्मप्रमुखान् देवान् देवराज च गगने नृत्यन्त सिद्धविद्याधरवधूसार्थं च अपि दर्शयामि ॥

(Vāsavadattā sits down.)

King —O good man, commence your magic in various forms.

Juggler —As my lord commands (making various gesticulations and waving the feather-bundle)
I show you the gods headed by Viṣṇu, Rudra and Brahmā, and Indra and the troop of the wives of Siddhas and Vidyādharas dancing in the heaven.

(All behold wonder-stricken.)

King —(looking overhead and stepping down from his seat.)
Marvellous, marvellous !

Vasantaka—Marvellous, marvellous !

King —O Queen, see !

एष ब्रह्मा सरोजे रजनिकरकलाशेखरः शंकरोऽयं
दोर्भिर्दैत्यान्तकोऽसौ सधनुरसिगदाचक्रचिन्हैश्चतुर्भिः ।
एषोऽप्यैरावतस्थस्त्रिदशपतिरमी देवि देवास्तथान्ये
नृत्यन्ति व्योम्नि चैताश्चलचरणरणन्नूपुरा दिव्यनार्यः ॥ ११ ॥

वासवदत्ता — आश्चर्यम्, आश्चर्यम् ।

वसन्तकः— (अपवाय) आः दास्याःपुत्र इन्द्रजालिक, किमेतैर्देवैरप्सरोभिश्च दर्शितैः । यदि ते अनेन परितुष्टेन कार्यं तद्दर्शय सागरिकाम् ।

1 सरोजम् lotus 2 रजनिकर moon 3 कला f digit, small part 4 शेखर crest 5 रजनिकरकलाशेखर = रजनिकरस्य कला एव शेखर यस्य स 6 शंकर = शिव 7 दोस् m n (ins p दोर्भि) arm 8 दैत्य demon 9 अन्तक a destroying, killing 10 दैत्यान्तक = दैत्यानां अन्तक (विष्णु) 11 धनुस् n bow 12 असि m sword 13 गदा f thunderbolt 14 चिह्नम् mark 15 सधनुरसिगदाचक्रचिह्नैं = धनु असि गदा चक्र तानि एव चिह्नानि तै सहिता तै (दोर्भि) 16 ऐरावत name of Indra's elephant 17 त्रिदशपति = इन्द्र 18 व्योमन् n (loc s व्योम्नि) sky 19 नूपुर m n anklet 20 चलचरणरणन्नूपुरा = चला य चरणा तेषु रणन्त नूपुरा यासा ता 21 दिव्यनारी f (nom p — नार्यं) heavenly woman, nymph 22 अप्सरस् f nymph

देवि ! एष सरोजे ब्रह्मा, अयं रजनिकरकलाशेखर शङ्कर, सधनुरसिगदाचक्रचिह्नैं चतुर्भि दोर्भि असौ दैत्यान्तक, एष अपि ऐरावतस्थ त्रिदशपति, तथा अमी अन्य देवा, व्योम्नि च एता चलचरणरणन्नूपुरा दिव्यनार्य नृत्यन्ति ॥ स्रग्धरा ।

O queen, here appears Brahmā on a lotus, this is Shiva bearing the crescent moon's digit upon his crest, that is Visnu the destroyer of demons with his four arms, each holding a bow a sword thunderbolt and chakra, here too, appears Indra seated on his elephant Airāvata, and there are many other gods, and in the heaven the nymphs are dancing, their anklets jingling on the moving feet

Vasavadattā—Marvellous, marvellous !

Vasantaka—Ah magician, son of a slave-girl, why do you only show these gods and nymphs ?
If you want your price from this satisfied King, do show Sāgarikā !

(तत प्रविशति वसुंधरा)

वसुंधरा — (राजानमुपसृत्य) जयतु जयतु भर्ता। अमात्ययौगंधरायणो देवस्य चरणयुगल इदं विज्ञापयति। एष खलु विक्रमबाहुना प्रधानामात्यो वसुभूतिः कंचुकिना सहानुप्रेषितः। तदेनमर्हसि देवः अस्मिन्नेव सुमुहूर्ते प्रेक्षितुम्। अहमपि कार्यशेषं समाप्यागत एव।

वासवदत्ता — आर्यपुत्र, तिष्ठतु तावदिन्द्रजालम्। मातुलकुलादार्योऽमात्य-प्रधानो वसुभूतिरागतः। तदेनं तावत् प्रेक्षतामार्यपुत्रः।

राजा — यथाह देवी। (इन्द्रजालिक प्रति) भद्र, विश्राम्यतामिदानीम्।

1 चरणयुगले = चरणयो युगले 2 विक्रमबाहु = सिंहलेश्वर 3 प्रधान-अमात्य Prime Minister 4 कंचुकिन m chamberlain 5 कार्यशेष rest of mission 6 समाप्य having completed, gerund सम + √आप 5P 7 मातुल maternal uncle 8 प्रेक्षताम let him or he must see, लोट प्र + √ईक्ष 1A 9 आह she said, लिट √ब्रू 2U 10 विश्राम्यताम it must be rested stopped, कर्माण लोट वि + √श्रम 4P

(At that time enters Vasundhara)

Vasundhara—(advancing towards the king) Victory to Your Majesty ! The minister, Yaugandharayana respectfully submits this to Your Majesty's royal feet,— Really, King Vikramabahu has dispatched (to you) his Prime Minister Vasubhuti along with your chamberlain On this fine occasion may Your Majesty be pleased to receive him in audience *After completing my remaining duty I will also come*"

Vasavadatta—My lord, now do stop the magic

The Prime Minister, Sir Vasubhuti has come from my maternal uncle's family So now may my husband see him !

King —As you say (to the magician) Good man rest now !

इन्द्रजालिक :— (पुन पिच्छिका भ्रामयति) यद्देव आज्ञापयति । एकः पुनर्मम खेलोऽवश्यं देवेन प्रेक्षितव्यः । (निष्क्रामति)

राजा — भद्र, एवं द्रक्ष्यामः ।

वासवदत्ता — काञ्चनमाले, गच्छ त्वं देह्यस्य पारितोषिकम् ।

काञ्चनमाला — यद्देव्याज्ञापयति । (इन्द्रजालिकेन सह निष्क्रान्ता)

राजा — वसन्तक, प्रत्युद्गम्य प्रवेश्यतां वसुभूतिः ।

वसन्तक :— यद्भर्ताऽऽज्ञापयति । (इति निष्क्रान्त )

(तत. प्रविशति वसन्तकेन प्रत्युद्गम्यमानो वसुभूतिर्बाभ्रव्यश्च)

वसुभूति :— (समन्तादवलोक्य) अहो वत्सेश्वरस्यानुभावः । तथा हि

1 खेल. play. 2 अवश्यम् inevitably. 3 प्रेक्षितव्य it ought to be seen, Pot. PP प्र + √ईक्ष 1A. 4 द्रक्ष्याम we will see; लृट् √दृश् 1P. 5 अस्य = अस्मै 6 पारितोषिकम् reward, gift. 7 प्रत्युद्गम्य having advanced as a mark of respect; gerund प्रत्युद् + √गम् 1P. 8 प्रवेश्यताम् he must be made to enter; णिजन्तात्कर्मणि लोट् प्र + √विश् 6P. 9 अनुभाव splendour, dignity

Juggler—(again waving the feather-bundle) As Your Majesty commands. But Your Majesty ought to see my another play (moves out)

King —O good man, we will see it

Vāsavadattā—O Kānchanamālā, go and give him a reward !

Kānchanamālā—As Your Majesty the Queen commands me

(moves out with the juggler )

King —Vasantaka, respectfully advancing, do you lead Vasubhūti in !

Vasantaka—Yes, I will do so, Sire ! (Exit)

(Then being respectfully escorted by Vasantaka Vasubhūti and Bābhravya enter )

Vasubhūti—(looking around) O splendour of the lord of Vatsa ! For ;

आक्षिप्तो जयकुञ्जरेण तुरगान्निर्वर्णयन्वल्लभा-
न्संगीतध्वनिना हृतः क्षितिभृतां गोष्ठीषु तिष्ठन्क्षणम् ।
सद्योविस्मृतसिंहलेशविभवः कक्ष्याप्रदेशेऽप्यहो
द्वाःस्थेनैव कुतूहलेन महता ग्राम्यो यथाऽहं कृतः ॥१२॥

बाभ्रव्यः :— वसुभूते, अद्य खलु चिरात्स्वामिनं द्रक्ष्यामीति यत् सत्य-
मानन्दातिशयेन किमप्यवस्थान्तरमनुभवामि । कुतः

1 आक्षिप्त repulsed, attracted , PP आ + √क्षिप् 6U 2 जयकुञ्जर victorious elephant 3 तुरग horse 4 वल्लभ dear, favour 5 ध्वनि m sound. 6 क्षितिभृत् m king 7 गोष्ठि, गोष्ठी f assembly, society. 8 सद्यस instantly 9 विस्मृत *forgotton*, PP वि + √स्मृ 1P 10 ईश *lord king* 11 विभव *wealth, power* 12 विस्मृतसिंहलेशविभव = विस्मृत सिंहलस्य ईशस्य विभव येन स 13 कक्ष्या f inner apartment of a palace 14 प्रदेश place, spot. 15 कुतूहलम् *curiosity, object of interest* 16 ग्राम्य rustic, vulgar 17 चिरात् ad after a long time 18 स्वामिन् m (acc s स्वामिनम्) *lord* 19 अवस्थान्तरम = अवस्था अन्या another *situation, condition*

वल्लभान् तुरगान् निर्वर्णयन् जयकुञ्जरेण आक्षिप्त क्षितिभृता गोष्ठीषु क्षण तिष्ठन् संगीतध्वनिना हृत अहो कक्ष्याप्रदेशे अपि सद्य विस्मृतसिंहलेशविभव अहं द्वा स्थेन महता कुतूहलेन एव यथा ग्राम्य कृत ॥ शार्दूलविक्रीडितम् ।

While appreciating the favoured steeds I am attracted by the elephant of victory, while standing in a moment in the assembly halls of the kings I am carried away by the cadence of music, and at one spot of the palace apartment, instantly forgetting the glory of the lord of Sinhala I am, alas ! rendered rustic by the great object of curiosity on the door

Bābhravya—Vasubhūti, today as I will be seeing my lord after a long time somehow I do feel another state of mind truly on account of overwhelming joy

विवृद्धिं कम्पस्य प्रथयतितरां साध्वसवशा-
दविस्पष्टां दृष्टिं तिरयति पुनर्बाष्पसलिलैः ।
स्खलद्वर्णां वाणीं जडयतितरां गद्गदतया
जरायाः साहाय्यं मम हि परितोषोऽद्य कुरुते ॥ १३ ॥

वसन्तकः— (अग्रे भूत्वा) एतु एतु अमात्यः ।

वसुभूतिः— (विदूषकस्य कण्ठे रत्नमालां दृष्ट्वाऽऽत्मगतं) बाभ्रव्य, जाने सैवेयं रत्नमाला या देवेन राजपुत्र्यै प्रस्थानसमये दत्तेति ।

1 विवृद्धि f growth increase 2 कम्प palsy, tremor 3 प्रथयतितराम् it increases or spreads the more, √ प्रथ् 1A 10u 4 तर a तद्धित affix added to nouns adjectives, indeclinables & verbs showing a comparative degree and is changed to तराम when added to a verb or an indeclinable 5 साध्वसवश influence of fear or nervousness 6 अविस्पष्ट unclear, unintelligible 7 तिरयति it obstructs, नामधातु तिरय् 8 स्खलत् tottering stumbling √ स्खल 1P 9 वर्ण syllable 10 स्खलद्वर्णाम् = स्खलन्त वर्णा यस्या ताम् 11 जडयति–तराम it stupefies the more, नामधातु जडय 12 गद्गदता f stammering, tottering 13 जरा f old age 14 साहाय्यम help friendship 15 राजपुत्री f (dat s —पुत्र्यै) princess

मम हि परितोष अद्य जराया साहाय्य कुरुते, साध्वसवशात कम्पस्य विवृद्धि प्रथयतितरा पुन वाष्पसलिलै अविस्पष्टा दृष्टि तिरयति गद्गदतया स्खलद्वर्णा वाणी जडयतितराम ॥ शिखरिणीवृत्तम ।

Indeed, today my satisfaction renders help to my old age, under the influence of excitedness it increases the more my palsy, again it obstructs my eye sight with tear drops and the more stupefies my speech of tottering syllables through stammering

Vasantaka—(standing in front) May the Minister proceed !

Vasubhuti—(beholding the jewel necklace on the jester's neck aside) Babhravya, I know this is the very jewel necklace that was given by my king to the princess on her departure

बाभ्रव्य :— अमात्य, अस्ति सादृश्यम् । तत्किं वसन्तकादवगच्छामि प्रभवमस्याः ।

वसुभूति :— बाभ्रव्य, मा मैवम् । महति राजकुले रत्नबाहुल्यान्न दुर्लभो भूषणानां संवादः ।

वसन्तक :— (राजानमुद्दिश्य) एष महाराजः । तदुपसर्पत्वमात्यः ।

वसुभूति :— जयतु देवः । (उपसृत्य)

राजा — (उत्थाय) अभिवादये ।

वसुभूति :— अतिश्रेयांस्त्वं भूयाः ।

राजा — आसनमासनमार्याय ।

वसन्तक :— (आसनमादाय) भोः, इदमासनम् । उपविशत्वमात्यः ।

1 अवगच्छामि I know; लट् √ गम् 1P, 2 प्रभव origin. 3 अस्याः=रत्नमालाया. 4 बाहुल्यम् (abl. s. बाहुल्यात्) abundance, plenty. 5 संवाद agreement, similarity. 6 अतिश्रेयस् a. (nom s. m. अतिश्रेयान्) very finer, auspicious. 7 भूयाः mayest thou be; आशीर्लिङ √ भू 1P.

Bābhravya—O Prime Minister, there is a similar one. But do I find out its origin from Vasantaka ?

Vasubhūti—O Bābhravya, nay, nay. In a great royal household there are abundant jewels, so similarity of ornaments is not rare.

Vasantaka—(Pointing out the King) Here is the King. May the Minister, therefore, advance !

Vasubhūti—(advancing) *Victory to the King* !

King —(rising) I salute you.

Vasubhūti—May you be exceedingly blessed !

King —A seat, a seat for the noble guest..... ......

Vasantaka—(taking a seat) friend, here it is May Your Excellency be seated

(वसुभूतिरुपविशति)

वाभ्रव्य :— देव, वाभ्रव्यः प्रणमति ।

राजा — (पृष्ठे हस्तं दत्त्वा) वाभ्रव्य, इत आस्यताम् ।

वसन्तक :— अमात्य, एषा देवी वासवदत्ता प्रणमति ।

वासवदत्ता — आर्य, प्रणामामि ।

वसुभूति :— आयुष्मति, वत्सराजसदृशं पुत्रमाप्नुहि ।

(सर्वे उपविशन्ति)

राजा — आर्य वसुभूते, अपि कुशलं तत्रभवतः सिंहलेश्वरस्य ।

वसुभूति :— (ऊर्ध्वमवलोक्य निःश्वस्य च) देव, न जाने किं विज्ञापयामि मन्दभाग्यः ।

(अधोमुखस्तिष्ठति)

वासवदत्ता — (सविषादमात्मगतम्) हा धिक् हा धिक् । किमिदानीं वसुभूतिः कथयिष्यति ।

राजा — वसुभूते, कथय । किमेवं मां पर्याकुलयसि ।

1 आयुष्मत् a. (voc. s. आयुष्मति) long-lived (this form is generally used for addressing royal dignitaries in the sense of Your Majesty, Your Highness ) 2 आप्नुहि mayest thou obtain; लोट् √ आप् 5P 3 भाग्यम् fate, fortune. 4 मन्दभाग्य = मन्द भाग्य यस्य स 5 पर्याकुलयसि thou confusest; caus. पर्या + √ कुल् 1P.

(Vasubhūti sits down.)

Bābhravya—O my lord, this Bābhravya salutes you

King —(Placing a hand on his back) O Bābhravya, be seated here.

Vasantaka—Your Excellency, this Queen Vāsavadattā bows to you.

Vāsavadattā—Noble Sir, I salute you

Vasubhūti—O long-lived one, mayest thou obtain a son resembling King of Vatsa ! *(all sit down )*

King —Noble Vasubhūti, how is the welfare of His Majesty the King of Sinhala ?

[illegible] sighing) O King, I know not what I [illegible] luckless as I am [illegible] head downcast )

Vāsavadattā—(sadly, to herself) Ah fie, ah fie ! What will now Vasubhūti say ?

King —Vasubhuti, tell us Why do you disturb me thus ?

बाभ्रव्य :— (अपवार्य । चिरमपि स्थित्वा) यत्कथनीयं तदिदानीमेव कथ्यताम् ।

वसुभूति :— (सास्रम्) देव, न शक्यं निवेदयितुम् । तथाप्येष कथयामि मन्दभाग्यः । यासौ तत्रभवतः सिंहलेश्वरस्य दुहिता रत्नावली नामाऽऽयुष्मती सिद्धादेशेनादिष्टा योऽस्याः पाणिग्रहणं करिष्यति स सार्वभौमो राजा भविष्यतीति ।

राजा — ततस्ततः ।

वसुभूति :— तत्प्रत्ययादार्यार्थं यौगंधरायणेन बहुशः प्रार्थ्यमानापि सा सिंहलेश्वरेण वासवदत्तायाश्चित्तखेदं परिहरता न दत्ता ।

राजा — (अपवार्य) देवि, किमिदमिदानीमलीकं त्वदीयमातुलामात्यः कथयति ।

1 शक्यम् it is possible to. 2 दुहितृ f. (nom, s. दुहिता) daughter. 3 सिद्ध seer, sage 4 आदेश indication, prediction. 5 आदिष्ट told; PP. आ + √ दिश् 6U. 6 स. =राजा. 7 पाणिग्रहणम् marriage. 8 सार्वभौम a universal, m. universal monarch. 9 तत्प्रत्ययात्=सिद्धादेशे प्रत्ययात् 10 आर्यार्थम्=वत्सराजार्थम्. 11 प्रार्थ्यमान. being requested; pass pres. part. प्र + √ अर्थ 10A. 12 परिहरत् (ins. s. m परिहरता) avoiding; परि + √ हृ 1U. 13 अलीकम् falsehood.

Bābhrayya—(after a considerable time, aside) Do speak now what is to be told.

Vasubhūti—Sire, it is not possible to inform. 'And yet I, an unfortunate man, must tell you. The daughter of His Majesty the King of Sinhala, named Ratnāvalī was told by the prediction of a seer that he who would marry Her Highness should become a universal monarch.

King —Then, then?

Vasubhūti—Although she had been many times asked by Yaugandharāyana for Your Honour with his belief in it, the King of Sinhala had not given her in marriage, avoiding Vāsavadattā's mental worry.

King —(aside) O Queen, why does the Minister of thy maternal uncle tell this falsehood now?

वासवदत्ता— (विमृश्य) आर्यपुत्र, अहमपि न जानामि कोऽत्रालीकं मन्त्रयते।

वसन्तक :— तस्याः किं संवृत्तम्।

वसुभूति :— ततो लावाणकेन वह्निना देवी दग्धेति वार्तामुत्पाद्य देवेन तदन्तिकं वाभ्रव्यः प्रहितः। पुनरपि सा प्रार्थिता च। ततस्तत्रभवता सिहलेश्वरेण चिन्तितं — देवेन सहास्माकं संबन्धलोपो मा भूदिति, दत्ता सा रत्नावली देवाय प्रतिपादयितुमस्माभिरानीयमाना समुद्रे यानभङ्गान्निमग्ना।

(इति रुदन्नधोमुखस्तिष्ठति)

वासवदत्ता — (सास्रम्) हा हतास्मि मन्दभागिनी। हा भगिनिके रत्नावलि, क्वेदानीमसि। देहि मे प्रतिवचनम्। (इति मूर्च्छिता पतति)

राजा — समाश्वसिहि समाश्वसिहि। दुरवगाहा गतिर्दैवस्य। वाहनभङ्गपतितोत्थितौ नन्वेतावेव ते निदर्शनम्। (इति वसुभूतिबाभ्रव्यौ दर्शयति)

1 विमृश्य considering, gerund वि + +मृश् 6P 2 दग्ध burnt, PP √ दह 1P 3 तदन्तिकम्=सिहलेश्वरस्य समीपम 4 सबन्ध matrimonial tie 5 लोप loss 6 यानम् ship 5 निमग्न sunk, PP नि + √ मस्ज् 6P 8 वाहनम् ship, vehicle 9 निदर्शनम evidence, proof

Vāsavadattā—(considering) My husband, I, too, do not know who is uttering falsehood here

Vasantaka—What happened to her ?

Vasubhuti—Thereafter, causing a rumour that the queen was burnt to death by a fire in Lāvana, your Majesty sent Babhravya to him and again asked for her Then His Majesty the King of Sinhala lost in thought, hoping his matrimonial relationship with Your Majesty might not be severed and gave her While Ratnāvali was being led by us to be offered to you she did sink into the sea due to a shipwreck (He hangs his face, weeping )

Vasavadatta—(in tears) Alas ! I am undone, luckless that I am Ah my cousin Ratnavali ! Where art thou now ? Give me a reply ! (she falls fainting )

King —Take heart, take heart ! Unfathomable is the way of fate These two men who regained life after being drowned due to the shipwreck are the proof of it

(He points out Vasubhūti and Babhravya to her )

वासवदत्ता — आर्य, युज्यत एवम् । परं कुतो ममैतावद्भागधेयम् ।
राजा — (अपवार्य) बाभ्रव्य, किमेवमिति सर्वथा नावगच्छामि ।
बाभ्रव्य :— देव श्रूयताम् । [(नेपथ्ये महान्कलकलः)]

हर्म्याणां हेमशृङ्गश्रियमिव निचयैरर्चिषामादधानः
सान्द्रोद्यानद्रुमाग्रग्लपनपिशुनितात्यन्ततीव्राभितापः ।
कुर्वन्क्रीडामहीध्रं सजलजलधरश्यामलं धूमपातै-
रेष प्लोषार्तयोषिज्जन इह सहसैवोत्थितोऽन्तःपुरेऽग्निः ॥ १४ ॥

1 हर्म्यम् palace, mansion. 2 हेमम्, हेमन् n gold. 3 शृङ्गम् top 4 श्री f (acc. s श्रियम्) beauty. 5 हेमशृङ्गश्रियम् = हेम्न शृङ्गाणि तेषां श्रियम् 6 निचय mass, collection. 7 अर्चिस् m. fire, n flame (gen p अर्चिषाम्) 8 आदधान putting, producing; Pres Part. Atm. आ + √धा 3U. 9 अग्रम् top, tip. 10 ग्लपनम् exhaustion. 11 पिशुनित *indicated*; PP. नामधातु : √पिशुनय्. 12 अत्यन्त excessive. 13 तीव्र sharp 14 अभिताप heat. 15 सान्द्रोद्यानद्रुमाग्रग्लपनपिशुनितात्यन्ततीव्राभिताप = सान्द्रस्य उद्यानस्य द्रुमाणां अग्राणि तेषां ग्लपनं तेन पिशुनितः अत्यन्त तीव्रः अभितापः यस्य सः 16 क्रीडामहीध्रः pleasure-mountain 17 सजल watery. 18 जलधर cloud 19 श्यामल black 20 धूम smoke. 21 प्लोषः combustion 22 आर्त a pained by. 23 योषित् f. young woman. 24 अग्नि fire.

अर्चिषां निचयैः हर्म्याणां हेमशृङ्गश्रियं आदधान इव सान्द्रोद्यानद्रुमाग्रग्लपनपिशुनितात्यन्ततीव्राभिताप धूमपातैः क्रीडामहीध्रं सजलजलधरश्यामलं कुर्वन् प्लोषार्तयोषिज्जन एष अग्निः सहसा एव अन्तःपुरे इह उत्थितः ॥ स्रग्धरावृत्तम् ।

Vāsavadattā—O my lord, it is appropriate, but whence my fate?
King —(Aside) Bābhravya, I do not grasp all about this.
Bābhravya—Sire! Do listen
(Behind the scenes a great noise.)

Here in the harem all of a sudden a fire has started, as if producing beauty onto the golden roofs of the palace-buildings with its massive flames having its terrible, extreme heat indicated by the burning of the tops of the dense garden trees, turning the pleasure-mountain as dark as a watery cloud by sending out smokes, and distressing the harem-ladies through its combustion!

(सर्वे सभ्रान्ता पश्यन्ति)

राजा — कथमन्तःपुरेऽग्निः । (ससम्भ्रममुत्थाय) कष्टं, देवी वासवदत्ता दग्धा ।

देवीदाहप्रवादोऽयं योऽभूल्लावाणके पुरा ।
करिष्यन्निव तत्सत्यमत्राग्निरयमुत्थितः ॥ १५ ॥

वासवदत्ता — आर्यपुत्र, परित्रायस्व परित्रायस्व ।

राजा — अये, कथमतिसंभ्रमात्पार्श्वस्थापि देवी नोपलक्षिता । (देव्या पाणिं गृहीत्वालिङ्ग्य) देवि, समाश्वसिहि समाश्वसिहि ।

1 दाह burning 2 प्रवाद rumour 3 देवीदाहप्रवाद = देव्या दाहस्य प्रवाद 4 अभूल्लावाणके = (सन्धि) अभूत् लावाणके 5 पुरा ind once, formerly 6 करिष्यत future participle (लृटशतृ) (nom s m करिष्यन्) √कृ 8U to make 7 तत् = प्रवाद तम् 8 परित्रायस्व help thou ! णिजन्तात्लोट परि + √त्रा 2A 9 पार्श्व m n side, vicinity 10 उपलक्षित observed, PP उप + √लक्ष 1A 10U 11 पाणि m hand

देवीदाहप्रवाद अय य पुरा लावाणके अभूत तत सत्य करिष्यन इव अत्र अय अग्नि उत्थित ॥ अनुष्टुब्वृत्तम् ।

(All behold it in confusion)

King —How a fire in the harem ? Alas, Queen Vasavadattā is burnt to ashes ! (Hurriedly rising)

Once there was a rumour that the queen was burnt to death in Lavanaka Now a fire has started here as if to prove it to be true

Vāsavadatta—My husband, help, help !

King —Oh how is it that I did not observe the queen, though she stands by my side through extreme confusion ? (Holding the queen s hand, embracing) O my consort take courage !

वासवदत्ता — आर्यपुत्र, मयात्मनः कृते न भणितम् । किं पुनरेषा खलु निर्घृणयेह निगडे संयमिता सागरिका विपद्यते । तत्परित्रायस्वार्यपुत्रः ।

राजा — कथं देवि, सागरिका विपद्यते । एष गच्छामि ।

वसुभूतिः — देव, किमिदमकारणमेव पतङ्गवृत्तिः क्रियते ।

बाभ्रव्य :— देव, युक्तमाह वसुभूतिः ।

वसन्तक :— (राजानमुत्तरीये गृहीत्वा) भोः, मा खलु साहसं कुरु ।

राजा — (उत्तरीयमाकर्षन्) अरे धिङ्मूर्ख, सागरिका विपद्यते । किमद्यापि प्राणाः परिरक्ष्यन्ते । (ज्वलनप्रवेशं नाटयित्वा धूमाभिभवं नाटयति)

1 आत्मन. = वासवदत्ताया . 2 कृते ind (+ gen. and in compds.) for, on account of. 3 निर्घृण a (ins s f. निर्घृणया) cruel 4 निगड m.n fetter 5 संयमित suppressed; caus. PP. सम् + √ यम् 1P. 6 विपद्यते she falls into misfortune, she perishes, लट् वि + √ पद् 4A. 7 पतङ्ग. moth. 8 वृत्ति f. conduct. 9 साहसम् violence, daring. 10 अभिभव. overpowering

Vāsavadattā—O my lord, I did not say for my own sake, but is Sāgarikā, who is detained in fetters by me a cruel woman, not really perishing ? Let my husband *rescue her* !

King —O queen, what, Sāgarikā is perishing ? I am going.

Vasubhūti—Sire ! *Why dare you behave like a moth for nothing ?*

Bābhravya—Vasubhūti has said correctly, Sire !

Vasantaka—(Catching the king by the upper garment) O *friend, don't* carry out a thoughtless deed !

King —(pulling his upper garment) Oh fie on you, idiot !
Sāgarikā is dying. How do I care about my life at this juncture ?
(Entering into the fire he is overpowered by smoke.)

विरम विरम वह्ने मुञ्च धूमानुबन्धं
प्रकटयसि किमुच्चैरर्चिषां चक्रवालम् ।
विरहहुतभुजाहं यो न दग्धः प्रियायाः
प्रलयदहनभासा तस्य किं त्वं करोषि ॥ १६ ॥

वासवदत्ता — कथं मम दुःखकारिण्या वचनादेवं व्यवसितमार्यपुत्रेण ।
तदहमपि आर्यपुत्रमेवानुगमिष्ये ।

वसन्तकः— (परिक्रामन्नग्रतो भूत्वा) भवति, अहमपि ते पन्थोपदेशको भवामि ।

1 विरम stop thou ! लोट् वि + √ रम् 1A (but with वि परस्मैपदि) 2 प्रकटयसि thou manifestest ; णिजन्तात्लट् प्र + √ कट् 1 P 3 चक्रवालम् circle 4 विरह parting 5 हुतभुज् m (हुतभुजा ins s ) fire 6 प्रलय destruction, death 7 दहनः burning, fire 8 प्रलयदहनभासा = प्रलयस्य दहन तद्वद्भाः यस्य तेन 9 तस्य = मम राज्ञ 10 दुःखकारिण्या = दुःख करोति इति दुःखकारिणी तस्याः 11 पन्थोपदेशक pointer or guide of the way

वह्ने ! विरम विरम धूमानुबन्ध मुञ्च, उच्चैः अर्चिषां चक्रवालं किं प्रकटयसि ? यः अहं प्रलयदहनभासा प्रियायाः विरहहुतभुजा न दग्धः, त्वं तस्य (मम) किं करोषि ? ॥ मालिनीवृत्तम् ।

O fire, stop, stop ! Withdraw thy persistent smoke , why dost thou display a circle with lofty flames ? What art thou doing to me who have not been burnt even by the fire of separation from my sweetheart with its destructive burning flames ?

Vasavadatta—How, my husband is thus determined due to the word of mine who create misfortune Then I, too, must follow after him

Vasantaka—(walking in front of her) O lady, I, too, must become a guide to your path.

वसुभूति :— कथं प्रविष्ट एव ज्वलनं वत्सराजः । तन्ममापि दृष्टराजपुत्री-विपत्तेर्युक्तमिहैवात्मानमाहुतीकर्तुम् ।

बाभ्रव्य :— सास्रम्) हा महाराज, किमिदमकारणमेव भरतकुलं संशय-तुलामारोपितम् । अथवा किं प्रलापेन । अहमपि भक्तिसदृश-माचरामि । (इति सर्वेऽग्निप्रवेशं नाटयन्ति)

राजा — (दक्षिणबाहुस्पन्दं निरूप्य) एतदवस्थस्य मम कुत एतत् फलम् । (अग्रतोऽवलोक्य सहर्षोद्वेगम्) कथमासन्नहुतवहा वर्तते सागरिका । तत्त्व-रितमेनां संभावयामि ।

(ततः प्रविशति निगडसंयता सागरिका)

सागरिका — (समन्तादवलोक्य) हा धिक् । आसमन्ततः प्रज्वलितो हुतवहः । अद्य हुतवहो दिष्ट्या करिष्यति मे दुःखावसानम् ।

1 राजपुत्री = रत्नावली. 2 विपत्ति f death, adversity. 3 दृष्टराजपुत्रीविपत्ते = दृष्टा राजपुत्र्या विपत्ति येन तस्य (मम). 4 आहुतीकर्तुम् to offer, sacrifice 5 भरतकुलम् the race of Bharata, the son of दुष्यन्त ~ शकुन्तला; वत्सराज belongs to भरतकुलम्, hence this expression. 6 संशयः peril. 7 तुला f. scale. 8 आरोपित raised, placed, caus. PP. आ + √रुह् 1P 9 प्रलाप lamentation 10 भक्ति f devotion, loyalty 11 आचरामि I perform, act ; आ + √चर् 1P 12 स्पन्द throbbing 13 दक्षिणबाहुस्पन्द is said to be a sign of good luck. 14 *आसन्न near.* 15 *हुतवह्, हुतवह m fire* 16 *आ-*समन्ततम् nearly on all sides. 17 प्रज्वलित burned, kindled; PP. प्र + √ज्वल् 1P. 18 अवसान: termination, end

Vasubhūti—Oh Vatsa King has got into the fire ! Then I, who witnessed the death of my Princess must sacrifice myself. It is proper.

Bābhravya—(shedding tears) O my King ! Why do you place the race of Bharata on the scale of peril for a thing without any reason ? Well no use lamenting I will, also, act befittingly in accordance with my loyalty. (Thus, all enter the fire.)

King —(observing the throbbing of his right arm) Under the present circumstances whence will I have this fruit ? (Looking in front with the excitement of joy) O Sāgarikā is near the fire Let me help her swiftly (*Then appears Sāgarikā bound in fetters.*)

Sāgarikā—(looking all around) Ha te ! Nearly on all sides the fire is spreading; *Today, fortunately this fire will terminate my misery.*

राजा — (त्वरितमुपगम्य) अयि प्रिये, किमद्यापि मध्यस्थतया वर्तसे ।

सागरिका — (राजानं दृष्ट्वात्मगतम्) कथमार्यपुत्रः । तदेनं प्रेक्ष्य पुनरपि मे जीविताशा संवृत्ता । (प्रकाशम्) भर्तः, परित्रायस्व ।

राजा — भीरु, अलं भयेन ।

मुहूर्तमपि सह्यतां बहुल एष धूमोद्गमो,

(अग्रतोऽवलोक्य)

हहा धिगिदमंशुकं ज्वलति ते स्तनात्प्रच्युतम् । (विलोक्य)

मुहुः स्खलसि किं कथं निगडसंयतासि द्रुतं (परिकरं बद्ध्वा)

नयामि भवतीमितः प्रियतमेऽवलम्बस्व माम् ॥ १७॥

1 मध्यस्थता f indifference 2 भीरु a (voc s f भीरु) timid 3 बहुल dense, thick 4 धूम-उद्गम burst of smoke 5 ज्वलति it burns, √ ज्वल् 1P 6 द्रुतम् ad quickly 7 परिकरः girdle, belt. 8 अवलम्बस्व lean thou ; लोट् अव + √ लम्ब् 1A. 9 नयामि I lead, √ नी 1U

एष बहुलः धूमोद्गमः मुहूर्तं अपि सह्यताम् हहा धिक् ते स्तनात् प्रच्युतं इदं अंशुकं ज्वलति किं मुहुः स्खलसि कथं निगडसंयता असि भवतीं इतः द्रुतं नयामि मां अवलम्बस्व, प्रियतमे ॥

King — (quickly approaching) Ah my darling, why do you remain indifferent to me even now ?

Sāgarikā — (looking at the king, to herself) How it is my lord ! on seeing him once again my hope of life has arisen (Aloud) My lord, help me !

King — O timid one, away with your fear

Just for a moment endure this thick outburst of smoke ,
(seeing in front)
Ah fie ! this silk cloth dropped from your breast is burning
(looking)
Why do you repeatedly stumble ? How you are bound in fetters
(tying his belt)
I will lead you out quickly from here : Lean on me, my dearest !

(कण्ठे गृहीत्वा निमीलिताक्ष स्पर्शसुख नाटयन) अहो क्षणादपगतोऽयं मे संतापः । प्रिये, समाश्वसिहि ।

व्यक्तं लग्नोऽपि भवती न धक्ष्यति हुताशनः ।
यतः संतापमेवायं स्पर्शस्ते हरति प्रिये ॥ १८ ॥

(अक्षिणी समु मील्य निरीक्ष्य च) अहो महदाश्चर्यम् । क्वासौ प्रज्वलनो हुताशनः । तदवस्थमेतदन्तःपुरम् । कथमचिन्त्यरूपमेवम् ।

वासवदत्ता — (राज शरीर परामृशन्ती सहर्षम) दिष्ट्या अक्षतशरीरः आर्यपुत्रः ।

बाभ्रव्य :— विजयतां महाराजः । देव, दिष्ट्या वर्धसे । पुनरुच्छ्वसिताः स्मः ।

1 निमीलित closed , PP नि + √मील 1P 2 निमीलिताक्ष = निमीलिते अक्षिणी येन स 3 क्षणात् after a moment 4 अपगत departed , PP अप + √गम 1P 5 व्यक्तम ad clearly 6 लग्न closely followed, stuck , PP √लग् 1P 7 धक्ष्यति it will burn , लृट् √दह् 1P 8 हुताशन fire 9 यतम् wherefore 10 तदवस्थम = पूर्वा अवस्था यस्य तम 11 अचिन्त्य unthinkable 12 परामशत् (nom s f परामृशन्ती) touching , Pres Part परा + √मृश 6 P 13 अक्षतशरीर = अक्षत शरीर यस्य स 14 उच्छ्वसित a enlivened refreshed

यत अय ते स्पर्श सताप एव हरति, व्यक्त लग्न अपि हुताशन भवती न धक्ष्यति, प्रिये ॥ अनुष्टुब्वृत्तम ।

(holding her by the neck, expressing the joy of her touch with his eyes closed) *Oh after a moment this my heat is gone My darling, cheer up !*

This fire though evidently sticking to thee will not burn thee,
whereas this touch of thine just removes heat, O dearest !

(opening his eyes and looking) *Oh it is a great miracle ! Where is the burning fire now ? This harem retains the same state as before How wonderful unthinkable this phenomenon is !*

Vasavadatta—(touching the king's body with joy) Fortunately my husband is unhurt

Babhravya—*Victory to the king ! Sire ! Felicitations ! We are again enlivened*

राजा — बाभ्रव्य एषः । वसुभूतिरयम् ।

वसुभूतिः — देव, दिष्ट्या वर्धसे ।

राजा — वसन्तकोऽयम् ।

वसन्तकः— जयतु जयतु भवान् ।

राजा — (विचिन्त्य सवितर्कम्) स्वप्नोऽयमिति भाति । किं न्विदमिन्द्रजालम् ।

वसन्तकः— भोः, मा संदेहं कुरु । इन्द्रजालमेवेदम् । भणितं तेन दास्याः पुत्रेणैन्द्रजालिकेन यथा अवश्यमेव ममैकः खेलनको देवेन प्रेक्षितव्य इति । तत्तदेवैतत् ।

राजा — देवि, इयं त्वद्वचनादस्माभिरिहाऽऽनीता सागरिका ।

वासवदत्ता — (विहस्य) आर्यपुत्र, ज्ञातं ते सर्वम् ।

वसुभूतिः— (सागरिकां दृष्ट्वापवार्य) बाभ्रव्य, सदृशीयं राजपुत्र्या ।

1 वितर्क supposition, thought 2 सवितर्कम् ad thougtfully 3 स्वप्न sleep, dream 4 भाति it appears, √भा 2P 5 संदेह doubt 6 सदृश शी a resembling

King —This is Bābhravya, and also Vasubhūti ?

Vasubhuti—Sire ! Congratulations !

King —Is this Vasantaka ?

Vasantaka—May Your Honour be victorious !

King —(deeply in thought) It appears like a dream Is it not a magic possibly ?

Vasantaka—O friend no doubt It was a piece of magic The juggler, son of a slave girl had said that the king must inevitably see one more play of his It is exactly what happened

King —Queen, by your command we have brought this Sagarika

Vasavadatta—(smiling) My husband, you know everything

Vasubhūti—(observing Sagarika aside) O Babhravya she resembles our Princess

बाभ्रव्य :— अमात्य, ममाप्येतदेव मनसि वर्तते ।

वसुभूति :— (प्रकाशं राजानमुद्दिश्य) देव, कुत इयं कन्यका ।

राजा — देवी जानाति ।

वसुभूति :— देवि, कुतः पुनरियं कन्यका ।

वासवदत्ता — अमात्य, एषा खलु सागरात्प्राप्तेति भणित्वाऽमात्ययौगन्धरायणेन मम हस्ते निक्षिप्ता । अत एव सागरिकेति शब्दायते ।

वसुभूति :— (अपवार्य) बाभ्रव्य, यथा सुसदृशी वसन्तकस्य कण्ठे रत्नमाला, अस्या अपि सागरात्प्राप्तिः, तथा व्यक्तं सिंहलेश्वरस्य दुहिता रत्नावलीयम् । (इत्युपसृत्य प्रकाशम्) आयुष्मति रत्नावलि राजपुत्रि, त्वमीदृशीमवस्थां गतासि ।

1 सागर sea 2 निक्षिप्त deposited, entrusted PP नि + √क्षिप 6U 3 अत एव hence, therefore 4 शब्दायते she is called, नामधातु शब्दाय or √शब्द् 10U

Babhravya—O Minister the same is in my mind

Vasubhūti—(aloud pointing the king) Sire, whence this virgin ?

King —The queen knows it

Vasubhūti—O queen, but whence this virgin ?

Vasavadatta—O Minister, our Minister Yaugandharayana placed her in my hand saying that she was secured from the sea, on account of which she is called Sagarikā (i e. Sea maid)

Vasubhūti—(aside) O Babhravya as there is a very similar jewel necklace on the neck of Vasantaka and also she was obtained from the sea she *is doubtlessly* Ratnavali, the daupher of the king of Sinhala (thus advancing aloud) Your Highness Princess Ratnavali ! You are reduced to such a plight as this

सागरिका — (वसुभूतिं दृष्ट्वा सास्रम) कथममात्यो वसुभूतिः ।

वसुभूतिः— हा हतोऽस्मि मन्दभाग्यः । इति भूमौ पतति)

सागरिका — हा हतास्मि मन्दभागिनी । हा तात हा अम्ब ! कुत्रासि । देहि मे प्रतिवचनम् । इत्यात्मानं पातयन्ती मोहमुपगता)

वासवदत्ता — (ससम्भ्रमम्) कञ्चुकिन्, इयं सा मम भगिनिका रत्नावली ।

बाभ्रव्य :— देवि, इयमेव सा ।

वासवदत्ता — (रत्नावलीमालिङ्ग्य) भगिनि, समाश्वसिहि समाश्वसिहि ।

राजा — कथमुदात्तवंशप्रभवस्य सिंहलेश्वरस्य विक्रमबाहोरात्मजेयम् ।

वसन्तक :— (स्वगतम) रत्नावलीं दृष्ट्वा प्रथममेव ज्ञातं मया न खलु सामान्यजनस्येदृशपरिच्छदो भवतीति ।

वसुभूतिः— (उत्थाय) राजपुत्रि, समाश्वसिहि समाश्वसिहि । नन्वियं ज्यायसी ते भगिनी दुःखमास्ते । तत्परिष्वजस्वैनाम् ।

1 उदात्त a high noble 2 वंश race 3 उदात्तवंशप्रभवस्य = उदात्तस्य वंशस्य प्रभव यस्य तस्य 4 आत्मजा f daughter 5 सामान्य common 6 परिच्छद belonging paraphernalia 7 आस्ते she is sits, √आस 2A

Sagarika—(beholding Vasubhuti in tears) O it is Minister Vasubhuti!

Vasubhuti—Ah unfortunate that I am I am undone! (He falls onto the ground)

Sagarikā—Ah I am undone unlucky as I am! Oh my father, Oh my mother! Where are you? Give me a reply! (she throws herself and faints)

Vasavadatta—(in haste) O Chamberlain, is this my cousin Ratnavati?

Babhravya—Yes, Madam.

*Vasavadattā—(embracing Ratnavali) My sister take heart, take heart!*

King —How is she the daughter of Vikramabahu the King of Sinhalā possessed of the glory of his noble family?

Vasantaka—(to himself) On having seen Ratnavali for the first time I thought she does not belong to a common man

Vasubhuti—(rising) O Princess do regain your consciousness! Certainly your elder sister feels unhappy So do embrace her!

रत्नावली — (समाश्वस्य राजानं तिर्यगवलोक्य स्वगतम्) कृतापराधा खल्वहं देव्या न शक्नोमि मुखं दर्शयितुम् । (इत्यधोमुखी तिष्ठति)

वासवदत्ता — (सास्रं बाहू प्रसार्य) एहि, अतिनिष्ठुरे, इदानीं प्रियभगिनिके, स्नेहं दर्शय । (इति कण्ठे गृह्णाति)

(रत्नावली स्खलितं नाटयति)

वासवदत्ता — (अपवार्य) आर्यपुत्र, लज्जेऽहमेतेनात्मनो नृशंसत्वेन । तल्लघ्वपनयास्या एतद्बन्धनम् ।

राजा — (सपरितोषम्) यथाऽऽह देवी । (इति सागरिकायाः बन्धनमपनयति)

वासवदत्ता — आर्यपुत्र, अमात्ययौगन्धरायणेनैतावत्कालं दुर्जनीकृतास्मि । येन जानतापि न मे निवेदितम् ।

(ततः प्रविशति यौगन्धरायणः)

1 तिर्यच् (तिर्यक्) a ad. oblique-ly, horizontal-ly. 2 अपराध. offence. 3 कृतापराधा = कृत अपराध. मया सा 4 शक्नोमि I can, am able; √शक् 5P. 5 अतिनिष्ठुर (voc s f. अतिनिष्ठुरे) a. very cruel, rough 6 स्नेह affection 7 स्खलितम् stumbling. 8 लज्जे I am ashamed; लट् √लज्ज् 6A 9 नृशंसत्वम् cruelty, mischief. 10 बन्धनम् fetter. 11 एतावत्कालम् at this hour 12 दुर्जनीकृत rendered vile, wicked 13 जानत् (ins s.m. जानता) knowing ; Pres. Part. √ज्ञा 9U. 14 येन = अमात्येन.

Ratnāvalī—(recovering and looking at the King obliquely, to herself) I am really unable to show my face to the Queen, as I have offended her. (she stands with her face downcast )

Vāsavadattā—(extending her arms with tears) Come, O very cruel girl, now my dear sister, show me your affection ! (she grasps her neck) (Ratnāvalī stumbles )

Vāsavadattā—(aside) O my husband, I am ashamed of this cruelty of mine. So quickly remove this fetter from her !

King —(satisfied) As the queen says (He takes off the fetter from Sāgarikā)

Vāsavadattā—My husband, at this hour the Minister, Yaugandharāyana has made me a wicked personality Even knowing everything he did not tell me.

(Then appears Yaugandharāyana)

यौगंधरायण :—देव्या मद्वचनात्प्रथामुपगतः पत्युर्वियोगस्तदा
सा देव्यन्यकलत्रसंघटनया दुःखं परं प्रापिता ।
तस्याः प्रीतिमयं करिष्यति जगत्स्वामित्वलाभः प्रभोः
सत्यं दर्शयितुं तथापि वदनं शक्नोमि नो लज्जया ॥ १६ ॥

अथवा किं क्रियते । ईदृशमत्यन्तमाननीयेष्वपि निरनुरोधवृत्ति स्वामिभक्तिव्रतम् । (निरूप्य) अयं देवो महाराजः । यावदुपसर्पामि । (उपसृत्य) जयतु जयतु देवः । (पादयोर्निपत्य) देव, क्षम्यतां यन्मयाऽनिवेद्य कृतम् ।

1 प्रथा f. fame 2 पति m husband, lord (gen s पत्यु) 3 कलत्रम् n wife. 4 सघटना f. union. 5 परम् = अत्यन्तम् 6 प्रीति f. love, pleasure 7 तस्या = वासवदत्ताया 8 जगत् n world 9 स्वामित्वम् lordship, control. 10 लाभ gain, knowledge, enjoyment. 11 जगत्स्वमित्वलाभ = जगति स्वामित्व तस्य लाभः 12 प्रभु m (gen s. प्रभो) master, king. 13 माननीय honourable respectable 14 निरनुरोध a unkind, unfavourable. 15 निरनुरोधवृत्ति = निरनुरोधा वृत्ति यस्मिन् (यस्य) तत्. 16 स्वामिभक्ति f. loyalty to the king 17 व्रत m n vow 18 क्षम्यताम् it must be tolerated, forgiven; कर्मणि लोट् क्षम् 1A 4P

तदा मद्वचनात् देव्या पत्यु वियोग प्रथा उपगत, सा देवी अन्यकलत्रसघटनया पर दुःख प्रापिता, प्रभो अय जगत्स्वामित्वलाभ तस्या प्रीति करिष्यति, तथापि सत्य लज्जया वदन दर्शयितु नो शक्नोमि ॥ शार्दूलविक्रीडितम् ।

Yaugandharāyana —When through my statement the Queen's separation from her husband is known to all and his union with another wife compels her to undergo bitter unhappiness, the knowledge of his lordship over the world will please her. Yet truly I am not able to show my face out of shame.

But what can be done ? This vow of loyalty to my king is often unkind to the most respected ones (looking) Oh there is our King. Now let me approach (approaching) Victory to Your Majesty ! (falling at his feet) Sire ! Pray endure what I did without reporting to you.

राजा — कथय किमनिवेद्य कृतम् ।

यौगन्धरायण :— करोत्वासनपरिग्रहं देवः । सर्वं विज्ञापयामि । (सर्वे राज्ञा सह यथास्थानमुपविशन्ति)

यौगन्धरायण :— देव, श्रूयताम् । येयं सिंहलेश्वरस्य दुहिता सा सिद्धेनादिष्टा यथा योऽस्याः पाणिग्रहणं करिष्यति स सार्वभौमो राजा भविष्यति । ततस्तत्प्रत्ययादस्माभिः स्वामिनोऽर्थे बहुशः प्रार्थ्यमानेनापि सिंहलेश्वरेण देव्या वासवदत्तायाश्चित्तखेदं परिहरता यदा न दत्ता........

राजा — तदा किम् ।

यौगन्धरायण :— (सलज्जम्) तदा लावाणिकेन वह्निना देवी दग्धेति प्रसिद्धिमुत्पाद्य बाभ्रव्यः प्रहितः ।

राजा — यौगन्धरायण, ततः परं श्रुतं मया । अथेयं देवीहस्ते किमित्यनुचिन्त्य स्थापिता ।

1 परिग्रहः acceptance. 2 यथास्थानम् ad according to (their) position, rank. 3 प्रसिद्धि f. fame, rumour

King —Tell us what you did without informing us !

Yaugandharāyana—May your Majesty accept the seat. I will inform you with respect. (Everyone sits down according to his rank with the King). Sire, pray listen ! This daughter of the King of Sinhala was given the prediction by a seer that he who marries her will become a Universal Emperor With a belief in it we often asked the King of Sinhala for her for the sake of Your Majesty, and he did not give her away in marriage, respecting Queen Vāsavadattā's peace of mind....

King —Then what ?

Yaugandharāyana—(bashfully) Then causing a rumour that the queen had been burnt, I despatched Bābhravya

King —O Yaugandharāyana, beyond it was heard by me But with what in your mind did you place her into my Queen's hand ?

वसन्तक :— भोः, एतस्याभिप्रायो मया ज्ञातः । अनाख्यातमप्येतज्ज्ञायत एव यथांतःपुरगतामेनां यावदंतःपुरगतो देवः सुखेन दर्शयिष्यति ।

राजा — यौगन्धरायण, गृहीतस्तेऽभिप्रायो वसन्तकेन ।

यौगन्धरायण :— यदाज्ञापयति देवः ।

राजा — इन्द्रजालिकवृत्तान्तोऽपि मन्ये त्वत्प्रयोग एव ।

यौगन्धरायण :— अन्यथाऽन्तःपुरे वद्धाया अस्याः कुतो देवेन दर्शनम् । अदृष्टायाश्च वसुभूतिना कुतः परिज्ञानम् । (विहस्य) परिज्ञातायाश्च भगिन्याः संप्रति यथा करणीयं तत्र देवी प्रमाणम् ।

वासवदत्ता — (सस्मितम्) आर्य अमात्य, स्फुटमेव किं न भणसि यथार्यपुत्रे प्रतिपादय रत्नावलीमिति ।

1 अभिप्राय aim, intention 2 प्रयोग experiment, scheme. 3 परिज्ञानम् recognition, thorough knowledge 4 करणीयम् what to be done. 5 तत्र=करणीये. 6 प्रमाणम् authority.

Vasantaka – Hallo friend, I know his intention Though untold it is known that Your Majesty would happily see her fallen into the harem by chance when he would go there

King —O Yaugandharāyana, your intention has been grasped by Vasantaka

Yaugandharāyana—As Your Majesty puts it.

King —I think even the incident of the magic was just your experiment ?

Yaugandharāyana—Otherwise how could my lord happen to see her who was detained in the harem ? And how could Vasubhūti recognize her unseen ? (pleasantly laughing) Her Majesty has the authority as to what to be done now to her sister who is now recognized.

Vāsavadattā—(smiling) Noble Minister, why do you not frankly say :—"Offer Ratnāvalī to your husband !"

(इति रत्नावलीं स्वकीयैराभरणैरलंकृत्य हस्ते गृहीत्वा राजानमुपसृत्य) देव, प्रतीच्छैतां रत्नावलीम् ।

राजा — (सहर्षं हस्तौ प्रसार्य) को देव्याः प्रसादो न बहु मन्यते । (इति सागरिकां गृह्णाति)

वासवदत्ता — आर्यपुत्र, दूरे खल्वेतस्या नाभिकुलम् । तत्तथा कुरु यथा बन्धुजनं न स्मरति ।

राजा — यथाऽऽज्ञापयति देवी ।

विदूषक :— (सहर्षं नृत्यति) पृथ्वी खल्विदानीं हस्ते गता प्रियवयस्यस्य ।

वसुभूति :— राजपुत्रि, वासवदत्तां प्रणामेनार्चय । (रत्नावली तथा करोति)

बाभ्रव्य :— देवि, स्थाने देवीशब्दमुद्वहसि । (वासवदत्ता रत्नावलीमालिङ्ग्य देवीशब्देन प्रसादं करोति)

बाभ्रव्य :— इदानीं सफलपरिश्रमोऽस्मि संवृत्तः ।

1 स्वक, स्वकीय a. one's own. 2 अलङ्कृत्य having decorated ; gerund अलम् + √ कृ 8U. 3 बन्धुजनः kinsfolk (in plural sense) 4 प्रणामः salutation, prostration. 5 अर्चय worship thou ! णिजन्तात्लोट् √ अर्च् 1U. 6 शब्द. title, sound. 7 सफल fruitful. 8 परिश्रम exertion, fatigue 9 सफलपरिश्रम.=सफलः परिश्रम. यस्य स

(decorating Ratnāvatī with her own ornaments, taking her by the hand, and approaching the King) My lord, may you accept Ratnāvalī !

King —(joyously extending his hands). *Who does not highly honour the Queen's favour ?* (He seizes Sāgarikā)

Vāsavadattā—My husband, indeed her native home is far away. Do endeavour, therefore, so that she might not remember her kinsfolk.

King —As your Majesty commands.

Jester —(joyfully dances) Truly *the earth has now come to the hand of my fond friend.*

Vasubhūti—O Princess, by salutation honour Vāsavadattā. (Ratnāvali does so )

Bābhravya—O Queen, rightly you bear the Queen's title ! (Vāsavadattā, embracing Ratnāvali, favours her with the title of Queen.)

Bābhravya—*Now my exertion has borne its fruit.*

यौगन्धरायण:— देव तदुच्यतां कि ते भूयः प्रिय करोमि ।

राजा — किमतः परमपि प्रियमस्ति । यतः

नीतो विक्रमबाहुरात्मसमतां प्राप्तेयमुर्वीतले
सारं सागरिका तथा च भुवनप्राप्त्येकहेतुः प्रिया ।
देवी प्रीतिमुपागता च भगिनीलाभाज्जिताः कोसलाः
किं नास्ति त्वयि सत्यमात्यवृषभे यस्मै विधेयं स्पृहाम् ॥२०॥

तथापीदमस्तु ।

1 नीत brought, led , PP √ नी 1U 2 समता f equality, oneness, similarity 3 उर्वी f earth 4 तल m n surface 5 सार m n wealth, strength 6 भुवनम् world 7 प्राप्ति f acquisition 8 एकहेतु m single cause 9 भुवनप्राप्त्येकहेतु =भुवनस्य प्राप्ति तस्या एक हेतु या एतादृशा (सागरिका) 10 भगिनीलाभात् = भगिन्या सागरिकाया लाभ तस्मात् 11 वृषभ a (समासान्ते) best. 12 अमात्यवृषभ = अमात्येषु वृषभ 13 अमात्यवृषभे त्वयि सति (loc abs ) when thou, the best of ministers art present 14 यस्मै connects किम् with it 15 विधेयम I may make, produce , विधिलिङ् वि + √धा 3U 16 स्पृहा f thirst, longing

विक्रमबाहु आत्मसमता नीत, उर्वीतले सार भुवनप्राप्त्येकहेतु प्रिया सागरिका च तथा प्राप्ता, भगिनीलाभात् देवी प्रीति उपागता, कोसला जिता च अमात्यवृषभे त्वयि सति, यस्मै स्पृहा विधेय कि न अस्ति ॥ शार्दूलविक्रीडितम् ।

Yaugandharāyana—Sire ! Command me what more favour I have to do for you

King —What more favour beyond this ? Because, Vikramabahu is brought to the equal status with me loving Sagarika, who is the wealth on earth's surface and the sole motive for the acquisition of the world, is secured, the Queen is pleased through acquiring her cousin sister, and Kosala is conquered , and while thou the best of ministers art present, is there anything for which I may long ?

Yet, let this be !

उर्वीमुद्दामसस्यां जनयतु विसृजन् वासवो वृष्टिमिष्टा-
मिष्टैस्त्रैविष्टपानां विदधतु विधिवत्प्रीणनं विप्रमुख्याः ।
आकल्पान्तं च भूयात्समुपचितसुखः संगमः सज्जनानां
निःशेषं यान्तु शान्तिं पिशुनजनगिरो दुर्जया वज्रलेपाः ॥ २१ ॥

(इति निष्क्रान्ताः सर्वे)

[(इतीन्द्रजालिको नाम चतुर्थोऽङ्कः)]

॥ समाप्तेयं नाटिका ॥

1 उद्दाम excessive. 2 सस्यम् crop 3 उद्दामसस्याम् = उद्दाम सस्य यस्या सा. 4 जनयतु he must effect, cause to be born, णिजन्तात्लोट् √जन् 4A 5 वासव Indra 6 इष्ट desired, PP √इष् 6P, m n. sacrific. 7 विधिवत् ad according to law, in accordance with prescribed rules 8 प्रीणनम् gratification, pleasing. 9 विप्रमुख्य best of chief Brahmin 10 कल्पः end of the word, universal destruction. 11 आकल्पान्तम् adverbiably, as far as the end of the world 12 समुपचित accumulated, PP समुप + √चि 5U 13 समुपचितसुख = समुपचित सुख येन स 14 सगम union, association 15 सज्जन good man 16 निःशेषम् ad entirely 17 शान्ति peace, calmness. 18 पिशुन wicked, slanderous 19 वज्रलेप cement 20 वज्रलेपा = वज्रलेप यासा ता 21 गिर् f (p गिर) speech, word 22 त्रैविष्टप god

इष्टा वृष्टि विसृजन् वासव उद्दामसस्या उर्वी जनयतु विप्रमुख्या इष्टैः त्रैविष्टपाना प्रीणन विधिवत् विदधतु आकल्पान्त सज्जनाना सगम समुपचितसुख भूयात् वज्रलेपा दुर्जया पिशुनजनगिरः निःशेष शान्ति यान्तु च ॥ स्रग्धरावृत्तम् ।

Releasing desired rain falls may Indra cause the earth to produce abundant crops, may the leading Brahmins accomplish gratification to the gods through sacrifices in conformity with the prescribed rules, may there be association of the virtuous that increases happiness, till the end of the world, and may the tongues of the wicked which are difficult to control and hard as cement attain calmness without reservation! (Exeunt omnes)

*End of Act IV entitled 'The Juggler' (curtain)*

श्रीहर्षविरचिता

# प्रियदर्शिका

# PRIYADARSHIKĀ
# OF
# HARṢA

# DRAMATIS PERSONAE

MEN :

| | | |
|---|---|---|
| Udayana | = | King of Kōshambī |
| Vasantaka | = | Jester, the King's companion |
| Rumanvān | = | the King's Prime Minister |
| Vijayasena | = | the King's General |
| Vinayavasu | = | Chamberlain to King Drdhavarmā |

WOMEN :

| | | |
|---|---|---|
| Priyadarshikā | = | alias Priyadarshanā, Āranyakā, King Drdhavarmā's daughter |
| Vāsavadattā | = | Queen |
| Manoramā | = | a maid, Priyadarshikā's friend |
| Indivarikā | = | a maid |
| Kānchanamalā | = | a maid |
| Yashodharā | = | door-keeper |
| Sāngkrtyāyani | = | Lady living with the Queen. |

## ❀ प्रथमोऽङ्कः ❀

धूमव्याकुलदृष्टिरिन्दुकिरणैराह्लादिताक्षी पुनः
पश्यन्ती वरमुत्सुकानतमुखी भूयो ह्रिया ब्रह्मणः ।
सेर्ष्या पादनखेन्दुदर्पणगते गङ्गां दधाने हरे
स्पर्शादुत्पुलका करग्रहविधौ गौरी शिवायास्तु वः ॥ १ ॥

1 धूमः smoke. 2 व्याकुल a. perplexed, troubled. 3 दृष्टि. f. eye. 4 धूमव्याकुलदृष्टि. = धूमेन व्याकुले दृष्टी यस्या सा 5 इन्दु m. moon. 6 किरण beam, ray. 7 आह्लादित gladdened, delighted; caus. PP आ + √ ह्लाद् 1A. 8 अक्षि n eye. 9 आह्लादिताक्षी= आह्लादिते अक्षिणी यस्याः सा तादृशी. 10 पुनर् (पुन) again 11 पश्यत् (पश्यन्ती f nom. s.) seeing; Pres. Part. √ दृश् 1P. 12 वर bridegroom, viz, Shiva 13 उत्सुक (उत्सुका f. nom s) a. anxious, eager. 14 आनत bent down; PP आ + √ नम् 1P. 15 मुखम् face 16 आनतमुखी = आनत मुख यस्याः सा तादृशी. 17 भूयस् again. 18 ह्री f (ins s. ह्रिया) bashfulness, shame. 19 ब्रह्मन् m. (gen.s. ब्रह्मण) Brahmā, the Creator. 20 ईर्ष्या f. envy, jealousy. 21 सेर्ष्या = स + ईर्ष्या, ईर्ष्यासहिता. 22 पादनख m.n. toe nail. 23 दर्पणः mirror, looking glass 24 गत gone, reflected; PP. √ गम 1P. 25 गङ्गा f. Ganges river (drawn on the forehead of Shiva), she is also personified as a goddess, hence the expression सेर्ष्या is fitly used here. 26 दधान placing, bearing, Pres. Part. √ धा 3U 27 हर god Shiva, husband of Gaurī 28 स्पर्श touch. 29 उत्पुलक a thrilling, bristling 30 करग्रह marriage. 31 विधि. m. (loc s. विधौ) ceremony. 32 शिवम् (dats. शिवाय) happiness, bliss. 33 अस्तु may she be ! लोट् √ अस् 2P. 34 व = युष्माकम् your

करग्रहविधौ धूमव्याकुलदृष्टिः पुन· इन्दुकिरणै आह्लादिताक्षी उत्सुका वर (हरम्) पश्यन्ती भूय· ब्रह्मणः (सन्निधानेन) ह्रिया आनतमुखी गङ्गा दधाने हरे पादनखेन्दुदर्पणगते सेर्ष्या स्पर्शात् उत्पुलका गौरी व शिवाय अस्तु ॥ शार्दूलविक्रीडितवृत्तम् ।

### ACT I

May Gauri, whose eyes were disturbed by smoke at the time of her wedding ceremony but gladdened again by the moon-beams, who, having looked at her bridegroom Shiva in eagerness, hung down her face abashed due to Brahmā's presence, who bacame jealous when Shiva bearing goddess Gangā was reflected upon the moon-like mirrors of her toe-nails and who felt thrilled by his touch, be present for your happiness !

अपि च ।

कैलासाद्रावुदस्ते परिचलति गणेषूल्लसत्कौतुकेषु
क्रोडं मातुः कुमारे विशति विषमुचि प्रेक्षमाणे सरोषम् ।
पादावष्टम्भसीदद्वपुषि दशमुखे याति पातालमूलं
क्रुद्धोऽप्याश्लिष्टमूर्तिर्भयघनमुमया पातु तुष्टः शिवो नः ॥ २ ॥

1 कैलास a peak of the Himalayas uplifted by the demon-king Rāvana 2 अद्रि m (loc s अद्रौ) mountain 3 उदस्त uplifted PP उद + √अस 4P 4 परिचलत् shaking, moving Pres Part परि + √ चल 1P 5 उदस्ते कैलासाद्रौ परिचलति (loc abs ) when the uprooted Kailāsa shook 6 गण demi god 7 उल्लसत् expanding, blowing , उद + √लस 1P 8 कौतुकम् curiosity, amazement 9 उल्लसत्कौतुकेषु = उल्लसत कौतुक येषा तेषु 10 क्रोड m chest n lap 11 मातृ f (gen s मातु ) mother 12 कुमार god of war, son of Shiva and Uma 13 विशत् entering , Pres Part √विश् 6P 14 कुमारे विशति (loc abs ) when Kumāra entered into 15 विषमुच m serpent 16 प्रक्षमाण seeing , Pres Part प्र + ईक्ष 1A 17 राष rage, anger 18 सरोषम ad angrily 19 अवष्टम्भ fixation, obstruction 20 सीदत sitting plunging , Pres Part √सद 1P 21 वपुष n body 22 पादावष्टम्भसीदद्वपुषि = शिवस्य पादस्य अवष्टम्भन सीदन वपु यस्य तस्मिन 23 दशमुख the ten headed demon Ravana 24 यात् going, falling , Pres Part √या 2P 25 पातालम् nether world 26 मूलम् *root, bottom* 27 क्रुद्ध *angry, enraged* , PP √क्रुध 4P 28 अपि even though also 29 आश्लिष्ट embraced , PP आ + √श्लिष 4P 30 मूर्ति f body 31 आश्लिष्टमूर्ति = आश्लिष्टा मुर्ति यस्य स 31 भयघनम् ad. tightly due to fear 32 उमा (ins s उमया) Gauri, wife of Shiva 33 पातु let him protect , लोट √पा 2P 34 तुष्ट pleased , PP √तुष 4P 35 न us

उदस्ते कैलासाद्रौ परिचलति गणेषु उल्लसत्कौतुकेषु कुमारे मातु क्रोड विशति सरोष विषमुचि प्रक्षमाणे पादावष्टम्भसीदद्वपुषि दशमुख पातालमूल याति क्रुद्ध अपि भयघन उमया आश्लिष्टमूर्ति तुष्ट शिव न पातु ॥ स्रग्धरा ।

Furthermore,

> When the uprooted Kailāsa shook, the Ganas displayed extreme amazement, Kumāra ran into his mother's bosom, the serpent angrily looked round and the Demon king Rāvana sank into the bottom of the nether world, his body pushed down by Shiva's firm foot May Shiva, who though enraged became pleased (at the time) when his body was embraced by Umā tightly due to fear, protect us !

(नान्द्यन्ते)

सूत्रधार :— (परिक्रम्य) अद्याहं वसन्तोत्सवे सबहुमानमाहूय नानादिग्देशागतेन राज्ञः श्रीहर्षदेवस्य पादपद्मोपजीविना राजसमूहेनोक्तः, यथास्मत्स्वामिना श्रीहर्षदेवेनापूर्ववस्तुरचनालंकृता प्रियदर्शिका नाम नाटिका कृतेत्यस्माभिः श्रोत्रपरम्परया श्रुता न तु प्रयोगतो दृष्टा । तत्तस्यैव राज्ञः सर्वजनहृदयाह्लादिनो बहुमानादस्मासु चानुग्रहबुद्ध्या यथावत्प्रयोगेण त्वया नाटयितव्येति ।

1 नान्दी f invocation 2 अन्त (loc. s अन्ते) end 3 सूत्रधार stage-manager. परिक्रम्य having walked round ; gerund परि + √क्रम् 1U 4P 5 अद्य today, now. 6 अहम् I. 7 वसन्त Spring 8 उत्सव festival 9 बहुमान respect, regard. 10 सबहुमानम् respectfully 11 आहूय gerund आ + √ह्वे 1U 12 नाना various. 13 दिग्देश quarter 14 आगत (ins s आगतेन) come ; PP आ + √गम् 1P. 15 राजन् (gen s राज्ञः) king. 16 पादपद्मम् lotus foot. 17 उपजीविन् a. dependent upon, subsisting. 18 राज समूह assemblage of kings 19 उक्त told , PP √वच् 2P. 20 यथा as (follows) 21 अस्मत्स्वामिन् (ins s — स्वामिना) our lord, master 22 अपूर्व novel wonderful 23 वस्तु n plot, subject 24 अलकृत decorated, furnished ; PP अलम् + √कृ 8U 25 नाम ind named, by name of 26 नाटिका f. a kind of drama 27 कृत made, composed , PP √कृ 8U 28 इति ind. thus, that (conjunction) 29 अस्माभि by us 30 श्रोत्रपरम्परा f hearsay. 31 श्रुत heard , PP √श्रु 5P. 32 न not 33 तु but 34 प्रयोगतस् ind. out of or from performance, stage representation 35 दृष्ट (f दृष्टा) seen ; PP √दृश् 1P 36 तत् so 37 एव just, only. 38 सर्वजन every man. 39 हृदयम् heart. 40 आह्लादिन् a. delighting 41 अस्मासु in (for) us 42 च and. 43 अनुग्रहबुद्धि f. (ins s —बुद्ध्या) favouring mind 44 यथावत् duly, Properly (it, also, has an adjective force) 45 प्रयोग stage-performance 46 त्वया by thee 47 नाटयितव्य ought to be performed , caus Pot PP. √नट् 1P to act

(at the end of the invocation)

Stage director—(walking round) Today on the occasion of the Spring Festival I have been cordially summoned and told by the assembly of the kings who hail from various quarters and who are dependent upon the lotus-feet of Emperor Shri Harsa ,- "We have heard from hearsay that our lord Shri Harsa composed a play entitled Priyadarshikā furnished with a novel plot and construction, but have not yet witnessed it in actual performance. Therefore, out of your respect for the sovereign who delights the hearts of his entire subjects and out of your favour for us you should stage it with due performance"

तद्यावन्नेपथ्यरचनां कृत्वा यथाभिलषितं संपादयामि । (परितोऽवलोक्य) आवर्जितानि सामाजिकमनांसीति मे निश्चयः । कुतः

श्रीहर्षो निपुणः कविः परिषदप्येषा गुणग्राहिणी
लोके हारि च वत्सराजचरितं नाट्ये च दक्षा वयम् ।
वस्त्वेकैकमपीह वाञ्छितफलप्राप्तेः पदं किं पुन-
र्मद्भाग्योपचयादयं समुदितः सर्वो गुणानां गणः ॥ ३ ॥

1 यावत in the meantime 2 नपथ्यम green room dress 3 रचना f arrangement 4 कृत्वा having made, gerund √क 8U 5 अभिलषित desired PP अभि + लष 1 4P 6 सपादयामि I do, produce, णिजन्तात्ल्ट सम + √पद 4A 7 परितस् ind all around, everywhere 8 अवलोक्य having looked, gerund अव + √लोक 1A 10U 9 आवर्जित won over pleased PP आ + √वज् 10U 10 सामाजिक spectator 11 मनस n, (nom p मनांसि) mind 12 मे my 13 निश्चय belief 14 कुतस ind whence, whereas 15 निपुण skilled shrewd 16 कवि m poet 17 परिषद् f audience, assembly 18 अपि also 19 एषा f this 20 गुण merit 21 ग्राहिन् a (nom s f ग्राहिणी) capturing appreciating 22 लोक populace world 23 हारिन a (nom s n हारि) charming captivating 24 चरितम् deed, exploit 25 नाट्यम acting 26 दक्ष capable skilled 27 वयम् we 28 एकक वस्तु every part, plot or scene 29 इह here 30 वाञ्छित desired, PP वाञ्छ 1P 31 फलम् fruit, result 32 प्राप्ति f *attainment* 33 पद *m n state, position* 34 किं पुनर् what more, needless to say 35 मद् = मम my 36 भाग्यम् luck 37 उपचय (abl s उपचयात्) growth 38 अयम् m this 39 समुदित risen, assembled, PP सम + उद् + √इ 2P 40 गण mass

श्रीहर्ष निपुण कवि एषा परिषद गुणग्राहिणी अपि वत्सराजचरित च लोके हारि वय च नाट्य दक्षा एकैक वस्तु अपि इह वाञ्छितफलप्राप्त पद किं पुन गणाना सव अय गण मद्भाग्योपचयात समुदित ॥ शार्दूलविक्रीडितम ।

So in the meantime having made the arrangement of my dress I shall act as desired (looking all round) It is my belief that the minds of all the spectators are won over whereas,—

Shri Harsa is a shrewd poet and also this audience can grasp merits the exploit of the Vatsa King is attractive in the world and we are also skilled in acting Every scene of it here will attain the desired fruit and needless to say, at the growth of my good luck all these merits are assembled together

(नेपथ्याभिमुखमवलोक्य) अये, कथं प्रस्तावनाभ्युद्यते मयि विदितास्मदभिप्रायोऽङ्गाधिपतेर्दृढवर्मणः कञ्चुकिनो भूमिकां कृत्वास्मद्भ्रातेत एवाभिवर्तते । तद्यावदहमप्यनन्तरभूमिकां संपादयामि ।

(इति निष्क्रान्त )

## ॥ इति प्रस्तावना ॥

1 नेपथ्यम green room, curtain, dress 2 अभिमुख a. facing 3 अये ind. Oh, alas 4 कथम् how 5 प्रस्तावना f introduction, prologue 6 अभ्युद्यत ready, prepared for, exerted for, PP अभि + उद् + √यम 1P प्रस्तावनाभ्युद्यते मयि (loc ) while I am engaged in the prologue 7 विदित known PP √विद् 2P 8 अस्मत our 9 अभिप्राय import, aim 10 विदितास्मदभिप्राय = विदित अस्मदभिप्राय येन स । 11 अङ्ग the name of a country in modern Bengal situated on the bank of the Ganges 12 अधिपति (gen s अधिपते ) king, ruler 13 कञ्चुकिन् m (gen s कञ्चुकिन ) chamberlain 14 भूमिका f role, character in drama 15 भ्रातृ (nom s भ्राता) brother 16 इतस् in this direction, hither 17 अभिवर्तते he goes to (comes to) 18 अनन्तर (in cpds ) a next, following 19 निष्क्रान्त moved out, PP निस् + क्रम् 1U 4P

(Looking at in the direction of the dressing room) O really, while I am engaged in the introduction, my brother, understanding our aim and taking up the rôle of the Chamberlain to Drdhavarma, the king of Angga, is just coming hitherwards Therfore, I will also play the following part (Exit)

HERE ENDS THE PROLOGUE

(ततः प्रविशति कञ्चुकी)

कञ्चुकी — (शोकश्रमं नाटयन् निःश्वस्य) कष्टं भोः कष्टम् ।

राज्ञो विपद्बन्धुवियोगदुःखं देशच्युतिर्दुर्गममार्गखेदः ।
आस्वाद्यतेऽस्याः कटुनिष्फलायाः फलं मयैतच्चिरजीवितायाः ॥ ४ ॥

(उपजाति)

(सशोकं सविस्मयं च) तादृशस्यापि नामाप्रतिहतशक्तित्रयस्य रघुदिलीपनलतुल्यस्य देवस्य दृढवर्मणः 'मत्प्रार्थ्यमानाप्यनेन स्वदुहिता वत्सराजाय दत्ता' इति बद्धानुशयेन

1 ततस् then 2 प्रविशति he enters; प्र + √विश् 6P. 3 शोक sorrow. 4 श्रम weariness 5 निःश्वस्य having sighed; gerund निर् + √श्वस् 2P. 6 कष्टम् n evil; ind alas. 7 विपद् f calamity 8 बन्धु m kinsfolk. 9 वियोग separation 10 दुःखम् sorrow, unhappiness 11 बन्धुवियोग—दुःखम् = बन्धुवियोगस्य दुःखम्. 12 देश country 13 च्युति f. fall. 14 दुर्गम trackless, impassable. 15 मार्ग journey, way. 16 खेद pain, trouble. 17 आस्वाद्यते it is tasted; कर्मणि लट् आ + √स्वाद् 1A 18 कटु bitter, pungent. 19 निष्फल fruitless 20 मया by me. 21 चिर long. 22 जीवितम् life. 23 सशोकम् sorrowfully. 24 विस्मय wonder 25 तादृश such. 26 नाम ind indeed 27 अप्रतिहत unimpaired irresistible. 28 शक्ति f strength, regal power. 29 त्रयम् triad 30 शक्तित्रयम् = प्रभुशक्ति, मन्त्रशक्ति, उत्साहशक्ति च 31 अप्रतिहतशक्तित्रयस्य = अप्रतिहतं शक्तित्रयं यस्य तस्य. 32 रघु the celebrated king of the solar race and the founder of रघुवंश who conquered the then known whole world 33 दिलीप father of रघु 34 नल the famed king of the नैषध 35 मत् = मया 36 प्रार्थ्यमान—ना f. being asked for; Pres Pass Part प्र + √अर्थ 10A 37 अनेन = दृढवर्मणा 38 स्वदुहितृ (nom s –दुहिता) daughter 39 दत्त (nom s f दत्ता) given away; PP √दा 3U 40 बद्ध formed; PP. √बन्ध् 9P 41 अनुशय intense hatred 42 बद्धानुशयेन बद्धः अनुशयः येन तेन (कलिङ्गराजेन)।

(Then enters the chamberlain.)

Chamberlain—(wearied with sorrow, sighing) Alas! Evil on me!

The king's calamity, sorrow of separation from kinsfolk, fall of the country, pang of the trackless path! these are the fruit of my bitter and futile long existence that I taste.

(with a mingled feeling of sorrow and wonder) *Having cherished* intense hatred towards His Majesty King Drdhavarmā who possesses such a triple regal power unimpaired and who is comparable to Raghu Dilipa and Nala, because of the fact that he gave away his own daughter to the King of Vatsa, regardless of his sollicitation for her

'वत्सराजो बन्धनान्न निवर्तते' इति च लब्धरन्ध्रेण सहसागत्य कलिङ्गहतकेन विपत्तिरीदृशी क्रियत इति यत्सत्यमुपपन्नमपि न श्रद्दधे। कथमेकान्तनिष्ठुरमीदृशं च दैवमस्मासु। येन सापि राजपुत्री 'यथाकथञ्चिदेनां वत्सराजायोपनीय स्वामिनमनृणं करिष्यामि' इति मत्वा मया तादृशादपि प्रलयकालदारुणाद-वस्कन्दसंभ्रमादपवाह्य

1 बन्धनम् (abl s बन्धनात्) captivity 2 निवर्तते he abstains from, नि + √वृत् 1A 3 लब्ध obtained, PP. √लभ् 1A 4 रन्ध्रम् defect, weak point 5 लब्धरन्ध्रेण= लब्ध रन्ध्र येन तेन 6 सहसागत्य having suddenly attacked; gerund सहसा + √गम् 1P 7 कलिङ्ग the name of a country and its inhabitant (now a district on the Coromandel coast) 8 हतक (समासान्ते) vile, wicked 9 विपत्ति f adversity, calamity 10 ईदृश~शी such as this like this 11 क्रियते it is done, कर्मणिलट् √कृ 8U 12 यत् n rel Pron that which 13 सत्य a true, n truth 14 उपपन्न befallen, PP उप + √पद् 4A 15 श्रद्दधे I believe श्रत + धा 3U 16 एकान्त excessive perpetual 17 निष्ठुर cruel 18 दैवम् fate 19 अस्मासु in (on) us 20 येन hence whereby 21 सा she 22 राजपुत्री princess 23 कथञ्चित् somehow, with much difficulty 24 एनाम her (acc s) 25 उपनीय having brought gerund उप + √नी 1U 26 अनृण a free from debt 27 स्वामिन m (acc s स्वामिनम्) master, king 28 करिष्यामि I will make, लृट √कृ 8U 29 मत्वा having thought, gerund √मन 4A 30 प्रलयकाल the time of universal destruction, annihilation 31 दारुण cruel, terrible 32 अवस्कन्द assault 33 सभ्रम confusion, turmoil 34 अपवाह्य having carried away, gerund अप + √वह caus 1P

and having all of a sudden launched an attack on us with the weak point that the King of Vatsa should not be freed from his captivity the vile King of Kalinggas has caused such a great calamity (to our king) It has befallen, it is true and yet I cannot believe it Why has a fate so cruel as this befallen us? Wherefor with a thought in my mind that I would render my lord free from his debt by taking our princess somehow to the Vatsa King I carried her away from the turmoil of the battle as terrible as the time of Universal annihilation

देवस्य दृढवर्मणो मित्रभावान्वितस्यैवाटविकस्य नृपतेर्विन्ध्यकेतोर्गृहे स्थापिता सती स्नानाय नातिदूरमित्यगस्त्यतीर्थं गते मयि क्षणात्कैरपि निपत्य हते विन्ध्यकेतौ रक्षोभिरिव निर्मानुषीकृते दग्धे स्थाने, न ज्ञायते कस्यामवस्थायां वर्तत इति । निपुणं च विचितमेतन्मया सर्वं स्थानम् । न च ज्ञातं किं तैरेव दस्युभिर्नीता अथवा दग्धेति ।

1 मित्रभाव friendship. 2 अन्वित full of, followed by, possessed of ; PP. अनु + √इ 2P. 3 आटविक forester. 4 नृपति (gen. s. नृपते.) king. 5 गृहम् house. 6 स्थापित (*nom.* s. f. स्थापिता) placed, caus. PP. √स्था 1P. 7 सत् (*nom.* s. f. सती) being ; pres. Part √अस 2P. 8 स्थापिता सती (loc. abs.) she being placed, while she was placed. 9 स्नानम् (dat s. स्नानाय) ablution, bath. 10 अतिदूर very far. 11 तीर्थं holy place, sacred river, *etc* 12 गत gone ; PP. √गम् 1P. 13 गते मयि when I went away. 14 क्षणात् after or in a moment. 15 कैः (m. ins. p.) by some unknown men 16 निपत्य having fallen ; gerund नि + √पत् 1P. 17 हत killed ; PP. √हन् 2P. 18 विन्ध्यकेतौ हते (loc. abs.) when Vindhyaketu was killed. 19 निर्मानुषीकृत rendered desolate, lonely ; PP. निर्मानुषी + √कृ 8U. 20 दग्ध burnt ; PP. √दह् 1P. 21 स्थानम् place. 22 निर्मानुषीकृते दग्धे स्थाने (loc abs) after the place was rendered desolate and burnt down. 23 ज्ञायते it is known ; कर्मणिलट् √ज्ञा 9U. 24 कस्या अवस्थायाम् in what plight. 25 वर्तते she exists, √वृत् 1A. 26 निपुणम् ad accurately, completely. 27 विचित searched, PP. वि + √चि 5U. 28 दस्यु m demon, villain. 29 नीत led away, *PP.* √नी *1U.* 30 अथवा or.

and placed her in the home of the forest king, Vindhyaketu who was friendly towards His Majesty Drdhavarmā. While I was away for an ablution to the sacred River Agastya some unknown foes like demons fell on Vindhyaketu and murdered him, turned the place desolate and burnt it down in a moment. So it is not known in what plight she is now. Every nook and corner of the place I searched, but I do not know whether she was just kidnapped by those villains or burnt alive.

तत्किं करोमि मन्दभाग्यः । (विचिन्त्य) अये एवं श्रुतं मया 'बन्धनात्परिभ्रष्टः प्रद्योततनयामपहृत्य वत्सराजः कौशाम्बीमागतः' इति किं तत्रैव गच्छामि । (नि स्वस्यात्मनोऽवस्था पश्यन्) किमिव हि राजपुत्र्या विना तत्र गत्वा कथयिष्यामि । अये कथितं चाद्य मम विन्ध्यकेतुना 'मा भैषीः । जीवति तत्रभवान्महाराजो दृढवर्मा गाढप्रहारजर्जरीकृतो बद्धस्तिष्ठति' इति । तदाधुना स्वामिनमेव गत्वा पादपरिचर्यया जीवितशेषमात्मनः सफलयिष्यामि ।

1 किम् what ? 2 करोमि I do ; लट् √कृ 8U. 3 मन्द dull, slow. 4 भाग्यम् fortune. 5 मन्दभाग्य. = मन्दं भाग्यं यस्य स 6 विचिन्त्य having thought ; gerund वि+√चिन्त् 10U. 7 एवम् in this manner, thus. 8 श्रुत heard ; PP. √श्रु 5P. 9 परिभ्रष्ट fallen, escaped ; PP. परि + √भ्रश् 1A. 4P. 10 प्रद्योत. king of Ujjayinī whose daughter Vatsa king married. 11 तनया daughter 12 अपहृत्य having carried away ; gerund अप + √हृ 1U. 13 तत्र there. 14 गच्छामि I go ; लट् √गम् 1P. 15 आत्मन one's own 16 पश्यत् (nom. s. m. पश्यन्) seeing ; Pres. Part. √दृश् 1P. 17 इव like, possibly. 18 हि for, because, surely, (it is often used merely as an expletive. 19 विना (+ ins. and acc.) without. 20 गत्वा having gone ; gerund √गम् 1P. 21 कथयिष्यामि I will tell ; लृट् √कथ् 10U. 22 कथित told ; PP. √कथ् 10U. 23 मम = मह्यम् to me. 24 अभैषी (अ is dropped with मा) लुङ √ भी 3P. to fear. 25 मा + लुङ is a negative imperative with a force of the present , e g मा भैषी means "fear thou not !" 26 जीवति he lives ; √ जीव् 1P. 27 गाढ deep 28 प्रहार stroke, thrust. 29 जर्जरीकृत shattered (wounded) 30 तिष्ठति he remains, stands ; √ स्था 1P. 31 तदा then. 32 अधुना now. 33 पादपरिचर्या f. service at the feet. 34 शेष a. remaining. 35 सफलयिष्यामि I will make fruitful ; नामधातु √ सफलय् .

So what shall I do, luckless that I am ? (Reflecting) Oh, I have heard that Kin[illegible] 's captivity, came back to Kaūsh[illegible] daughter Shall I go there ? ([illegible] t ) Going there without our princess what shall I possibly narrate ? Ah, I remember just to-day I was told by Vindhyaketu ; —"Don't be afraid ! His Majesty King Drdhavarmā is alive in a dungeon, his body shattered by the strokes of weapons" Then I will repair to my King and will render the remaining span of my life fruitful by dint of serving at his royal feet.

देवस्य दृढवर्मणो मित्रभावान्वितस्यैवाटविकस्य नृपतेर्विन्ध्यकेतोर्गृहे स्थापिता सती स्नानाय नातिदूरमित्यगस्त्यतीर्थं गते मयि क्षणात्कैरपि निपत्य हते विन्ध्यकेतौ रक्षोभिरिव निर्मानुषीकृते दग्धे स्थाने, न ज्ञायते कस्यामवस्थायां वर्तत इति। निपुणं च विचितमेतन्मया सर्वं स्थानम्। न च ज्ञातं किं तैरेव दस्युभिर्नीता अथवा दग्धेति।

1 मित्रभाव friendship 2 अन्वित full of, followed by, possessed of, PP अनु + √इ 2P 3 आटविक forester 4 नृपति (gen s नृपते) king. 5 गृहम् house. 6 स्थापित (nom s f स्थापिता) placed, caus PP √स्था 1P 7 सत (nom s f सती) being, pres Part √अस 2P 8 स्थापिता सती (loc abs) she being placed, while she was placed 9 स्नानम (dat s स्नानाय) ablution bath 10 अतिदूर very far 11 तीर्थं holy place, sacred river, etc 12 गत gone, PP √गम् 1P 13 गते मयि when I went away. 14 क्षणात after or in a moment 15 कं (m ins p) by some unknown men 16 निपत्य having fallen gerund नि + √पत 1P 17 हत killed, PP √हन् 2P 18 विन्ध्यकेतौ हते (loc. abs) when Vindhyaketu was killed 19 निर्मानुषीकृत rendered desolate, lonely, PP निर्मानुषी + √कृ 8U 20 दग्ध burnt, PP √दह् 1P 21 स्थानम place 22 निर्मानुषीकृते दग्ध स्थाने (loc abs) after the place was rendered desolate and burnt down 23 ज्ञायते it is known, कर्मणिलट् √ज्ञा 9U 24 कस्या अवस्थायाम् in what plight 25 वर्तते she exists, √वृत् 1A 26 निपुणम् ad accurately, completely 27 विचित searched, PP. वि + √चि 5U 28 दस्यु m demon villain 29 नीत led away PP √नी 1U 30 अथवा or

and placed her in the home of the forest king Vindhyaketu who was friendly towards His Majesty Drdhavarmā While I was away for an ablution to the sacred River Agastya some unknown foes like demons fell on Vindhyaketu and murdered him turned the place desolate and burnt it down in a moment So it is not known in what plight she is now Every nook and corner of the place I searched but I do not know whether she was just kidnapped by those villains or burnt alive

तत्किं करोमि मन्दभाग्यः । (विचिन्त्य) अये एवं श्रुतं मया 'बन्धनात्परिभ्रष्टः प्रद्योततनयामपहृत्य वत्सराजः कौशाम्बीमागतः' इति किं तत्रैव गच्छामि । (नि श्वस्यात्मनोऽवस्था पश्यन्) किमिव हि राजपुत्र्या विना तत्र गत्वा कथयिष्यामि । अये कथितं चाद्य मम विन्ध्यकेतुना 'मा भैषीः । जीवति तत्रभवान्महाराजो दृढवर्मा गाढप्रहारजर्जरीकृतो बद्धस्तिष्ठति' इति । तदाधुना स्वामिनमेव गत्वा पादपरिचर्यया जीवितशेषमात्मनः सफलयिष्यामि ।

1 किम् what ? 2 करोमि I do ; लट् √कृ 8U. 3 मन्द dull, slow. 4 भाग्यम् fortune. 5 मन्दभाग्य = मन्दं भाग्य यस्य स 6 विचिन्त्य having thought ; gerund वि+√चिन्त् 10U. 7 एवम् in this manner, thus. 8 श्रुत heard ; PP. √श्रु 5P. 9 परिभ्रष्ट fallen, escaped ; PP. परि + √भ्रश् 1A. 4P. 10 प्रद्योत king of Ujjayini whose daughter Vatsa king married. 11 तनया daughter. 12 अपहृत्य having carried away ; gerund अप + √हृ 1U. 13 तत्र there. 14 गच्छामि I go ; लट् √गम् 1P. 15 आत्मन one's own 16 पश्यत् (nom. s. m. पश्यन्) seeing ; Pres. Part. √दृश् 1P. 17 इव like, possibly. 18 हि for, because, surely, (it is often used merely as an expletive. 19 विना (+ ins. and acc ) without. 20 गत्वा having gone ; gerund √गम् 1P. 21 कथयिष्यामि I will tell ; लृट् √कथ् 10U. 22 कथित told ; PP. √कथ् 10U. 23 मम = मह्यम् to me. 24 अभैषी (अ is dropped with मा) लुङ् √ भी 3P. to fear. 25 मा + लुङ् is a negative imperative with a force of the present , e g मा भैषी means "fear thou not !" 26 जीवति he lives ; √ जीव् 1P 27 गाढ deep 28 प्रहार stroke, thrust. 29 जर्जरीकृत shattered (wounded) 30 तिष्ठति he remains, stands ; √ स्था 1P. 31 तदा then. 32 अधुना now. 33 पादपरिचर्या f. service at the feet. 34 शेष a. remaining. 35 सफलयिष्यामि I will make fruitful ; नामधातु √ सफलय् .

So what shall I do, luckless that I am ? (Reflecting) Oh, I have heard that King of Vatsa, having escaped from his captivity, came back to Kaūshambī, carrying with him Pradyota's daughter. Shall I go there ? ( With a sigh looking at his own plight ) Going there without our princess what shall I possibly narrate ? Ah, I remember just to-day I was told by Vindhyaketu ; —"Don't be afraid ! His Majesty King Drdhavarmā is alive in a dungeon, his body shattered by the strokes of weapons " Then I will repair to my King and will render the remaining span of my life fruitful by dint of serving at his royal feet.

(परिक्रम्योर्ध्वमवलोक्य) अहो अतिदारुणता शरदातपस्य । यदेवमनेकदुःखसन्तापितेनापि मया तीक्ष्णोऽवगम्यते ।

घनवन्धनमुक्तोऽयं कन्याग्रहणात्परां तुलां प्राप्य ।
रविरधिगतस्वधामा प्रतपति खलु वत्सराज इव ॥ ५ ॥

(इति निष्कान्त )

❁ इति विष्कम्भकः ❁

1 ऊर्ध्वम overhead 2 अतिदारुणता f excessive cruelty 3 शरद autumn 4 आतप heat sunshine 5 अनेक not one, many 6 सन्तापित heated, tortured pp सम + √ तप् 1P 10U 7 अनकदु खसतापितन = अनकै दु खै सतापित स तेन 8 तीक्ष्ण heat 9 अवगम्यते it is known, कर्मणि ण्ट अव + √ गम 1P 10 घन a close, m cloud 11 बन्धनम bondage, obstruction 12 मुक्त released pp √ मुच् 6P 13 घनबन्धनमुक्त = (1) घनाना बन्धनात मुक्त, (2) घनात बन्धनात् मुक्त 14 अयम् = वत्सराज, रवि. 15 कन्या f virgin girl Virgo of the zodiac 16 ग्रहणम् accepting, taking 17 पर a (acc s f पराम) highest 18 तुला f measure, height, Libra of the zodiac 19 प्राप्य having attaind to, reached, gerund प्र + √ आप 5P 20 रवि m sun Titan 21 अधिगत attained, pp अधि + √ गम 1P 22 स्व one's own 23 धामन् n residence, lustre 24 अधिगतस्वधामा = अधिगत स्वधाम येन स 25 प्रतपति it shines, प्र + √ तप 1P 26 खलु ind really, indeed 27 विष्कम्भक interlude in a drama

घनबन्धनमुक्त अय कन्याग्रहणात परा तुला प्राप्य अधिगतस्वधामा रवि वत्सराज इव खलु प्रतपति ॥ आर्या

(Pacing about and looking overhead) O extremity of the atumnal sunshine! Although I am heated up thus by various kinds of misery I can perceive its heat

Like king of Vatsa who, freed from his strict imprisonment, returned to his own palace, acquiring supreme glory by his attainment of a virgin, indeed, Titan, freed from the envelope of clouds, reaching lofty Libra after acquiring Virgo, shines with his lustre regained (Exit)

INTERLUDE

(तत प्रविशति राजा विदूषकश्च)

राजा — भृत्यानामविकारिता परिगता दृष्टा मतिर्मन्त्रिणां
मित्राण्यप्युपलक्षितानि विदितः पौरानुरागोऽधिकम् ।
निर्व्यूढा रणसाहसव्यसनिता स्त्रीरत्नमासदितं
निर्व्याजादिव धर्मतः किमिव न प्राप्तं मया वन्धनात् ॥ ६ ॥

1 भृत्य (gen p भृत्यानाम) servant 2 अविकारिता f unchangeability, constancy 3 परिगत understood, pp परि+ √गम् 4 दृष्ट seen , pp √दृश् 1P 5 मति f mind wisdom 6 मन्त्रिन m (gen p मन्त्रिणाम्) minister 7 मित्रम् (nom p मित्राणि) ally, friend 8 उपलक्षित observed, pp उप + √लक्ष् 1A 10U 9 विदित known , pp √विद् 1 2P 10 पौर a civic, popular, m citizen 11 अनुराग attachment, love 12 पौरानुराग = पौराणा (मयि) अनुराग 13 निर्व्यूढ accomplished, achieved , pp. निर्वि+ √ऊह 1A 14 रण m n war 15 साहसम् violence, adventure 16 व्यसनिता f strong attachment passion 17 रणसाहसव्यसनिता = रणस्य साहसे व्यसनिता 18 स्त्री f woman 19 रत्नम् jewel 20 स्त्रीरत्नम = स्त्रीणा स्त्रीषु वा रत्नम 21 आसादित encountered, obtained , caus pp आ + √सद 1P 22 व्याज deception 23 निर्व्याज a (acc. s निर्व्याजात) free from fraud, honest 24 धर्म duty 25 धर्मतम् ind out of or from duty, righteousness 26 प्राप्त obtained , pp प्र + √आप् 5P 27 मया by me 28 अधिकम् ad very much

भृत्याना अविकारिता परिगता मन्त्रिणा मति दृष्टा मित्राणि अपि उपलक्षितानि पौरानुराग अधिक विदित रणसाहसव्यसनिता निर्व्यूढा स्त्रीरत्न आसादित निर्व्याजात धर्मत इव वन्धनात् किमिव मया न प्राप्तम् ? ॥ शार्दूलविक्रीडितम

(Then enter the king and his clown )

King —I have understood my servants' faithfulness, seen the wisdom of my ministers, observed allies known of the attachment of my subjects very much, realized my passion for adventures of war and obtained the jewel among the female sexes What have I not gained from prison as from my honest duty ?

विदूषक :— (सरोषम्) भो वयस्य, कथं तमेव दास्याः पुत्र वन्धनहतकं प्रशंससि । तमिदानी विस्मर । यत् तथा नवग्रह इव गजपतिः खलखलायमानलोहशृङ्खलाबन्धप्रतिस्खलच्चरणः शून्यदुष्करहृदय-सन्तापो रोषवशोत्तम्भितदृष्टिर्गुरुककरस्फोटितधरणिमार्गो रजनी-ष्वप्यनिद्रासुखमनुभूतोऽसि ।

1 रोष anger 2 सरोषम angrily 3 भो ind (voc particle) oh ah, sir ! 4 वयस्य companion, friend 5 दास्या पुत्र (a despising expression) son of a bitch or slave girl 6 बन्धनहतकम vile wretched prison 7 इदानीम् now 8 विस्मर forget thou ! लोट वि + √स्मृ 1P 9 यत whereas since 10 नवग्रह fresh capture, नवे ग्रहे पतित 11 गज elephant 12 पति m lord, master 13 गजपति m lordly elephant chief elephant 14 खलखलायमान clanking, pres part नामधातु √खलखलाय A 15 लोह m n iron copper 16 शृङ्खला f chain, fetter 17 बन्ध bondage 18 प्रतिस्खलत stumbling, tottering, Pres Part प्रति + √स्खल 1P 19 चरण m n foot 20 खलखलायमानलोहशृङ्खलाबन्धप्रतिस्खलच्चरण = खलखलायमानाना लोहशृङ्खलाना बन्धन प्रतिस्खलन्त चरणा यस्य स 21 शून्य desolate 22 दुष्कर difficult, unbearable 23 हृदयम् heart 24 सन्ताप heat torment 25 शून्यदुष्करहृदयसन्ताप = शून्यस्य दुष्करस्य च हृदयस्य सन्ताप यस्य स 26 वश influence 27 उत्तम्भित upheld, stopped, transfixed pp उद + √स्तम्भ् 1A 5 9P 28 दृष्टि f glance, eye 29 रोषवशोत्तम्भितदृष्टि = रोषस्य वशेन उत्तम्भिते दृष्टी यस्य (येन) स 30 गुरुक heavy massive 31 कर hand trunk 32 स्फोटित burst, splitted, caus pp √स्फुट 1U 6P 33 धरणि f soil 34 मार्ग way, path 35 गुरुककरस्फोटितधरणिमार्ग = गुरुकेन करेण स्फोटित धरणिमार्ग येन स 36 रजनी f (loc. p रजनीषु) night 37 अनिद्रा f sleeplessness 38 सुखम happiness 39 अनुभूत enjoyed, pp अनु + √भू 1P 40 असि thou art, लट √अस 2P

Clown —(angrily) O friend ! Why do you just praise the wretched and miserable prison ? Forget it now ! For you will not enjoy a happy sleep at night, like a newly captured lordly elephant tottering on account of the clanking iron chains with which his feet are tied up, burning with a torment of his heart desolate and unbearable trans fixing his eyes under the influence of wrath and digging up the ground pathway with his massive trunk

राजा — वसन्तक, दुर्जनः खल्वसि । पश्य

दृष्टं चारकमन्धकारगहनं नो तन्मुखेन्दुद्युतिः
पीडा ते निगलस्वनेन मधुरास्तस्या गिरो न श्रुताः ।
क्रूरा बन्धनरक्षिणोऽद्य मनसि स्निग्धाः कटाक्षा न ते
दोषान्पश्यसि बन्धनस्य न पुनः प्रद्योतपुत्र्या गुणान् ॥७॥

1 दुर्जन wicked man. 2 पश्य behold thou ! लोट् √ दृश् 1P. 3 चारक m. n. bondage, prison. 4 अन्धकार darkness 5 गहन a. deep, impenetrable 6 अन्धकारगहनम् = अन्धकारेण गहनम् 7 नो ind. not. 8 तन्मुख=तस्या मुख—. 9 मुखम् face. 10 द्युति f lustre, complexion. 11 तन्मुखेन्दुद्युति = तस्या मुख एव इन्दु तस्य द्युति 12 पीडा f. trouble, annoyance 13 ते=तव thy. 14 निगल swallowing; the word निगल must be replaced by निगड m. n. (chain, fetter). 15 स्वन sound. 16 निगडस्वनेन ते पीडा = निगडस्वन त्वा पीडयति 17 मधुर sweet. 18 गिर् f. (nom. p. गिर) voice, speech. 19 क्रूर cruel, harsh 20 रक्षिन् a. m. (nom. p. रक्षिण) guarding, warder, jailer. 21 मनस् n. (loc. s मनसि) mind 22 स्निग्ध charming 23 कटाक्ष f. glance 24 दोष (acc. p. दोषान्) setback, demerit 25 पश्यसि thou seest; √दृश् 1P. 26 पुनर् again, but. 27 गुण merit, virtue, excellence

अन्धकारगहन चारक दृष्ट तन्मुखेन्दुद्युति नो [[दृष्टा]] निगडस्वनेन ते पीडा मधुरा तस्या गिर. न श्रुताः अद्य क्रूरा बन्धनरक्षिण ते मनसि स्निग्धा कटाक्षा न [[ते मनसि]] बन्धनस्य दोषान् पश्यसि पुन प्रद्योतपुत्र्या गुणान् न [[पश्यसि]] ॥ शार्दूलविक्रीडितम्

King — O Vasantaka, how defective you are ! Behold !

You have seen the impenetrable darkness of the jail but not the radiance of her moon-face, the clanking sound of fetters have annoyed you, but you have not heard her sweet voice, now the pitiless jailers are impressed in your mind but not her charming glances, you find the setbacks of the prison but not the virtues of Pradyota's daughter.

विदूषकः— (सगर्वम्) भो यदि तावद्बन्धनं सुखनिबन्धनं भवति तत्कस्मात्त्वं दृढवर्मा बद्ध इति कलिङ्गराजस्योपरि रोषं बध्नासि ।

राजा — (विहस्य) धिङ्मूर्ख, न खलु सर्वो वत्सराजः । य एवं वासवदत्तामवाप्य बन्धनान्निर्यास्यति । तदास्तां तावदियं कथा । विन्ध्यकेतोरुपरि बहून्यहानि विजयसेनस्य प्रेषितस्य । न चाद्यापि तत्सकाशात्कश्चिदागतः । तदाहूयतां तावदमात्यो रुमण्वान् । तेन सह किञ्चिदालपितुमिच्छामि ।

1 गर्व pride 2 सगर्वम् ad proudly 3 यदि if 4 सुख a happy, n happiness 5 निबन्धनम् building 6 भवति it is, लट्√भू 1P 7 तत् = तर्हि then 8 कस्मात् why 9 उपरि (+ acc gen loc) above, towards. 10 बध्नासि thou conceivest, formest; लट्√बन्ध् 9P 11 विहस्य having laughed, gerund वि+√हस् 1P 12 धिक् fie 13 मूर्ख fool 14 सर्व all 15 य relat pron m s who 16 अवाप्य having obtained; gerund अव +√आप् 5P 17 निर्यास्यति he will go out लृट् निर् + √या 2P 18 आस्ताम् let it rest, लोट्√आस् 2A. 19 इयं कथा f this tale 20 बहु a (nom p बहूनि n) many 21 अहन् n (nom p अहानि) day 22 प्रेषित sent, caus PP प्र + √इष् 1U 4P 23 विजयसेनस्य प्रेषितस्य (genitive absolute) after Vijayasena was sent 24 तत्सकाशात् = तस्मात् from him 25 कश्चित् m any one 26 आगत arrived PP आ + √गम् 1P. 27 आहूयताम् he must be called, कर्मणि लोट् आ + √ह्वे 1U 28 अमात्य prime minister 29 सह with 30 किञ्चित् something 31 आलपितुम् to converse, inf आ + √लप् 1P. 32 इच्छामि I wish, √इष् 6P

Clown — (proudly) Sir, if a gaol is a happy residence, why, then, do you feel angry with the King of Kalingas over his having imprisoned Drdhavarmā ?

King — (laughing) O fie on you, fool ! Indeed everyone is not King of Vatsa able to come out of his detention and to acquire a Vāsavadattā So let this talk rest for now It is many days since Vijayasena was despatched to Vindhyaketu, and even to this date no one has turned up from him So now call the Prime Minister Rumanvān, as I wish to speak something with him

(प्रविश्य)

**प्रतीहारी** — जयतु जयतु देवः। एष खलु विजयसेनः, अमात्यो रुमण्वानपि प्रतीहारभूमिमुपस्थितौ ।

**राजा** — त्वरितं प्रवेशय तौ ।

**प्रतीहारी** — यद्देव आज्ञापयति (इति निष्क्रान्ता)

(ततः प्रविशति रुमण्वान् विजयसेनश्च)

**रुमण्वान्** — (विचिन्त्य)

तत्क्षणमपि निष्क्रान्ताः कृतदोषा इव विनापि दोषेण ।
प्रविशन्ति शङ्कमाना राजकुलं प्रायशो भृत्याः ॥ ८ ॥

1 प्रतीहारी m f doorkeeper 2 जयतु may he gain a victory, लोट् √जि 1P 3 देव king 4 प्रतीहार door, gate 5 भूमि f earth, ground प्रतीहारभूमि f threshold 7 उपस्थित arrived, drawing near, PP उप + √स्था 1P 8 त्वरितम् ad hurriedly, quickly 9 तौ m acc dual them two 10 प्रवेशय admit thou! णिजन्तात्लोट् प्र + √विश 6P 11 यत् as 12 आज्ञापयति he commands, णिजन्तात्लट् आ + √ज्ञा 9U 13 विचिन्त्य having reflected gerund वि + √चिन्त् 10U 14 तत्क्षणम् ad immediately, instantly 15 कृत made, committed √कृ 8U 16 दोष fault 17 कृतदोषा = कृत दोष यै ते 18 शङ्कमान (nom p m शङ्कमाना) fearing, pres part √शङ्क 1A 19 राजकुलम् royal household roayal family 20 प्रायशम् mostly, generally 21 भृत्य servant

तत्क्षण निष्क्रान्ता अपि दोषण विना अपि कृतदोषा इव प्रायश शङ्कमाना भृत्या राजकुल प्रविशन्ति ॥ आर्या

(The door keeper enters )

Door keeper — May Your Majesty be victorious ! Here have arrived Vijayasena and Prime Minister Rumanvān at the threshold

King — *Do admit them at once !*

Door keeper — As your Majesty commands (Exit)

(Then enter Rumanvān and Vijayasena )

Rumanvān — (reflecting)

Though they came out instantly, mostly the servants enter the royal household with fear as if they committed offence even without an offence

(उपसृत्य) जयतु देवः ।

राजा — (आसनं निर्दिश्य) रुमण्वन्, इत आस्यताम् ।

रुमण्वान् — (सस्मितमुपविश्य) एष खलु जितविन्ध्यकेतुर्विजयसेनः प्रणमति ।
(विजयसेनस्तथा करोति)

राजा — (सादरं परिष्वज्य) अपि कुशली भवान् ।

विजयसेन :— अद्य स्वामिनः प्रसादात् ।

राजा — विजयसेन, स्थीयताम् । (विजयसेन उपविशति)

राजा — विजयसेन, कथय विन्ध्यकेतोर्वृत्तान्तम् ।

विजयसेन :— देव, किमपरं कथयामि । यादृशः स्वामिनि कुपिते ।

राजा — तथापि विस्तरतः श्रोतुमिच्छामि ।

1 उपसृत्य approaching, having advanced; gerund उप + √सृ 1 3P. 2 आसनम् seat. 3 सस्मितम् ad smilingly, with a smile 4 उपविश्य having sat; gerund उप + √विश् 6P. 5 जित defeated, won; PP. √जि 1P 6 जितविन्ध्यकेतु = जित विन्ध्यकेतु येन स 7 प्रणमति he bows; प्र + √नम् 1U. 8 तथा so 9 करोति he does; लट् √कृ 8U. 10 आदर respect 11 सादरम् ad. respectfully. 12 परिष्वज्य having embraced; gerund परि + √स्वञ्ज् 1A. 13 कुशलिन् a. (nom s. m. कुशली) faring well, fine. 14 प्रसादः favour 15 स्थीयताम् (भावे प्रयोग) it must be sat (be seated!) कर्मणिलोट् √स्था 1P. 16 कथय tell thou! लोट् √कथ् 10U. 17 वृत्तान्त tiding, news. 18 किमपरम् what else, what more. 19 यादृश a. of such kind as (it indicates here वृत्तान्त). 20 कुपित angered; PP. √कुप् 4P. 21 स्वामिनि कुपिते (loc. abs.) when Your Majesty is angry. 22 तथापि yet. 23 विस्तरतस् ind. abundantly, minutely 24 श्रोतुम् to hear; inf. √श्रु 5P.

(Advancing) Victory to your Majesty!

King — (pointing out a seat) Rumanvān, be seated here

Rumanvān — (sitting with a smile) Indeed, Vijayasena who has defeated Vindhyaketu salutes you (Vijayasena does so)

King — (respectfully embracing) Are you fine?

Vijayasena — Today by Your Majesty's favour.

King — Vijayasena, sit down (Vijayasena sits down)

King — Vijayasena, tell us the tidings of Vindhyaketu.

Vijayasena — Sire! What else shall I tell. It is such a news as might be heard when my lord is angry.

King — Yet I desire to hear in detail.

विजयसेनः—देव श्रूयताम् । इतो वयं देवपादादेशाद्यथादिष्टेन करि-
तुरगपदातिसैन्येन महान्तमप्यध्वानं दिवसत्रयेणोल्लङ्घ्य प्रभात-
वेलायामतर्किता एव विन्ध्यकेतोरुपरि निपतिताः स्मः ।

राजा — ततस्ततः ।

विजयसेनः — ततः सोऽप्यस्मद्बलतुमुलकलकलाकर्णनेन प्रतिबुद्धः केस-
रीव विन्ध्यकन्दरान्निर्गत्य विन्ध्यकेतुरनपेक्षितबलवाहनो यथा-
संनिहितकतिपयसहायः

1 आदेश. order. 2 दिष्ट mentioned; pp. √दिश् 6U. 3 देवपादादेशाद्यथादिष्टेन = देवपादयोः आदेशः तेन यथादिष्टेन. 4 करिन् m. (समासेषु करि) elephant., 5 तुरग horse. 6 पदातिन् m. (समासेषु पदाति) infantry man. 7 सैन्यः army. 8 महत् a. (acc. s. m महान्तम्) great. 9 अध्वन् m (acc. s. अध्वानम्) way, distance to be traversed. 10 दिवसत्रयम् three days. 11 उल्लङ्घ्य having traversed; gerund उद् + √लङ्घ् 1U. 12 प्रभातम् daybreak. 13 वेला f. (loc. s. वेलायाम्) time, hour. 14 अतर्कित unexpected; a pp. अ + √तर्क् 10U. 15 स्म we are; लट् √अस् 2P. 16 अस्मत् = अस्माकम् our. 17 बलम् force, troop. 18 तुमुल tumultuous 19 कलकल confused noise. 20 आकर्णनम् hearing. 21 प्रतिबुद्ध awakened; pp. प्रति + √बुध् 1U. 4A. 22 केसरिन् m. (nom s. केसरी) lion. 23 अस्मद्बलतुमुलकलकलाकर्णनेन = अस्मद्बलस्य तुमुल. कलकल तस्य आकर्णनेन. 24 विन्ध्य the name of a mountain range in मध्यप्रदेशः. 25 कन्दर m n. glen, cave, valley. 26 अनपेक्षित not taken into account, pp. न अप + √ईक्ष् 1A. 27 संनिहित a pp. present, lying or placed near; सनि + √धा 3U. 28 कतिपय a some, a few. 29 सहाय helper, ally. 30 वाहनम् vehicle, elephant, horse 31 अनपेक्षितबलवाहनः = अनपेक्षितानि बलानि वाहनानि च येन स 32 यथासंनिहितकतिपयसहाय = यथासंनिहिताः कतिपयाः सहाय यस्य स.

Vijayasena—Sire! Pray listen. Traversing a great distance from here within three days with an army of elephant-soldiers, cavalry and infantry in accordance with Your Majesty's command, we fell upon Vindhyaketu in a surprise attack.

King —Then, then?

Vijayasena—Then awakened by the tumultuous noise of our army Vindhyaketu jumped out of the glens of the Vindhya mountain, like a lion, and not reconnoitring the mutual troops and vehicles and with whatever men he could muster at hand

स्वनामोद्घोषयन्नस्मानभियोद्धुं प्रवृत्तः ।

राजा — (रुमण्वन्तमवलोक्य सस्मितम्) शोभितं विन्ध्यकेतुना । ततस्ततः ।

विजयसेन :— ततोऽस्माभिरयमसाविति द्विगुणतरबद्धमत्सरोत्साहैर्महता विमर्देन निःशेषितसहाय एक एव विमर्दिताधिकबलक्रोधवेगो दारुणतरं संप्रहारमकरोत् ।

राजा — साधु विन्ध्यकेतो साधु साधु ।

विजयसेन :— किं वा वर्ण्यते । देव, संक्षेपतो विज्ञापयामि ।

1 स्व one's own 2 नामन् n (acc s नाम) name 3 उद्घोषयत् (nom s m उद्घोषयन्) announcing; Pres Part उद +√ घुष् 10U 1P 4 अस्मान् us 5 अभियोद्धुम् to fight, inf अभि +√ युध् 4A 6 प्रवृत्त begun, PP प्र +√ वृत् 1A 7 शोभित appeared beautiful, befitted, PP √ शुभ् 1A 8 द्विगुणतर a redoubled 9 मत्सर envy, hostility, enmity 10 उत्साह energy, exertion 11 द्विगुणतरबद्धमत्सरोत्साहैं = द्विगुणतर बद्धौ मत्सर उत्साह च यै तैं (अस्माभि) 12 विमर्द crushing, destruction 13 निःशेषित not left, caus PP. निस् +√ शिष् 7P 14 निःशेषितसहाय = निःशेषिता सहाया यस्य स (विन्ध्यकेतु) 15 विमर्दित pressed, PP वि +√ मृद् 9P 16 अधिक a more 17 बलम strength 18 क्रोध rage 19 वेग velocity 20 विमर्दिताधिकबलक्रोधवेग: = विमर्दित अधिक बल क्रोध तयो वेग येन स. 21 दारुणतरम् more terribly 22 संप्रहार war, battle 23 अकरोत् he did, लङ √ कृ 8U 23 साधु fine, brave 24 वा possibly, or 25 वर्ण्यते it is described, कर्मणिलट √ वर्ण 10U 26 संक्षेपतस् ind briefly, from abridgement 27 विज्ञापयामि I inform, request, णिजन्तात्लट वि +√ ज्ञा 9U

he began to fight us back, announcing his own name

King — (observing Rumanvān with a smile) Vindhyaketu glorified himself. Then, then ?

Vijayasena — Then his soldiers completely having been destroyed by us with redoubled enmity and exertion, and with a shout "Here he is !", single-handed he fought a fiercer battle pressing out his redoubled strength and burning rage.

King — Bravo, bravo, bravo, O Vindhyaketu !

Vijayasena — How can it be described ? Sire ! let me respectfully inform you in brief

पादातं पत्तिरेव प्रथमतरमुरःपेषमात्रेण पिष्ट्वा
दूरन्नीत्वा शरौघैर्हरिणकुलमिव त्रस्तमश्वीयमाशाः ।
सर्वत्रोत्सृष्टसर्वप्रहरणनिवहस्तूर्णमुत्खाय खड्गं
पश्चात्कर्तुं प्रवृत्तः करिकरकदलीकाननच्छेदलीलाम् ॥ ६ ॥

1 पादात m foot-soldier, n infantry 2 पत्ति m foot-soldier 3 प्रथमतरम् ad at first 4 उरम् breast 5 पेष crushing, pounding 6 मात्र suffix (ins s मात्रेण) only, just 7 पिष्ट्वा having crushed, gerund √ पिष् 7P 8 दूरम् afar 9 नीत्वा having led, gerund √ नी 1U 10 शर arrow 11 ओघ flood 12 शरौघैः = शराणां ओघैः (वृष्टिभिः) 13 हरिण antelope, deer. 14 कुलम् herd 15 हरिणकुलम् = हरिणानां कुलम् 16 त्रस्त frightened PP √ त्रस् 1 4P 17 *अश्वीयम cavalry* 18 *आशा f (acc p आशाः)* direction 19 सर्वत्र everywhere 20 उत्सृष्ट thrown, poured out PP उद् + √ सृज् 6P 21 प्रहरणम weapon 22 निवह multitude, heap 23 सर्वत्रोत्सृष्टसर्वप्रहरणनिवह = सर्वत्र उत्सृष्ट सर्वेषां प्रहरणानां निवहः येन सः 24 तूर्णम् quickly, speedily 25 उत्खाय having dug up, drawn gerund उद् + √ खन 1U 26 पश्चात् thereafter 27 कर्तुम् to do, inf √ कृ 8U 28 खड्ग sword 29 कदली f plantain tree 30 काननम् forest, grove 31 छेद cutting 31 लीला f play, sport 32 करिकरकदलीकाननच्छेदलीलाम् = करिणां कराः एव कदल्यः तासां काननं तस्य छेदलीलाम्

पत्तिः (विन्ध्यकेतुः) एव प्रथमतरं उरःपेषमात्रेण पादातं पिष्ट्वा शरौघैः त्रस्तं हरिणकुलं इव अश्वीयं आशाः दूरं नीत्वा सर्वत्र उत्सृष्टसर्वप्रहरणनिवहः तूर्णं खड्गं उत्खाय पश्चात् करिकरकदलीकाननच्छेदलीलां कर्तुं प्रवृत्तः ॥ स्रग्धरा

He in the form of a foot soldier, at first crushing the infantry just by *dint of grinding it with his chest, dipersing the cavalry afar in* all directions like a herd of frightened antelopes with his downpours of arrows, throwing all the weapons all over the place and thereafter drawing out a sword, began to cut down the grove of plantain trees in the shape of the elephants' trunks in a sportive mood

एवं बलत्रितयमाकुलमेक एव
कुर्वन्कृपाणकिरणच्छुरितांसकूटः ।
शस्त्रप्रहारशतजर्जरितोरुवक्षाः
श्रान्तश्चिराद्विनिहतो युधि विन्ध्यकेतुः ॥ १० ॥

राजा — रुमण्वन्, सत्पुरुषोचितं मार्गमनुगच्छतो यत्सत्यं व्रीडिता एव वयं विन्ध्यकेतोर्मरणेन ।

1 त्रितय triad 2 बलत्रितयम्=बलस्य त्रितयम् पत्तितुरगकरिसैन्यमिति 3 आकुल a confused, troubled. 4 कृपाण sword, knife 5 किरण ray 6 छुरित cut, PP √ छुर 1P 7 अंस· shoulder 8 कूट portion, quarter, dwelling 9 कृपाणकिरणच्छुरितांसकूट =कृपाणानां किरणैः छुरितौ असकूटौ यस्य स 10 शस्त्रम् weapon 11 प्रहार stroke 12 शतम् hundred 13 जर्जरित a shattered 14 वक्षस् n breast 15 शस्त्रप्रहारशतजर्जरितोरुवक्षा = शस्त्राणां प्रहाराः तेषां शतेन जर्जरितं उरुवक्षः यस्य स 16 श्रान्त tired, wearied, PP √ श्रम् 4P 17 चिरात् after a long time 18 विनिहत violently killed, PP विनि + √ हन् 2P 19 युध् f (loc s युधि) battle 20 सत्पुरुष good or great man 21 उचित suitable, praiseworthy 22 मार्ग path 23 अनुगच्छत (gen s m अनुगच्छत) following after, Pres Part अनु + √ गम 1P 24 व्रीडित ashamed, PP √व्रीड् 25 मरणम् death

एव एक एव बलत्रितयम् आकुल कुर्वन् कृपाणकिरणच्छुरितांसकूट शस्त्रप्रहारशतजर्जरितोरुवक्षा चिरात् श्रान्त विन्ध्यकेतु युधि विनिहत ॥ वसन्ततिलका

In this way troubling our triple army, single-handed, with his shoulders cut by the glittering swords and his chest shattered by a hundred strokes of weapons, becoming wearied after a long time, Vindhyaketu was violently killed in battle

King —O Rumanvān, it is true that we are ashamed of ourselves at the death of Vindhyaketu following the praiseworthy path of great men

रुमण्वान् — देव, त्वद्विधानामेव गुणैकपक्षपातिनां रिपोरपि गुणाः प्रीति जनयन्ति ।

राजा — विजयसेन, अप्यस्ति विन्ध्यकेतोरपत्यम् । यत्रास्य परितोषस्य फलं दर्शयामि ।

विजयसेनः— देव, इदमपि विज्ञापयामि । एवं सबन्धुपरिवारे हते विन्ध्यकेतौ तमनुसृतासु सहधर्मचारिणीषु विन्ध्यशिखराश्रितेषु जनपदेषु शून्यभूते तत्स्थाने ।

1 विध kind, sort fold 2 त्वद्विधानाम् = तव विधानाम् 3 एकपक्षपातिन् a. (gen p m एकपक्षपातिनाम्) solely adhering to siding with 4 रिपु m (gen s रिपो) foe, enemy 5 प्रीति f love, admiration 6 जनयन्ति they generate, occasion, णिजन्तात्लट् √ जन् 4A 7 अपत्यम् offspring 8 यत्र = अपत्य 9 परितोष gratification, satisfaction 10 फलम fruit 11 दर्शयामि show, णिजन्तात्लट् √ दश 1P. 12 इदम् n acc s this 13 बन्धु relation 14 परिवार retinue, followers 15 सबन्धुपरिवारे विन्ध्यकेतौ हते (loc abs) when Vindhyaketu was killed along with his relatives and retinue 16 सबन्धुपरिवारे is the adjective qualifying विन्ध्यकेतौ 17 तम = विन्ध्यकेतुम्, 18 अनुसृत (loc p f अनुसृतासु) followed, PP अनु + √ सृ 1 3P 19 सहधर्मचारिणी f wife 20 सहधर्मचारिणीषु तमनुसृतासु (loc abs) when his wives did follow suit 21 शिखर m n summit top 22 आश्रित (loc. p m आश्रितेषु) a resorting to 23 जनपद subject country 24 जनपदेषु विन्ध्यशिखराश्रितेषु (loc abs) when his subjects resorted to the summits of the विन्ध्य range 25 शून्यभूत become empty 26 तत्स्थाने शून्यभूते (loc abs) when the spot became desolate

Rumanvān—Sire ! Only in persons like you who are solely attached to virtue, even the merits of an enemy generate admiration

King —O Vijayasena, has Vindhyaketu left behind him any offspring, to whom I may display the fruit of my satisfaction with him ?

Vijayasena—Your Majesty, I inform you about this, too When Vindhyaketu was killed along with his relatives and retinue, and his consorts followed suit his subjects taking refuge on the summits of the Vindhya range, and when the place became desolate

हा तात हा तातेति कृतकृपणप्रलापा विन्ध्यकेतोर्वेश्मन्याभि-
जात्यानुरूपा कन्यका तद्दुहितेत्यस्माभिरानीता द्वारि तिष्ठति । तां प्रति देवः प्रमाणम् ।

राजा — यशोधरे, गच्छ गच्छ । त्वमेव वासवदत्तायाः समर्पय । वक्तव्या च देवी 'भगिनीबुद्ध्या त्वयैव सर्वदा द्रष्टव्या । गीतनृत्तवाद्यादिषु विशिष्टकन्यकोचितं सर्वं शिक्षयितव्या । यदा वरयोग्या भविष्यति तदा मां स्मारये'ति ।

1 हा ah, alas ! 2 तात father 3 कृत made, done ; PP. √ कृ 8U 4 कृपण pitiable 5 प्रलाप lamentation 6 कृतकृपणप्रलापा = कृतः कृपणः प्रलापः यया सा 7 वेश्मन् n (loc. s वेश्मनि) house 8 आभिजात्यम् noble birth 9 अनुरूप a resembling, suitable 10 आभिजात्यानुरूपा=आभिजात्यस्य अनुरूपा 11 तत्=तस्य, his 12 दुहितृ f (दुहिता nom s) daughter 13 आनीत (nom. s f आनीता) brought, PP. आ + √ नी 1U. 14 द्वार् f (loc s द्वारि) door. 15 ताम् (acc) her 16 प्रति toward 17 प्रमाणम् authority 18 गच्छ go thou ! लोट् √ गम् 1P 19 समर्पय offer thou ! णिजन्तात्लोट् सम् + √ ऋ 1 3 P 20 वक्तव्य (nom s f वक्तव्या) to be said ; Pot PP √वच् 2P 21 देवी queen 22 भगिनी f sister 23 त्वया = वासवदत्तया. 24 सर्वदा at all times, always 25 द्रष्टव्य to be seen, Pot PP. √ दृश् 1P 26 गीतम् singing 27 नृत्तम् dancing 28 वाद्यम् instrumental music. 29 आदि a (loc p आदिषु) it is used mostly at the end of compounds denoting 'and so on, etc' 30 विशिष्ट a distinguished, prominent 31 शिक्षयितव्य to be educated ; caus Pot. PP √ शिक्ष् 1A 32 यदा—तदा when—then 33 वरयोग्या fit for marriage (or a bride-groom) 34 भविष्यति she will be, लृट् √ भू 1P 35 स्मारय remind thou ! णिजन्तात्लोट् √स्मृ 1P

we found a girl presumably of noble stock in the house of Vindhyaketu lost in pitiable lamentation, crying : "Ah father ! ah father." Thinking her to be his daughter we have brought her here Now she stands at the door. Your Majesty has the authority towards her

King —O Yashodharā, go, go and offer her to Vasavadatta ! And send my message to the queen thus,—' With a sisterly feeling you should look after her at all times, and teach her everything in singing, dancing, in instrumental music and so forth as befits a distinguished girl. Do remind me when she becomes fit for marriage."

**प्रतीहारी** — यद्देव आज्ञापयति । (इति निष्क्रान्ता) (नेपथ्ये वैतालिक)

लीलामज्जनमङ्गलोपकरणस्नानीयसंपादिनः
सर्वान्तःपुरवारविभ्रमवतीलोकस्य ते संप्रति ।
आयासस्खलदंशुकाव्यवहितच्छायावदातैः स्तनै-
रुत्क्षिप्तापरशातकुम्भकलशेवालंकृता स्नानभूः ॥ ११ ॥

**राजा** — (ऊर्ध्वमवलोक्य) अये कथं नभोमध्यमध्यास्ते भगवान् सहस्रदीधितिः। संप्रति हि

1 वैतालिक bard, *minstrel* 2 लीला f pleasure. 3 मज्जनम् ablution, bath 4 मङ्गल auspicious 5 उपकरणम् material 6 स्नानीयम् perfume powder 7 सपादिन् a preparing, obtaining 8 लीलामज्जनमङ्गलोपकरणस्नानीयसपादिन = लीलामज्जने मङ्गलोपकरणानि स्नानीयानि तेषा सम्पादिन 9 अ त पुरम् harem 10 वारविभ्रमवती f courtezan, harlot 11 लोक people (in plural sense) 12 सर्वान्त पुरवारविभ्रमवतीलोकस्य = सर्वस्य अ त पुरनिवासिन विभ्रमवतीलोकस्य •13 ते = तव thy 14 सप्रति ind now 15 आयास effort 16 स्खलत stumbling i e dropping, Pres Part √ स्खल् 1P 17 अशुकम् cloth, garment 18 अव्यवहित uncovered bare 19 छाया f complexion 20 अवदात a beautiful, pure 21 आयासस्खलदशुकाव्यवहितच्छायावदातै = आयासेन स्खलद्भि अशुकै अव्यवहिता छाया (येषा तै ) तया अवदातै 22 स्तन (ins p स्तनै ) breast, udder 23 उत्क्षिप्त held up, PP. उद् + √ क्षिप् 6P 24 अपर matchless 25 शातकुम्भम् gold 26 कलश m n pitcher 27 उत्क्षिप्तापरशातकभकलशा = उत्क्षिप्ता अपरे शातकभकलशा यस्या सा 28 अलकृत decorated, PP. अलम् +√ कृ 8U 29 स्नानभू f bathing place 30 नभस् n sky 31 मध्यम् centre zenith 31 सहस्रदीधिति m the sun 32 अध्यास्ते he occupies, sits, अधि +√ आस् 2A

सप्रति त लीलामज्जनमङ्गलोपकरणस्नानीयसपादिन सर्वान्त पुरवारविभ्रमवतीलोकस्य आयासस्खलद शुकाव्यवहितच्छायावदातै स्तनै उत्क्षिप्तापरशातकुम्भकलशा इव स्नानभू अलकृता ॥ शार्दूलविक्रीडितम्

Door-keeper—I will do so Sire ! (Exit)

(Behind the curtain a bard recites)

Now the bathing place seems to be decorated, like a matchless gold pitcher held up with their breasts beautiful on account of the complexion revealed by the garments slipping off due to their physical effort when the entire courtezans of thy harem are preparing some auspicious materials and scented powders for a pleasure bath

King —(looking up) O really, the thousand rayed lord sun occupies the zenith in the sky. For now

आभात्यर्कांशुतापक्वथदिव शफरोद्वर्तनैर्दीर्घिकाम्भ-
श्छत्राभं नृत्तलीलाशिथिलमपि शिखी बर्हभारं तनोति ।
छायाचक्रं तरूणां हरिणशिशुरुपैत्यालवालाम्बुलुब्धः
सद्यस्त्यक्त्वा कपोलं विशति मधुकरः कर्णपाली गजस्य ॥ १२ ॥

रुमण्वन्, उत्तिष्ठोत्तिष्ठ । प्रविश्याभ्यन्तरमेव कृतयथोचितक्रियाः सत्कृत्य विजयसेनं कलिङ्गोच्छित्तये प्रेषयामः ।

(इति निष्क्रान्ता सर्वे)

## ❀ समाप्तः प्रथमोऽङ्कः ❀

1 आभाति it shines, appears आ + √ भा 2P 2 अर्क sun 3 अंशु m ray 4 ताप heat 5 क्वथत boiling Pres Part √ क्वथ 1P 6 शफर small fish 7 उद्वर्तनम् turning to and fro 8 दीर्घिका f lake, well 9 अम्भस n water 10 अर्कांशुतापक्वथत = अर्कस्य अंशव तेषा तापेन क्वथत 11 छत्रम parasol 12 आभा f semblance 13 छत्राभम = छत्रस्य आभा यस्य तम 14 शिथिल a loosened, languid 15 नृत्तलीलाशिथिलम = नृत्तस्य लीलया शिथिलम 16 अपि though 17 शिखिन् m (nom s शिखी) peacock 18 बर्ह m n peacock's tail 19 भार burden 20 तनोति it spreads लट् √ तन् 8U 21 छाया f shade 22 चक्रम् circle 23 छायाचक्रम round shade 24 तरु m (gen p तरूणाम्) tree 25 शिशु m child young 26 उपैति it approaches उप + √ इ 2P 27 आलवालम basin around the trunk of a tree 28 अम्बु n water 29 लुब्ध greedy (from √ लुभ 4P) 30 सद्यस at once 31 त्यक्त्वा having abandoned, gerund √ त्यज 1P 32 कपोल cheek 33 मधुकर bee 34 कर्णपाली f tip of ear 35 गज elephant 36 उत्तिष्ठ rise thou ! लोट् उत् + √ स्था 1P 37 अभ्यन्तरम interior, apartment 38 क्रिया f act, duty 39 सत्कृत्य having honoured gerund सत् + √ कृ 8U 40 उच्छित्ति f (dat s उच्छित्तय) destruction 41 प्रेषयाम we send प्र + √ इष् 1U 4P

शफरोद्वर्तन अर्कांशुतापक्वथत् इव दीर्घिकाम्भ आभाति नृत्तलीलाशिथिल अपि छत्राभ बर्हभार शिखी तनोति आलवालाम्बुलुब्ध हरिणशिशु तरूणा छायाचक्र उपैति सद्य गजस्य कपोल त्यक्त्वा मधुकर कर्णपाली विशति ॥ स्रग्धरा

The lake water appears to be boiling with the fish darting to and fro and with the heat of the solar rays The peacock spreads his parasol like plumage, though languid in a sportive dance Greedy for the water of the basin around the trunk of a tree the fawn jumps into the circular shade of trees The bee flies into the tip of the elephant's ear instantly abandoning its cheek

Well Rumanvan, rise rise ! Let us enter into the interior and attend to our duties as considered appropriate and after honouring Vijayasena send him for the destruction of the King of the Kalingas

(Exeunt omnes) *Here Ends Act One*

# द्वितीयोऽङ्कः

(तत प्रविशति विदूषक)

विदूषक :— ननु भणितोऽस्मीन्दीवरिकया यथा 'आर्य, उपवासनियम-स्थिता देवी वासवदत्ता स्वस्तिवायननिमित्तं शब्दापयेत्' इति। तद्यावद्धारागृहोद्यानदीर्घिकायां स्नात्वा देवीपार्श्वं गत्वा कुक्कुटवाद करिष्यामि। अन्यथा कथमस्माभिः सदृशा ब्राह्मणा राजकुले प्रतिग्रहं कुर्वन्ति। (नेपथ्याभिमुखमवलोक्य) कथमेष प्रियवयस्योऽद्य देव्या विरहोत्कण्ठाविनोदननिमित्तं धारागृहोद्यानमेव प्रस्थितः। तद्यावद्वयस्येन सहैव गत्वा यथोदितमनुष्ठास्यामि।

1 ननु certainly 2 भणित spoken, PP √भण 1P 3 आय noble 4 उपवास religious fast 5 नियम vow, observance 6 स्थित a PP stood, abiding by √स्था 1P 7 स्वस्तिवायनम a kind of a religious rite in which gifts and sweetmeats are presented to Brahmins 8 निमित्तम cause, reason on account of, for (when adverbially used) 9 शब्दापयेत she will or may call, णिजन्तादविधिलिङ् नामधातु √शब्दाय 10 धारागहम shower house 11 उद्यानम garden 12 धारागृहोद्यानदीर्घिकायाम = धारागृहोद्यानस्य दीर्घिकायाम 13 स्नात्वा having bathed, gerund √स्ना 2P 14 पार्श्वम near to, to the side of 15 कुक्कुटवाद a cock's cry 16 करिष्यामि I will make, do लृट √कृ 8U 17 अन्यथा otherwise 18 सदृश similar 19 ब्राह्मण a man of the Brahmin caste, the highest of the Hindu caste system 20 प्रतिग्रह acceptance of a gift 21 कुर्वन्ति they do, लट √कृ 8U 22 प्रियवयस्य dear friend, i e the king 23 अद्य today 24 विरह separation 25 उत्कण्ठा f anxiety longing 26 विनोदनम diversion 27 प्रस्थित set out, PP प्र + √स्था 1P 28 उदित said, PP उद + इ 2P 29 अनुष्ठास्यामि I will do, लृट अनु + √स्था 1P

## ACT II

(Then enters the clown)

Clown —Certainly I have been communicated by Indivarika thus,—"Sir, Her Majesty Queen Vasavadatta, who is abiding by a vow of fast, calls you for the observance of a Svastivayana rite" So now after taking a bath in the pond of the garden of the shower house I will *repair to the side of the queen and utter a cock s cry* Otherwise, how will the Brahmins like us expect a gift in the Royal Household? (Turning towards the curtain) How now my dear friend is heading just for the shower house garden to divert the queen in her anxiety of separation So now accompanying my friend thither I will do as I said above

(ततः प्रविशति सोत्कण्ठो राजा)

राजा — क्षामां मङ्गलमात्रमण्डनभृतं मन्दोद्यमालापिनी-
मापाण्डुच्छविना मुखेन विजितप्रातस्तनेन्दुद्युतिम् ।
सोत्कण्ठां नियमोपवासविधिना चेतो ममोत्कण्ठते
तां द्रष्टुं प्रथमानुरागजनितावस्थामिवाद्य प्रियाम् ॥ १ ॥

विदूषकः— (उपसृत्य) स्वस्ति भवते । वर्धतां भवान् ।

1 सोत्कण्ठ anxious, very eager 2 मण्डनम् ornament 3 भृत् a (acc s f भृतम्) bearing, possessing 4 मङ्गलमात्रमण्डनभृतम् = मङ्गलमात्र मण्डन भृतम् 5 मन्द slow 6 उद्यम exertion 7 आलापिन् a (acc. s f आलापिनीम्) talking, speaking 8 मन्दोद्यमालापिनीम् = मन्द उद्यमेन आलापिनीम् 9 आ (समासेषु) slightly, a little 10 पाण्डु pale 11 छवि f complexion, colour 12 आपाण्डुच्छविना=आपाण्डु छविः यस्य तेन 13 विजित defeated, PP वि + √जि 1P. 14 प्रातस्तन a matutinal 15 इन्दु m. moon 16 द्युति f lustre, hue, 17 विजितप्रातस्तनेन्दुद्युतिम् = विजिता प्रातस्तनस्य इन्दोः द्युतिः यया तादृशीम्, 18 विधि m (ins s विधिना) religious rule 19 नियमोपवासविधिना = नियमस्य उपवासस्य च विधिना 20 चेतस् n mind 21 उत्कण्ठते it is anxious for, उद् कण्ठ् 1A 22 द्रष्टुम् to see, inf √दृश् 1P 23 अनुराग love, passion 24 जनित occasioned caus PP. √ जन 4A 25 अवस्था f state, condition 26 प्रथमानुरागजनितावस्थाम् = प्रथमेन अनुरागेण जनिता अवस्था यस्याः सा 27 प्रिया f beloved woman 28 स्वस्ति ind (+ dat ) hail !

नियमोपवासविधिना क्षामां मङ्गलमात्रमण्डनभृतं मन्दोद्यमालापिनीं आपाण्डुच्छविना मुखेन विजितप्रातस्तनेन्दुद्युतिं प्रथमानुरागजनितावस्था इव सोत्कण्ठां तां प्रियां द्रष्टुं अद्य मम चेतः उत्कण्ठते ॥ शार्दूलविक्रीडितम्

(Then enters the eager king )

King —Today my mind is anxious to see my beloved one, who is emaciated through her observance of penance and fast wearing only a simple auspicious decoration, speaking slowly through effort, defeating the lustre of the matutinal moon with her face of a slightly pale hue, and who is anxious as if she were in the state as occasioned by her first love

Clown —(advancing) Hail to you ! May Your Honour prosper !

राजा — (विलोक्य) वसन्तक, कस्मात्प्रहृष्ट इव लक्ष्यसे ।

विदूषक :— अर्चति खलु देवी ब्राह्मणम् ।

राजा — यद्येवं ततः किम् ।

विदूषक :— (सगर्वम्) भोः, ईदृशः खलु ब्राह्मणो यश्चतुर्वेदपञ्चवेदषड्वेदब्राह्मणसहस्रपर्याकुले राजकुले प्रथममहमेव देवीसकाशात्स्वस्तिवायनं लभे ।

राजा — (विहस्य) वेदसंख्ययैवावेदितं ब्राह्मण्यम् । तदागच्छ महाब्राह्मण । धारागृहोद्यानमेव गच्छावः ।

1 विलोक्य having gazed; gerund वि + √लोक् 1A. 10U. 2 कस्मात् why? 3 प्रहृष्ट rejoiced, been pleased; PP. प्र + √हृष् 4P. 4 लक्ष्यसे thou art seen, thou appearest; कर्मणि लट् √लक्ष् 1A. 10U. 5 अर्चति she honours, worships; √अर्च् 1U 6 यदि एवम् if it is so. 7 गर्व arrogance, pride. 8 सगर्वम् ad. arrogantly, proudly. 9 ईदृश a such as this, like this 10 य rel. Pron. he who 11 वेद most ancient Hindu Scripture, there are four Vedas, i e. ऋग्वेद, यजुर्वेद सामवेदः and अथर्ववेद that was added at a later stage to the foregoing three Vedas 12 चतुर् four. 13 पञ्च five. 14 षट् six. 15 सहस्रम् one thousand. 16 पर्याकुल confused, filled with 17 चतुर्वेदपञ्चवेदषड्वेदब्राह्मणसहस्रपर्याकुले = चतुर्वेदज्ञा पञ्चवेदज्ञा. षड्वेदज्ञाः ब्राह्मणा तेषा सहस्रेण (बहुभि ब्राह्मणै) पर्याकुले. 18 प्रथमम् ad. at first 19 देवीसकाशात् from the queen 20 लभे I obtain; √लभ् 1A. 21 विहस्य having laughed, gerund वि + √हस् 1P. 22 सख्या f. (ins s. सख्यया) number, enumeration. 23 आवेदित informed, caus. PP. आ + √विद् 1.2P. 24 ब्राह्मण्यम् the state, status, or rank of a Brahmin.

King —(gazing) Vasantaka, why do you appear joyful?
Clown —Really the queen honours a Brahmin.
King —If so, what then?
Clown —(arrogantly) Sir, I who am a Brahmin like this will be the first one to receive a present of *Svastivāyana from the queen herself in the* Royal household which is filled with a thousand Brahmins well-acquainted with the four Vedas, five Vedas and six Vedas.
King —(laughing) Your enumeration of the Vedas has revealed your Brahmanic status. Well, now come, you great Brahmin! Let us just proceed to the shower house-garden

विदूषक :— यद्भवानाज्ञापयति ।

राजा — गच्छाग्रतः ।

विदूषक :— भो एहि गच्छावः । (परिक्रम्यावलोक्य च) भो वयस्य, पश्य पश्य प्रविरतपतद्विविधकुसुमसुकुमारशिलातलोत्सङ्गस्य परिमलनिलीनमधुकरभरभग्नवकुलमालतीलताजालकस्य कमलगन्धग्रहणोद्दाममारुतपर्यवबुद्धवन्धूकवन्धनस्याविरलतमालतरुपिहितातपप्रसारस्य धारागृहोद्यानस्य सश्रीकताम् ।

1 अग्रतस् ind. in front, ahead 2 पश्य behold thou! लोट् √दृश् 1P. 3 अविरत a. ad (— तम्) perpetual, perpetually 4 पतत् falling down; pres. part. √ पत् 1P. 5 विविध various. 6 कुसुमम् flower. 7 सुकुमार very soft, tender. 8 शिलातल m. n. stone-slab. 9 उत्सङ्गः interior, surface. 10 अविरतपतद्विविधकुसुमसुकुमारशिलातलोत्सङ्गस्य=अविरत पतद्भि विविधैः कुसुमैः सुकुमारः शिलातलस्य उत्सङ्गः यस्मिन् तस्य. 11 परिमलः perfume. 12 निलीन adhered, absorbed; PP. नि+√ली 4A. 9P. 13 भर. burden, weight 14 भग्न broken, PP. √भञ्ज् 7P. 15 बकुल. the name of a flower tree. 16 मालती f. a jasmine. 17 लता f. creeper. 18 जालकम् bud, multitude. 19 लता it also means a branch. 20 परिमलनिलीनमधुकरभरभग्नबकुलमालतीलताजालकस्य= परिमललोभेन निलीनानां मधुकराणां भरेण भग्नं बकुलस्य मालत्याः लताजालकं यस्मिन् तस्य. 21 कमलम् lotus. 22 गन्धः scent. 23 ग्रहणम् taking, carrying. 24 उद्दाम strong. 25 मारुतः wind. 26 पर्यवबुद्ध awakend; PP. पर्यव=√बुध् 1U. 4A. 27 बन्धनम् stem. 28 कमलगन्धग्रहणोद्दाममारुतपर्यवबुद्धबन्धूकबन्धनस्य=कमलगन्धस्य ग्रहणे उद्दामाः मारुताः तैः पर्यवबुद्धानि बन्धूकस्य बन्धनानि यस्मिन् तस्य. 29 अविरल dense. 30 तमाल-तरु m. Tamāla tree. 31 पिहित shut, barred; PP पि+√धा 3U. 32 प्रसारः diffusion 33 सश्रीकता f. beauty. 34 अविरलतमालतरुपिहितातपप्रसारस्य=अविरलैः तमालतरुभिः पिहितः आतपप्रसारः यस्मिन् तस्य.

Clown —Yes, as Your Honour commands.

King – Go ahead.

Clown —Sir, come along. (Pacing about and beholding) O friend, behold, behold the beauty of the shower-house garden where the surface of the stone-slab is softened by the multifarious blossoms perpetually falling down, the branches of the Bakula and the jasmine are broken by the weight of the bees indulged in gathering perfumed honey, the stems of the Bandhūka tree are violently agitated by the winds rash in taking up the fragrance of the lotuses, and the dense wood of the Tamāla trees bars the arrows of the sun!

राजा — वयस्य; साध्वभिहितम् । अत्र हि

वृन्तैः क्षुद्रप्रवालस्थगितमिव तलं भाति शेफालिकानां।
गन्धः सप्तच्छदानां सपदि गजमदामोदमोहं करोति ।
एते चोन्निद्रपद्मच्युतबहलरजःपुञ्जपिङ्गाङ्गरागा
गायन्त्यव्यक्तवाचः किमपि मधुलिहो वारुणीपानमत्ताः ॥२॥स्रग्धरा

विदूषकः — भो वयस्य, एतमपि तावत्पश्य पश्य य एषोऽविरलपतत्कुसुमनिकरोऽद्यापि पत्रान्तरगलद्वर्षावसानसलिलबिन्दुरिव लक्ष्यते सप्तपर्णपादपः ।

1 अभिहित spoken ; PP. अभि + √धा 3U. 2 वृन्तम् stalk. 3 क्षुद्र small. 4 प्रवाल. coral tree. 5 स्थगित filled with , PP. √स्थग् 1P. 6 शेफालिका f. a flower plant. 7 सप्तच्छद , सप्तपर्ण a flower tree. 8 सपदि ind instantly 9 मद: ichor 10 आमोद fragrance. 11 मोह confusion. 12 उन्निद्र full-blown 13 पद्मम् lotus. 14 च्युत. fallen off ; PP √च्यु 1A 15 बहल thick, abundant 16 रजस् n. pollen. 17 पुञ्ज heap 18 पिङ्ग reddish-brown. 19 अङ्गम् limb, body. 20 राग colour. 21 उन्निद्रपद्मच्युतबहलरज पुञ्जपिङ्गाङ्गरागाः = उन्निद्रेभ्य पद्मेभ्य च्युतं बहलरजसा पुञ्जं पिङ्ग अङ्गाना राग येषा ते (मधुलिह ) 22 गायन्ति they hum, sing ; √गै 1P 23 अव्यक्त indistinct 24 वाच् f speech. 25 अव्यक्तवाचः=अव्यक्ता वाच येषा ते 26 किमपि something somehow. 27 मधुलिह् m. bee 28 वारुणी f. wine 29 पानम् drink. 30 मत्त intoxicated ; PP. √मद् 4P. 31 निकर heap, cluster. 32 पत्रम् petal, leaf. 33 अन्तरम् interior. 34 गलत् dropping ; Pres Part √गल् 1P. 35 वर्ष-अवसानम् end of the rain. 36. सलिलम् water. 37 बिन्दु m drop. 38 पत्रान्तरगलद्वर्षावसानसलिलबिन्दुः = पत्राणा अन्तरेषु गलन्त वर्षावसाने सलिलबिन्दवः इव कुसुमानि यस्य स 39 पादप tree

King —O friend, you have well spoken. For here on account of the stalks of the Shephālikās the surface of the soil appears as if it were covered with little coral trees, the scent of the Saptacchadas instantaneously confuses the fragrance of the elephant-ichor, and these honey-lickers (i e bees), as if intoxicated with a drink of wine, are singing something in an indistinct tone, with their limbs reddish brown in hue besmeared with heaps of the thick pollen dropped from the lotuses in full bloom.

Clown —Ho my friend, behold, behold this Saptaparna tree, too, whose clusters of blossoms densely falling down look like drizzling drops falling onto their petals at the end of a rain!

राजा — वयस्य, सम्यगुत्प्रेक्षितम् । बह्वेव सदृशं जलदसमयस्य ।

तथा हि

विभ्राणा मृदुतां शिरीषकुसुमश्रीहारिभिः शाद्वलैः
सद्यः कल्पितकुट्टिमा मरकतक्षोदैरिव क्षालितैः ।
एषा संप्रति बन्धनाद्विगलितैर्बन्धूकपुष्पोत्करै-
रद्यापि क्षितिरिन्द्रगोपकशतैश्छन्नेव संलक्ष्यते ॥ ३ ॥

1 सम्यक् ind. *properly, rightly.* 2 उत्प्रेक्षित compared; PP. उद्+√प्र ईक्ष् 1A. 3 उत्प्रेक्षितम् (त्वया) you have compared (भावे प्रयोग.) 4 बहु a. much. 5 सदृश a. like, resembling. 6 जलदः cloud. 7 समय time, season. 8 जलदसमयः cloud season, *viz.* rainy season. 9 तथा हि whereas, for. 10 बिभ्राण (f. nom. s. बिभ्राणा) bearing; pres. part.√भृ 3U. 11 मृदुता f. tenderness. 12 शिरीष. the name of a tree, n. its flower 13 श्री beauty. 14 हारिन् a. (ins. pn. हारिभि.) captivating, surpassing. 15 शाद्वलम् lawn, meadow. 16 कल्पित fashioned, arranged; caus. pp. √क्लृप् 1A. 17 कुट्टिम m. n. pavement 18 कल्पितकुट्टिमा = कल्पित कुट्टिम यस्या सा 19 मरकतम् emerald. 20 क्षोद. *any pounded substance, powder, piece.* 21 क्षालित washed, purified; pp. √क्षल् 10U. 22 एषा क्षितिः this ground (f.) 23 विगलित dropped; pp. वि + √गल् 1P. 24 पुष्पम् flower. 25 उत्कर. pile. 26 इन्द्रगोपकः a kind of red and white insect. 27 शतम् hundred. 28 छन्न covered, veiled; pp. √छद् 10U.

शिरीषकुसुमश्रीहारिभिः शाद्वलैः मृदुता बिभ्राणा क्षालितैः मरकतक्षोदैः सद्यः कल्पितकुट्टिमा इव एषा क्षितिः संप्रति बन्धनात् विगलितै. बन्धूकपुष्पोत्करै. इन्द्रगोपकशतैः छन्ना इव अद्य अपि संलक्ष्यते ॥ शार्दूलविक्रीडितम्

King —*Friend, you have rightly compared It very much resembles the* rainy season Whereas,—This soil bearing a tenderness due to the lawns that surpass the grace of the Shirişa blossom and resembling a pavement now fashioned with the purified gravels of emerald seems even now to be bestrewn with many a hundred red and white insects, Indragopakas on account of the piles of the Bandhūka flowers at present dropped from the stems.

( तत प्रविशति चेटी )

चेटी — आज्ञाप्तास्मि देव्या वासवदत्तया 'हञ्जे इन्दीवरिके, अद्य मया अगस्त्यमहर्षयेऽर्घ्यं दातव्यम् । तद्गच्छ त्वम् । शेफालिकाकुसुममालां लघु गृहीत्वागच्छ । एषाप्यारण्यका धारागृहोद्यानदीर्घिकाया यावदेव विकासितानि कमलानि नास्ताभिलाषिणा सूर्येण मुकुलाय्यन्ते तावदेव लघ्ववचित्यागच्छतु' इति । एषा तपस्विनी तां दीर्घिकां न जानाति । तद्गृहीत्वा तां गमिष्यामि । (नेपथ्याभिमुखमवलोक्य) इत इत आरण्यके, एहि । (तत प्रविशत्यारण्यका)

1 आज्ञाप्त commanded, ordered, caus PP आ+√ज्ञा 9U 2 हञ्जे (a voc particle) O maid! 3 महर्षि m (dat s महर्षये) great seer, sage. 4 अर्घ्यम् venerable offering, or oblation 5 दातव्य to be given, pot PP √दा 3U. 6 तत् so 7 माला f garland 8 शेफालिकाकुसुममालाम्=शेफालिकानामधयानि कुसुमानि तेषा मालाम् 9 लघु ad swiftly, quickly 10 गृहीत्वा having taken, gerund √ग्रह् 9U 11 आगच्छ come thou! लोट आ+√गम 1P 12 यावत् तावत् while 13 विकासित (nom and acc p n विकासितानि) opened bloomed, PP वि+√कास् 1A 14 अस्त sunset the western mountain over which the sun is supposed to set 15 अभिलाषिन् ins s m अभिलाषिणा) longing for 16 सूर्य the sun 17 मुकुलाय्यन्ते they are closed; णिजन्तात्कर्मणि लट नामधातु √मुकुलय् 18 अवचित्य having gathered, gerund अव+√चि 5U 19 तपस्विनी f poor girl 20 जानाति she knows, √ज्ञा 9U 21 गमिष्यामि I shall go, लृट् √गम् 1P 22 इतम् ind hither 23 एहि go thou (but it means 'come!') लोट् √इ 2P

(Then enters a maid attendant )

Maid —"O maid Indivarika, to day I am to offer an oblation to the great seer Agastya So do you go and quickly bring a garland of Shephalikā flowers! Let this Āranyaka, too, gather some blooming lotuses of the pond of the shower-house garden before they are shut up by the sun longing to set and bring them quickly," thus ordered I am by Queen Vāsavadattā This poor girl does not know the very pond So I shall take her with me (Looking at in the direction of the curtain) Come hither, Āranyakā! (At this moment appears Āranyakā )

आरण्यका — (सबाष्पोद्वेगमात्मगतम्) तथा नाम तादृशे वंश उत्पन्नयान्यजनमाज्ञाप्य स्थितया सांप्रतं परस्य मयाज्ञाप्तिः कर्तव्येति नास्ति खलु दुष्करं दैवस्य। अथवा ममैवैष दोषः। येन जानत्यापि न व्यापादित आत्मा। तत्किं सांप्रतं करिष्यामि। अथवा दुष्करमिदानीं मया चिन्तितम्। वरमेवैतदपि। न पुनरात्मनो महार्घं वंशं प्रकाशयन्त्या मया लघूकृत आत्मा। तत्का गतिः। यथाभणितमनुष्ठास्यामि।

चेटी — इत एह्यारण्यके।

आरण्यका — इयमागच्छामि। (श्रम नाटयन्ती) हञ्जे, दूरे किमद्यापि दीर्घिका।

1 वाष्प m n tear 2 उद्वेग agitation 3 सबाष्पोद्वेगम् ad emotionally in tears 4 आत्मगतम् (a dramatic term) to oneself only 5 नाम ind indeed 6 तादृश of such kind 7 वंश race, family 8 उत्पन्न born PP उद् + √पद् 4A. 9 अन्यजन another people 10 आज्ञाप्य having ordered, gerund आ+√ज्ञा 9U 11 स्थित ins s f स्थितया) stood, lived, PP √स्था 1P 12 सांप्रतं ind now. 13 पर another 14 आज्ञाप्ति f order 15 कर्तव्य to be done, Pot PP √कृ 8U 16 दुष्कर, a difficult to do, n difficulty 17 दैवम् fate 18 अथवा yet, or 19 दोष sin, fault 20 येन whereas 21 जानत् (ins s f जानत्या) knowing, Pres Part √ज्ञा 9U 22 व्यापादित killed, caus PP व्या + √पद् 4A 23 आत्मन् m (nom s आत्मा) self 24 चिन्तित thought, PP √चिन्त 10U 25 वरम् it is better 26 पुनर् but 27 प्रकाशयन् (ins s f प्रकाशयन्त्या) disclosing, caus Pres Part प्र + √काश् 1A. 28 लघूकृत slighted, PP लघू+√कृ 8U 29 का गति f what help, what alternative? 30 अनुष्ठास्यामि I will do, लृट् अनु+√स्था

Āranyakā—(emotionally shedding tears, to herself) Indeed, born in such family and having lived a life, commanding other people, I have now to execute other's command really fate has nothing impossible to do Or this may be my own fault, since I did not kill myself, though I knew about it So what shall I do now? Perhaps I have thought of a difficult thing just now It is better, even But I have not slighted my own self by dint of revealing my respectable origin. So what alternative is there? I will do as I was told

Maid —Come hitherward, Āranyakā!

Āranyakā—I am coming. (Expressing fatigue) O maid, is the pond still far off?

चेटी — एषा शेफालिकागुल्मान्तरिता। तदेहि। अवतरावः। (अवतरणं नाटयतः)

राजा — वयस्य, किमन्यदिव चिन्तयसि। ननु ब्रवीमि। बह्वेव सदृशं जलदसमयस्य। (इति विभ्राणा मृदुतामित्यादि पुनः पठति)

विदूषकः — (सक्रोधम्) भोः, त्वं तावदेतदन्यच्च पश्यन्नुत्कण्ठानिर्भरं विनोदयस्यात्मानम्। मम पुनर्ब्राह्मणस्य स्वस्तिवायनवेलातिक्रामति। तत्तावदहं त्वरितं दीर्घिकायां स्नात्वा देव्याः सकाशं गमिष्यामि।

राजा — ननु मूर्ख, पारं गता एव वयं दीर्घिकायाः। एवमनेकेन्द्रियसुखातिशयमनुभवन्नपि नोपलक्षयसि। पश्य।

1 गुल्म m n. thicket, bush 2 अन्तरित screened, concealed, अन्त. + √इ 2P. 3 अवतराव we two descend, cross; अव + √तॄ 1P 4 अवतरणम् descending. 5 नाटयत they two gesticulate; णिजन्तात्लट् √नट् 1P 6 अन्यत् n. another 7 चिन्तयसि thou thinkest; √चिन्त् 10U 8 ब्रवीमि I say, लट् √ब्रू 1U. 9 पठति he recites, reads; √पठ् 1P 10 क्रोध anger 11 सक्रोधम् ad. angrily. 12 निर्भर ardent, excessive 13 उत्कण्ठानिर्भरम्=उत्कण्ठया निर्भरम्. 14 विनोदयसि thou divertest, amusest, णिजन्तात्लट् वि + √नुद् 6U 15 वेला hour. 16 अतिक्रामति it passes; अति + √क्रम् 1U. 4A. 17 त्वरितम् hurriedly. 18 स्नात्वा having bathed; gerund √स्ना 2P. 19 मूर्ख fool 20 पार m n. extreme limit, opposite bank. 21 गत (nom p m. गताः) gone; PP. √गम् 1P. 22 अनेक a. many, not one. 23 इन्द्रियम् sense-organ. 24 सुख a happy, pleasing; n happiness. 25 अनेकेन्द्रियसुखातिशयम्=अनेकेन्द्रियाणां सुखं तस्य अतिशय. 26 अतिशय excess. 27 अनुभवत् (nom s m अनुभवन्) enjoying; Pres. Part. अनु + √भू 1P. 28 उपलक्षयसि thou thinkest; उप + √लक्ष्.

Maid —It is concealed by the Shephālikā thicket. So come, let us go down. (Both descend)

King —Friend, what else are you thinking? Indeed, I say it is very much similar to the rainy season (Thus again he recites 'This soil bearing a tenderness " etc.)

Clown —(angrily) Sir, now you amuse yourself full of longing, seeing this. But the hour of the Svastivayana for me a Brahmin is passing So hurriedly taking a dip in the pond I will go to Her Majesty.

King —Sure, you idiot! We have come to the bank, and you do not realize, though enjoying an excessive joy of the pond thus pleasing many sense-organs See!

श्रोत्रं हंसस्वनोऽयं सुखयति दयितानूपुरह्लादकारी
दृष्टिप्रीतिं विधत्ते तटतरुविवरालक्षिता सौधपाली।
गन्धेनाम्भोरुहाणां परिमलपटुना जायते घ्राणसौख्यं
गात्राणां ह्लादमेते विदधति मरुतो वारिसंपर्कशीताः ॥ ४ ॥
तदेहि। दीर्घिकातटमुपसर्पावः। (परिक्रम्यावलोक्य च) वयस्य, पश्य पश्य।

1 श्रोत्रम् ear, hearing 2 हंस swan 3 स्वन sound 4 सुखयति it pleases √सुख 10P 5 दयिता f beloved woman 6 नूपुर m n anklet 7 ह्लाद sound 8 कारिन् a (m कारी) making doing, performing (समासान्ते) 9 दयितानूपुरह्लादकारी = दयिताया नूपुरह्लादं करोति इति तादृश 10 दृष्टि f eye 11 प्रीति f love pleasure 12 विधत्ते it does, shapes लट् वि + √धा 3U 13 तट bank, shore 14 तरु m tree. 15 विवरम् gap 16 आलक्षित seen PP आ + √लक्ष 1A 10U 17 सौधम् mansion, palace 18 पाली f row 19 तटतरुविवरालक्षिता = तटतरूणां विवरेभ्य आलक्षिता 20 अम्भोरुहम् lotus 21 परिमल perfume 22 पटु a (ins s m पटुना) sharp, distinct 23 जायते it occurs happens लट् √जन् 4A 24 घ्राण m n nose smelling 25 सौख्यम् happiness, enjoyment 26 गात्रम् limb, body 27 ह्लाद joy 28 विदधति they make वि + √धा 3U 29 मरुत् m (P मरुत्) wind 30 वारि n water 31 संपर्क touch 32 शीत a cool 33 वारिसंपर्कशीता = वारिसंपर्केण शीता 34 उपसर्पाव we two approach, उप + √सृप 1P

दयितानूपुरह्लादकारी अयं हंसस्वनः श्रोत्रं सुखयति तटतरुविवरालक्षिता सौधपाली दृष्टिप्रीतिं विधत्ते परिमलपटुना अम्भोरुहाणां गन्धेन घ्राणसौख्यं जायते वारिसंपर्कशीता एते मरुतः गात्राणां ह्लादं विदधति ॥
स्रग्धरा

*Imitating the jingling sound of my beloved one's anklets the song of the swans pleases the ear a row of the palace buildings peeping through the gaps between the trees on the bank produces joy to the eye, the smell of the lotuses prominent in fragrance gladdens the nose and these winds cool with the touch of the water gratify the limbs*

So come, let us approach the bank of the pond. (Pacing and looking) O friend behold, behold!

उद्यानदेवतायाः स्फुटपङ्कजकान्तिहारिणी स्वच्छा ।
दृष्टिरिव दीर्घिकेयं रमयति मां दर्शनेनैव ॥ ५ ॥

विदूषक :— (सकौतुकम्) भो वयस्य, पश्य पश्य । कैषा कुसुमपरिमलसुगन्धवेणिमधुकरावलिविद्रुमलतारुणहस्तपल्लवा उज्ज्वलत्तनुकोमलबाहुलता सत्यं प्रत्यक्षचरीवोद्यानदेवता स्त्री दृश्यते ।

राजा—(सकौतुकं विलोक्य) वयस्य, निरतिशयस्वरूपशोभाजनितबहुविकल्पेयम् । यत्सत्यमहमपि नावगच्छामि । पश्य ।

1 देवता f. (gen. s. देवतायाः) deity, goddess. 2 स्फुट open, transparent. 3 पङ्कजम् lotus. 4. कान्ति f. beauty. 5. स्वच्छ a beautiful. 6 रमयति it delights; णिजन्तात्लट् √ रम् 1A. 7 माम् me. 8 दर्शनम् sight, appearance. 9 स्फुटपङ्कजकान्तिहारिणी = स्फुटस्य पङ्कजस्य कान्ति हारिणी. 10 कौतुकम् curiosity, delight. 11 सकौतुकम् ad curiously. 12 सुगन्ध sweet-smelling. 13 वेणि f. वेणी f. tress, hair. 14 आवलि f. row, line. 15 विद्रुमलता coral branch, twig. 16 अरुण reddish. 17 हस्त hand. 18 पल्लव m. n sprout, blade of grass. 19 कुसुमपरिमलसुगन्धवेणीमधुकरावलिविद्रुमलतारुणहस्तपल्लवा=कुसुमाना परिमलेन सुगन्धा वेणी तस्या मधुकराणा आवलिः विद्रुमस्य लते इव अरुणे हस्तपल्लवे यस्या सा. 20 उज्ज्वलत् bright, kindling; Pres. Part उद् + √ ज्वल् 1P. 21 तनु f. body. 22 कोमल tender. 23 बाहु m arm. 24 उज्ज्वलत्तनुकोमलबाहुलता = उज्ज्वलन्ती तनुः कोमले च बाहुलते यस्या सा. 24 सत्यम् truly. 25 प्रत्यक्ष visible, evident. 26 चर a. (f. चरी) moving 27 स्त्री f. woman 28 निरतिशय a. unsurpassed, unrivalled. 29 स्वरूपम् nature, one's own form. 30 शोभा f. beauty. 31 जनित caused; caus. PP. √ जन् 4A. 32 विकल्प doubt. 33 निरतिशयस्वरूपशोभाजनितबहुविकल्पा=निरतिशयया स्वरूपशोभया जनित बहु विकल्प यया सा 34 अवगच्छामि I know, अव + √ गम् 1P

उद्यानदेवतायाः स्फुटपङ्कजकान्तिहारिणी स्वच्छा दृष्टि इव इय दीर्घिका दर्शनेन मा रमयति एव ॥ आर्या

Like the lovely eyes of the garden goddess surpassing the charm of the blooming lotuses the pond delights me at its sight alone.

Clown —(with a curiosity) Ho friend, see, see! Who is this lady who appears like the evidently visible garden-goddess? She has tresses sweet-smelling with the fragrance of flowers, with a row of the bees on them, and her leaf-like hands are reddish as coral twigs, her body is shining, and her arms are so tender as a creeper

King —(observing with curiosity) O friend, she causes so much suspicion by her unrivalled physical beauty that I fail to understand truly. See!

पातालाद्भुवनावलोकनपरा किं नागकन्योत्थिता
मिथ्या तत्खलु दृष्टमेव हि मया तस्मिन्कुतोऽस्तीदृशी ।
मूर्ता स्यादिह कौमुदी न घटते तस्या दिवा दर्शनं
केयं हस्ततलस्थितेन कमलेनालोक्यते श्रीरिव ॥ ६ ॥

विदूषक :— (निरूप्य) एषा खलु देव्याः परिचारिकेन्दीवरिका । तद्-
गुल्मान्तरितौ भूत्वा पश्यावः । (उभौ तथा कुरुतः)

1 पातालम् the nether-world 2 भुवनम् the earth 3 अवलोकनम् beholding. 4 पर a (f nom s परा) intent on, absorbed in 5 भुवनावलोकनपरा=भुवनस्य अवलोकनं तत्परा. 6 नाग semi divine man said to dwell in पातालम् 7 कन्या f girl 8 उत्थित risen, PP उद् + √स्था 1P 9 मिथ्या ind false, falsely 10 दृष्ट seen; PP √दृश् 1P 11 हि for, because. 12 तस्मिन्=पाताले 13 कुत whence? 14 मूर्त a incarnate. 15 इह here 16 कौमुदी f. moonlight. 17 घटते it is possible; लट् √घट् 1A 18 स्यात् it may be, विधिलिङ् √अस् 2P. 19 तस्या = कौमुद्या 20 दिवा ind. by or during daytime. 21 हस्ततल m n palm 22 आलोक्यते she is seen, कर्मणि लट् आ + √लोक् 1A 10U 23 श्री Luxmi the goddess of wealth. 24 निरूप्य having seen, gesticulated, gerund नि + √रूप् 10P 25 परिचारिका f. maid-servant 26 कुरुत they two do, √कृ 8U 27 भूत्वा having becom, gerund √भू 1P 28 गुल्म m n bush, wood 29 अन्तरित concealed, PP अन्त + √इ 2P. 30 उभ Pron (nom dual m उभौ) both

किं भुवनावलोकनपरा नागकन्या पातालात् उत्थिता? मिथ्या, तत् खलु मया दृष्टम् एव हि, तस्मिन् कुतः ईदृशी अस्ति? कौमुदी इह मूर्ता स्यात् तस्याः दर्शनं दिवा न घटते, हस्ततलस्थितेन कमलेन श्री इव आलोक्यते इयं का॥ शार्दूलविक्रीडितम्

Is she a Nāga girl, sprung up, eager to see the world, from the nether region? It is false since I really saw it. Whence such a girl there? She may be the moonlight incarnate here, but its appearance is not possible in daytime What is she who appears like Luxmī holding a lotus upon her palm?

Clown —(gesticulating) Really, here also appears Indīvarikā the queen's maid Therefore, hiding ourselves in the bush we shall observe. (Both do so)

चेटी — (कमलिनीपत्रग्रहणं नाटयन्ती) आरण्यके, अपचिनु त्वं पद्मानि । अहमप्येतस्मिन्नलिनीपत्रे शेफालिकाकुसुमान्यपचित्य देवीसकाशं गमिष्यामि ।

राजा — वयस्य, संलाप इव वर्तते । तदवहिताः शृणुमः । कदाचिदित एव व्यक्तीभविष्यति । (चेटी गमनं नाटयति)

आरण्यका — हला इन्दीवरिके, न शक्नोमि त्वया विनात्रासितुम् ।

चेटी — (विहस्य) यादृशमद्य मया देव्या मन्त्रितं श्रुतं तादृशेन चिरमेव मया विना त्वयासितव्यम् ।

आरण्यका — (सविषादम्) किं देव्या मन्त्रितम् ।

1 कमलिनी f lotus plant 2 पत्रम् leaf 3 ग्रहणम् taking 4 अपचिनु collect thou! लोट् अप+√चि 5U 5 पद्मम् (p acc पद्मानि) lotus 6 नलिनी f lotus plant 7 एतस्मिन् पत्रे on this leaf 8 अपचित्य having collected, piled up, gerund अप+√चि 5U 9 देवीसकाशम् to the presence of the queen 10 संलाप conversation 11 वर्तते it is it exists, √वृत् 1A 12 अवहित a attentive 13 शृणुम we hear, लट्√श्रु 5P 14 कदाचित् whenever, at any time 15 व्यक्तीभविष्यति it will become manifest, लृट् व्यक्ती+√भू 1P 16 गमनम् going 17 शक्नोमि(+inf) I am able to, I can, √शक् 5P 18 विना Prep (+acc and ins) without 19 आसितुम् to be to remain, inf √आस् 2A 20 मन्त्रित spoken, PP √मन्त्र् 10A 21 श्रुत heard, PP √श्रु 5P 22 चिरम् for a long time 23 त्वया आसितव्यम् you must remain 24 विषादः dejection 25 सविषादम् ad sorrowfully

Maid —(picking up a lotus leaf) O Āranyakā, do you gather lotus flowers I, too, will collect Shephālika flowers on this lotus leaf and go to the queen's presence

King —Friend, a conversation seems to be heard Let us, therefore, attentively hear At any moment it will become clearly audible from here

(The maid tries to depart.)

Āranyaka—Friend Indivarika, I cannot stay here without you

Maid —(laughing) *According to what I heard from the queen to day you are to remain here for a long time without me*

Āranyakā—(sadly) what did the queen say?

चेटी — एतत् 'तदैषाहं महाराजेन भणिता। यथा यदैषा विन्ध्यकेतुदुहिता वरयोग्या भविष्यति तदाहं स्मारयितव्य इति । तत्सांप्रतं महाराजं स्मारयामि येनास्या वरचिन्तापर्याकुलो भविष्यति ।'

राजा — (सहर्षम्) इयं सा विन्ध्यकेतोर्दुहिता । (सानुतापम्) चिरं मुषिताः स्मो वयम् । वयस्य, निर्दोषदर्शना कन्यका खल्वियम् । विस्रब्धमिदानीं पश्यामः ।

आरण्यका — (सरोषं कर्णौ पिधाय) तद्गच्छ त्वम् । न त्वयासम्बद्धप्रलापिन्या प्रयोजनम् ।

1 भणित spoken ; PP. √ भण् 1P. 2 यदा-तदा (correlative) when-then. 3 दुहितृ f. (nom. s. दुहिता) daughter. 4 वरयोग्या marriageable, fit for a bride-groom. 5 स्मारयितव्य (ought) to be reminded , Pot. PP. √स्मृ 1P. caus. 6 स्मारयामि I remind ; णिजन्तात्लट् √ स्मृ. 7 येन so that. 8 चिन्ता f. thought, anxiety. 9 वरचिन्तापर्याकुल = वरस्य चिन्तया पर्याकुल . 10 हर्ष joy. 11 सहर्षम् joyfully. 12 अनुतापः remorse, pain. 13 सानुतापम् ad. remorsefully, painfully. 14 मुषित stolen, deceived ; PP. √ मुष् 9P. 15 निर्दोष spotless, faultless. 16 निर्दोषदर्शना = निर्दोषं दर्शनं यस्या. सा. 17 विस्रब्धम् ad. confidently. 18 पश्याम we see ; लट् √दृश् 1P. 19 रोष. anger. 20 सरोषम् angrily. 21 पिधाय having covered, gerund अपि (in this case अ is dropped) + √ धा 3U. 22 असम्बद्ध contradictory, not connected in sense. 23 प्रलापिन a. (ins. s. f. प्रलापिन्या) chattering. 24 प्रयोजनम् use.

Maid —Her majesty said like this : " At that time I was told by the king to remind him when the daughter of Vindhyaketu comes of a marriageable age. So now I will remind the king so that he might be occupied with the thought of finding a bride-groom for her."

King —(joyfully) So she is the very daughter of Vindhyaketu ! (remorsefully) For a long time we have been cheated. O friend, she has a spotless beauty indeed Now we will confidently observe her.

Āranyakā—(angrily covering her ears) Go away ! No use of you who are talking a nonsense.

चेटयपसृत्य पुष्पापचयं नाटयति)

राजा — अहो सुतरां प्रकटीकृतमाभिजात्यं धीरतया । वयस्य, धन्यः खल्वसौ य एतदङ्गस्पर्शसुखभाजनं भविष्यति ।

(आरण्यका कमलापचयं नाटयति)

विदूषकः — भो वयस्य, पश्य पश्य । आश्चर्यमाश्चर्यम् । एषा सलीलचलत्करपल्लवप्रभाविस्तृतेनापहसितशोभं करोति कमलवनमपचिन्वती ।

राजा — वयस्य, सत्यमेवैतत् । पश्य

1 अपसृत्य having withdrawn, retreated, gerund अप + √सृ 1 3P 2 अपचय loss, gathering 3 अहो ind oh, alas! 4 सुतराम् ind excellently. 5 प्रकटीकृत manifested, displayed, PP प्रकटी + √कृ 8U 6 आभिजात्यम् noble birth 7 धीरता f (ins s धीरतया) strength of mind, fortitude, solemnity. 8 धन्य lucky, fortunate, blessed 9 एतदङ्गम् her body 10 स्पर्श touch 11 भाजनम् vessel, receptacle, recipient 12 एतदङ्गस्पर्शसुखभाजनम् = एतस्या अङ्गस्य स्पर्शसुख तस्य भाजनम् 13 आश्चर्यम् wonder, miracle, marvel 14 लीला f play, beauty. 15 सलील beautiful, ad सलीलम् beautifully 16 चलत् moving, Pres Part √चल् 1P. 17 कर hand 18 करपल्लव m n = पल्लव इव कर 19 प्रभा f lustre, splendour 20 विस्तृत spread, extended, PP. वि + √स्तृ 5U 21 अपहसित mocked, ridiculed, PP. अप + √हस् 1P. 22 शोभा f charm 23 सलीलचलत्करपल्लवप्रभाविस्तृतेन = सलील चलत करपल्लवस्य प्रभाया विस्तृतेन 24 उपहसितशोभम् = उपहसिता शोभा यस्य तत् 25 वनम् grove, forest 26 अपचिन्वत् (nom s f अपचिन्वती) gathering, Pres Part अप + √चि

(Having retreated the maid gathers flowers)

King —Oh, her noble origin has been excellently manifested by her solemn attitude! O my friend, truly he who will receive the joy of touching her body will be a lucky man

(Āraṇyakā collects lotuses)

Clown —Ah friend, see, see wonderful wonderful! She who is gathering the lotuses, mocks their beauty by means of spreading the lustre of her shoot-like hand which is gracefully moving

King —O friend it is really true Behold!

अच्छिन्नामृतविन्दुवृष्टिसदृशीं प्रीतिं ददत्या दृशा
याताया विगलत्पयोधरपटाद्द्रष्टव्यतां कामपि ।
अस्याश्चन्द्रमसस्तनोरिव करस्पर्शास्पदत्वं गता
नैते यन्मुकुलीभवन्ति सहसा पद्मास्तदेवाद्भुतम् ॥ ७ ॥

आरण्यका — (भ्रमरसबाध नाटयन्ती) हा धिक् हा धिक् । एते खल्वपरे परित्यज्य कमलिनीं नीलोत्पलवनानि समापतन्तो निपुणतरं बाधमाना आयासयन्ति मां दुष्टमधुकराः ।

1 अच्छिन्न uninterrupted, constant 2 अमृतम् nectar. 3 वृष्टि f. shower. *4 अच्छिन्नामृतविन्दुवृष्टिसदृशीम्=अच्छिनया अमृतस्य बिन्दुवृष्टया सदृशीम्* 5 ददत् (gen. s f. ददत्या) giving; Pres Part. √दा 3U 6 दृश् f (ins. s दृशा) eye, sight. 7 यात gone, attained; PP.√या 2P 8 पयोधर udder, cloud 9 पट m. n. (abl s. पटात् cloth 10 द्रष्टव्यता f. visibility. 11 अस्या: her. 12 चन्द्रमस् *m* (*gen s* चन्द्रमस / moon 13 तनु f. (gen. s तनौ) body 14 चन्द्रमम तनो·=चन्द्रमसः तनु इव तनु यस्या तस्या . 15 आस्पदत्वम् receptacle, state of receiving 16 गत (nom. p. m गता:) attained; PP √गम् 1P. 17 एते पद्मा (*m p*) *these lotuses* 18 मुकुलीभवन्ति they close; ग्वट् मुकुली+√भू 1P 19 सहसा ind suddenly 20 अद्भुतम् wonder, surprise. 21 यत्~तद् अद्भुतम् it is a wonder that~~ 22 भ्रमर bee. 23 सबाध annoyance 24 धिक् ind fie! 25 अपर a (nom p. m अपरे) another, inferior 26 परित्यज्य having left; परि+√त्यज् 1P gerund 27 समापतत (nom p m समापतन्त) assailing; Pres. Part समा + √पत् 1P 28 निपुणतरम् (more skilfully 29 बाधमान tormenting. Pres Part. √बाध् 1A. 30 आयासयन्ति they trouble, णिजतात्लट् आ + √यस् 4P. 31 दुष्ट vile wicked

दृशा अच्छिन्नामृतविन्दुवृष्टिसदृशी प्रीति ददत्या विगलत्पयोधरपटान् कामपि द्रष्टव्यता याताया. चन्द्रमसः तनो इव अस्या करस्पर्शास्पदत्व गता एते पद्मा यत् सहसा न मुकुलीभवन्ति तत् अद्भुत एव ॥ शार्दूलविक्रीडितम्

It is very surprising that *these lotuses do not at once close themselves* while they are touched by the hands of the lady who resembles the moon's form, who happens to reveal her appearance due to the *garment slipping off* her breasts, and who is giving as much joy as the constant spray of Nectar by her glances

Āranyakā — (gesticulating the annoyance of the bees) Ah fie, fie! After abandoning the lotus plant and blue lotus-beds these inferior, wicked bees are causing me very much annoyance, assailing and disturbing me skilfully

(उत्तरीयेण मुखं पिधाय सभयम्) हला इन्दीवरिके, परित्रायस्व मां परित्रायस्व माम् । एते दुष्टमधुकराः परिभविष्यन्ति ।

विदूषक :— भो वयस्य, पूर्णास्ते मनोरथाः । यावदेव गर्भदास्याः सुता नागच्छति, तावदेव त्वमपि तूष्णीको भूत्वोपसर्प । एषापि सलिलशब्दश्रुतेन पदसंचारेणेन्दीवरिकागच्छतीति ज्ञात्वा त्वामेवावलम्बिष्यते ।

राजा — साधु वयस्य साधु । कालानुरूपमुपदिष्टम् ।

(इत्यारण्यकासमीपमुपसर्पति)

आरण्यका — (पदशब्दाकर्णनं नाटयन्ती) इन्दीवरिके, लघूपसर्प लघूपसर्प । आकुलीकृतास्मि दुष्टमधुकरैः । (राजानमवलम्बते)

1 उत्तरीयम् upper garment. 2 भयम् fear. 3 सभयम् ad. fearfully. 4 परित्रायस्व help, save thou ! लोट् परि + √ त्रै 1A, or √ त्रा 2A. 5 परिभविष्यन्ति they will injure, conquer , लृट् परि + √ भू 1P 6 पूर्ण filled with, accomplished ; PP. √ पूर् 10U 7 मनोरथः wish desired object 8 गर्भदासी f. (gen s गर्भदास्याः) slave girl by birth (often used as an expression of abuse.) 9 सुता f. daughter. 10 तूष्णीक silent. 11 सलिलम् water. 12 शब्द sound. 13 श्रुत (ins.s.m श्रुतेन) heard; PP.√श्रु 5P. 14 सलिलशब्दश्रुतेन=सलिले यस्य शब्द श्रुत तेन. 15 पदसचार movement of feet, foot-step 16 ज्ञात्वा having known, gerund √ ज्ञा 9U 17 अवलम्बिष्यते she will hold, cling to; लृट् अव +√ लम्ब् 1A. 18 काल: time 19 अनुरूप a befitting, adapted to. 20 उपदिष्ट pointed out, advised; PP उप +√ दिश् 6U. 21 समीपम्=सकाशम्. 22 आकर्णनम् hearing. 23 आकुलीकृत troubled; PP. आकुली +√ कृ 8U

(Covering her face with her upper garment in fear) Dear Indivarikā, save me, save me ! These wicked bees will injure me

Clown —Hallo friend, your wishes are to be accomplished Before the daughter of a slave-girl by birth comes back you will approach her silently. By your foot-steps to be heard on the water thinking that Indivarikā is coming, she will just cling to you

King —Fine, O friend, fine ! It is a timely suggestion.

(Thus he advances to Āranyakā )

Āranyakā—(hearing the sound of footsteps) O Indivarikā ! Do come quickly, quickly ! I am troubled by these vile bees. (she leans on the king.)

(राजा कण्ठे गृह्णाति । आरण्यकोत्तरीयं मुखादपनीय राजानमपश्यन्ती भ्रमरावलोकनं नाटयति)

**राजा —** (स्वोत्तरीयेण भ्रमरान्निवारयन्)

अयि विसृज विषादं भीरु भृङ्गास्तवैते
परिमलरसलुब्धा वक्त्रपद्मे पतन्ति ।
विकिरसि यदि भूयस्त्रासलोलायताक्षी
कुवलयवनलक्ष्मीं तत्कुतस्त्वां त्यजन्ति ॥ ८ ॥

**आरण्यका —** (राजानं दृष्ट्वा साध्वसं नाटयन्ती) कथं नैषेन्दीवरिका । (सभयं राजानं त्यक्त्वापसरन्ती) इन्दीवरिके, लघ्वागच्छ लघ्वागच्छ । परित्रायस्व माम् ।

1 कण्ठ neck 2 गृह्णाति he seizes takes, √ ग्रह् 9U 3 अपनीय having removed gerund अप + √ नी 1U 4 अपश्यत् (nom s f अपश्यन्ती) not seeing, Pres Part अ + √ दृश् 1P 5 अवलोकनम् looking 6 निवारयत् (nom s m निवारयन्) warding off, Pres. Part caus नि + √ वृ 1 5 9U 7 विसृज abandon thou ! लोट् वि + √ सृज् 6P 8 विषाद despair 9 भीरु a (voc.s f भीरु) timid 10 भृङ्ग bee 11 रस juice 12 परिमलरस honey, perfume-juice 13 लुब्ध (nom p m लुब्धाः) coveted, longed, PP √ लुभ् 4P 14 वक्त्रम् face 15 पतन्ति they fall, √ पत् 1P 16 विकिरसि thou spreadest, वि + √ कृ 6P 17 यदि if 18 भूयस् ind repeatedly 19 त्रास alarm fear 20 लोल a rolling, tremulous 21 आयत long, large 22 अक्षि n eye. 23 त्रासलोलायताक्षी=त्रासेन लोले आयते अक्षिणी यस्याः तादृशी 24 कुवलयम् lotus 25 लक्ष्मी f beauty 26 कुवलयवनलक्ष्मीम्=कुवलयानां वनं तस्य लक्ष्मीम् 27 साध्वसम् fear 28 तत्=तर्हि, तदा

अयि भीरु विषादं विसृज परिमलरसलुब्धाः एते भृङ्गाः तव वक्त्रपद्मे पतन्ति यदि त्रासलोलायताक्षी (त्वम्) भूयः कुवलयवनलक्ष्मीं विकिरसि तत् कुतः ((ते)) त्वां त्यजन्ति ॥ मालिनी

(The king catches her by the neck Āranyakā, removing the upper garment from her face, and not looking at the king, looks at the bees.)

King —(warding off the bees with his own upper garment) Ah timid one, do abandon thy despair ! These bees hungry for fragrant honey are falling upon the lotus in the form of thy face : if thou with thy large eyes rolling in alarm repeatedly spread'st the beauty of lotus beds, how would they abandon thee ?

Āranyakā—(looking at the king and expressing alarm) How it is not Indivarikā ! (Abandoning him, frightened and retreating) O Indivarikā, come quickly, quickly ! Help me !

**विदूषक** :— भवति, सकलपृथ्वीपरित्राणसमर्थेन वत्सराजेन परित्रायमाणा चेटीमिन्दीवरिकामाक्रन्दसि ।

(राजा अयि विसृज इत्यादि पुन पठति)

**आरण्यका** — (राजानमवलोक्य सस्पृह सलज्ज चात्मगतम) अयं खलु स महाराजो यस्याहं तातेन दत्ता । स्थाने खलु तातस्य पक्षपातः ।

**चेटी** — आयासिता खल्वारण्यका दुष्टमधुकरैः । तद्यावदुपसृत्य समाश्वासयामि । आरण्यके, मा बिभिहि । एषोपागतास्मि ।

**विदूषक** :— भोः, अपसरापसर । एषा खल्विन्दीवरिकागता । तदेतं वृत्तान्तं प्रेक्ष्य देव्यै निवेदयिष्यति । (अङ्गुल्या निदिश्य)

1 भवती f (voc s भवति) Your ladyship 2 सकल a entire, all 3 पृथ्वी f earth 4 परित्राणम protection, deliverance 5 समर्थ a strong, competent 6 सकलपृथ्वीपरित्राणसमर्थेन = सकलाया पृथ्व्या परित्राण समर्थेन 7 परित्रायमाण being protected Pres Part परि + √त्रा 2A √त्रै 1A 8 आक्रन्दसि thou callest out आ + √क्रन्द 1P 9 स्पृहा f envy 10 सस्पृहम enviously 11 लज्जा f shame 12 सलज्जम bashfully 13 यस्य=यस्म 14 दत्त (nom s f दत्ता) given in marriage PP √दा 3U 15 स्थान ind rightly 16 पक्षपात partiality 17 आयासित annoyed caus PP आ + √यस 4P 18 समाश्वासयामि I console, encourage, णिजन्तात्लट सम + आ + √श्वस 2P 19 मा (negative particle) not 20 बिभिहि fear thou ! लोट √ भी 3P 21 वृत्तान्त incident, news 22 प्रेक्ष्य having seen gerund प्र + √ईक्ष 1A 23 निवेदयिष्यति she will inform णिजन्तात्लृट नि + √ विद 1 2P 24 अङ्गुली f finger

Clown —O lady, being saved by the King of Vatsa who can protect the whole world you cry for a maid, Indivarika

(The king repeats O timid one " etc )

Aranyaka—(looking at the King enviously and bashfully, to herself) Really, this is the King to whom I was given in marriage Rightly my father feels partiality for him

Maid —Truly Aranyaka is annoyed by those wicked bees So now approaching her I will encourage her Aranyaka don t be afraid ! I am coming

Clown —Sir, retreat retreat ! Indivarika is surely coming Should she detect this event she will report to the queen (pointing out with his finger)

तदिदमेव कदलीगृहं प्रविश्य मुहूर्तं तिष्ठावः ।

(उभौ तथा कुरुत)

चेटी — (उपसृत्य कपोलौ स्पृशन्ती) हञ्जे आरण्यके, कमलसदृशस्य तव वदनस्यायं दोषो यन्मधुकरा एवमपराध्यन्ति । (हस्ते गृहीत्वा) तदेहि गच्छावः । परिणतो दिवसः । (गमनं नाटयतः)

आरण्यका — (कदलीगृहाभिमुखमवलोक्य) हञ्जे इन्दीवरिके, अतिशिशिरतया सलिलस्योरुस्तम्भ इव समुत्पन्नः । तच्छनैः शनैः गच्छावः ।

चेटी — तथा (इति निष्क्रान्ते)

विदूषक :—भोः, एहि निष्क्रामावः । तां गृहीत्वैषा दास्याः सुतेन्दीवरिका गता ।

1 कदली f plantain tree 2 गृहम् house 3 मुहूर्त moment 4 मुहूर्तम् for a moment 5 तिष्ठाव we stay, rest , √स्था 1P 6 कपोल (acc d कपोलौ) cheek 7 स्पृशत् (nom s f स्पृशन्ती) touching , Pres Part √स्पृश 6P 8 वदनम् face. 9 यत् (conjunction) that 10 अपराध्यन्ति they offend , अप + √राध 4 5P 11 परिणत grown old set pp परि + √नम 1U 12 दिवस day sun 13 अतिशिशिरता f excessive cold coolness 14 ऊरु m thigh 15 स्तम्भ rigidity, insensibility 16 समुत्पन्न occurred , pp सम् + उत् + √पद 4A 17 शनैः ind slowly 18 गच्छाव we two go , √गम 1P

Let us therefore, enter this plantain house and stay there for a moment (Both men do so )

Maid —(approaching and touching her cheeks) O maid Aranyaka It is the fault of your lotus like face that the bees offend you in this way (Taking her by the hand) So come let us go The sun has set (Both the girls walk )

Aranyaka—(beholding the facade of the plantain bower) O maid Indivarika, my thighs seem to be benumbed on account of the coolness of the water So let us move very slowly

Maid —Very well (Both move out )

Clown —Sir come let us go away The slave girl's daughter Indivarika has carried her away

राजा — (निश्वस्य) कथं गता । सखे वसन्तक, न खल्वविघ्नमभिलषितम-
धन्यैः प्राप्यते । (विलोक्य) सखे, पश्य पश्य ।

आवद्धमुखमपीदं कण्टकितं कमलकाननं तस्याः ।
सुकुमारपाणिपल्लवसंस्पर्शसुखं कथयतीव ॥ ६ ॥

(निश्वस्य) सखे, क इदानीमुपायः पुनस्तां द्रष्टुम् ।

विदूषक :— भोः, त्वमेव पुत्तलिकां भङ्क्त्वेदानीं रोदिषि । न मे मूर्खस्य ब्राह्मणस्य वचनं करोषि ।

राजा — किं मया न कृतम् ।

1 निश्वस्य having sighed, gerund निस + √श्वस् 2P 2 सखि m (voc s सखे) friend 3 अविघ्न a free from impediment 4 अभिलषितम् desired object 5 अधन्य unlucky man 6 प्राप्यते it is obtained कर्मणि लट प्र + √आप 5P 7 आवद्ध tied, shut 8 आवद्धमुखम = आवद्ध मुख यस्य तत 9 कण्टकित a horripilated thrilled 10 काननम — वनम 11 पाणि m hand 12 संस्पर्श touch 13 कथयति it tells, indicates √कथ 10U 14 सुकुमारपाणिपल्लवसंस्पर्शसुखम = सुकुमारस्य पाणिपल्लवस्य संस्पर्शेन संजात सुखम 15 उपाय means, plan 16 द्रष्टुम to see inf √दृश 1P 17 पुत्तलिका f doll 18 भङ्क्त्वा having broken, gerund √भञ्ज 7P 19 रोदिषि thou screamest, लट √ रुद 2P

आवद्धमुख अपि कण्टकित इद कमलकानन तस्या सकुमारपाणिपल्लवसंस्पर्शसुख कथयति इव ॥ आर्या

King —(sighing) How has she gone ? O my friend Vasantaka, the unlucky can not realize any desired object without hindrance (observing) Friend, behold, behold !

The lotus grove thrilled, indicates as it were, the happiness occasioned by the touch of her very tender shoot like hands even though its face is closed

(with a sigh) Friend is there any means now to see her again ?

Clown —Sir ! having just broken a doll you scream for it now You do not carry out what I tell you a foolish Brahmin as I am

King —What did I not carry out ?

विदूषक :— तदिदानीं विस्मृतं यत् तूष्णीको भूत्वोपसर्पेति मया भणितम्। अतिसंकटे भवान्प्रविश्यालीकपाण्डित्यदुर्विदग्धतया 'अयि विसृज विषादम्' इत्येतैरन्यैश्च कटुवचनैर्निर्भर्त्स्य साम्प्रतं किं रोदिषि। पुनरप्युपायं पृच्छसि।

राजा — कथं समाश्वासनमपि निर्भर्त्सितमिति भणितं मूर्खेण।

विदूषक :— ज्ञातमेव कोऽत्र मूर्ख इति। तत्किमेतेन। अस्तमयाभिलाषी भगवान्सहस्ररश्मिः। तदेह्यभ्यन्तरमेव प्रविशावः।

1 विस्मृत forgotten, PP वि + √स्मृ 1P 2 अतिसंकट narrow passage great danger, risk. 3 अलीक false, pretended 4 पाण्डित्य learning, scholarship 5 दुर्विदग्धता f (ins s दुर्विदग्धतया) stupidity, foolishness 6 अन्य a (ins p n अन्यैः) another 7 कटु pungent, disagreeable 8 वचनम् word 9 निर्भर्त्स्य having abused or menaced, gerund निस् + √भर्त्स् 10U 10 पृच्छसि thou askest, लट् √ प्रच्छ 6P 11 समाश्वासनम् consolation, comforting 12 निर्भर्त्सित menaced PP. निस् + √भर्त्स् 10 U 13 ज्ञात known, PP. √ज्ञा 9U 14 अत्र in this case 15 किम् + ins what is the use of? There is no use of 16 अस्तमय sunset setting of the sun 17 अभिलाषिन् a (nom s m अभिलाषी) longing for 18 सहस्ररश्मि m thousand rayed sun

Clown—You have just forgotten what I told you, that is, 'Do approach her silently" After falling into a risk and menacing her with a stupid display of your false scholarship in such pungent terms as, 'O timid one. " etc why do you weep now? And furthermore you ask me for a means

King —How this idiot dare say that I menaced her, instead of comforting me!

Clown —It is just understood who the idiot is in this case So no use of this talk The thousand rayed lord sun is desirous of setting Come, let's repair to the inner apartment

राजा — (विलोक्य) अये परिणतप्रायो दिवसः । अहह संप्रहि हि ।

हृत्वा पद्मवनद्युति प्रियतमेवेयं दिनश्रीर्गता
रागोऽस्मिन्मम चेतसीव सवितुर्बिम्बेऽधिकं लक्ष्यते ।
चक्राह्वोऽहमिव स्थितः सहचरीं ध्यायन्नलिन्यास्तटे
सञ्जाताः सहसा ममेव भुवनस्याप्यन्धकारा दिशः ॥ १० ॥

(इति निष्क्रान्ता सर्वे)

## ❀ इति द्वितीयोऽङ्कः ❀

1 प्राय (समासान्त) majority, great part, almost 2 परिणतप्राय = परिणत प्राय यस्य स 3 हृत्वा having carried away, gerund √हृ 1U 4 द्युति f lustre radiance 5 प्रियतमा = आरण्यका 6 दिनम day 7 राग passion love, red hue 8 चतस n (loc s चतसि) mind 9 सवितृ m (gen s सवितु) the sun 10 बिम्ब m n disc, circle 11 अधिकम ad very much 12 चक्राह्व = चक्रवाक a ruddy goose (as the native saying goes this bird is doomed to separation from his mate as soon as the sun sets) 13 स्थित stood PP √स्था 1P 14 सहचरी f wife 15 ध्यायत (nom s m ध्यायन्) meditating calling to mind, pres part √ध्य 1P 16 नलिनी f lotus, lotus pond 17 भुवनम the world 18 अन्धकार darkness 19 दिश f (nom p दिश) direction

इय दिनश्री पद्मवनद्युति हृत्वा प्रियतमा इव गता अस्मिन सवितु बिम्ब मम चतसि इव राग अधिक लक्ष्यत चक्राह्व सहचरी ध्यायन नलि या तट अह इव स्थित भुवनस्य दिश अपि मम (दिश) इव अन्धकारा सहसा सजाता ॥ शार्दूलविक्रीडितम ।

King —(beholding) Ah the sun has almost set Alas for now—
This day's beauty is gone like my dearest stealing away the radiance of the lotus assemblage in that disc of the sun as in my mind, the passion fire glows very much, the Chakravaka goose stands on the edge of the lotus pond calling to his mind his mate as I do, and also all the directions of the world like my paths become all of a sudden dark (Exeunt omnes)

(*Here Ends Act Two*)

## ❀ तृतीयोऽङ्कः ❀

(तत प्रविशति मनोरमा)

मनोरमा —आज्ञप्तास्मि देव्या वासवदत्तया, 'हञ्जे मनोरमे, यः स साङ्कृत्यायन्यार्यपुत्रस्य मम च वृत्तान्तो नाटकोपनिबद्धः तस्य नर्तितव्यशेषमद्य युष्माभिः कौमुदीमहोत्सवे नर्तितव्यम्' इति । ह्यः खल्वारण्यकया प्रियसख्या शून्यहृदययान्यथैव नर्तितम् । अद्य पुनर्वासवदत्ताभूमिकया तया यदि तथा क्रियते ततोऽवश्यं देवी कोपिष्यति । तत्कुत्र तावत्तां प्रेक्ष्योपालप्स्ये ।

1 आर्यपुत्र husband 2 वृत्तान्त story tidings 3 नाटकम् drama, play, 4 उपनिबद्ध bound arranged, PP उपनि +√ बन्ध 9P 5 नाटकोपनिबद्ध = नाटके उपनिबद्ध 6 य = वृत्तान्त 7 तस्य = वृत्तान्तस्य, 8 नर्तितव्य (ought) to be played, or acted, pot, PP नृत 4P 9 शेष a n remaining, rest 10 युष्माभि (ins p) by you 11 कौमुदीमहोत्सव the great festival of moonlight that falls in the month of आश्विन (September-October) 12 ह्यस yesterday 13 प्रियसखी f (ins s प्रियसख्या) dear friend, 14 शून्य absent vacant 15 हृदयम heart 16 शून्यहृदयया = शून्य हृदय यस्या तया 17 अन्यथा ind, otherwise, in a different way 18 अद्य today 19 भूमिका f, role, part (of a character in dramas) 20 वासवदत्ताभूमिकया = वासवदत्ताभूमिका यस्या तया 21 क्रियते it is done, कर्मणि √ कृ 8U 22 अवश्यम् inevitably, 23 कोपिष्यति she will be angry, लृट् √ कुप् 4P 24 कुत्र where ? 25 उपालप्स्ये I will blame, लृट् उपा +√ लभ् 1A

## ACT III

(Enters Manoramā)

Manoramā—I have been ordered by Queen Vāsavadattā thus ' O maid Manoramā, the episode of my husband and myself was woven by Sāngkṛtyāyanī into a drama, whose remaining portion to be staged you will have to act today on the occasion of grand Moonlight Festival " Yesterday, indeed, my fond friend Āranyakā, absent minded, played in a wrong way If she who has assumed the role of Vāsavadatta repeats the same the queen will surely be angry But where shall I find and blame her ?

(विलोक्य) एषारण्यकात्मनैव किमपि किमपि मन्त्रयमाणा दीर्घिका-तीरे कदलीगृहं प्रविशति । तद्गुल्मान्तरिता भूत्वा श्रोष्यामि तावदस्या विस्रब्धजल्पितानि ।

॥ इति प्रवेशकः ॥

(तत प्रविशत्यासनस्था कामावस्था नाटयन्त्यारण्यका)

आरण्यका — (निःश्वस्य) हृदय, दुर्लभजनं प्रार्थयमानं त्वं कस्मान्मां दुःखितां करोपि ।

मनोरमा — तदेतच्छून्यहृदयत्वस्य कारणम् । कं पुनरेषा प्रार्थयते । अवहिता तावच्छ्रोष्यामि ।

आरण्यका — (सास्रम्) कथं तथा नाम शोभनदर्शनो भूत्वा महाराज एवं सन्तापयति माम् । आश्चर्यमाश्चर्यम् ।

1 आत्मन m (dat s आत्मने) oneself 2 किमपि something 3 मन्त्रयमाणा saying, Pres part √मन्त्र 10A 4 तीरम् bank 5 श्रोष्यामि I will hear, लृट √श्रु 5P 6 विस्रब्ध confident 7 जल्पितम muttering, chattering 8 आसनम् seat 9 स्थ a (समासान्ते) standing, existing 10 काम love 11 कामावस्था f love-sick 12 दुर्लभ hard to obtain, unattainable 13 जन man 14 प्रार्थयमान begging longing for, Pres Part प्र + √अर्थ 10A 15 दुःखित pained, sorrowful 16 शून्यहृदयत्वम् absent mindedness 17 कारणम् cause reason 18 शोभन fine, beautiful 19 दर्शनम् appearance 20 शोभनदर्शन = शोभनं दर्शनं यस्य एतादृश स 21 सन्तापयति he torments सम + √तप 1P 10U 22 अस्रम् tear

(Looking) There enters Āranyakā into the plantain bower on the bank of the pond, muttering something to herself So concealing myself behind the bush I shall listen to her muttering confidently

*Introduction Ends*

(Then appears Āranyaka seated, exhibiting her love sick )

Āranyakā—(sighing) O my heart ! Why do you longing for an unattainable one make me miserable ?

Manoramā—So, this is the cause of her absent mindedness !
But whom does she long for ? I will hear now very attentively

Āranyakā—(shedding tears) How so handsome looking King does torment me thus ? A marvellous phenomenon !

अथवा ममैवैषाऽभागधेयता । न पुनर्महाराजस्य दोषः ।

मनोरमा — (सबाष्पम्) कथं महाराज एवास्याः प्रार्थनीयः । साधु प्रियसखि साधु , आभिजात्यसदृशस्तेऽभिलाषः ।

आरण्यका — कस्मै तावदेतं वृत्तान्तं निवेद्य सह्यवेदनमिव दुःखं करिष्यामि । (विचिन्त्य) अथवा अस्ति मे हृदयनिर्विशेषा प्रियसखी मनोरमा । तस्या अप्येतल्लज्जया न पारयामि कथयितुम् । सर्वथा मरणं वर्जयित्वा कुतो मे हृदयस्यान्या निर्वृतिः ।

मनोरमा — (सास्रम्) हा धिक् हा धिक् । अतिभूमिं गतोऽस्यास्तपस्विन्या अनुरागः । तत्किमिदानीमत्र करिष्यामि ।

1 अभागधेयता f ill fate 2 प्रार्थनीय to be longed, or solicited, Pot PP. प्र + √ अर्थ् 10A 3 *आभिजात्यसदृश = आभिजात्ये सदृश befitting her noble birth* 4 अभिलाष wish, desired object 5 कस्मै (dat s m) to whom ? 6 निवेद्य having informed gerund नि + √ विद् 1 2P 7 *सह्य endurable* 8 *वेदना f pang pain* 9 सह्यवेदनम् = सह्या वेदना यस्य तत् 10 निर्विशेष same, not different from 11 तस्या = तस्यै 12 *लज्जा f shame* 13 *पारयामि I am able, √ पृ 10U* 14 *कथयितुम् to tell,* inf √ कथ् 10U 15 सर्वथा ind by all means completely 16 मरणम् death 17 वर्जयित्वा having excluded, except, *gerund √ वृज् 1P 10U* 18 *निर्वृति f solace* 19 अतिभूमि गत reached the climax 20 अनुराग love

Perhaps this is but my ill fate, but not the king's blunder

Manorama—(tearfully) How, she is longing for the king ! Bravo bravo, my dear friend ! The object of her longing is worthy of her noble origin

Āranyakā—To whom shall I now disclose this affair and lighten thereby the pang of my misery ? (musing) I have a dear friend of mine, Manoramā who is same as my bosom Nevertheless, I cannot tell her about this out of shame By all means death is my only solace Except for it where can be any other solace for my heart ?

Manōramā—(shedding tears) Alas ! this poor girl's love has gone too far So what shall I do now in this respect ?

आरण्यका — (साभिलाषम्) अयं स उद्देशः यस्मिन्मधुकरैरायास्यमानाव-
लम्ब्य महाराजेन समाश्वासितास्मि 'भीरु मा बिभीहि' इति ।

मनोरमा — (सहर्षम्) कथमेषापि दृष्टा महाराजेन । सर्वथास्त्यस्या जीवित-
व्यस्योपायः । यावदुपसृत्य समाश्वासयाम्येनाम् । (सहसोपसृत्य)
युक्तं नाम हृदयस्यापि लज्जितुम् ।

आरण्यका — (सलज्जमात्मगतम्) हा धिक् हा धिक् । सर्वं श्रुतमेतया । तदत्र
युक्तमेव प्रकाशयितुम् (प्रकाशं हस्ते गृहीत्वा) प्रियसखि, मा कुप्य मा
कुप्य । लज्जात्रापराध्यति ।

मनोरमा — (सहर्षम्) सखि, अलं शङ्कया । एतन्मे आचक्ष्व सत्यमेव त्वं
महाराजेन दृष्टा न वेति ।

1 साभिलाषम् ad with a longing, enviously 2 उद्देश spot 3 यस्मिन् = उद्देशे 4 आयास्यमान (f—ना) being annoyed, caus Pres Pass Part आ + √ यस् 4P. 5 अवलम्ब्य having supported, gerund अव + √ लम्ब् 1A 6 जीवितव्य (gens जीवितव्यस्य) to be alive, Pot PP √ जीव् 1P 7 युक्त Proper, deserving (√ युज् 4A.) 8 लज्जितुम् to feel ashamed, inf √ लज्ज् 6A 9 प्रकाशयितुम् to publish, to disclose, caus inf प्र + √ काश् 1 4A 10 कुप्य be thou angry, लोट् √ कुप् 4P 11 अलम् ind (+ ins & gerund) enough of, away with 12 शङ्का f fear 13 आचक्ष्व tell thou ! लोट् आ + √ चक्ष् 2A

Āranyakā—(longingly) This is the spot where the King supported and consoled me, saying "O timid one fear not !' when I was annoyed by the bees

Manoramā—(with joy) Oh she was also seen by the king ! By all means there is a means to save her I will now approach and comfort her (suddenly advancing) Is it proper to feel ashamed of your heart, really ?

Āranyakā—(bashfully to herself) Ah fie fie ! she has heard everything So it is proper for me to disclose here (Taking her by the hand) My dear friend, don't be angry Shame is to blame here

Manoramā—(joyfully) O friend, don't you worry ! Do tell me whether you were seen by the king or not

आरण्यका — (सलज्जमधोमुखी) श्रुतमेव प्रियसख्या सर्वम् ।

मनोरमा — यदि दृष्टा महाराजेन त्वं तदलं सन्तापितेन । स एवेदानीं दर्शनोपायपर्याकुलो भविष्यति ।

आरण्यका — (स्वगतम्) अयं सखीजनः पक्षपातेन मन्त्रयते । (प्रकाशम्) अयि सखीपक्षपातिनि, देवीगुणनिगडनिबद्धे खलु तस्मिन् जने कुत एतत् ।

मनोरमा — (विहस्य) हला अपण्डिते, कमलिनीबद्धानुरागोऽपि मधुकरो मालतीं प्रेक्ष्याभिनवरसास्वादलम्पटः कुतस्तामनासाद्य स्थितिं करोति ।

आरण्यका — किमेतेनासम्भावितेन । तदेहि । अधिकं खलु शरदातपेन सन्तप्तान्यद्यापि न मेऽङ्गानि सन्तापं मुञ्चन्ति ।

1 अधोमुख a (f —मुखी) having face downcast 2 अधस् ind below. 3 सन्तापितम् tormenting, pain 4 उपाय means, plan 5 दर्शनोपायपर्याकुल = दर्शनस्य उपायेन पर्याकुल 6 स्वगतम् = आत्मगतम् to oneself 7 सखीजन female friend or friends 8 पक्षपातिन् a (voc s f पक्षपातिनि) partial, attached to 9 गुण virtue 10 निगड fetter 11 देवीगुणनिबद्धे तस्मिन् जने (loc abs ) when the king is very much attached to the queen *for her virtues* 12 अपण्डित *ignorant* 13 कमलिनीबद्धानुराग = कमलिन्यां बद्ध अनुराग यस्य स 14 मालती f kind of jasmine 15 अभिनव fresh 16 आस्वाद tasting 17 लम्पट greedy, lustful 18 स्थिति f standing still 19 असम्भावित impossible

Āranyakā—(with her face downcast, abashed) You, my dear friend, have heard everything

Manoramā—If you had been seen by the king, then don't torture yourself. *He will now very much try and see you, too*

Āranyakā—(to herself) This friend speaks in my favour (Aloud) O you who are partial to your friend, how is it possible when he is tied by the fetters of the queen's virtues ?

Manoramā—(laughing) Ah ignorant one ! Though attached to the lotus, the bee becomes greedy for the taste of new honey when it sees a jasmine, and will not rest till it gets it

Āranyaka—No use of your impossible talk So come.
Even now my limbs extremely heated by the autumnal sun do not give up their heat

मनोरमा — अयि लज्जालुके, न युक्तमेतामवस्थां गतयापि त्वया आत्मा प्रच्छादयितुम् । (आरण्यका मुखमवनमयति)

मनोरमा — अविस्रम्भशीले, किमिदानीं प्रच्छादयसि । निःश्वासनिभविनिर्गतो दिवसं रात्रिमपि तवानुरागोऽविरतपतत्कुसुमशरशरनिवहप्रवृत्तहुङ्कारशब्द इव न भणति ? (आत्मगतम्) अथवा न खल्वयं काल उपालम्भस्य । तत्तावन्नलिनीपत्राण्यस्या हृदये दास्यामि । (उत्थाय दीर्घिकाया नलिनीपत्राणि गृहीत्वारण्यकाहृदये ददती) समाश्वसितु सखी समाश्वसितु (ततः प्रविशति विदूषक )

विदूषक :— अतिमहान्खलु प्रियवयस्यस्यारण्यकाया उपर्यनुरागः ।

1 लज्जालुक a (voc s f लज्जालुक) modest, bashful 2 प्रच्छादयितुम् to veil, to conceal, inf प्र + √ छद् 10U 3 अविस्रम्भ non confidence, mistrust 4 शील disposition, (समासान्ते) habituated to, inclined to 5 निश्वास sighing 6 निभ m n appearance manifestation 7 विनिर्गत come out, PP विनिस + √गम् 1P 8 निश्वासनिभविनिर्गत — निश्वासानां निभेन विनिर्गत 9 दिवस रात्रिम् = रात्रिंदिवा day and night 10 कुसुमशर cupid 11 शर arrow 12 निवह heap 13 प्रवृत्त begun, PP प्र + √वृत 1A 14 हुंकार hissing, roaring 15 उपालम्भ censure 16 दास्यामि I shall give place, लृट √दा 3U 17 उत्थाय having risen, gerund उद् + √स्था 1P 18 उपरि (+acc. gen and loc) on, towards, on account of 19 अविरतपतत्कुसुमशरशरनिवहप्रवृत्तहुंकारशब्द = अविरत पतता कुसुमशरस्य शराणां निवहात् प्रवृत्त हुंकारशब्द येन स 20 अवनमयति she bends, णिजन्त लट √नम 1U

Manorama—Ah bashful one, it is not proper for you to hide yourself in spite of this plight in which you have fallen (Āranyaka casts her face down) Ah mistrustful girl, does not your love coming out in the form of sighs day and night like a hissing sound caused from a heap of the arrows of Cupid falling down constantly speak for it ? Why do you now hide ? (To herself) Perhaps it is not the time for criticizing her So now I will place lotus leaves on her bosom

(Rising and bringing lotus leaves from the pond and placing them upon her heart) Take heart friend take heart !
(At that moment the jester enters )

Clown —Very great is the affection of my dear friend towards Āranyaka

येन परित्यक्तराजकार्यस्तस्या एव दर्शनोपायं चिन्तयन्नात्मानं विनोदयति । (विचिन्त्य) कुत्रेदानीं तां प्रेक्षे । अथवा तत्र दीर्घिकायामन्विष्यामि । (परिक्रामति)

मनोरमा — (आकर्ण्य) पदशब्द इव श्रूयते । तत्कदलीगुल्मान्तरिते भूत्वा पश्यावस्तावत्क एष इति । (उभे तथा कृत्वा पश्यतः)

आरण्यका — कथं स एव महाराजस्य पार्श्वपरिवर्ती ब्राह्मणः ।

मनोरमा — कथं वसन्तक एव । (सहर्षमात्मगतम्) अपि नाम तथा भवेत् ।

विदूषकः— (दिशोऽवलोक्य) किमिदानीमारण्यका सत्यमेव संवृत्ता ।

1 येन ind. because, on account of which, etc. 2 परित्यक्त deserted, given up ; PP. परि + √ त्यज् 1P. 3 राजकार्यम् royal duty. 4 परित्यक्तराजकार्यः = परित्यक्तं राजकार्यं येन सः 5 ताम्=आरण्यकाम्. 6 प्रेक्षे I see ; लट् प्र + √ ईक्ष् 1A. 7 अन्विष्यामि I search for ; लट् अनु + √ इष् 4.6P. 8 पदशब्दः sound of footsteps. 9 श्रूयते it is heard ; कर्मणिलट् √ श्रु 5P. 10 पार्श्वपरिवर्तिन् a. (nom s. m. पार्श्वपरिवर्ती) attending by the side of, waiting upon. 11 अपि नाम ind. I wish, it is likely that, in all probabilities. 12 सत्यम् truly, really. 13 संवृत्त happened, become ; PP. सम् + √ वृत् 1A. 14 भवेत् it might or would be ; विधिलिङ् √ भू 1P.

On that account, deserting his royal duty, and thinking of a means to meet her he consoles himself. (Reflecting) Where can I see her now? Well, I shall search for her about the pond. (He moves round.)

Manoramā—(listening) Something like a sound of footsteps is heard. So hiding ourselves behind the plantain thicket let us see who it is. (Both doing so, behold.)

Araṇyakā—O it is the Brahmin, the attendant to the king !

Manoramā—Is it Vasantaka ? (To herself joyfully) I wish it might be he.

Clown —(looking everywhere) What has now become of Araṇyakā really ?

मनोरमा — (सस्मितम्) सखि, राजवयस्यः खलु ब्राह्मणस्त्वामुद्दिश्य मन्त्रयते। तत्तावदवहिते श्रृणुवः । (आरण्यका सस्पृहं सलज्जं च श्रृणोति)

विदूषक :—(सोद्वेगम्) यदा तावन्मया गुरुमदनसंतापनिस्सहस्य प्रियवयस्यस्यास्वस्थवचनेन देव्योर्वासवदत्तापद्मावत्योरन्यासां च देवीनां भवनान्यन्विष्यता न सा दृष्टा तदा यत्र दीर्घिकायां दृष्टा एतामपि तावत्प्रेक्षिष्य इत्यागतोऽस्मि। तद्यावदिहापि नास्ति। किमिदानीं करिष्ये।

मनोरमा — श्रुतं प्रियसख्या ?

1 उद्दिश्य ind (+acc.) with reference to, about, for the sake of. 2 तावत् just now, in the meantime, completely. 3 गुरु heavy. 4 मदन. love. 5 निस्सह unbearable, impatient. 6 अस्वस्थ unwell, anxious, indisposed. 7 भवनम् (p. भवनानि) apartment, palace. 8 अन्विष्यत् (ins. s m. अन्विष्यता) searching for; Pres. Part. अनु + √इष् 4. 6P. 9 यत्र (rel. ad.) where. 10 प्रेक्षिष्ये I will see; लृट् प्र + √ईक्ष् 1A. 11 इह here 12 करिष्ये I will do, लृट् √कृ 8U. 13 आगत come; PP. आ + √गम् 1P 14 यदा ~ तदा (correlative) when ~ then. 15 अन्विष्यता connects मया.

Manoramā—(smiling) Friend, the Brahmin who is the king's companion speaks about you We shall hear him very attentively. (Āranyakā listens emotionally and bashfully.)

Clown —(agitatedly) When, at the anxious command of my dear friend who is not able to bear the torment of his deep love, I have not been able to see her in spite of the fact that I have searched for her in the apartments of Queen Vasavadattā, Queen Padmāvatī and all other consorts, then I came here with a hope that I might see her on the pond where she was seen before But I cannot find her even here. What shall I do now ?

Manoramā—Have you heard, my dear friend ?

विदूषकः— (विचिन्त्य) अथवा भणित एवाहं वयस्येन 'यदि तामन्विष्यन्न प्रेक्षसे तत्ततोऽपि तावद्दीर्घिकातस्तस्याः करतलस्पर्शद्विगुणितसुखशीतलानि नलिनीपत्राणि गृहीत्वागच्छ' इति। तत्कथमेतानि ज्ञातव्यानि।

मनोरमा — अयं ममावसरः। (उपसृत्य विदूषक हस्त गृहीत्वा) वसन्तक, एहि। अहं ते ज्ञापयामि।

विदूषकः— (सभयम्) कस्य त्वं ज्ञापयसि। किं देव्याः। न खलु मया किमपि मन्त्रितम्।

मनोरमा — वसन्तक, अलं शङ्कया। यादृश्यारण्यकायाः कृते आत्मनः प्रियवयस्यस्यावस्था त्वया वर्णिता ततो द्विगुणतरा भर्तुरपि कृते मम प्रियसख्या अवस्था।

1 दीर्घिकातस ind from the lake, pond 2 करतल m n palm of the hand 3 द्विगुणित a twofold redoubled 4 करतलस्पर्शद्विगुणितसुखशीतलानि=करतलस्य स्पर्शेन द्विगुणिते सुख शीतल च येषा तानि 5 ज्ञातव्य (ought) to be known, pot PP √ ज्ञा 9U 6 ज्ञापयामि I inform, I let~know णिजन्तात् लट् √ ज्ञा 9U 7 यादृशी qualifies अवस्था. 8 आत्मन = वसन्तकस्य 9 वर्णित (nom s f वर्णिता) sounded (spoken) PP √ वर्ण् 1P 10 कृते (+ gen) for, on account of 11 भर्तु = महाराजस्य

Clown —(musing) Furthermore, I was told by my friend,— If you do not find her after a search then bring me without fail the lotus leaves from the pond that are more soothing and cool on account of the touch of her palms" But how can they be distinguished?

Manoramā—This is my opportune chance (Advancing and seizing the jester by the hand) O Vasantaka come! I will let you know

Clown —(with a fear) Whom? to the queen? Indeed, I did not say anything at all

Manoramā—O Vasantaka, don't be afraid! My dear friend's love sickness for the king is twice as grave as your friend's love-sickness for Āranyakā as pictured by you

तत्पश्य पश्य । (उपसृत्यारण्यका दर्शयति)

विदूषकः— (दृष्ट्वा सहर्षम्) सफलो मे परिश्रमः । स्वस्ति भवत्यै ।

(आरण्यका सलज्ज कमलिनीपत्राण्यपनीयोत्तिष्ठति)

मनोरमा— आर्य वसन्तक, तव दर्शनेनैवापगतः प्रियसख्याः संतापो येन स्वयमेव नलिनीपत्राण्यपनयति । तदनुगृह्णात्वार्य इमानि ।

आरण्यका— (सावेगम्) अयि परिहासशीले, कस्मान्मां लज्जयसि ।

विदूषकः— (सविषादम्) तिष्ठन्तु तावन्नलिनीपत्राणि । अतिलज्जालुका ते प्रियसखी । तत्कथमेतयोः समागमो भविष्यति ।

मनोरमा— (क्षणं विचिन्त्य सहर्षम्) वसन्तक, एवमिव । (कर्णे कथयति)

विदूषकः— (अपवार्य) साधु प्रियसखि साधु । यावदेव युवां नेपथ्यग्रहणं कुरुथः तावदेवाहमपि वयस्यं गृहीत्वागच्छामि । (इति निष्क्रान्तः)

1 तत = ताम् अवस्थाम 2 दर्शयति she shows णिजन्तात्लट् √ दृश् 1P 3 सफल fruitful 4 परिश्रम trouble exertion 5 उत्तिष्ठति she stands up, लट उद् +√ स्था 1P 6 अपनयति she removes, लट अप +√ नी 1U 7 स्वयम personally, in person 8 अनुगृह्णातु let him accept, लोट अनु +√ ग्रह 9U 9 आवेग agitation, hurry 10 सावेगम् agitatedly, hurriedly 11 परिहास joke jest 12 लज्जयसि you cause to blush, णिजन्तात्लट √ लज्ज 6A 13 समागम union 14 एतयो = राजारण्यकोभयो 15 क्षणम for a moment

Observe it observe it ! (Approaching she shows Āranyaka )

Clown —(looking at with joy) My endeavour is fruitful Hail to your Ladyship ! (Bashfully removing the lotus leaves Āranyaka stands up )

Manorama—Sir Vasantaka, at your mere appearance my dear friend's heat has been dispelled inasmuch as she takes off the lotus leaves by herself So may you accept them

Āranyaka—(hurriedly) Ah joking girl ! Why do you make me bashful ?

Clown —(disappointed) Now let the lotus leaves alone ! Your dear friend is very much bashful Then how will they unite themselves ?

Manorama—(thinking for a mement, joyfully) O Vasantaka like this (she whispers into his ear )

Clown —(aside) Fine idea my dear friend ! While you two arrange your dressing, I will also bring my friend

( Exit )

मनोरमा — अतिकोपने, उत्तिष्ठोत्तिष्ठ। नर्तितव्यमस्माभिस्तस्यैव नाटकस्य नर्तितशेषम्। तदेहि। प्रेक्षागृहमेव गच्छावः। (परिक्रम्यावलोक्य) इदं प्रेक्षागारम्। यावदेहि प्रविशावः। (प्रविष्टकेनावलोक्य) साधु साधु। सर्वं सज्जीकृतम्। देव्यागन्तव्यम्। (तत प्रविशति देवी साङ्कृत्यायनी विभव तश्च परिवार)

वासवदत्ता — भगवति, अहो ते कवित्वम्। येनैतद्गूढवृत्तान्तं नाटकोपनिबद्धं सानुभवमप्यस्माकमार्यपुत्रचरितमदृष्टपूर्वमिव दृश्यमानमधिकतरं कौतूहलं वर्धयति।

सांकृत्यायनी — आयुष्मति, आश्रयगुण एवायमीदृशः। यदसारमपि काव्यमवश्यमेव शृण्वतां श्रवणसुखमुत्पादयति। पश्य

1 अतिकोपन a very angry. 2 प्रेक्षागृहम्, प्रेक्षागारम् (प्रेक्षा + आगारम) theatre 3 प्रविष्टकम् entering room or stage 4 सज्जीकृत ready, prepared 5 विभवतस ind according to rank 6 भगवत् a (voc s f भगवति) sacred, holy 7 कवित्वम poetic skill 8 गूढ secret, hidden 9 अनुभव experience 10 सानुभवम् experienced (it qualifies वृत्तान्तम्) 11 चरितम् exploit, deed 12 अदृष्टपूर्वम् unseen before 13 कौतूहलम् interest, curiosity 14 वर्धयति it increases ; णिजन्तात्लट √ वृध 1A 15 आयुष्मत a (voc s f आयुष्मति) long-lived (this term is addressed to members of a royal family) 16 असार worthless 17 काव्यम् poem, drama 18 श्रवण m n hearing, ear 19 शृण्वत listening, Pres Part √ श्रु 5P

Manoramā—O very angry girl, rise, rise! We have to act the remaining portion of the drama So come, let us repair to the theatre (Pacing about and looking) This is the theatre. Come along Let us just now enter (on entering the stage looking) Fine, fine! Everything is ready The queen is to come (Then enter the queen, Sāngkrtyayani and retinue in the order of their ranks)

Vasavadattā—O holy lady, your poetical skill is so wonderful that the episode of my and my husband's exploit dramatised, though actually experienced multiplies very much interest with its stage-performance as if it had been unseen before

Sānkrtyayanī—Your Majesty, it is owing to the merit of the original poem (drama) inevitably delights the ears of the audience, however worthless it may be Behold!

प्रायो यत्किञ्चिदपि प्राप्नोत्युत्कर्षमाश्रयान्महतः ।
मत्तेभकुम्भतटगतमेति हि शृङ्गारतां भस्म ॥ १ ॥

वासवदत्ता — (सस्मितम्) भगवति, सर्वस्य वल्लभो जामाता भवतीति ज्ञायत एवैतत् । तत्किमेतेन कथानुबन्धेन । वरं तदेव नर्तितव्यं द्रष्टुम् ।

सांकृत्यायनी — एवम् । इन्दीवरिके, प्रेक्षागृहमादेशय ।

चेटी — एतु एतु भट्टिनी । (सर्वा परिक्रामन्ति)

1 प्रायस mostly generally 2 किञ्चित anything 3 प्राप्नोति it attains, लट प्र + √ आप 5P 4 उत्कर्ष eminence excellence 5 मत्त rutting, intoxicated 6 इभ elephant 7 कुम्भ temple of an elephant 8 मत्तभकुम्भतटगतम = मत्तभस्य कुम्भतट गतम 9 एति it attains, लट √इ 2P 10 शृङ्गारता f amorous state loveliness 11 भस्मन n (nom s भस्म) ashes 12 वल्लभ beloved, loving dear 13 जामातृ m (nom s जामाता) son in law, lord sunflower 14 कथा f talk, tale 15 अनुबन्ध continuity repeated pursuit 16 आदेशय show thou ! णिजन्तात्लोट आ + √ दिश 6U 17 एतु may she go लोट √ इ 2P 18 भट्टिनी f queen 19 आश्रय source, origin

यत किञ्चित अपि महत आश्रयात उत्कर्षं प्राय प्राप्नोति मत्तभकुम्भतटगत भस्म शृङ्गारता एति हि ॥ आर्या

Anything that is worthless generally attains to eminence from a great substratum, for even ashes reaching the side of a rutting elephant's temples, acquire loveliness

Vasavadatta—(smiling) O blessed lady, it is known that my lord is beloved of everyone Therefore there is no need of continual talks It is better to appreciate the peformance

Sangkrtyayani—Yes, it is O Indivarika guide us to the theatre

Maid —May Her Majesty come (all walk round )

सांकृत्यायनी — (विलोक्य) अहो प्रेक्षणीयता प्रेक्षागृहस्य ।

आभाति रत्नशतशोभितशातकुम्भ-
स्तम्भावसक्तपृथुमौक्तिकदामरम्यम् ।
अध्यासितं युवतिभिर्विजिताप्सरोभिः
प्रेक्षागृहं सुरविमानसमानमेतत् ॥ २ ॥

मनोरमारण्यके — (उपसृत्य) जयतु जयतु भट्टिनी ।

वासवदत्ता — मनोरमे, अतिक्रान्ता खलु सन्ध्या । तद्गच्छतम् । लघु गृह्णीतं नेपथ्यम् ।

1 प्रेक्षणीयता f lovely sight 2 रत्नम् jewel. शतम् hundred 3 शोभित beautiful, adorned 4 स्तम्भ pillar 5 अवसक्त suspended, clung, PP अव + √सञ्ज् 1P 6 पृथु broad, large 7 मौक्तिकम् pearl 8 दामन् n string streak 9 रम्य delightful 10 रत्नशतशोभितशातकुम्भस्तम्भावसक्तपृथुमौक्तिकदामरम्यम् = रत्नाना शतै शोभितेषु शातकुम्भस्तम्भेषु अवसक्तानि पृथूनि मौक्तिकानि तेषा दामानि तै रम्यम् 11 अध्यासित occupied PP अधि + √आस् 2A 12 युवति f damsel 13 अप्सरस् f (ins p अप्सरोभि) nymph 14 विजिताप्सरोभि = विजिता अप्सरस याभि ताभि 15 सुरविमान heavenly palace 16 समान equal, same 17 सन्ध्या f twilight 18 गच्छतम् you must go, द्विवचनलोट √गम् 1P 19 गृह्णीतम् you two must take, लोट् √ग्रह 9U

रत्नशतशोभितशातकुम्भस्तम्भावसक्तपृथुमौक्तिकदामरम्य विजिताप्सरोभि युवतिभि अध्यासित एतत् प्रेक्षागृह सुरविमानसमान आभाति ॥ वसन्ततिलका

Sāngkṛtyāyanī—(beholding) O lovely sight of the theatre!

This theatre, which is delightful on account of the strings of large pearls suspended from the golden pillars adorned with hundreds of jewels and which is occupied by the young damsels lovelier than the nymphs appears like a heavenly palace of the gods

Manoramā, Āranyakā —(advancing) May the queen be victorious!

Vāsavadattā—O Manoramā, the twilight is past Go both of you, and dress yourselves up!

उभे — यद्देव्याज्ञापयति । (इति प्रस्थिते)

वासवदत्ता — आरण्यके, एतैरेव मदङ्गपिनद्धैराभरणैर्नेपथ्यभूमिं गत्वात्मानं प्रसाधय । (आभरणान्यङ्गादवतार्यारण्यकायै समर्पयति) मनोरमे, त्वमपि नलगिरिग्रहणपरितुष्टेन तातेनार्यपुत्राय दत्तान्याभरणानीन्दीवरिकासकाशाद्गृहीत्वा नेपथ्यभूमिं गत्वात्मानं मण्डय येन सुसदृशी दृश्यसे महाराजस्य ।

(मनोरमा इन्दीवरिकासकाशादाभरणानि गृहीत्वा महारण्यकया निष्क्रान्ता)

इन्दीवरिका — इदमासनम् । उपविशतु भट्टिनी ।

वासवदत्ता — (आसनं निर्दिश्य) उपविशतु भगवती । (उभे उपविशत)

(ततः प्रविशति गृहीतनेपथ्यः कञ्चुकी)

1 प्रस्थित departed, PP प्र + √स्था 1P 2 पिनद्ध fastened, put on, PP पि + √नह् 4P 3 आभरणम् ornament 4 नेपथ्यभूमि f dressing room, dressing place 5 प्रसाधय put on dress thou! 6 अवतार्य having taken down caus gerund, अव + √तॄ 1P 7 समर्पयति she gives, offers, णिजन्तात्लट् सम् + √ऋ 1 3 P 8 नलगिरि m the name of King Pradyota's elephant 9 परितुष्ट satisfied, pleased, PP परि + √तुष 4P 10 दत्त (acc p n दत्तानि) given, PP √दा 3U 11 मण्डय decorate thou लोट √मण्ड् 1P 10U 12 सुसदृश (f सुसदृशी) well resembling, very much like 13 आसनम् seat 14 उपविशतु she may sit down, लोट उप + √विश् 6P 15 गृहीतनेपथ्यः = गृहीतं नेपथ्यं येन सः

Both —Yes, as Your Majesty commands (They depart)

Vāsavadattā—O Āranyakā, go to the dressing room and adorn yourself with these ornaments fastened on my limbs (Taking off the ornaments from her body she offers them to Āranyakā) O Manorama, do you also take from Indivarikā the ornaments that were presented to my husband by my father who was pleased with the capture of Nalagiri and decorate yourself with them in the dressing room Then you will be very much like the king (Receiving the ornaments from Indivarikā, Manorama moves out with Āranyakā)

Indivarikā—Here is the seat Pray be seated, Your Majesty

Vāsavadattā—*(pointing out a seat) Holy one, be seated*

(Both sit down Then appears the Chamberlain dressed)

कञ्चुकी — अन्तःपुराणां विहितव्यवस्थः
पदे पदेऽहं स्खलितानि रक्षन्।
जरातुरः संप्रति दण्डनीत्या
सर्वं नृपस्यानुकरोमि वृत्तम् ॥३॥

भोः आज्ञापितोऽस्मि विमानिताशेषशत्रुसैन्येन यथार्थनाम्ना महासेनेन 'समादिश्यतामन्तःपुरेषु यथा श्वो वयमुदयनोत्सवमनुभवामः। अतो युष्माभिरुत्सवानुरूपवेषोज्ज्वलेन परिजनेन सह मन्मथोद्यानं गन्तव्यम्' इति।

1 अन्त.पुरम् harem-lady. 2 विहित done, PP. वि + √ धा 3U. 3 व्यवस्था f. management, state of affairs. 4 विहितव्यवस्थ. = विहिता व्यवस्था येन स 5 पदे पदे at every step. 6 स्खलितम् stumbling, blunder, error. 7 रक्षत् (nom.s.m. रक्षन्) ruling, avoiding; Pres Part. √ रक्ष् 1P. 8 जरा f. old age. 9 आतुर a smitten, feeble 10 जरातुर = जरया आतुरः. 11 दण्डनीतिः f. (ins.s.—नी-या) administration, guidance of a stick 12 नृपः king. 13 अनुकरोमि I follow, imitate; अनु + √ कृ 8U. 14 वृत्तम् conduct. 15 विमानित disgraced; caus. PP. वि + √ मन् 4.8A. 16 शत्रु m. enemy. 17 सैन्यः army. 18 विमानिताशेषशत्रुसैन्येन = विमानितः अशेष शत्रूणां सैन्यः येन तेन. 19 यथार्थं true to the meaning. 20 नामन् n. name 21 यथार्थनाम्ना = यथार्थं नाम यस्य तेन. 22 महासेनः great warrior-king. 23 समादिश्यताम् it must be instructed, कर्मणिलोट् समा + √ दिश् 6U. 24 श्वस् tomorrow. 25 अतस् hence. 26 वेषः dress. 27 उज्ज्वल bright 28 परिजनः retinue.

अन्तःपुराणां विहितव्यवस्थः अहं पदे पदे (अन्तःपुराणां) स्खलितानि रक्षन् संप्रति जरातुरः दण्डनीत्या नृपस्य सर्वं वृत्तं अनुकरोमि ॥ उपजाति.

Chamberlain—Supervising the affairs of the harem ladies and avoiding their errors at every step I imitate the king's every conduct by the help of a walking stick, as I am now feeble due to my old age

Hark ye! I am commanded by King Mahāsena (great warrior) who dishonoured, true to the meaning of his name, the entire army of his adversary thus;—"Give an instruction to the harem-ladies to come to the Garden of Love along with the retinue in gorgeous attire befitting the festivity as we will enjoy a festival in honour of Udayana tomorrow."

सांकृत्यायनी — (कञ्चुकिनं निर्दिश्य) राजपुत्रि, प्रवृत्ता प्रेक्षा। दृश्यताम्।

कञ्चुकी — तदेतदादेष्टव्यं परिजनेन सह गन्तव्यमिति। गृहीतनेपथ्येनेति नादेष्टव्यम्। कुतः

पादैर्नूपुरिभिर्नितम्बफलकैः शिञ्जानकाञ्चीगुणै-
र्हारापादितकान्तिभिः स्तनतटैः केयूरिभिर्बाहुभिः।
कर्णैः कुण्डलिभिः करैः सवलयैः सस्वस्तिकैर्मूर्धजै-
र्देवीना परिचारिकापरिजनोऽप्येतेषु संदृश्यते॥ ४॥

1 राजपुत्री f (voc s राजपुत्रि) princess 2 प्रेक्षा f theatrical performance 3 दृश्यताम् it must be seen, कर्मणि लोट √दृश 1P 4 आदेष्टव्य (ought) to be ordered, pp Pot आ + √दिश 6U 5 गृहीतनेपथ्येन — गृहीतं नेपथ्यं येन तेन (परिजनेन) 6 नूपुर m n anklet 7 नूपुरिभि = नूपुर युक्त 8 नितम्ब hip 9 फलकम buttocks 10 शिञ्जानम tinkling jingling sound 11 काञ्ची f girdle 12 गुण string 13 हार necklace 14 आपादित produced caus PP आ + √पद 4A 15 कान्ति f beauty 16 हारापादितकान्तिभि = हारै आपादिता कान्ति यषा त 17 केयूर m n armlet 18 केयूरिभि = केयूरै अलङ्कृतै 19 बाहु m arm 20 कुण्डल m n earring 21 कुण्डलिभि = कुण्डलै सहितै 22 वलयम् bracelet ring 23 सवलय = वलयसहित 24 स्वस्तिकम auspicious mark, sign 25 सस्वस्तिकै — स्वस्तिकसहित 26 मूर्धज hair of the head 27 एतेषु = अन्तःपुरेषु 28 संदृश्यते it is seen कर्मणि लट सम + √दृश 1P

नूपुरिभि पाद शिञ्जानकाञ्चीगुण नितम्बफलकै हारापादितकान्तिभि स्तनतट केयूरिभि बाहुभि कुण्डलिभि कर्णै सवलय करै सस्वस्तिक मूर्धज देवीना परिचारिकापरिजन अपि एतेषु संदृश्यते॥ शार्दूलविक्रीडितम

Sangkrtyayani—(pointing out the Chamberlain) Princess the theatrical show has commenced Behold!

Chamberlain—So I must instruct them to go along with the ladies in waiting However I must not instruct the latter to be clad in gorgeous attire whereas

Amongst them (the harem ladies) are the queens ladies in waiting visible with their feet adorned with anklets their hips with tinkling girdle belts, their breasts on which beauty is produced by necklaces, their arms with armlets, their ears with earrings, their hands with rings and their hair fashioned into an auspicious Swastic sign

न खलु किञ्चिदत्रापूर्वमनुष्ठेयम् । केवलं स्वाम्यादेश इति मत्वाहं समादिष्टः । तदाज्ञाशेषं राजपुत्र्यै निवेदयामि । (परिक्रम्यावलोक्य च) इयं सा वासवदत्ता वीणाहस्तया काञ्चनमालयानुगम्यमाना गन्धर्वशालां प्रविष्टा । यावदस्याः कथयामि । (परिक्रामति)

(तत प्रविशति गृहीतवासवदत्तानेपथ्यासनस्थारण्यका वीणाहस्ता काञ्चनमाला च)

आरण्यका — हला काञ्चनमाले, कस्मात्पुनश्चिरयत्यद्यापि वीणाचार्यः ।

काञ्चनमाला — भर्तृदारिके, दृष्टस्तेनैक उन्मत्तः । तस्य वचनं श्रुत्वा चित्रेण भावितोऽपहसंस्तिष्ठति ।

आरण्यका — (सहस्ततालं विहस्य) हञ्जे, सुष्ठ्वेतं पृच्छति । सदृशाः सदृशे रज्यन्ते इति द्वावत्रोन्मत्तौ ।

1 अपूर्वं *spectacular, extraordinary* 2 अनुष्ठेय *(ought) to be done, Pot PP* अनु +√ स्था 1P 3 स्वाम्यादेश = स्वामिन आदेश 4 मत्वा having thought, gerund √ मन् 4A 5 आज्ञा f command 6 वीणा f lute 7 हस्त hand 8 वीणाहस्ता = वीणा हस्ते यस्य सा 9 अनुगम्यमान being followed Pass Pres Part अनु +√ गम् 1P 10 गन्धर्वशाला f music hall 11 गृहीतवासवदत्तानेपथ्या = गृहीत वासवदत्ताया नेपथ्य यया सा 12 चिरयति he delays नामधातु √ चिरय P 13 आचार्य teacher 14 भर्तृदारिका Princess 15 तेन = वीणाचार्येण 16 उन्मत्त mad 17 चित्रेण भावित wonder -stricken 18 ताल clapping hands together 19 रज्यन्ते (+ loc ) they love, √ रञ्ज 1 4U

Indeed, *nothing singular has to be performed here I got the* command merely thinking that it was my lord s command So I shall inform the princess of the rest of his command (pacing about and looking) There enters Vāsavadatta into the music hall accom panied by Kānchanamāla with a lute in her hand I will just tell her (He walks round ) (Then appear Āranynkā seated on a couch disguised as Vasavadatta and Kānchanamalā )

Āranyakā — Maid Kānchanamālā, why does my lute instructor delay again today ?

Kānchanamālā — O princess, he has met a mad man He stands laughing, *marvelling at his speech*

Aranyakā — (clapping her hands together and laughing) O maid, he likes him very nicely As the saying goes like would associate with the like Both the men are mad here

सांकृत्यायनी — राजपुत्र्याः सदृशमाकारं पश्याम्यस्याः । तादृशेनाकारेणावश्यं त्वदीयां भूमिकां सम्भावयिष्यति ।

कञ्चुकी — (उपसृत्य) राजपुत्रि, देवस्त्वामाज्ञापयति । 'तत्त्वया नवतन्त्रीसज्जया घोषवत्या स्थेयम् । श्वोऽवश्यमस्माभिर्वीणां वादयन्ती श्रोतव्या ।' इति ।

आरण्यका — यद्येवं लघु वीणाचार्यं विसर्जय ।

कञ्चुकी — एष वत्सराजं प्रेषयामि । (इति निष्क्रान्तः)

आरण्यका — काञ्चनमाले, उपनय मे घोषवतीं यावदस्यास्तन्त्रीः परीक्षे ।

(काञ्चनमाला वीणामर्पयति । आरण्यकोत्सङ्गे वीणां कृत्वा सारयति) (ततः प्रविशति गृहीतवत्सराजनेपथ्या मनोरमा ।)

1 आकार appearance, countenance. 2 त्वदीय a. (acc. s. f. भूमिकाम्) your. 3 भूमिका f. role, part. 4 सम्भावयति she will honour; णिजन्ताल्लृट् सम् + √भू 1P. 5 नवतन्त्री f. new string. 6 सज्ज (ins s. f. सज्जया) ready. 7 घोषवती f. lute. 8 त्वया स्थेयम् = त्वम् तिष्ठ you must be present 9 वादयत् (nom. s. f. वादयन्ती) playing on a musical instrument. 10 विसर्जय send thou! णिजन्ताल्लोट् वि + √सृज् 6P. 11 प्रेषयामि I send; णिजन्ताल्लट् प्र + √इष् 1U.4P 12 उपनय offer thou! लोट् उप + √नी 1U. 13 परीक्षे I examine; परि + √ईक्ष 1A. 14 उत्सङ्गे कृत्वा having placed it upon the lap. 15 सारयति she plays on, णिजन्ताल्लट् √सृ 1.3P.

Sāngkrtyāyani — I see her appearance is similar to yours. She will certainly honour your part with such appearance.

Chamberlain — (approaching) Your Highness, His Majesty commands you; "Tomorrow we shall inevitably listen to your lute-solo. You will be, therefore, present with your lute ready with new strings."

Āranyakā — If so, send here my lute-instructor soon!

Chamberlain — I shall dispatch King of Vatsa. (Exit)

Āranyakā — Kānchanamālā, bring me my lute so that I might examine its strings (Kānchanamālā offers her the lute. Āranyakā, placing it on her lap, plays on it.) (Then enters Manoramā in the disguise of Vatsa King.)

मनोरमा — (स्वगतम्) चिरयति खलु महाराजः। किं न कथितं वसन्तकेन। अथवा देव्या बिभेति। यदीदानीमागच्छेत्ततो रमणीयं भवेत्।

(तत प्रविशति राजावगुण्ठितशरीरो विदूषकश्च)

राजा — संतापं प्रथमं तथा न कुरुते शीतांशुरद्यैव मे
निःश्वासा ग्लपयन्त्यजस्रमधुनैवोष्णास्तथा नाधरम्।
संप्रत्येव मनो न शून्यमलसान्यङ्गानि नो पूर्वव-
दुःखं याति मनोरथेषु तनुतां संचिन्त्यमानेष्वपि ॥ ५ ॥

1 बिभेति he fears ; लट् √भी 3P 2 आगच्छेत् he should come , विधिलिङ् आ + √ गम् 1P. 3 रमणीय fine, delightful 4 भवेत् it should be , विधिलिङ् √भू 1P. 5 अवगुण्ठित covered, veiled , PP. अव + √गुण्ठ् 10U. 6 शरीरम् body. अवगुण्ठितशरीरः = अवगुण्ठित शरीर यस्य स. 8 प्रथमम् ad at first 9 कुरुते it makes ; √कृ 8U. 10 शीतांशु m. moon. 11 अद्य now. 12 निश्वास sigh. 13 ग्लपयन्ति they exhaust, cause to fade ; णिजन्तात्लट् √ग्लै 1P. 14 अजस्रम् ad. perpetually, constantly. 15 अधुना now. 16 उष्ण hot. 17 अधरः lip 18 मनस् n. mind. 19 अलस a (nom p. n अलसानि) languid, inactive, idle. 20 नो = न not. 21 पूर्ववत् ind as before. 22 तनुता f. emaciation, thinness. 23 संचिन्त्यमान being recollected or remembered , Pass. Pres. Part. सम् + √चिन्त् 10U. 24 मनोरथेषु संचिन्त्यमानेषु (loc abs ) while my wishes are recollected

शीतांशु मे प्रथम संताप अद्य एव न तथा कुरुते उष्णा निश्वासा अधुना एव तथा अजस्र अधर न ग्लपयन्ति मन संप्रति एव न शून्य अङ्गानि पूर्ववत् नो अलसानि मनोरथेषु सञ्चिन्त्यमानेषु अपि दु ख तनुता याति ॥ शार्दूलविक्रीडितम्

Manoramā—(to herself) Indeed, the king is delaying. Has Vasantaka not spoken to the king, or is he afraid of the queen ? Should he come now, it should be fine.

(Then enters the king and the clown, his body veiled.)

King —Now the moon does not so much torment me as it did at first, hot sighs do not constantly exhaust my lips now, my mind is no more vacant, my limbs are not languid as before, and my sorrow gradually fades away even while my wishes are being recollected.

वयस्य, सत्यमेवोक्तं मनोरमया यथा 'मम एषा प्रियसखी देव्या महाराजस्य दर्शनपथादपि रक्ष्यते। तदयं समागमोपायः। अद्य रात्रावस्माभिरुदयनचरितं नाम नाटकं देव्याः पुरतो नर्तितव्यम्। तत्रारण्यका वासवदत्ता भविष्यति। अहमपि वत्सराजः। तच्चरितेनैव सर्वं शिक्षितव्यम्। तदागत्य स्वयमेव स्वां भूमिकां कुर्वाणः समागमोत्सवमनुभवतु' इति।

विदूषक :— यदि मां न प्रत्येषि एषा मनोरमा तव वेषं धारयन्ती तिष्ठति। तदुपसृत्य स्वयमेव पृच्छ।

1 उक्त said, PP √वच् 2P 2 दर्शनपथ (abl s पथात्) range of sight 3 रक्ष्यते she is guarded or avoided, कर्मणि लट √रक्ष 1P 4 रात्रि f (loc s रात्रौ) night 5 चरितम exploit, deed 6 नाम ind named, by the name of 7 पुरतम (+ gen) in front of, before 8 शिक्षितव्य (ought) to be learnt PP Pot. √शिक्ष 1A 9 आगत्य having come gerund आ + √गम 1P 10 स्व a (acc s f स्वाम) one's own 11 कुर्वाण doing Pres Part Atm √कृ 8U 12 समागम union rendezvous 13 उत्सव joy 14 समागमोत्सवम् = समागमस्य उत्सव तम 15 अनुभवतु he must enjoy, लोट अनु + √भू 1P 16 प्रत्येषि thou trustest, लट प्रति + √इ 2P 17 धारयत् (nom s f धारयन्ती) bearing assuming Pres Part √धृ 10U 18 पृच्छ ask thou! लोट् √प्रच्छ् 6P

My friend, is it true that Manorama said as follows?
"This my dear friend is even guarded by the queen from the king's sight This is, therefore, a means to realize their union, tonight we shall stage a play entitled the deed of Udayana in the presence of the queen. There Aranyaka will become Vāsavadatta and the king will assume his own rôle as Vatsa King Everything is to be learnt by the deed itself So let him enjoy the joy of meeting her by going there and playing his own rôle"

Clown —If you do not trust me, go and ask Manorama as she stands wearing your own cloak!

राजा — (मनोरमामुपसृत्य) मनोरमे, सत्यमिदं यद्वसन्तकोऽभिधत्ते।

मनोरमा — भर्तः, सत्यमेव। मण्डयैतैराभरणैरात्मानम्।

(इत्याभरणान्यङ्गादवतार्य राज्ञ समर्पयति। राजा परिदधाति)

विदूषकः — एते खलु राजानो दास्याप्येवं नर्त्यन्ते। अहो कार्यस्य गुरुता।

राजा — विहस्य) मूर्ख, नैष कालः परिहासस्य। निभृतेन चित्रशालां प्रविश्य मनोरमया सहास्मन्नृत्तं पश्यता त्वया स्थीयताम्।

(उभौ तथा कुरुत)

आरण्यका — काञ्चनमाले, तिष्ठतु वीणा। प्रक्ष्यामि तावत्किमपि।

राजा — शृणोमि तावत्कतमोऽयमुद्देशो वर्तते। (इत्यवहित शृणोति)

काञ्चनमाला — पृच्छतु भर्तृदारिका।

1 अभिधत्ते (Atm) he speaks, लट अभि + √धा 3U 2 परिदधाति he puts on, परि + √धा 3U 3 राजान kings; nom p of राजन् 4 दासी f (ins दास्या) slave-girl 5 नर्त्यन्ते they are made to dance णिजन्तात्कर्मणिलट √नत् 4P 6 कार्यम motive 7 गुरुता f importance 8 निभृतेन = निभृतम secretly 9 चित्रम् picture 10 अस्मद = अस्माकम् 11 नृत्तम् drama 12 प्रक्ष्यामि I will ask, लृट√प्रच्छ् 6P 13 कतम a which, what, who 14 उद्देश narration, brief account 15 वर्तते it is, लट √वृत 1A

King — (moving towards Manorama) O Manorama, is what Vasantaka says true?

Manorama — Your Majesty, yes, it is true Pray decorate yourself with these ornaments (Thus she takes off from her body and offers them to the king The king puts them on)

Clown — Even a slave girl makes kings dance in this way O importance of a motive (or purpose)!

King — (laughing) Idiot! This is no time for a jest Go to the picture hall and stay there watching our performance with Manorama in secret! (Both do the same)

Aranyaka — Kanchanamala, leave the lute alone! I will ask you some question

King — Let me hear now what their narration is (He listens attentively)

Kānchanamāla — May Your Highness question me.

आरण्यका — सत्यमेव तातो मन्त्रयते यथा 'यदि वीणां वादयन्नपहरति मां वत्सराजोऽवश्यं वन्धनान्मुञ्चामि' इति ।

राजा — (प्रविश्य पटाक्षपेण सहर्षं वस्त्रान्ते ग्रथित वध्नाति) एवमेतत् । कः संदेहः ।

सपरिजनं प्रद्योतं विस्मयमुपनीय वादयन्वीणाम् ।
वासवदत्तामपहरामि नचिरादेव पश्याम्यहम् ॥ ६ ॥

यतः सुसंविहित सर्वं यौगन्धरायणेन ।

वासवदत्ता — (सहसोत्थाय) जयतु जयत्वार्यपुत्रः ।

राजा — (स्वगतम) कथं प्रत्यभिज्ञातोऽस्मि देव्या ।

सांकृत्यायनी — (सस्मितम) राजपुत्रि, अलमलं सम्भ्रमेण। प्रेक्षणीयकमेतत् ।

राजा — (आत्मगत सहर्षम) इदानीमुच्छ्वासितोऽस्मि ।

1 अपहरति he takes away, captivates लट अप + √हृ 1U 2 मुञ्चामि I release √मुच 6P 3 पटाक्षपेण with a hurried toss of the curtain 4 वस्त्रम garment 5 अन्त end 6 ग्रथितम knot 7 सदेह doubt 8 प्रद्योत Vasavadatta's father 9 नचिरात soon 10 यतम whereas 11 सुसंविहित well arranged 12 प्रत्यभिज्ञात recognised, pp प्रति + अभि + √ज्ञा 9U 13 सम्भ्रम confusion, error 14 उच्छ्वासित enlivened, caus pp उद + √श्वस 2P

वीणा वादयन सपरिजन प्रद्योत विस्मय उपनीय वासवदत्ता अपहरामि अहं नचिरात एव पश्यामि ॥ आर्या

Aranyaka — Is it true that my father has spoken like this? "If the King of Vatsa captivates me by dint of his lute solo I will certainly set him at liberty"

King — (entering with a hurried toss of the curtain he ties a knot at the fringe of his garment with joy) Exactly No doubt
By playing on the lute I will throw Pradyota along with his retinue into wonderment, and snatch away Vasavadatta I know it will be soon accomplished
For everything has been well planned by Yaugandharayana

Vasavadatta — (at once rising) May my husband be victorious!

King — (to himself) How, am I recognised by the queen?

Sangkrtyayani — (with a smile) O princess don't—don't be confused! This is a dramatic scene

King — (to himself gaily) Now I am enlivened!

वासवदत्ता — (सविलक्षस्मितमुपविश्य) कथं मनोरमैषा । मया पुनर्ज्ञातमार्यपुत्र एष इति । साधु मनोरमे साधु । शोभनं नर्तितम् ।

सांकृत्यायनी — राजपुत्रि, स्थान एव कृता भ्रान्तिस्ते मनोरमया । पश्य

रूपं तन्नयनोत्सवास्पदमिदं वेषः स एवोज्ज्वलः
सा मत्तद्विरदोचिता गतिरियं तत्सत्त्वमत्यूर्जितम् ।
लीला सैव स एव सान्द्रजलदह्लादानुकारी स्वरः
साक्षाद्दर्शित एष नः कुशलया वत्सेश एवानया ॥ ७ ॥

1 विलक्ष a amazed 2 शोभन a ad beautiful,--ly 3 स्थाने ind rightly 4 भ्रान्ति f delusion, mistake 5 रूपम् form 6 नयनम् eye 7 आस्पदम् source receptacle 8 उज्ज्वल bright 9 द्विरद elephant 10 उचित a agreeable suitable 11 गति f gait 12 सत्त्वम् natural quality, courage 13 अत्यूर्जित vigorous, noble 14 लीला f grace, semblance, beauty 15 सान्द्र compact, thick 16 जलद cloud 17 ह्लाद sound, thunder 18 अनुकारिन् (nom s m अनुकारी) similar, resembling 19 स्वर sound voice 20 साक्षात् ind in person, directly. 21 दर्शित shown, caus PP √दृश 1P 22 कुशल happy, able 23 ईश king 24 अनया by her

नयनोत्सवास्पद तत् इद रूप स एव उज्ज्वल वेष सा मत्तद्विरदोचिता इय गति तत् अत्यूर्जित सत्त्व सा एव लीला सान्द्रजलदह्लादानुकारी स एव स्वर अनया कुशलया एष न वत्सेश एव साक्षात दर्शित ॥ शार्दूलविक्रीडितम

Vāsavadattā—(*sitting down amazed with a smile*) How it is Manoramā! I thought it is my husband Bravo, bravo Manorama! You have acted beautifully

Sāngkrtyāyani—O princess, rightly Manoramā has caused you delusion Behold!

The form is a source of joy to the eye gorgeous is the attire, the gait is as agreeable as that of an elephant in rut, very noble is the natural quality, the grace is the very grace of his, and the voice just imitates the thunder of a massive cloud this able girl has presented to us the Vatsa King in person.

वासवदत्ता — हञ्जे इन्दीवरिके, बद्धेनार्यपुत्रेणाहं वीणां शिक्षिता। तदस्य कुरु नीलोत्पलदाम्ना निगडनम्। (शिरसोऽपनीय नीलोत्पलदामार्पयति। इन्दीवरिका तथा कृत्वा पुनस्तत्रैवोपविशति।)

आरण्यका — काञ्चनमाले, कथय कथय। ननु सत्यमेव मन्त्रयते तातः 'यदि वीणां वादयन्नपहरति मां वत्सराजस्ततोऽवश्यं बन्धनान्मुञ्चामि' इति।

काञ्चनमाला — भर्तृदारिके, सत्यम्। तथा कुरु यथा वत्सराजस्यावश्यं बहुमता भवसि।

राजा — निष्पादितमेव काञ्चनमालया यत्तदास्माभिरभिलषितम्।

आरण्यका — यद्येवं तदादरेण वादयिष्यामि। (गायन्ती वादयति)

1 बद्ध (ins s m बद्धन) fettered, tied, PP √बध 9P 2 शिक्षित learnt PP √शिक्ष 1A 3 नील blue 4 उत्पलम lotus 5 दामन n (nom and acc s दाम, ins s दाम्ना) string 6 नीलोत्पलदाम्ना = नीलोत्पलस्य दाम्ना 7 निगडनम fetter, fettering 8 शिरस n (abl s शिरस) head 9 कथय tell thou! लोट √कथ 10U बहुमत a beloved, highly respected 11 निष्पादित accomplished caus PP निस + √पद 4A 12 तदा ind at that time 13 अभिलषित longed for PP अभि + √लष 1 4U 14 आदर love, respect 15 गायत (nom s f गायन्ती) singing, Pres Part √गै 1P

Vāsavadatta — Maid Indivarika, I learnt lute from my fettered husband So make a fetter for him with this blue lotus stalk (Removing the blue lotus stalk from her head she gives it to her Indivarika, after doing so sits down again )

Aranyaka — Kanchanamala, tell me, tell me, is it true that my father has said that he would release the King of Vatsa without fail if he would surprise him by his lute solo ?

Kanchanamala — O princess true Do endeavour so that you will surely be esteemed by the King of Vatsa

King — Kanchanamala has but accomplished what I longed for then

Āranyakā — If so, I shall affectionately play on it (She plays on it while singing )

घनवन्धनरुद्धं गगनं दृष्ट्वा मानसमेतुम् ।
अभिलषति राजहंसो दयितां गृहीत्वात्मनो वसतिम् ॥ ८ ॥

(विदूषको निद्रां नाटयति)

मनोरमा — (हस्तेन चालयन्ती) वसन्तक, पश्य पश्य । प्रियसखी मे नृत्यति ।

विदूषक :— (सरोषम्) दास्याः सुते, त्वमपि न ददासि स्वप्तुम् । यदाप्रभृति प्रियवयस्येनारण्यका दृष्टा तदाप्रभृति तेन सह मया रात्रिंदिवं निद्रा न दृष्टा । तदन्यतो निष्क्रम्य स्वप्स्यामि । (निष्क्रम्य शेते)

(आरण्यका पुनर्गायति)

अभिनवरागक्षिप्ता मधुकरिका वामकेन कामेन ।
उत्ताम्यति प्रार्थयमाना द्रष्टुं प्रियदर्शनं दयितम् ॥ ९ ॥

1 घन cloud 2 संरुद्ध obstructed, PP सम् + √रुध् 7U 3 गगनम् sky 4 मानस the name of a lake 4 राजहंस royal swan 6 दयित a beloved 7 वसति f abode, home 8 निद्रा f sleep 9 चालयत् (nom s f चालयन्ती) shaking, moving; caus Pres Part √चल् 1P 10 ददासि thou allowest √दा 3 U 11 स्वप्तुम् to sleep, inf √स्वप् 2 P 12 प्रभृति ind since, from 13 रात्रिंदिवम् day and night 14 अन्यतस् ind elsewhere 15 क्षिप्त thrown PP √क्षिप् 6U 16 वामक lovely adverse 17 उत्ताम्यति she pines away, लट् उद् + √तम् 4P 18 प्रियदर्शनम् = प्रियं दर्शनं यस्य तम्

घनबन्धनरुद्धं गगनं दृष्ट्वा राजहंसः दयितां गृहीत्वा आत्मनः वसतिं मानसम् एतुम् अभिलषति ॥ वामकेन कामेन अभिनवरागक्षिप्ता मधुकरिका प्रियदर्शनं दयितं द्रष्टुं प्रार्थयमाना उत्ताम्यति ॥ गीति

Beholding the sky with cloud curtains the royal swan longs to fly to the lake Manasa his home, accompanying his sweetheart

(The clown falls asleep)

Manoramā—(shaking him with her hand) Vasantaka, see, see my fond friend is acting !

Clown —(angrily) O slave girl's daughter ! You, too do not allow me to sleep Since the time when my dear friend first saw Āranyakā, I have not seen slumber with him day and night So I shall go to some other place and sleep (Going out he lies down )

Āranyakā—(sings) *The female bee, thrown into a new passion by lovely love, pines away with a thirst to meet her lovely lover*

राजा — (तत्क्षणं श्रुत्वा सहर्षमुपसृत्य) साधु राजपुत्रि साधु । अहो गीतम् । अहो वादित्रम् । तथा हि—

व्यक्तिर्व्यञ्जनधातुना दशविधेनाप्यत्र लब्धाधुना
विस्पष्टो द्रुतमध्यलम्बितपरिच्छिन्नस्त्रिधायं लयः ।
गोपुच्छप्रमुखाः क्रमेण यतयस्तिस्रोऽपि संपादिता-
स्तत्त्वौघानुगताश्च वाद्यविधयः सम्यक्त्रयो दर्शिताः ॥१०॥

आरण्यका—(वीणां परिष्वज्यासनादुत्थाय राजानं साभिलाषं पश्यन्ती) उपाध्याय, प्रणमामि ।

1 तत्क्षणम् immediately, instantly 2 गीतम् song 3 वादित्रम् musical instrument. 4 व्यक्ति f manifestation clearness 5 व्यञ्जनम् sound consonant 6 धातु m. (ins s धातुना) constituent element, harmony 7 दशविध (ins s दशविधेन) tenfold 8 लब्ध attained, realized, PP √लभ् 1A 9 विस्पष्ट clear, manifest 10 द्रुत quick 11 मध्य middle, moderate 13 लम्बित slow 13 परिच्छिन्न cut, distinguished, PP परि + √छिद् 7U 14 त्रिधा ind in three ways 15 लय tempo 16 गोपुच्छम् a cow's tail a musical term of pause 17 प्रमुख a facing, headed by 18 क्रम proper order 19 यति f (nom p यतय) pause, stopping 20 त्रि (m त्रय f तिस्र) three 21 तत्त्वम् three fold quality viz quick moderate & slow tempos 22 वाद्यम् instrumental music. 23 विधि m (nom p विधय) mode, manner 24 परिष्वज्य having embraced, gerund परि + √ष्वञ्ज 1A 25 उपाध्याय preceptor teacher

दशविधेन व्यञ्जनधातुना अपि अत्र व्यक्ति अधुना लब्धा द्रुतमध्यलम्बितपरिच्छिन्न अयं लय त्रिधा विस्पष्ट गोपुच्छप्रमुखा तिस्र यतय अपि क्रमेण सम्पादिता तत्त्वौघानुगता च त्रय वाद्यविधय सम्यक् दर्शिता शार्दूलविक्रीडितम्

King —(instantly listening and advancing) Well done, princess, well done ! How fine the song and the instrument ! For

Now through the tenfold harmony of sound distinction is attained here, the tempo in three ways distinguished amongst quick moderate and slow has been crystal clear, the three pauses headed by 'Gopuccha' have also been realised in due order, and the three methods of instrumental music have been properly displayed in accordance with the whole of the three qualities

Aranyaka—(embracing the lute rises from her seat and looks at the king with longing) My preceptor, I salute you

राजा — (सस्मितम्) यदहमिच्छामि तत्ते भूयात् ।

काञ्चनमाला — (आरण्यकाया आसनं निर्दिश्य) इहैवोपविशतु उपाध्यायः ।

राजा — (उपविश्य) राजपुत्री क्वेदानीमुपविशतु ।

काञ्चनमाला — (सस्मितम्) इदानीमेव भर्तृदारिका विद्यामानेन परितोषिता युष्माभिः । तदर्हत्येवैपोपाध्यायपीठिकायाम् ।

राजा — उपविशत्वर्हेयमर्धासनस्य । राजपुत्रि, स्थीयताम् ।

(आरण्यका काञ्चनमाला पश्यति)

काञ्चनमाला — (सस्मितम्) भर्तृदारिके, उपविश । कोऽत्र दोषः । शिष्यविशेषा खलु त्वम् । (आरण्यका सलज्जमुपविशति)

वासवदत्ता — (सलज्जम्) भगवत्याधिकं कलितं काव्यम् । न खल्वहं तस्मिन्काले एकासने आर्यपुत्रेण सहोपस्थिता ।

राजा — राजपुत्रि, पुनः श्रोतुमिच्छामि । वादय वीणाम् ।

1 भूयात् may it be ! आशीर्लिङ् 2 क्व where ? 3 विद्यामान honour or pride of knowledge 4 परितोषित gratified, caus PP. परि + √ तुष् 4P 5 अर्हति she deserves, √ अर्ह् 1P 6 पीठिका f chair 7 अर्ह a (f s अर्हा) worthy of, deserving 8 अर्ध a half 9 शिष्यविशेषा f distinguished pupil

King —(smiling) May what I wish befall you !

Kanchanamālā—(pointing out Āranyakā's seat) May the master accept this seat.

King —(sitting) Where should Her Highness sit down ?

Kānchanamālā—(smiling) Just now the princess has been gratified by you through her pride of knowledge So she deserves to accept her teacher's stool

King —Pray occupy the part of this chair as you deserve, O Princess !

(Āranyakā looks at Kānchanamālā )

Kanchanamalā—(with a smile) Princess, be seated What harm ? You are a distinguished pupil, surely

(Āranyakā sits down bashfully.)

Vāsavadattā—(blushing) Your ladyship has pushed this drama too far Really at that time I did not share the same seat with my lord

King —O princess, I desire to listen again Play on the lute

आरण्यका — (सस्मितम्) काञ्चनमाले, चिरं खलु मम वादयन्त्याः परिश्रमो जातः। इदानीं निःसहान्यङ्गानि। तन्न शक्नोमि वादयितुम्।

काञ्चनमाला — उपाध्याय, सुष्ठु परिश्रान्ता भर्तृदारिका। कपोलतलवद्धस्वेदलवायाः पश्यास्या वेपेते अग्रहस्तौ। तत्समाश्वस्ता भवतु मुहूर्तम्।

राजा — काञ्चनमाले, युक्तमभिहितम्। (हस्तेन ग्रहीतुमिच्छति। आरण्यका हस्तमपसारयति।)

वासवदत्ता — (सासूयम्) भगवति, अधिकमेतदपि त्वया कृतम्। न खल्वहं काञ्चनमालाकाव्येन वञ्चयितव्या।

सांकृत्यायनी — (विहस्य) आयुष्मति, ईदृशमेव काव्यं भविष्यति।

आरण्यका — (सरोषमिव) अपेहि काञ्चनमाले अपेहि। न मे बहुमतासि।

1 चिरम् ad for a long time 2 परिश्रम fatigue 3 जात happened, PP √ जन् 4A 4 शक्नोमि (+ inf) I can, I am able, लट् √ शक् 5P. 5 स्वेद perspiration, sweat 6 लव drop, small quantity 7 कपोलतलवद्धस्वेदलवायाः = कपोलतलयो. बद्धः स्वेदस्य लवा यस्या. तस्या, 8 वेपते she trembles, √ वेप् 1A 9 मुहूर्तम् for a while, moment. 10 वञ्चयितव्य (ought) to be deceived, caus Pot. PP √ वञ्च् 1P. 11 असूया anger. 12 सासूयम् angrily

Āranyakā—(smiling) Kānchanamālā, I am tired as I have been playing for a long time Now my limbs are languid So I am unable to play on this

Kānchanamālā—Teacher, our princess is completely tired See her two fingers are trembling while drops of sweat are oozing out on her cheeks So let her be comforted for a while

King —Kānchanamālā, you have said befittingly (He intends to grasp her hand with his hand Āranyakā withdraws her hand)

Vāsavadattā—(enraged) Lady this is too much of your fiction Really I am not to be deceived by Kanchanamālā's acting

Sāngkrtyāyanī—(laughing) Your Majesty, this will be something like a fiction

Āranyakā—(as if angry) Be gone, Kānchanamalā, be gone! I don't like you

काञ्चनमाला — (सस्मितम्) यद्यहं तिष्ठन्ती न बहुमता तदेषा गच्छामि ।

(इति निष्क्रान्ता)

आरण्यका — (ससम्भ्रमम्) काञ्चनमाले, तिष्ठ तिष्ठ । अयमस्याग्रहस्तः समर्पितः ।

राजा — (आरण्यकाया हस्तं गृहीत्वा)

सद्योऽवश्यायबिन्दुव्यतिकरशिशिरः किं भवेत्पद्मकोशो
ह्लादित्वं नास्य मन्ये सदृशमिदमुपस्येव वीतातपस्य ।
मुञ्चन्त्येते हिमौघं नखरजनिकराः पञ्च किं सोऽपि दाही
ज्ञातं स्वेदापदेशादविरतममृतं स्यन्दते व्यक्तमेतत् ॥ १ ॥

1 अवश्याय frost, dew. 2 बिन्दु m. drop 3 व्यतिकर. mixture, contact. 4 शिशिर cool, cold. 5 अवश्यायबिन्दुव्यतिकरशिशिर = अवश्यायाना बिन्दव तेषा व्यतिकरेण शिशिर. 6 पद्मकोश lotus-bud. 7 ह्लादित्वम् delight, pleasantness 8 अस्य = पद्मकोशस्य. 9 मन्ये I think, लट् √मन् 4A. 10 उषस् f (loc s. उषसि) daybreak, dawn 11 वीत gone; pp. वि + √इ 2P 12 वीतातपस्य = वीत आतप यस्य तस्य. 13 हिमम् snow, frost 14 ओघ: flood, mass, heap 15 नख m n nail 16 रजनिकर moon 17 नखरजनिकरा: = नखा एव रजनिकरा: 18 पञ्चन् (nom p. पञ्च) five. 19 दाहिन् a. (nom s m. दाही) burning. 20 स = हिमौघ: 21 अपदेश disguise, pretext. 22 अविरत constant, अविरतम् constantly. 23 अमृतम् nectar. 24 स्यन्दते it pours forth, oozes; √स्यन्द 1A.

किं सद्य अवश्यायबिन्दुव्यतिकरशिशिर पद्मकोश भवेत् वीतातपस्य अस्य इदं ह्लादित्व उषसि न सदृश एव मन्ये एते पञ्च नखरजनिकरा हिमौघ मुञ्चन्ति किं, स अपि दाही, ज्ञात स्वेदापदेशात् अमृत अविरत स्यन्दते एतत् व्यक्तम् ॥ स्रग्धरा

Kānchanamālā — (smiling) If my being here is not welcome, I am going away. (Exit)

Aranyakā — (hurriedly) Ah Kānchanamālā, stop, stop ! the tip of his hand is extended to me

King — (catching Aranyakā's hand)

Is this a lotus-bud now cooled by the touch of drew-drops ? I do think its pleasantness is not like this at daybreak when it is cold Do these five moons in the form of the nails pour down a stream of frost ? Nay, it is burning ! I know it is clear that nectar under the disguise of perspiration is constantly oozing out

अपि च

एतेन बालविद्रुमपल्लवशोभापहारदक्षेण ।
हृदये मम त्वयायं न्यस्तो रागः स्वहस्तेन ॥ १२ ॥

आरण्यका — (स्पर्शविशेषं नाटयन्ती, आत्मगतम्) हा धिक् हा धिक् । एतां मनोरमां स्पृशन्त्या अनर्थमेव मेऽङ्गानि कुर्वन्ति ।

वासवदत्ता — (सहसोत्थाय) भगवति, पश्य त्वम् । अहं पुनरलीकं न पारयामि प्रेक्षितुम् ।

सांकृत्यायनी — राजपुत्रि, धर्मशास्त्रविहित एष गान्धर्वो विवाहः । किमत्र लज्जास्थानम् । प्रेक्षणीयकमिदम् । तन्न युक्तमस्थाने रसभङ्गं कृत्वा गन्तुम् । (वासवदत्ता परिक्रामति)

1 बाल young, infant 2 अपहार plundering, carrying away. 3 दक्ष a skilful, competent. 4 बालविद्रुमपल्लवशोभापहारदक्षेण = बालविद्रुमस्य पल्लवशोभा तस्या अपहारे दक्षेण 5 न्यस्त placed, deposited; pp नि + √अस् 4P. 6 स्पर्शविशेष peculiar sensation of touch (विशेष in compounds is mostly translated as special, peculiar, distinguished) 7 अनर्थः calamity, danger. 8 अलीकम् falsehood. 9 पारयामि I am able; लट् √पृ 10U 10 धर्मशास्त्रम् code of jurisprudence. 11 गान्धर्व विवाह love-marriage. 12 रसभङ्ग anger

बालविद्रुमपल्लवशोभापहारदक्षेण एतेन स्वहस्तेन अयं रागः मम हृदये त्वया न्यस्तः ॥ आर्या

And furthermore,

In mine heart thou hast placed Love with this hand of thine that is skilled in plundering the beauty of the sprout of a young coral tree

Āranyakā — (expressing a peculiar sensation of touch, to herself) O fie! O fie! As I touch this Manoramā, my limbs create a crisis.

Vāsavadattā — (suddenly standing up) Reverend lady, see! I am not able to see the falsehood

Sāngkṛtyāyanı — Princess, this kind of love-marriage is laid down in the code of jurisprudence. So there is no cause of your shame here. It is improper for you to go away angry without any reason This is a dramatic scene (Vāsavadattā walks out)

इन्दीवरिका — (विलोक्य) भट्टिनि, वसन्तकश्चित्रशालाद्वारे प्रसुप्तस्तिष्ठति।

वासवदत्ता — (निरूप्य) वसन्तक एवैषः। (विचिन्त्य) राज्ञाप्यत्र भवितव्यम्। तद्बोधयित्वा प्रक्ष्यामि तावदेनम्। (प्रबोधयति)

विदूषकः— (निद्राजडमुत्थाय सहसा विलोक्य) मनोरमे, किं नर्तित्वागतः प्रियवयस्यः। अथवा नृत्यत्येव।

वासवदत्ता — (सविषादम्) कथमार्यपुत्रो नृत्यति। मनोरमेदानीं कुत्र।

विदूषकः— एषा चित्रशालायां तिष्ठति।

मनोरमा — (सभयमात्मगतम्) कथमन्यथैव हृदये कृत्वा देव्या मन्त्रितम्। एतेनापि मूर्खवटुकेनान्यथैव बद्ध्वा सर्वमाकुलीकृतम्।

1 प्रसुप्त asleep, slept, a PP √ स्वप् 2P 2 राज्ञा अत्र भवितव्यम् (भावे प्रयोग) the king must be here, राजा अत्र भवितव्य 3 बोधयित्वा having roused or waken up, caus gerund √ बुध् 1U 4P 4 जड dullness 5 वटुक boy, lad, chap 6 बद्ध्वा having entertained or felt, gerund √बन्ध् 9P 7 आकुलीकृत confused, PP आकुली + √ कृ 8U.

Indivarikā—(looking) O queen, Vasantaka is asleep at the door of the arts hall

Vasavadattā—(observing) This is Vasantaka ! (Thinking) The king must be here So I shall rouse and ask him

(She wakes him up )

Clown—(rising from his dull slumber and suddenly looking) O Manoramā ! Has my dear friend come, finishing his acting ? Or is he still acting ?

Vāsavadatta—(disappointed) How, my husband is acting ! Where is Manoramā now ?

Clown —She remains in the arts hall

Manoramā—(to herself in fear) The queen has spoken keeping something in her heart And moreover this foolish chap has upset everything, feeling otherwise

वासवदत्ता — (सरोष हसन्ती) साधु मनोरमे साधु। शोभनं त्वया नर्तितम् ।

मनोरमा — (सभय कम्पमाना पादयोर्निपत्य) भट्टिनि, न खल्वहमत्रापराध्यामि । एतेन खलु हताशेन बलादलंकरणानि गृहीत्वा द्वारस्थितेनेह निरुद्धा । न पुनर्ममाक्रन्दन्त्याः शब्दो मूर्खनिर्घोषान्तरितः केनापि श्रुतः ।

वासवदत्ता — हञ्जे, उत्तिष्ठ। ज्ञातं सर्वम् । वसन्तकः खल्वारण्यकावृत्तान्तनाटके सूत्रधारः ।

विदूषकः— स्वयमेव चिन्तय, कुत्रारण्यका कुत्र वसन्तक इति ।

वासवदत्ता — मनोरमे, सुगृहीतं कृत्वैनमागच्छ । यावत्प्रेक्षणीयमस्य पश्यामि ।

1 कम्पमान (nom s f कम्पमाना) trembling, Pres Part √ कम्प् 1A. 2 निपत्य having fallen, gerund नि + √ पत् 1P 3 अपराध्यामि I offend, I am guilty, अप + √राध् 4P. 4 हताश a wretched, miserable 5 बलम force, बलात् by force. 6 अलंकरणम् ornament, preparation 7 आक्रन्दत् (gen s f आक्रन्दन्त्या ) crying, Pres. Part आ + √ क्रन्द् 1P. 8 निर्घोष loud noise 9 मूर्खनिर्घोषान्तरित = मूर्खस्य निर्घोषे अन्तरित 10 प्रेक्षणीयम् performance 11 अस्य = वसन्तकस्य

Vāsavadattā—(laughing angrily) Well done, Manorama, Well done ! You have nicely acted.

Manoramā—(trembling in fear and falling at her feet) O your Majesty ! I am not at all guilty here Surely this wretched man snatched away my ornaments and blocked me up by standing at the door

Nobody heard me cry out as my crying sound was overwhelmed by the louder noise of this fool

Vāsavadattā—Maid, stand up ! I know everything In reality Vasantaka is the stage director in the drama, 'the Episode of Āranyakā '

Clown —Do consider yourself where Āranyakā is and where Vasantaka is !

Vāsavadattā—Arrest him well and come, Manorama ! Let me now see his dramatic performance

मनोरमा — (स्वगतम्) इदानीं समाश्वस्तास्मि । (विदूषकं करे बध्नाति । प्रकाशम्) हताश, इदानीमनुभवात्मनो दुर्नयस्य फलम् ।

वासवदत्ता — (ससंभ्रममुपसृत्य) आर्यपुत्र, प्रतिहतमेतदमङ्गलम् । मर्षत्वार्यपुत्रो यन्मनोरमेति कृत्वा नीलोत्पलदामकेन बन्धितोऽसि । (इति पादयोर्नीलोत्पलदामापनयन्ती सोत्प्रासम्)

(आरण्यका सभयमपसृत्य तिष्ठति)

राजा — (सहसोत्थाय विदूषकं मनोरमां च दृष्ट्वात्मगतम्) कथं विज्ञातोऽस्मि देव्या । (वैलक्ष्यं नाटयति)

सांकृत्यायनी — (सर्वानवलोक्य सस्मितम्) कथमन्यदेवेदं प्रेक्षणीयकं संवृत्तम् । अभूमिरियमस्मद्विधानाम् । (इति निष्क्रान्ता)

1 बध्नाति she binds, लट् √बन्ध 9P 2 दुर्नय (दुर्णय) misconduct 3 प्रतिहत driven away, pp प्रति + √हन् 2P 4 मर्षतु he must forgive लोट् √मृष् 10U. 5 कृत्वा having believed, or thought gerund √कृ 8U 6 बन्धित bound, tied, caus pp √बन्ध् 9P 7 उत्प्रास joke 8 सोत्प्रासम् ad jokingly 9 वैलक्ष्यम् embarrassment 10 अभूमि f unfit place or object, beyond the reach of 11 विध विधा f kind

Manorama — (to herself) Now I am resurrected (She binds the jester's hands Aloud) *You wretched lad, do taste now the result of* your own misconduct

Vāsavadatta — (hurriedly advancing) My lord, this awful incident has been driven away Pray forgive me for I chained you with a blue lotus stalk, mistaking you to be Manoramā (Thus she jokingly removes the stalk from his feet )

(Āranyaka stands apart in fear )

King — (after rising suddenly and looking at his fool and Manorama to himself ) How am I caught red handed by the queen ? (He gesticulates with embarrassment )

Sāngkrtyāyani — (observing all with a smile) It is strange that another scene has occurred It is beyond the reach of persons like me (Exit)

राजा — (स्वगतम्) अपूर्वोऽयं कोपप्रकारः। दुर्लभमत्रानुनयं पश्यामि।
(विचिन्त्य) एवं तावत्करिष्ये। (प्रकाशम्) देवि, त्यज्यतां कोपः।

वासवदत्ता — आर्यपुत्र, कोऽत्र कुपितः।

राजा — कथं न कुपितासि।

स्निग्धं यद्यपि वीक्षितं नयनयोस्ताम्रा तथापि द्युति-
र्माधुर्येऽपि सति स्खलत्यनुपदं ते गद्गदा वागियम्।
निश्वासा नियता अपि स्तनभरोत्कम्पेन संलक्षिताः
कोपस्ते प्रकटप्रयत्नविधृतोऽप्येष स्फुटं लक्ष्यते ॥१३॥

1 अपूर्व unknown, extraordinary. 2 प्रकार sort, fashion, manner 3 अनुनयः pacification, conciliation 4 स्निग्ध charming 5 यद्यपि ~ तथापि although ~ yet 6 ताम्र red 7 माधुर्यम् sweetness 8 स्खलति it stumbles, totters, √स्खल् 1P. 9 अनुपदम् ind at every step 10 गद्गद a stammering, faltering. 11 वाक् (वाग्) f. speech 12 नियत controlled pp नि + √यम् 1P 13 उत्कम्प tremor, trembling 14 प्रयत्न effort. 15 विधृत curbed, seized, pp वि + √धृ 10U 16 प्रकटप्रयत्नविधृत = प्रकट प्रयत्नेन विधृत यस्य स

[ते] नयनयो वीक्षित स्निग्ध तथापि द्युति ताम्रा, माधुर्ये सति अपि गद्गदा ते इय वाक् अनुपद स्खलति, नियता अपि निश्वासा स्तनभरोत्कम्पेन सलक्षिता प्रकटप्रयत्नविधृत अपि एष ते कोप स्फुट लक्ष्यते॥ शार्दूलविक्रीडितम्।

King — (to himself) This sort of anger is unknown as yet I think it difficult to pacify her here (Reflecting) I will now try in this manner. (Aloud) O my wife, discard thy anger!

Vāsavadattā — My husband, who is angry here?

King — How is it that you are not angry?

Although your glance is charming, yet your eyes are blood shot, your faltering speech, though sweet stammers at every syllable, your breaths, though controlled, are observable due to the heaving of your weighty breasts, and your wrath, though concealed through an effort, is clearly visible

(पादयोर्निपत्य) प्रिये, प्रसीद प्रसीद ।

वासवदत्ता — आरण्यके, त्वं कुपितेति सभावयन्नार्यपुत्रः 'प्रिये प्रसीद' इति प्रसादयति । तदुपसर्प । (इति हस्तेनाकर्षति)

आरण्यका — (सभयम्) भट्टिनि, न खल्वहं किमपि जानामि ।

वासवदत्ता — आरण्यके, त्वं कथं जानासि । इदानीं ते शिक्षयामि । इन्दीवरिके, गृहाणैनाम् ।

विदूषकः— भवति, अद्य कौमुदीमहोत्सवे तव चित्तमपहर्तुं वयस्येन प्रेक्षणीयमनुष्ठितम् ।

वासवदत्ता — एतं युष्माकं दुर्नयं प्रेक्ष्य हासो मे जायते ।

राजा — देवि, अलमन्यथा विकल्पितेन । पश्य

1 प्रसीद favour thou ! Be thou pleased ! लोट प्र + √सद 1P 2 सभावयत (nom s m सभावयन्) considering, Pres Part caus सम + √भू 1P 3 प्रसादयति he propitiates he causes to be pleased णिज तातन्ट प्र + √सद 1P 4 आकर्षति she draws pulls, लट आ + √कृष 6U 5 जानामि I know, लट √ज्ञा 9U 6 शिक्षयामि I teach, णिज लट्ट √शिक्ष 1A 7 गृहाण seize thou ! लोट् √ग्रह 9U 8 चित्तम mind 9 अनुष्ठित perfotmed, done, PP अनु √स्था 1P 10 जायते it occasions, लट √जन् 4A 11 विकल्पितम conjecture presumption, doubt

(Prostrating) O beloved be pleased be pleased !

Vasavadatta—Āranyaka considering you to be angry my husband propitiates you, O beloved be pleased ! ' Approach him ! (she pulls her with her hand )

Āranyaka—(in fear) O queen, I do not know anything about it

Vasavadatta—Āranyaka, how can you know ? Now I shall teach you a lesson O Indivarika, arrest her !

Clown —Lady, today on the occasion of Moonlight Festival my friend has acted in the drama to surprise your mind

Vasavadatta—On seeing this misconduct of yours I cannot help laughing

King —My wife *misunderstand not* ! See !

भ्रूभङ्गैः क्रियते ललाटशशिनः कस्मात्कलङ्को मुधा
वाताकम्पितबन्धुजीवसमतां नीतोऽधरः किं स्फुरन् ।
मध्यश्चाधिककम्पितस्तनभरेणायं पुनः खिद्यते
कोपं मुञ्च तवैव चित्तहरणायैतन्मया क्रीडितम् ॥ १४ ॥

देवि, प्रसीद प्रसीद । (इति पादयो पुन पतति)

वासवदत्ता — हञ्जे, निर्वृत्तं प्रेक्षणकम् । तदेहि । अभ्यन्तरमेव प्रविशावः ।

(इति निष्क्रान्ता)

राजा — (विलोक्य) कथमकृत्वैव प्रसादं गता देवी ।

1 भ्रूभङ्ग knitting of eyebrows 2 ललाट forehead 3 शशिन् m (gen s शशिन ) moon 4 ललाटशशिन = ललाट एव शशी तस्य 5 कलक spot 6 मुधा ind in vain 7 वात wind 8 कम्पित shaken, PP √कम्प् 1A 9 बन्धुजीव = बन्धुक name of flower 10 समता f equality, sameness 11 वाताकम्पितबन्धुजीवसमताम् = वातेनाकम्पितस्य बन्धुजीवस्य समताम् 12 स्फुरत् (nom s m स्फुरन) trembling, Pres Part √स्फुर् 6P 13 मध्य waist 14 खिद्यते it is overpowered, exhausted, √खिद् 6P 4 7A 15 क्रीडित played, PP √क्रीड् 1P 17 निवृत्त finished, PP निस + √वृत् 1A

कस्मात् ललाटशशिन कलङ्क भ्रूभङ्गै मुधा क्रियत कि स्फुरन अधर वाताकम्पितबन्धुजीवसमता नीत अय च मध्य अधिककम्पितस्तनभरेण पुन खिद्यते, कोप मुञ्च तव चित्तहरणाय एव एतत् मया क्रीडितम् ॥ शार्दूलविक्रीडितम्

Why do you create in vain a black spot in the moon in the shape of the forehead with the knitted eyebrows ? Why are your trembling lips rendered similar to the Bandhujiva flowers shaken by the wind ? And again this waist of yours is oppressed by the weight of the breasts heaving the more Drop your anger ! I played this just to captivate your mind

O wife, forgive, forgive me ! (Again he kneels down )

Vasavadatta—Maid, the drama has ended Well let us repair to the inner apartment (Exit)

King —(looking) How is the queen gone without forgiving me ?

स्वेदाम्भःकणभिन्नभीषणतरभ्रूभङ्गमेकं रुषा
त्रासेनापरमुत्प्लुतोत्प्लुतमृगव्यालोलनेत्रोत्पलम् ।
उत्पश्यन्नहमग्रतो मुखमिदं देव्याः प्रियायास्तथा
भीतश्चोत्सुकमानसश्च महति क्षिप्तोऽस्म्यहं संकटे ॥ १५ ॥

तद्यावदिदानीं शयनीयं गत्वा देव्याः प्रसादनोपायं चिन्तयामि ।

( इति निष्क्रान्ता सर्वे )

❀ इति तृतीयोऽङ्कः ❀

1 अम्भस् n water 2 कण drop 3 भिन्न mixed broken, pp √भिद् 7U 4 भीषणतर more formidable, fearful 5 रुष् f (ins s रुषा) anger 6 स्वेदाम्भ कणभिन्न-भीषणतरभ्रूभङ्गम् = स्वेदाम्भ कणैः, भिन्न भीषणतर भ्रूभङ्ग यस्मिन तत (देवीमुखम्) 7 त्रास terror 8 अपर another, other 9 उत्प्लुत jumped, pp उद + √प्लु 1A 10 मृग deer 11 व्यालोल tremulous 12 नत्रम् eye 13 उत्प्लुतोत्प्लुतमृगव्यालोलनेत्रोत्पलम्=उत्प्लुत उत्प्लुत मृग तस्य इव व्यालोले नेत्रोत्पले यस्मिन् तादृश (आरण्यकामुखम्) 14 तथा as well as 15 उत्सुक longing, anxious 16 मानसम् *mind* 17 *उत्सुकमानस = उत्सुक मानस यस्य स* 18 संकट difficulty 19 शयनीयम् bed, couch

रुषा स्वेदाम्भ कणभिन्नभीषणतरभ्रूभङ्ग एक त्रासेन उत्प्लुतोत्प्लुतमृगव्यालोलनेत्रोत्पल अपर देव्या तथा प्रियाया इद मुख अग्रत उत्पश्यन् अह भीत च उत्सुकमानस च महति संकटे क्षिप्त अस्मि ॥ शार्दूलविक्रीडितम्

On beholding in front the faces of the queen and my sweetheart,—the one with knit eyebrows more formidable on account of its contact with the drops of perspiration due to anger, and the other having its lotus eyes as tremulous as those of a deer jumping in terror,—I am thrown into a great difficulty, placed between fear and longing

So let me proceed to the bed chamber now and design a plan to pacify the queen (Exeunt omnes)

*Here Ends Act III*

# ❀ चतुर्थोऽङ्कः ❀

( ततः प्रविशति मनोरमा )

**मनोरमा** —(सोद्वेगम्) अहो दीर्घरोषता देव्याः । कथमेतावन्तं कालं बद्धायाः प्रियसख्या आरण्यकाया उपर्यनुकम्पां न गृह्णाति । (सास्रम्) सा तपस्विन्यात्मनो बन्धनस्य क्लेशेन तथा न संतप्यते यथा भर्तृदर्शननिराशतया । ईदृशं चास्या दुःखं येनाद्यैवात्मानं व्यापादयन्ती मया कथमपि निवारिता । एतं वृत्तान्तं भर्त्रे निवेदयेति वसन्तकं भणित्वागतास्मि ।

1 दीर्घरोषता f. prolonged anger 2 एतावत् a. (acc.s m एतावन्तम्) this much, so much. 3 अनुकम्पा f. sympathy, pity. 4 क्लेश pain, suffering. 5 संतप्यते she is tormented, कर्मणिलट् सम् +√ तप् 1P. 10U 6 निराशता f despair, hopelessness 7 व्यापादयत् (nom s f व्यापादयन्ती) killing; caus. Pres Part. व्या + √ पद् 4A. 8 कथमपि with much difficulty, somehow 9 निवारित (nom s f निवारिता) averted, prevented; caus. PP नि +√ वृ 1.5 9U 10 भर्तृ m. (dat.s भर्त्रे) king.

## ACT IV.

( Manoramā appears. )

Manoramā—(sorrowfully) Ah how persistent is the wrath of the queen! For such a long time she would not cherish a pity on Āraṇyakā the fond friend of mine who is under detention

(Shedding tears) The unfortunate girl is not being so much tormented by the suffering of her imprisonment as by her hopelessness to see the king Yet, such is her misfortune on account of which just today she attempted suicide, but it was averted by me with much difficulty Having spoken to Vasantaka to inform the king about this news, I have come.

(तत प्रविशति काञ्चनमाला)

काञ्चनमाला — कथमन्विष्यन्त्यापि मया भगवती सांकृत्यायनी न दृष्टा। (विलोक्य) तदेतामपि तावन्मनोरमां प्रक्ष्यामि। (उपसृत्य मनोरमे, अपि जानासि कुत्र भगवती साङ्कृत्यायनीति।

मनोरमा — (विलोक्याश्रूणि प्रमृज्य) हला काञ्चनमाले, दृष्टा। किं पुनस्तया प्रयोजनम्।

काञ्चनमाला — मनोरमे, देव्याङ्गारवत्या लेखः प्रेषितः। तस्मिन्वाचिते बाष्पपूर्णनयना दृढं संतप्तुमारब्धा देवी। तद्विनोदननिमित्तं तस्या भगवतीमन्विष्यामि।

मनोरमा — हला, कि पुनस्तस्मिंल्लेख आलिखितम्।

1 अन्विष्यत् (ins s f अन्विष्यन्त्या) searching, looking for Pres Part अनु + √इष् 1U 4P 2 अश्रु n (nom & acc p अश्रूणि) tear 3 प्रमृज्य having wiped, washed off gerund प्र + √मृज 2P 10U 4 अङ्गारवती = वासवदत्ताया माता 5 लेख letter 6 प्रेषित a sent 7 वाचित read, caus PP √वच् 2P 1 तस्मिन् वाचिते (loc abs) when it was read 9 बाष्प m n tear 10 पूर्ण a full, filled with 11 बाष्पपूर्णनयना = बाष्पैः पूर्णे नयने यस्याः सा 12 दृढम very much 13 आरब्ध begun, PP आ + रभ् 1A 14 आलिखित written, PP आ + √लिख् 6P

(At that moment enters Kānchanamalā)

Kānchanamalā—Though I have been searching Rev Sangkrtyayanī could not be seen (Looking) Well, I will ask this Manorama, too (Approaching) Ah Manorama, do you know where Rev Sāngkrtyāyanī is ?

Manoramā — (looking and wiping off tears) Friend Kanchanamalā, I saw her but what business do you have with her ?

Kānchanamālā — O Manoramā, Her Majesty Queen Angāravatī sent a letter to our queen When it was read, the queen began to be sorry very much, her eyes filled with tears I am, therefore, looking for the reverend lady for comforting her

Manoramā — Friend, but what is written in the letter ?

काञ्चनमाला — 'या मम भगिनी सा तव जनन्येव। तस्या भर्ता दृढवर्मा तातस्ते । तत्तव किमेतदाख्यातव्यम् । तस्य समधिकः संवत्सरः कलिङ्गहतकेन बद्धस्य । तन्न युक्तमेतं वृत्तान्तमनिष्टं श्रुत्वा समीपस्थस्य समर्थस्य भर्तुस्ते एवमुदासीनत्वमवलम्बितुम्' इति ।

मनोरमा — हला काञ्चनमाले, यदा तावदयं वृत्तान्तो भट्टिन्यै न केनापि वाचयितव्य इति भर्त्राज्ञाप्तं तत्केन पुनरिदानीं स लेखः श्रावितः।

1 भगिनी f sister 2 जननी f mother (but here aunt) 3 तात father (but it must be interpreted as uncle here) 4 आख्यातव्य (ought) to be communicated, PP Pot आ + √ख्या 2P 5 संवत्सर a year 6 तस्य बद्धस्य समधिक संवत्सर it is more than a year since he was imprisoned 7 अनिष्ट a ill, evil 8 समर्थ a competent, strong 9 उदासीनत्वम indifference, neutrality 10 अवलम्बितुम् to hold to maintain, inf अव + लम्ब 1A 11 वाचयितव्य (ought) to be red, caus Pot PP √वच् 2P 12 आज्ञाप्त (आज्ञप्त) ordered caus PP आ + √ज्ञा 9U 13 श्रावित informed, told, caus PP √श्रु 5P

Kanchanamala— 'I have a sister who is your aunt, and her husband is your uncle, Drdhavarma So how can I communicate this to you? More than a year has passed since he was captured by the wretched King of Kalingas It is not, therefore proper for your powerful husband who resides in the neighbourhood to maintain neutrality in this way, after hearing about this evil incident" so it is written

Manorama—Dear Kanchanamala, after all who did now tell the queen about the letter when the king gave an order that nobody should inform her of this incident

काञ्चनमाला — अनुवाच्य तूष्णीं भूताया मम हस्ताद्गृहीत्वा स्वयमेव भट्टिन्या वाचितः ।

मनोरमा — तेन गच्छ त्वम् । एषा खलु देवी तयैव सह दन्तवलभ्यां तिष्ठति ।

काञ्चनमाला — तेन हि भट्टिनीसकाशं गमिष्यामि । (इति निष्क्रान्ता)

मनोरमा — चिरं खलु म आरण्यकासकाशादागतायाः । इढं च निर्विण्णा सा तपस्विन्यात्मनो जीवितेन । कदाचिदत्याहितं भवेत् । तत्तत्रैव गच्छामि । (इति निष्क्रान्ता)

❀ इति प्रवेशकः ❀

1 अनुवाच्य having read; gerund अनु + √ वच् 2P. caus. 2 तूष्णीम् ind silently. 3 तया सह = साकृत्यायन्या सह 4 दत tusk, tooth 5 वलभी f roof, terrace. 6 दन्तवलभी the name of a palace here. 7 निर्विण्ण despondent, emaciated with grief. 8 जीवितम् life 9 कदाचित् ind. at any time 10 अत्याहितम् rash deed, calamity.

Kānchanamālā—When I became silent after reading it, the queen took it from my hand and personally went through it.

Manoramā—Then, you should go. Her Majesty is indeed in the Dantavalabhī palace with her.

Kānchanamālā—Then I shall go to the queen. (Exit)

Manoramā—Really, it is a long time since I left Āranyakā. And the poor girl is extremely tired of her own life. At any time a calamity might occur So I must go there. (Exit.)

( END OF INTRODUCTION )

(तत प्रविशति सोद्वेगासनस्था वासवदत्ता साङ्कृत्यायनी विभवतश्च परिवार )

सांकृत्यायनी — राजपुत्रि, अलमुद्वेगेन । नेदृशो वत्सराजः । कथमित्थंगतमपि भवत्या मातृष्वसृपतिं विज्ञाय वत्सराजो निश्चिन्तं स्थास्यति ।

वासवदत्ता — (सास्रम्) भगवति, अतिऋजुकेदानीं त्वम् । यस्य मया न कार्यं तस्य मदीयेन किं कार्यम् । मातुर्युक्तं ममैतदालिखितुम् । सा पुनर्न जानात्यद्य तादृशी न वासवदत्तेति । तव पुनरेष आरण्यकावृत्तान्तः प्रत्यक्षः । तत्कथमेतद्भणसि ।

सांकृत्यायनी — यत एव मे प्रत्यक्षस्तत एव ब्रवीमि । तेन ननु कौमुदीमहोत्सवे त्वां हासयितुं तथा क्रीडितम् ।

1 इत्थंगत a fallen under these circumstances, so circumstanced 2 स्वसृ f sister 3 पति m husband 4 मातृष्वसृपतिम् = मातु स्वसा तस्या पतिम् दृढवर्माणम् 5 निश्चिन्त a free from anxiety, unconcerned —म् ad 6 अतिऋजुक (f —का) very simple-minded, upright मदीय a my, mine 8 मदीयेन = मम मातृष्वस पत्या 9 प्रत्यक्ष visible evident, perceptible 10 यतस् ~ ततस् (correlative) whence ~ thence, because, from whatever.

(Then appear sorrowfully seated Vasavadatta Sangkrtyayani and the retinue in the order of their ranks)

Sāngkrtyayani — O princess don't be sad The king of Vatsa is not such a person How will the Vatsa King remain unconcerned, knowing that the husband of your maternal aunt has fallen into such circumstances ?

Vasavadatta — (with tears) O revered lady ! You are now very simple-minded What business should he have with my uncle when I am nothing to him ? It was all right for my mother to write to me, but she does not know that Vasavadatta is now different from what she used to be But the scandal of Āranyaka is clear to you Then why do you say like that ?

Sāngkrtyāyani — From what is clear to me I dare say that on the day of Moonlight Festival he did frolic so as to humour you

वासवदत्ता — भगवति, एतदत्र सत्यम् । तथा हासितास्मि येन भगवत्याः
पुरतो लज्जया कथमपि तिष्ठामि । तत्किं तदीयया कथया ।
नन्वेतेनैव पक्षपातेनैतावतीं भूमिं नीतास्मि । (रोदिति)

सांकृत्यायनी — अलं राजपुत्रि रुदितेन । नेदृशो वत्सराजः । (विलोक्य)
अथवा प्राप्त एवायं यस्ते अश्रुप्रमार्जनं करोति ।

वासवदत्ता — मनोरथा इदानीमेते भगवत्याः ।

(ततः प्रविशति राजा विदूषकश्च)

राजा — वयस्य, क इदानीमभ्युपायः प्रियां मोचयितुम् ।

विदूषकः — भो वयस्य, मुञ्च विषादम् । अहं ते उपायं कथयिष्यामि ।

राजा — (सहर्षम्) वयस्य, त्वरिततरमभिधीयताम् ।

1 तदीय a. (ins.s.f. तदीयया) his, its 2 भूमिः f. situation, extent, degree. 3 रोदिति she weeps; लट् √ रुद् 2P. 4 रुदितम् weeping. 5 प्राप्त reached; PP. प्र + √ आप् 5P. 6 प्रमार्जनम् wiping. 7 अभ्युपायः means, remedy. 8 मोचयितुम् to set at liberty; inf. caus. √ मुच् 6U. 9 प्रियाम् = आरण्यकाम्. 10 अभिधीयताम् it must be told; कर्मणिलोट् अभि + √ धा 3U.

Vāsavadattā—Lady, this is true to the extent that I hardly stand before you because of my shame as I was so humoured. So what can be done with his tale ? Indeed, I am brought to this plight by his affection, (She weeps )

Sāngkrtyāyanī—O Princess, do not lament. The King of Vatsa is not cold. (Looking) Perhaps he is coming, who will wipe off your tears,

Vāsavadattā—It is but your wishful expectation,

( Then enter the king and his fool. )

King —O friend, is there any means to free my loving one now ?

Clown —Ah friend, drop your despair ! I will tell you a means.

King —( joyously ) Friend, tell me immediately !

विदूषकः— भोः, त्वं तावदनेकसमरसङ्घट्टप्रभावबाहुशाली पुनरप्यनेकगजतुरगपदातिदुर्विषहबलसमुदितः । तत्सर्वबलसन्दोहेनान्तःपुरं सुपीडितं कृत्वेदानीमेवारण्यकां मोचय ।

राजा — वयस्य, अशक्यमुपदिष्टम् ।

विदूषकः — किमत्राशक्यम् । यतस्तावत्कुब्जवामनवृद्धकञ्चुकिवर्जितो मनुष्योऽपरो नास्ति तत्र ।

राजा — (सावज्ञम्) मूर्ख, किमसम्बद्धं प्रलपसि । देव्याः प्रसादं मुक्त्वा नान्यस्तस्या मोचणाभ्युपायः । तत्कथय कथं देवीं प्रसादयामि ।

विदूषकः— भोः, मासोपवासं कृत्वा जीवितं धारय । एवं देवी चण्डी प्रसत्स्यति ।

1 समर war 2 सङ्घट्ट friction, encounter 3 प्रभावबाहु m powerful arm, prowess 4 शालिन a (nom s m शाली) possessing endowed with 5 दुर्विषह irresistible 6 समुदित elevated furnished with, PP सम + उद + √इ 2P 7 सन्दोह mass, whole 8 सुपीडित a well squeezed 9 अशक्यम् impossible thing 10 उपदिष्ट advised, PP उप + √दिश् 6U 11 कुब्ज hump backed 12 वामन dwarf, pigmy 13 वृद्ध old 14 मासोपवास = मासस्य उपवास fast for a month 15 धारय hold thou, लोट √धृ 10U 16 चण्डी f angry woman

Clown —Sir, you are now endowed with powerful arms due to your encounter with many a war and are further furnished with an irresistible army of many elephants, cavalry and infantry men So now crushing the harem with your whole army, set Āranyakā at liberty !

King —O friend you have prescribed an impossible thing

Clown —What is impossible here ? There is no other male there except the aged, hump backed and dwarfish chamberlain

King —(with contempt) Idiot ! Why talk nonsense ? With the exception of the queen's pleasure there is no other means for her liberation Therefore, tell me how best I can please the queen

Clown —Sir, do sustain your life by undergoing a fast for a month Then the angry queen will be pleased

राजा — (विहस्य) अलं परिहासेन । कथय कथं देवीं प्रसादयामि ।
धृष्टः किं पुरतोऽवरुध्य विहसन्गृह्णामि कण्ठे प्रियां
किं वा चाटुशतप्रपञ्चरचनाप्रीतां करिष्यामि ताम् ।
किं तिष्ठामि कृताञ्जलिर्निपतितो देव्याः पुरः पादयोः
सत्यं सत्यमहो न वेद्म्यनुनयो देव्याः कथं स्यादिति ॥१॥
तदेहि । देवीसकाशमेव गच्छावः ।

विदूषकः— भोः, गच्छ त्वम् । अहं पुनरिदानीमेव बन्धनात् कथमपि परिभ्रश्यागतोऽस्मि । तन्न गमिष्यामि ।

राजा — (विहस्य कण्ठे गृहीत्वा बलान्निवर्तयति) मूर्ख, आगम्यतामागम्यताम् । (परिक्रम्यावलोक्य च) इयं देवी दन्तवलभीमध्यमध्यास्ते । यावदुपसर्पामि ।

(सलज्जमुपसर्पति । वासवदत्ता सखेदमासनादुत्तिष्ठति)

1 धृष्ट a bold, impudent 2 चाटु m n coaxing word 3 प्रपञ्च display, explanation 4 रचना f arrangement 5 प्रीत pleased, pp √प्री 6 चाटुशतप्रपञ्चरचनाप्रीताम् = चाटूना शतस्य प्रपञ्च तस्य रचनया प्रीताम् 7 अञ्जलि m *folding hands* 8 कृताञ्जलि = कृत अञ्जलि येन स 9 वेद्मि I know, लट् √विद् 2P

किं धृष्टः पुरत अवरुध्य विहसन् कण्ठे प्रिया गृह्णामि, किं वा ता चाटुशतप्रपञ्चरचनाप्रीता करिष्यामि, किं देव्या पादयो पुर निपतित कृताञ्जलि तिष्ठामि, अहो सत्य सत्य देव्या अनुनय कथ स्यात् इति न वेद्मि ॥ शार्दूलविक्रीडितम्

King — (laughing) Enough of your humour Tell me how to please the queen! Shall I embrace my love by the neck with a smile, boldly blocking *her way, or please her by dint of making a display of hundreds of* coaxing words, or fall prostrate in front of the queen's feet with folded hands ? Ah! really, really I know not how to pacify the queen Come, let us go to see the queen

Clown — Sir, you go alone, but somehow I just managed to escape from the jail So I am not going

King — (laughing and catching him by the neck he forces him to turn) O stupid! Come on, come on (Pacing about and looking) Here is the queen sitting inside the Dantavalabhi Palace Let me just approach her (He advances in shame Vasavadattā rises from her seat painfully.)

राजा — किं मुक्तमासनमलं मयि संभ्रमेण
नोत्थातुमित्थमुचितं मम तान्तमध्ये ।
दृष्टिप्रसादविधिमात्रहृतो जनोऽय-
मत्यादरेण किमिति क्रियते विलक्षः ॥२॥

वासवदत्ता — (मुख विलोक्य) आर्यपुत्र, विलक्ष इदानीं त्वं भवसि ।

राजा — प्रिये, सत्यमहं विलक्षः । यत्प्रत्यक्षदृष्टापराधोऽपि भवतीं प्रसादयितुं व्यवसितोऽस्मि ।

सांकृत्यायनी — (आसन निर्दिश्य) महाराज, क्रियतामासनपरिग्रहः ।

1 उत्थातुम् to stand up, inf उद् + √ स्था 1P 2 इत्थम ind एवम thus 3 उचित proper 4 मम = मम कृते 5 तान्त withered, narrowed, PP √ तम् 4P 6 तान्तमध्ये = तान्त मध्य यस्या सा तत्सबोधनम् 7 विधि m act, manner 8 मात्र (a suffix) only, alone 9 जन = राजा 10 दृष्टिप्रसादविधिमात्रहृत = दृष्टिप्रसादस्य विधिमात्रेण हृत 11 किमिति = केन प्रकारेण, किमयम 12 विलक्ष a shameful ashamed 13 अपराध offence. 14 प्रत्यक्षदृष्टापराध = प्रत्यक्षेण दृष्ट अपराध यस्य स 15 व्यवसित striven, determined, pp व्यव + √सा1P

कि आसन मुक्तम, मयि सभ्रमेण अल, तान्तमध्ये! मम इत्थ उत्थातु न उचित दृष्टिप्रसादविधिमात्रहृत अय जन अत्यादरेण किमिति विलक्ष क्रियते ॥ वसन्ततिलका

King — Why do you leave the seat ? Do not be confused at me O slender waisted one ! It is unfit for you to rise thus for me Why do you make this man who is overwhelmed by mere favour of your sight, feel ashamed with your extreme courtesy ?

Vāsavadatta — (observing his face) My husband, are you ashamed now ?

King — Ah my love ! I feel truly ashamed of the fact that I am determind to propitiate you though my offence was evidently detected by you.

Sangkrtyāyani — (showing the seat) Your Majesty, pray do accept this seat

राजा — (आसन निर्दिश्य) इतो देव्युपविशतु। (वासवदत्ता भूमावुपविशति) आः कथं भूमावुपविष्टा देवी। अहमप्यत्रैवोपविशामि। (इति भूमावुपविश्य कृताञ्जलिः) प्रिये, प्रसीद प्रसीद। किमेवं प्रणतेऽपि मयि गम्भीरतरं कोपमुद्वहसि।

भ्रूभङ्गं न करोषि रोदिषि मुहुर्मुग्धेक्षणे केवलं
नातिप्रस्फुरिताधरानवरतं निःश्वासमेवोज्झसि।
वाचं नापि ददासि तिष्ठसि परं प्रध्याननम्रानना
कोपस्ते स्तिमितो निपीडयति मां गूढप्रहारोपमः॥ ३॥

1 भूमि. f. (loc. s. भूमौ) ground, floor. 2 प्रणत bent, saluted; PP. प्र + √नम् 1U. 3 प्रणते मयि (loc. abs.) *when I bow down.* 4 गम्भीर a. (com.—तर) deep, serious. 5 उद्वहसि thou bearest; उद् + √वह् 1P. 6 मुग्ध charming. 7 ईक्षणम् eye. 8 मुग्धेक्षणे = मुग्धे ईक्षणे यस्याः सा तत्सबोधनम्. 9 केवलम् ad. = परम् only, solely. 10 नातिप्रस्फुरिताधरा = न अतिप्रस्फुरितः अधरः यस्याः तादृशी. 11 अनवरतम् ind. continually. 12 उज्झसि thou givest out; √उज्झ् 6P. 13 प्रध्यानम् meditation. 14 नम्र low, bent. 15 आननम् face. 16 प्रध्याननम्रानना = प्रध्याने नम्रं आननं यस्याः तादृशी. 17 स्तिमित rigid, fixed; PP √स्तिम् 4P. 18 निपीडयति *it oppresses*; नि + √पीड 10U. 19 उपमा f comparison, resemblance. 20 प्रहार. stroke. 21 गूढप्रहारोपमः = गूढप्रहारस्य उपमा यस्य सः (कोपः)

मुग्धेक्षणे! भ्रूभङ्गं न करोषि केवलं मुहुः रोदिषि नातिप्रस्फुरिताधरा अनवरतं निश्वासं एव उज्झसि वाचं अपि न ददासि परं प्रध्याननम्रानना तिष्ठसि स्तिमितः गूढप्रहारोपमः ते कोपः मां निपीडयति॥
शार्दूलविक्रीडितम्

King —(pointing out the chair) *Queen, be seated here.* (*Vāsavadattā sits* down on the floor) Oh how my queen is seated on the floor! *Let me take* seat here, too. (He, sitting down on the floor, folds his hands.) My darling, forgive me, forgive me! Why do you bear serious anger when I humble myself thus?

O charming-eyed one! thou dost not knit thy eyebrows and only weepest *repeatedly: thou givest out continual sighs, with thy* lips slightly trembling: thou dost not utter a single word and remainest, bending down thy face in reflection :— thy rigid anger comparable to a deep stroke oppresses me.

प्रिये, प्रसीद प्रसीद । (इति पादयोः पतति)

वासवदत्ता — अतिसुखितो नन्वसि। किमिदानीं दुःखितं जनं विकारयसि। उत्तिष्ठ। कोऽत्र कुपितः।

सांकृत्यायनी — उत्तिष्ठ। महाराज, किमनेन। अन्यदेव तावद् उद्वेगकारणमस्याः।

राजा — (ससंभ्रमम्) भगवति, किमन्यत्।

(सांकृत्यायनी कर्णे कथयति)

राजा — (विहस्य) यद्येवमलमुद्वेगेन। मयापि ज्ञातं सिद्ध एवास्मिन्प्रयोजने देवीं दिष्ट्या वर्धयिष्यामीति नोक्तम्। अन्यथा कथमहं दृढवर्मवृत्तान्ते विस्रब्धस्तिष्ठामि। तत्कतिपयान्यहानि तद्वार्ताया आगतायाः। इदं च तत्र वर्तते।

1 अतिसुखित very happy. 2 दुःखित miserable, unhappy. 3 जनम् = वासवदत्ताम् 4 विकारयसि thou affectest, disturbest; णिजन्तात्लट् वि + √कृ 8U. 5 सिद्ध succeeded, accomplished; pp. √सिध् 4P. 6 प्रयोजनम् cause, purpose, use. 7 विस्रब्ध confidential, tranquil. 8 कतिपय a. (nom. p.n. कतिपयानि) several 9 अहन् n. (nom. p. अहानि) day. 10 वार्ता f. news, message.

Darling wife, be pleased, be pleased! (He falls prostrate.)

Vāsavadattā — Certainly you are too happy Why do you affect this unhappy person? Rise! Who is angry here?

Sāngkrtyāyanī — Pray stand up, Sire! It is no use. The cause of her despair is altogether different.

King — (hastily) O reverend, what is it?

(Sāngkrtyāyanī whispers into his ear)

King — (laughing) If so, do not lament! I have not yet spoken about it, thinking that I should congratulate her when I succeed in this enterprise. Otherwise, how can I remain calm towards the incident of Drḍhavarmā? A few days ago the message came. This being the case,—

अस्मद्बलैर्विजयसेनपुरस्सरैस्तै-
राक्रान्तबाह्यविषयो विहतप्रतापः ।
दुर्गं कलिङ्गहतकः सहसा प्रविश्य
प्राकारमात्रशरणोऽशरणः कृतोऽसौ ॥४॥ तदवस्थं च तम्;
निर्दिष्टाक्रान्तमन्दं प्रतिदिनविरमद्वीरदासेरवृत्त
सध्वंसं शीर्यमाणद्विपतुरगनरक्षीणनिःशेषसैन्यम् ।
अद्य श्वो वा विभग्ने झटिति मम बलैः सर्वतस्तत्र दुर्गे
बद्धं युद्धे हतं वा भगवति नचिराच्छ्रोष्यसि त्वं कलिङ्गम् ॥५॥

1 पुरःसर a foremost, going in front, m leader 2 आक्रान्त seized, PP आ + √क्रम् 1U. 4P. 3 बाह्य external, outer 4 विषय place, territory. 5 आक्रान्तबाह्यविषय = आक्रान्त बाह्यविषय यस्य स: 6 प्रताप valour 7 विहतप्रताप = विहत प्रताप यस्य स: 8 दुर्ग m n castle 9 प्राकार m n wall 10 शरणम refuge 11 प्राकारमात्रशरण = प्राकारमात्र शरण यस्य स 12 अशरण helpless 13 मन्द inactive, feeble 14 विरमत् ceasing, stopping Pres Part वि + √रम् 1A (but P with वि) 15 वीर hero, soldier 16 दासेर slave, servant 17 वृत्तम् conduct, duty 18 ध्वंस loss, ruin 19 सध्वसम् = ध्वससहितम् ruinous, decaying 20 शीर्यमाण being shattered, Pass Pres Part √शॄ 9P. 21 क्षीण decayed, defeated, PP. √क्षि 1U. 5 9P 22 शीर्यमाणद्विपतुरगनरक्षीणनिःशेषसैन्यम् = शीर्यमाणै द्विपै तुरगै नरै च क्षीण निःशेषसैन्य यस्य तम 23 विभग्न broken, conquered PP वि + √भञ्ज 7P 24 झटिति quickly, at once 25 सर्वतस् all round entirely

विजयसेनपुरःसरै तै अस्मद्बलै आक्रान्तबाह्यविषय विहतप्रताप असौ कलिङ्गहतक सहसा दुर्गं प्रविश्य प्राकारमात्रशरण अशरण कृत ॥ वसन्ततिलका

निर्दिष्टाक्रान्तमन्द प्रतिदिनविरमद्वीरदासेरवृत्त सध्वस शीर्यमाणद्विपतुरगनरक्षीणनिःशेषसैन्य अद्य श्व वा तत्र दुर्गे झटिति सर्वतः मम बलै विभग्ने युद्धे बद्ध हत वा कलिङ्ग त्व नचिरात् श्रोष्यसि, भगवति! ॥ स्रग्धरा

As his outer territory was captured by our forces under the command of Vijayasena, the wretched King of Kalingas with his morale disappeared all of a sudden retreated to his castle and is now helpless, only relying upon its walls

And reduced to such a plight —

And enfeebled from his defeat as indicated above he is suffering heavy loss, while his soldiers and servants are every day incapacitated and his entire army almost all destroyed, the tuskers, horses and men being shattered, so, as soon as the fort is completely broken open today or to-morrow by my troops thou wilt soon hear Kalingga either captured or killed in battle, O reverend !

सांकृत्यायनी — राजपुत्रि, प्रथमतरमेव भवत्याः कथितं मया कथमप्रति-
विधाय वत्सराजः स्थास्यतीति ।

वासवदत्ता — यद्येवं प्रियं मे । (प्रविश्य प्रतीहारी)

प्रतीहारी — जयतु जयतु भर्ता । एष खलु विजयसेनो दृढवर्मकञ्चुकि-
सहितो हर्षसमुत्फुल्ललोचनः प्रियं निवेदयितुकामो द्वारे तिष्ठति ।

वासवदत्ता — (सस्मितम्) भगवति, तर्कयामि यथा परितोषितास्म्यार्य-
पुत्रेणेति ।

सांकृत्यायनी — वत्सराजपक्षपातिनी खल्वहं न किंचिदपि ब्रवीमि ।

राजा — शीघ्रं प्रवेशय तौ ।

प्रतीहारी — तथा । (इति निष्क्रान्ता)

1 अप्रतिविधाय not having retaliated, gerund अ + प्रतिवि + √ धा 3U 2 समुत्फुल्ल widely open expanded 3 प्रिय favourable dear, n happy news 4 लोचनम् eye 5 हर्षसमुत्फुल्ललोचन = हर्षेण समुत्फुल्ल लोचन यस्य तादृश 6 निवेदयितुकाम (the final म of inf is dropped before काम) desirous of informing 7 तर्कयामि I suppose, √ तर्क 10U 8 ब्रवीमि I speak लट √ ब्रू 2U 9 शीघ्रम् ad quickly

Sangkrtyayani—Your Highness did I not say to you in the first place that Vatsa King should not remain calm without resorting to retaliation ?

Vasavadatta—If so it is a favour to me

( The female door keeper enters )

Doorkeeper—Victory to Your Majesty ! Indeed there stands at the door Vijayasena accompanied by the Chamberlain to King Drdhavarma, with his eyes expanding in joy desiring to submit to Your Majesty a happy tiding

Vāsavadatta—(smiling) Reverend lady, I think my husband has satisfied me

Sangkrtyayani—Certainly I will not say anything as I am partial to Vatsa King

King —Admit them at once !

Doorkeeper—Yes (Exit)

(ततः प्रविशति विजयसेनः कञ्चुकी च)

विजयसेनः— भोः कञ्चुकिन्, अद्य स्वामिपादा द्रष्टव्या इति यत् सत्यमनुपमं कमपि सुखातिशयमनुभवामि ।

कञ्चुकी — विजयसेन, अवितथमेतत् । पश्य

सुखनिर्भरोऽन्यथापि स्वामिनमवलोक्य भवति भृत्यजनः ।
किं पुनररिबलविघटननिर्व्यूढप्रभुनियोगभरः ॥६॥

उभौ — (उपसृत्य) जयतु जयतु स्वामी । (राजा उभावपि परिष्वजते)

कञ्चुकी — देव, दिष्ट्या वर्धसे ।

1 अनुपम matchless, incomparable, 2 अतिशय excess. 3 अवितथ a. true, n. truth. 4 निर्भर (often समासान्ते) excessive strong. 5 भृत्यजन (in plural sense) servants. 6 किं पुनर् what more. 7 अरि m enemy 8 विघटनम् destruction. 9 निर्व्यूढ completed; PP. निर्वि + √ऊह्. 1A. 10 प्रभु m master, king. 11 नियोगः injunction. 12 भरः burden, responsibility. 13 अरिबलविघटननिर्व्यूढप्रभुनियोगभरः = अरिबलस्य विघटनेन निर्व्यूढ प्रभुनियोगस्य भरः येन सः

अन्यथा अपि भृत्यजनः स्वामिनं अवलोक्य सुखनिर्भरः भवति, किं पुनर् अरिबलविघटननिर्व्यूढप्रभुनियोगभरः ॥ आर्या

(Then appear Vijayasena and the Chamberlain.)

Vijayasena—O chamberlain, truly I experience some sort of excessive and incomparable happiness as I am now to see the royal feet of my lord.

Chamberlain—O Vijayasena, *it is true.* *Hark!*

The servants become overwhelmed with happiness when they have an audience with the king even on other business: What more when they come to see him after carrying out the burden of his command by means of destroying the enemy-force!

Both men – (approaching) Victory to Your Majesty!

(The king embraces them, too.)

Chamberlain—Congratulations, Sire!

हत्वा कलिङ्गहतकं ह्यस्मत्स्वामी निवेशितो राज्ये।
देवस्य समादेशाद्रिपुजयिना विजयसेनेन ॥७॥

वासवदत्ता — अयि भगवति, अभिजानास्येतं कञ्चुकिनम् ।

सांकृत्यायनी — कथं नाभिजानामि । ननु स एषः यस्य हस्ते मातृष्वसा ते पत्रिकामनुप्रेषितवती ।

राजा — साधु । विजयसेनेन महाव्यापारोऽनुष्ठितः ।

(विजयसेन पादयो पतति)

राजा — देवि, दिष्ट्या वर्धसे । प्रतिष्ठितो राज्ये दृढवर्मा ।

वासवदत्ता — (सहर्षम्) अनुगृहीतास्मि ।

1 अस्मत्स्वामी = अस्माक राजा दृढवर्मा 2 निवेशित admitted, restored, caus PP नि + √विश 6P 3 राज्यम kingdom, reign 4 समादेश command 5 रिपु m enemy 6 जयिन a (ins s जयिना) conquering 7 अभिजानासि thou recognizest, अभि + √ज्ञा 9U 8 पत्रिका f letter 9 व्यापार work 10 अनुष्ठित performed, PP अनु + √स्था 1P 11 प्रतिष्ठित established PP प्रति + √स्था 1P 12 अनुगृहीता f favoured, PP अनु + √ग्रह 9U

देवस्य हि समादेशात रिपुजयिना विजयसेनेन कलिङ्गहतकं हत्वा अस्मत्स्वामी राज्ये निवेशित ॥ आर्या

For having slaughtered the wretched monarch of Kalinga at Your Majesty's command the conqueror of foes Vijayasena restored our lord to his kingdom

Vasavadatta—O revered lady, do you recognise this chamberlain ?

Sangkrtyayani—How do I not recognize him ? Certainly it is he, through whose hand your aunt did dispatch a letter to you

King —Well done ! A great enterprise was achieved by Vijayasena (Vijayasena falls prostrate at his feet )

King —O my queen, congratulations ! Drdhavarma was re established in his realm

Vasavadatta—(joyously) I am favoured

विदूषकः—ईदृशेऽभ्युदयेऽस्मिन्राजकुले एतत्करणीयम्। (राजानं निर्दिश्य वीणावादनं नाटयन्)

गुरुपूजा। (आत्मनो यज्ञोपवीतं दर्शयन्) ब्राह्मणस्य सत्कारः। (आरण्यकां सूचयन्) सर्वबन्धनमोक्ष इति।

राजा — (अपवार्य छोटिकां ददत्) साधु वयस्य, साधु।

विदूषकः— भवति, कथं त्वं न किमप्यत्र समादिशसि।

वासवदत्ता — (साङ्कृत्यायनीमवलोक्य सस्मितम्) मोचिता खलु हताशेन आरण्यका।

सांकृत्यायनी — किं वा तपस्विन्यानया बद्धया।

वासवदत्ता — यथा भगवत्यै रोचते।

सांकृत्यायनी — यद्येवम्, अहमेव गत्वा तां मोचयिष्यामि। (इति निष्क्रान्ता)

1 अभ्युदय. prosperity, joyously and festive occasion 2 यज्ञोपवीतम् sacred thread worn over the shoulder. 3 सत्कारः honour. 4 समादिशसि thou commandest; समा + √दिश् 6P. 5 हताशेन = विदूषकेण

Clown — On such a joyous occasion the following must be done in this royal household (pointing out the king and gesticulating to play on a lute) To worship the teacher: (showing his own sacred thread) To honour the Brahmin: (indicating Āranyakā) To free all in captivity.

King — (Aside, snapping his fingers) Bravo, bravo, my friend!

Clown — Your Ladyship, why do you not issue an order in this regard?

Vāsavadattā — (looking at Sāngkrtyāyanī, smiling) Indeed, Āranyakā is freed by this wretched lad.

Sāngkrtyāyanī — Or what is the use of detaining the poor girl?

Vāsavadattā — As it pleases you (As you like).

Sāngkrtyāyanī — If so, I will go and release her. (Exit)

कञ्चुकी — इदमपरं संदिष्टं महाराजेन दृढवर्मणा 'त्वत्प्रसादात् सर्वमेव यथाभिलषितं संपन्नम् । तदेते प्राणास्त्वदीयाः । यथेष्टमिमान्विनियोक्तुं त्वमेव प्रमाणम्' ।

(राजा सलज्जमधोमुखस्तिष्ठति)

विजयसेनः— देव, न शक्यमेव देवं प्रति प्रीतिविशेषं दृढवर्मणः कथयितुम् ।

कञ्चुकी — 'यद्यपि तुभ्यं प्रतिपादितायाः प्रियदर्शिकाया अस्मद्दुहितुः परिभ्रंशान्न मे संबन्धो जात इति दुःखमासीत् तथापि वासवदत्तायाः परिणेत्रापि त्वया तदपनीतमेव' ।

वासवदत्ता — (सास्रम्) आर्य कञ्चुकिन्, कथं मे भगिनी परिभ्रष्टा ।

1 संदिष्ट sent as a message, pp सम् + √दिश् 6U 2 प्राण life breath 3 यथा इष्टम् as desired 4 इमान = प्राणान् 5 विनियोक्तुम् to use to dispose of, inf विनि + √युज् 7A 6 प्रतिपादित (gen s f—ताया) betrothed, given in marriage, pp. प्रति + √पद् 4A. causal 7 परिभ्रंश loss 8 संबन्ध relation 9 परिणेतृ m (ins s परिणेत्रा) husband 10 तत् अपनीतम् = दुःख दूरीकृतम् 11 भगिनी sister (but cousin here)

Chamberlain — Furthermore His Majesty King Drdhavarmā mentions in his message that by your favour everything was achieved as desired, so his life is yours and you are the only authority to dispose of it as much as you will

(The king bends down his face abashed )

Vijayasena—Sire ! King Drdhavarmā's special regard for Your Majesty is beyond description

Chamberlain—He further says "Although I felt unhappy because my matrimonial relationship is cut off due to the loss of my daughter, Priyadarshikā who was betrothed to you my sorrow has been just dispelled by your marriage with Vasavadatta

Vasavadattā—(shedding tears) O noble chamberlain !
How was my cousin sister lost ?

कञ्चुकी — राजपुत्रि, तस्मिन्कलिङ्गहतकावस्कन्दे विद्रुतेष्वितस्ततोऽन्तः-
पुरजनेषु पृष्टां दिष्ट्या 'इदानीं न युक्तमत्र स्थातुम्' इति तामहं गृहीत्वा वत्सराजान्तिकं प्रस्थितः । ततः संचिन्त्य तां विन्ध्यकेतोर्हस्ते निक्षिप्य निर्गतोऽस्मि । यावत्प्रतीपमागच्छामि तावत्कैरपि तत्स्थानं सह विन्ध्यकेतुना स्मर्तव्यतां नीतम् ।

राजा — (सस्मितम्) विजयसेन, किं कथयसि ।

कञ्चुकी — तत्र चान्विष्यता मया न प्राप्ता । तदाप्रभृति नाद्यापि विज्ञायते क्व वर्तत इति । (प्रविश्य मनोरमा)

मनोरमा — भट्टिनि, प्राणसंशये वर्तते सा तपस्विनी ।

1 अवस्कन्द. assault, attack. 2 अन्त.पुरेषु विद्रुतेषु (loc. abs.) when the harem-ladies ran away. 3 अन्तिकम् = समीपम्, सकाशम्. 4 प्रतीपं आगच्छामि I return. 5 स्मर्तव्यता f recollection, memory. 6 विज्ञायते it is known; कर्मणिलट् वि + √ ज्ञा 9U. 7 प्राणसंशय. danger of life.

Chamberlain—O princess, at the time of the wicked Kalinga's attack when the harem ladies were fleeing hither and thither, I headed for the palace of Vatsa King accompanying her, saying that the place was now unfit for her stay. Then after profound deliberation I deposited her in the hands of Vindhyaketu, and went out.
As soon as I came back, the place was reduced by unknown foes to a thing of past only to be remembered along with Vindhyaketu.

King —(with a smile) O Vijayasena, what do you say ?

Chamberlain—And I could not find her out there. Since then it is unknown even now where she is.
( Manoramā entering )

Manoramā—O queen, the ill-fated girl is in danger of life.

वासवदत्ता — (सास्रम्) किं पुनस्त्वं प्रियदर्शनावृत्तान्तं जानासि ।

मनोरमा — न खल्वहं प्रियदर्शनावृत्तान्तं जानामि । एषा खल्वारण्यका कल्याव्यपदेशेनानीतं विषं पीत्वा प्राणसंशये वर्तत इत्येवं मया निवेदितम् । तत्परित्रायतां भट्टिनी । (रुदती पादयो पतति)

वासवदत्ता — (स्वगतम्) हा धिक् हा धिक् । प्रियदर्शनादुःखमपि मेऽन्तरितमारण्यकावृत्तान्तेन । अतिदुर्जनः खलु लोकः । कदाचिन्मामन्यथा सम्भावयिष्यति । तदेतदत्र युक्तम् । (प्रकाश ससम्भ्रमम्) मनोरमे, लघ्विहैवानय ताम् । नागलोकादृहीतविषविद्य आर्यपुत्रोऽत्र कुशलः ।

1 कल्या f kind of wine 2 आनीत brought, PP आ + √नी 1U 3 विषम् poison 4 पीत्वा having drunk, gerund √पा 1P 5 अतिदुर्जन very wicked 6 विद्या knowledge 7 गृहीतविषविद्य = गृहीता विषस्य विद्या येन स 8 कुशल a fine, fit, skilful 9 अत्र in this case

Vāsavadatta—(tearfully) But dost thou know the news of Priyadarshanā ?

Manoramā—I do not know anything about Priyadarshanā I am to inform you that Āranyakā is really in a critical condition after drinking poison brought under the pretext of wine So may the queen save her ! (weeping she falls prostrate )

Vāsavadattā—(to herself) Alas, fie ! My sorrow felt for Priyadarshana has been overshadowed by the tidings of Āranyakā Indeed, the folks are very wicked At any time they might misunderstand me So this is appropriate here (Aloud in haste) Ah Manorama, bring her here at once ! In this case my husband is skilled as he got the knowledge of poison from the world of Nagas

मनोरमा — सखि, किं ते बोधः । (सास्रं पुनश्चालयन्ती) सखि, ननु भणामि किं ते बोध इति ।

प्रियदर्शिका — (अविस्पष्टम्) नन्वेतयापि न मया महाराजो दृष्टः । (इत्यर्धोक्ते भूमौ पतति)

राजा — (सास्रं स्वगतम्)

एषा मीलयतीदमीक्षणयुगं जाता ममान्धा दिशः
कण्ठोऽस्याः प्रतिरुध्यते मम गिरो निर्यान्ति कृच्छ्रादिमाः ।
एतस्याः श्वसितं हृतं मम तनुर्निश्चेष्टतामागता
मन्येऽस्या विषवेग एव हि परं सर्वं तु दुःखं मम ॥६॥

1 अविस्पष्टम् indistinctly. 2 एतया मया = इमां दशां गतया मया. 3 मीलयति she closes, √मील् 1P 4 युगम् a pair 5 अन्ध a blind, dark. 6 प्रतिरुध्यते it is choked; कर्मणिलट् प्रति + √रुध् 7U. 7 गिर् f. (p गिरः) voice, word. 8 कृच्छ्रात् with difficulty. 9 हृत suspended. PP √हृ 1U. 10 निश्चेष्टता f. motionlessness. 12 तु = केवलम् only.

एषा इदं ईक्षणयुगं मीलयति मम दिशः अन्धाः जाताः, अस्याः कण्ठः प्रतिरुध्यते मम इमाः गिरः कृच्छ्रात् निर्यान्ति, एतस्याः श्वसितं हृतं मम तनुः निश्चेष्टतां आगता, मन्ये अस्याः विषवेगः परं तु सर्वं मम दुःखं एव हि ॥ शार्दूलविक्रीडितम् ।

Manoramā — Friend, are you conscious ? (shedding tears and again shaking her) Friend, I say, are you conscious ?

Priyadarshikā — (indistinctly) Though in this plight I did not see the king. (Half-saying so, she falls down on the ground )

King — (tearfully to himself)

This pair of her eyes she closes, and all quarters become dark to me her throat is choked, and I can hardly utter these word : her breathing is stopped, and my body comes to a standstill ; I consider the effect of the poison is severest to her, and it is but all my torment.

वासवदत्ता — (सास्रम्) प्रियदर्शने, उत्तिष्ठोत्तिष्ठ। पश्यैष महाराजस्तिष्ठति। कथं वेदनाप्यस्या नष्टा। किमिदानीं मयापराद्धमजानत्या येन कुपिता नालपसि। तत्प्रसीद प्रसीद। उत्तिष्ठोत्तिष्ठ। न खलु पुनरपरात्स्यामि। (ऊर्ध्वमवलोक्य) हा दैवहतक, किमिदानीं मयापकृतं येनैतदवस्थां गता मे भगिन्यादर्शिता। (प्रियदर्शिकाया उपरि पतति)

विदूषकः— भो वयस्य, कथं त्वं मूढ इव तिष्ठसि। नैष विषादस्य कालः। विषमा खलु गतिर्विषस्य। तद्दर्शयात्मनो विद्याप्रभावम्।

राजा — सत्यमेवैतत्। मूढ एवाहमेतावतीं वेलाम्। तदहमेनां जीवयामि। (प्रियदर्शिकामालोक्य) सलिलं सलिलम्।

1 वेदना f. perception, sensation 2 नष्ट (nom. s. f. नष्टा) destroyed; pp. √नश् 4P. 3 अपकृत injured, wronged, pp. अप + √कृ 8U. 4 आदर्शित shown. 5 मूढ foolish, perplexed. 6 विषम rough, vehement

Vāsavadattā — (shedding tears) O Priyadarshanā, arise, arise! See the king is here. How even her senses are lost. Now what wrong did I commit unwittingly, so that you would not speak, being angry? Forgive me, forgive me! I will never again offend you. Arise, arise! (looking at the sky) Ah miserable Fate! Now what wrong did I commit that you show me my sister in such a plight? (Falls over Priyadarshikā).

Clown — Hallo friend, why do you stand as if perplexed? This is not the time for despair. Really the speed of the poison is terrible. Therefore, do display your magnanimous knowledge of medicine.

King — Exactly true. I remained a fool all this time So I will now bring her to life. (observing Priyadarshikā) Water! water!

(निष्क्रान्ता मनोरमा) (ततः प्रविशति मनोरमया धृता सविषवेगमात्मानं नाटयन्त्यारण्यका)

आरण्यका — हला मनोरमे, कस्मादिदानीं मामन्धकारं प्रवेशयसि ।

मनोरमा — (सविषादम्) हा धिक् हा धिक् । दृष्टिरप्यस्याः संक्रान्ता विषेणैव । (वासवदत्तां दृष्ट्वा) भट्टिनि, लघु परित्रायस्व लघु परित्रायस्व । गुरूभूतमस्या विषम् ।

वासवदत्ता — (ससम्भ्रमं राजानं हस्ते गृहीत्वा) आर्यपुत्र, उत्तिष्ठोत्तिष्ठ । लघु विपद्यते खल्वेषा तपस्विनी । (सर्वे पश्यन्ति)

कञ्चुकी — (विलोक्य) सुसदृशी खल्विय मम राजपुत्र्याः प्रियदर्शनायाः । (वासवदत्तां निर्दिश्य) राजपुत्रि, कुत इयं कन्यका ।

वासवदत्ता — आर्य, विन्ध्यकेतोर्दुहिता । तं व्यापाद्य विजयसेनेनानीता ।

कञ्चुकी — कुतस्तस्य दुहिता । सैवेयं मम राजपुत्री । हा हतोऽस्मि मन्दभाग्यः । राजपुत्रि, इयं सा प्रियदर्शिका भगिनी ते ।

1 अन्धकार darkness 2 दृष्टि f eye sight 3 गुरूभूत become serious 4 विपद्यते she perishes, लट् वि + √पद् 4A 5 भाग्यम् fortune 6 मन्दभाग्य = मन्दं भाग्यं यस्य सः

*(Manorma moves out Then appears Aranyaka supported by Manorama showing herself overcome by the velocity of poison)*

Aranyaka—Dear Manorama why do you now throw me into darkness ?

Manorama—(sadly) Alas ! alas ! Even her eye-sight becomes deluded by the poison (Looking at Vasavadatta)
O queen, help her ! help her quickly Her poison is severe

Vasavadatta—(hastily grasping the king by the hand) My husband, rise ! Indeed this poor girl is perishing now (All look)

Chamberlain—(looking) Really she is very much like our princess Priyadarshana (Pointing out Vasavadatta)
O princess, whence this virgin ?

Vasavadatta—Sir, she is Vindhyaketu's daughter Having destroyed him Vijayasena brought her

Chamberlain—How is she his daughter ? She is none other than our princess I am undone alas ! unlucky that I am O princess, she is your cousin Priyadarshika !

(इति निपत्य भूमावुत्थाय)

वासवदत्ता — आर्यपुत्र, परित्रायस्व परित्रायस्व । मम भगिनी विपद्यते ।

राजा — समाश्वसिहि समाश्वसिहि । पश्यामस्तावत् । (स्वगतम्) कष्टं भोः कष्टम् ।

सञ्जातसान्द्रमकरन्दरसां क्रमेण
पातुं गतश्च कलिकां कमलस्य भृङ्गः ।
दग्धा निपत्य सहसैव हिमेन चैषा
वामे विधौ न हि फलन्त्यभिवाञ्छितानि ॥८॥

(प्रकाशम्) मनोरमे, पृच्छ्यतां तावत्किं ते बोध इति ।

1 मकरन्द honey 2 रस juice 3 सञ्जातसान्द्रमकरन्दरसाम् = सञ्जात सान्द्र मकरन्दरस यस्या ताम् 4 क्रमेण gradually, in course of 5 कलिका f bud 6 एषा = कलिका 6 अभिवाञ्छितम् wish 7 बोध consciousness, knowledge 8 च ~ च indicates simultaneous occurrence of two events

भृङ्ग सञ्जातसान्द्रमकरन्दरसां कमलस्य कलिकां क्रमेण पातुं गत च सहसा एव एषा हिमेन निपत्य दग्धा, च अभिवाञ्छितानि वामे विधौ न हि फलन्ति ॥ वसन्ततिलका

(Thus falling upon the ground and rising)

Vāsavadattā—My lord, save her, save her ! My cousin is dying

King —Take heart, take heart ! Well, let us see. (to himself) O sorrow !
No sooner the bee went to drink gradually the lotus-bud filled with thick juice of honey than the bud was all of a sudden dropped and frozen by the frost In an adverse fortune, indeed, wishes do bear no fruit.
(Aloud) Ah Manoramā, ask her how her consciousness is now !

विदूषकः— (निष्क्रम्य पुनः प्रविश्य) भोः, एतत्सलिलम् ।
(राजोपसृत्य प्रियदर्शनाया उपरि हस्तं निधाय मन्त्रस्मरणं नाटयति । प्रियदर्शिका शनैरुत्तिष्ठति ।)
वासवदत्ता — आर्यपुत्र, दिष्ट्या प्रत्युज्जीविता मे भगिनी ।
विजयसेनः— अहो सर्वत्राप्रतिहता नरेन्द्रता देवस्य ।
प्रियदर्शिका — (शनैरुत्थायोपविश्य च जृम्भिकां नाटयन्ती सविषादमविस्पष्टम्) मनोरमे, चिरं खलु सुप्तास्मि ।
विदूषकः— भो वयस्य, निर्व्यूढं ते वैद्यत्वम् ।
(प्रियदर्शिका साभिलाषं राजानं निरूप्य सलज्जं किंचिदधोमुखी तिष्ठति ।)
वासवदत्ता — (सहर्षम्) आर्यपुत्र, किमिदानीमप्येषान्यथैव करोति ।
राजा — (सस्मितम्)

1 निधाय having placed, gerund नि + √धा 3U 2 मन्त्र spell formula 3 स्मरणम् recollection memory प्रत्युज्जीवित resurrected returned to life pp. प्रति+उद √जीव 1P 5 सर्वत्र ind completely 6 अप्रतिहत unopposed 7 नरेन्द्रता f kingship, poison curing 8 जृम्भिका f yawning 9 वैद्यत्वम doctoring medical skill

Clown — (having moved out, re entering) Sir, here is water (The king approaching and placing his hand on Priyadarshika, remembers a spell ) (Priyadarshika slowly rises )
Vasavadatta — My husband, my sister has been fortunately resurrected
Vijayasena — Oh how unique Your Majesty's doctoring is !
Priyadarshika — (slowly rising, sitting and yawning she utters indistinctly) O Manorama, I have really slept for a long time
Clown — O friend, your medical skill is successful (Priyadarshika, on looking at the king longingly and expressing bashfulness, bends down her face a little )
Vasavadatta — (joyfully) My lord even now she behaves awkwardly
King — (smiling)

स्वभावस्था दृष्टिर्न भवति गिरो नातिविशदा-
स्तनुः सीदत्येषा प्रकटपुलकस्वेदकणिका ।
यथा चायं कम्पः स्तनभरपरिक्लेशजनन-
स्तथा नाद्याप्यस्या नियतमखिलं शाम्यति विषम् ॥ १० ॥

कंचुकी — (प्रियदर्शिकां निर्दिश्य) राजपुत्रि, एष ते पितुराज्ञाकरः ।
(इति पादयोः पतति)

प्रियदर्शिका — (विलोक्य) कथं कंचुक्यार्यविनयवसुः । (सास्रम्) हा तात, हा मातः ।

कंचुकी — राजपुत्रि, अलं रुदितेन । कुशलिनौ ते पितरौ । वत्सराजप्रभावात्पुनस्तदवस्थमेव राज्यम् ।

1 स्वभाव nature natural state 2 अतिविशद very clear 3 सीदति it fails, लट् √सद् 1P 4 प्रकट manifest 5 पुलक horripilation, thrill 6 कणिका drop 7 प्रकटपुलकस्वेदकणिका = प्रकटा पुलक स्वेदकणिका च यस्या सा 8 परिक्लेश fatigue, trouble 9 अखिल entire 10 नियतम surely, positively 11 शाम्यति it is quelled √शम 4P

स्वभावस्था दृष्टि न भवति गिर न अतिविशदा प्रकटपुलकस्वेदकणिका एषा तनु सीदति, यथा च अयं कम्प स्तनभरपरिक्लेशजनन [[भवति]] तथा अद्य अपि अस्या अखिल विष नियत न शाम्यति ॥ शिखरिणी

As her eye sight is not in its natural state, her voice is very unclear, her body upon which are manifest horripilation and drops of perspiration fails and there appears tremor caused by the oppressing weight of the breasts even now her entire poison is not yet quelled positively

Chamberlain—(pointing Priyadarshika) O princess! This man is your father's servant (Thus falls at her feet )

Priyadarshika—(looking) Ah it is the noble Chamberlain Vinayavasu! (shedding tears) Ah father! Ah mother!

Chamberlain—O princess, weep not! Thy parents are well! They have regained their kingdom through the majestic power of Vatsa King

वासवदत्ता — (सास्रम्) एह्यलीकशीले। इदानीमपि ते भगिनीस्नेहं दर्शय। (कण्ठे गृहीत्वा) इदानीं समाश्वस्तास्मि।

विदूषक:— भवति, त्वं भगिनीं गृहीत्वा कण्ठ एवं परितुष्टासि। वैद्यस्य पारितोषिकं विस्मृतम्।

वासवदत्ता — वसन्तक, न विस्मृतम्।

विदूषक:— (राजानं निर्दिश्य सस्मितम्) वैद्य, प्रसारय हस्तम्। भगिन्या अग्रहस्तं ते पारितोषिकं दापयिष्यामि। (राजा हस्तं प्रसारयति। वासवदत्ता प्रियदर्शिकाहस्तमर्पयति।)

राजा — (हस्तमुपसंहृत्य) किमनया। संप्रत्येव कथमपि प्रसादितासि।

वासवदत्ता — कस्त्वमग्रहीतुम्। प्रथममेव तातेनेयं दत्ता।

विदूषक:— भोः, माननीया खलु देवी। मास्याः प्रतिकूलं कुरु।

(वासवदत्ता राज्ञो हस्त वलादाकृष्य प्रियदर्शिकामर्पयति।)

1 स्नेहः affection. 2 वैद्यः physician, doctor. 3 पारितोषिकम् reward. 4 विस्मृत forgotten; pp. वि + √स्मृ 1P. 5 दापयिष्यामि I will cause to give; णिजन्ताल्लृट् √दा 3U 6 माननीय honourable. 7 प्रतिकूल unfavourable, opposing.

Vāsavadattā — (shedding tears) Come, you liar. Now show me your sisterly affection! (Holding her neck) now I am consoled

Clown — Lady, holding your cousin by the neck you are thus satisfied. Have you forgotten to reward the doctor ?

Vāsavadattā — Ah Vasantaka! I have not.

Clown — (pointing the king with a smile) O doctor, extend your hand I will cause her to offer you her cousin's finger as a reward. (The king extends his hand Vāsavadattā offers him Priyadarshikā's hand.)

King — (pulling his hand) What about her ? Somehow I am just now forgiven

Vāsavadattā — Who are you not to accept her? In the first place she was betrothed to you by her father.

Clown — Hallo! Her Majesty is really respectable. Do never oppose her! (Vāsavadattā, forcibly drawing out the king's hand, offers it to Priyadarshikā.)

राजा — (सस्मितम्) देवी प्रभवति । कुतोऽस्माकमन्यथा कर्तुं विभवः ।
वासवदत्ता — आर्यपुत्र, अतोऽपि परं किं ते प्रियं क्रियताम् ।
राजा — किमतः परं प्रियम् । पश्य

निःशेषं दृढवर्मणा पुनरपि स्वं राज्यमध्यासितं
त्वं कोपेन सुदूरमप्यपहृता सद्यः प्रसन्ना मम ।
जीवन्ती प्रियदर्शना च भगिनी भूयस्त्वया संगता
किं तत्स्यादपरं प्रियं प्रियतमे यत्साम्प्रतं प्रार्थ्यते ॥११॥

1 निःशेषम् ad entirely, unreservedly 2 अध्यासित occupied, PP. अधि + √ आस्
2A 3 अपहृत carried away PP. अप + √ हृ 1U. 4 प्रसन्न favourable 5 मम = मह्यम्
मयि 6 संगत united, PP सम् + √ गम् 1P 7 यत् = अपरं प्रियम् 8 साम्प्रतम् = सम्प्रति

प्रियतमे, पुनर् अपि दृढवर्मणा स्वं राज्यं निःशेषं अध्यासितं, कोपेन सुदूरं अपि अपहृता त्वं सद्यः मम प्रसन्ना, भूयः च त्वया संगता भगिनी प्रियदर्शना जीवन्ती तत् साम्प्रतं यत् प्रार्थ्यते किं अपरं प्रियं स्यात्
शार्दूलविक्रीडितम्

King — (smiling) The queen is the authority Whence can we derive a power to contradict ?

Vāsavadattā — My husband what more service may I contribute to you ?

King — What more service beyond this ? Behold !

O beloved one, Drdhavarmā has unreservedly re-occupied his own kingship, thou who hast been overwhelmed by wrath art now favourable to me, and thy cousin sister is alive united to thee So could there be any other favour now to be longed for ?

तथापीदमस्तु । ( भरतवाक्यम )

उर्वीमुद्दामसस्यां जनयतु विसृजन्वासवो वृष्टिमिष्टा-
मिष्टैस्त्रैविष्टपानां विदधतु विधिवत्प्रीणनं विप्रमुख्याः ।
आकल्पान्तं च भूयात्स्थिरसमुपचिता संगतिः सज्जनानां
निःशेषं यान्तु शान्तिं पिशुनजनगिरो दुःसहा वज्रलेपाः ॥ १२ ॥

(इति निष्क्रान्ता सर्वे)

## ❀ इति चतुर्थोऽङ्कः ❀

1 सस्यम crop, grain 2 सस्याम = सस्यानि यस्या ताम 3 वासव Indra 4 वृष्टि f rain 5 इष्ट by sacrifices 6 त्रविष्टप god 7 विधिवत ad according to precepts 8 प्रीणनम् pleasing, gratification 9 विप्रमुख्य chief Brahmin 10 आकल्पान्तम till the end of कल्प or the world 11 वज्रलेप kind of hard cement 12 वज्रलेपा = वज्रलेपा इव ता

इष्टा वृष्टि विसजन वासव उद्दामसस्या उर्वी जनयतु विप्रमुख्या विधिवत इष्ट त्रैविष्टपाना प्रीणन विदधतु स्थिरसमुपचिता सज्जनाना सगति च आकल्पान्त भूयात दु सहा वज्रलेपा पिशुनजनगिर नि शेष शान्ति यान्तु ॥ स्रग्धरा

Yet let this be ! (Epilogue)
Sending down desired rain falls may Indra filll the earth with wealthy grains, may the leading Brahmins through sacrifices according to the ritual precepts gratify the gods, may there be permanent yet suitable association of the good till the end of Kalpa and may the speeches of the wicked that are unbearable and hard as cement become silent !
(Exeunt omnes )